॥ अथश्रीमत्तात्पर्यचंद्रिकाद्वितीयाध्यायः ॥

प्र० श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ हरिः ॐ ॥ आम्नायोदितकल्याणगुणंश्रीरमणंभजे । यंद्रष्टुंनेशते
ऽपांगवीक्षयापिकुबुद्धयः ॥ १ ॥ "पूर्वाध्यायसंगतत्वेनैतदध्यायार्थंदर्शयती"त्यादिटीकार्थंसंगृह्णाह ॥ **पूर्वेणेति** ॥ टीकायां "उक्तेर्थे"
इतिभाष्यानुरोधात्समन्वयलब्धार्थपर्यंतोपन्यासेपि "उक्तस्समन्वयस्साक्षादविरोधोत्रसाध्यत"इत्यनुभाष्योक्तदिशासमन्वयइत्येवोक्तं । हरि
रेवजगज्जन्मादिकर्तेत्याद्यर्थेशक्तितात्पर्यावधारणंसमन्वयःप्रागुपक्रमादिन्यायैरुपपादितः । तस्मिन्विरोधोनिरस्यतइत्यर्थः । तथाचविरोध

॥ श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ हरिः ॐ ॥
पूर्वेणोक्तेसमन्वयेऽनेनविरोधःपरिह्रियतइत्यध्याययोर्हेतुहेतुमद्भावलक्षणासंगतिः । पूर्वोह्ये
तन्निरसनीयविरोधशंकाविषयभूतसमन्वयोपस्थापकतयाऽस्यहेतुः । अयंवाविरोधनिरासेनस
मन्वयस्थैर्यसाधकत्वात्तस्यहेतुः । तथाचसमन्वयाक्षेपसमाधानार्थत्वादस्यतदनंतरतायुक्ता ॥

प्र० परिहाररूपैकार्थ्यादेकवाक्यत्वंस्वस्मिन्नस्योक्तंभवति । यथोक्तं "अर्थैकत्वादेकंवाक्य"मिति । तांसंगतिंसुधोक्तरीत्याद्वेधाव्यनक्ति ॥ **पूर्वो
हीति** ॥ एतेनसंगतिपरटीकापिद्वेधाव्याख्याताज्ञेया । एतेनैव "नह्यनुपन्यस्तेसमन्वयेविरोधस्स्फुरती"त्यादिनासन्न्यायरत्नावल्यांपूर्वस्यहे
तुत्वमुक्तं । तत्वप्रदीपेच "यावन्नविरोधपरिहारस्तावन्नपुरुषार्थपर्यवसायित्वंशास्त्रस्ये"त्यादिनाऽस्यहेतुत्वमुक्तमितितयोर्विरोधइतिनिरस्तं ।
सुधारीत्योभयोरनुमतत्वादिति । विरोधरूपैकार्थ्येनास्याध्यायस्यैकवाक्यत्वेपादभेदःकिंनिमित्तइत्यतोऽवांतरप्रमेयभेदादितिभावेन "उक्तेर्थे

॥ ८४३ ॥

प्र० विरोधश्चतुर्विधस्स्फुरती"त्यादिटीकार्थंसंगृह्णाह ॥ **युक्तिभिरिति** ॥ तृतीयांतानामविरोधइत्यत्रोपसर्जनीभूतविरोधपदेनान्वयइतिभावेन
श्लोकंव्याचष्टे ॥ **अत्राद्यपादइति** ॥ **तन्निरूप्येति** ॥ तन्निरूप्यविरोधप्रतियोगिकइत्यर्थः । एतेनकथमभावेचातुर्विध्यमितिनिरस्तं ।
उक्तंचसुधायां "चतुर्विधाहिविरोधिन्योयुक्त्यादयः । तदुपधानाद्विरोधोपिचतुर्विधोऽभिधीयते । ततस्तत्प्रतियोगिकोऽभावोपिचतुर्विध"

युक्तिभिःसमयैःशुद्धवेदैर्युक्त्युपबृंहितैः । वेदैश्चाप्यविरोधोत्रक्रमात्पादेषुकीर्त्यते ॥ १ ॥ अत्राद्यपादेयुक्त्यविरोधः द्वितीये
ऽलौकिकार्थगोचरबहुजनपरिगृहीतवाक्यसंदर्भरूपसमयाविरोधः तृतीयेकेवलश्रुत्यविरोधः चतुर्थेसयुक्तिकश्रुत्यविरोधः
इतिविरोधिनांयुक्त्यादीनांचातुर्विध्यात्तन्निरूप्याविरोधोपिचतुर्विधइतितत्प्रतिपादकपादभेदः । यद्यपितृतीयेपिक्वचिद्विरो
धिन्यःश्रुतयःसयुक्तिकाः । तथापिचतुर्थेविरोधिन्यःश्रुतयःश्रुत्याद्युक्तयुक्तिसहिताइतिभेदः । तत्क्रमस्तु पदात्पादिषुभग्नेषुग
जाश्वादिप्रवृत्तिवत् । युक्त्यादिषुनिरस्तेषुसमयादिप्रवृत्तितः ॥ १ ॥ अनुमानमात्रस्यकामचारित्वेनाऽतिदुर्बलत्वात् सम
यानांचवेदवदकामचारित्वेप्यतिदार्ढ्येनबहुजनपरिगृहीतत्वेपिपौरुषेयतयाशंकितदोषत्वेनदुर्बलत्वात् श्रुतिमात्रस्यचसमया

प्र० इति । अंत्योपांत्ययोर्भेदमाक्षिप्यतत्रत्यटीकोक्तमेवसमाधिमाह ॥ **यद्यपीति** ॥ एवंपादभेदमुक्त्वा "सर्वविरोधानांयुक्तिमूलत्वेने"तिटी
कोपलक्षणमितिभावेनचतुर्धातत्क्रममाह ॥ **पदात्पादिष्वित्यादिना** ॥ **इतिपादक्रमइत्यंतेन** ॥ श्लोकस्थपंचम्यंतस्य "पादक्रमस्त्वि"
तिसाध्येनान्वयइतिभावेनश्लोकंव्याचष्टे ॥ **अनुमानेति** ॥ **अकामचारित्वेपीति** ॥ नियतैकार्थप्रतिपादकत्वेपीत्यर्थः ॥ **अतिदार्ढ्येनेति** ॥

प्र० वेदवदित्यत्राप्यनुषज्यते ॥ बलवत्त्वेपीति ॥ अपौरुषेयतयानाशंकितदोषत्वेनेतिभावः ॥ अश्वादिवदिति ॥ अश्वादेरिवस
मयादेःप्रवृत्तेरित्यर्थः । अनतिप्रयत्नसाध्यतन्निरासक्रमात्सोपानारोहणन्यायेनायंक्रमइत्यर्थः । निरसनीयविरोधप्रतीतिक्रमात्पादक्रमइत्याह

द्बलवत्त्वेपिसोपपत्तिकश्रुतिवत्प्रबलत्वाभावात्पदात्पादिभंगानंतरमेवाश्वादिवदनुमानादिनिरासानंतरमे
वविरोधिसमयादेःप्रवृत्तेःपादक्रमः । यद्वा बहिरंगैर्विरोधोहिझडित्येवप्रतीयते । अंतरंगैःस्वगोत्रैस्तुविलं
बेनप्रतीयते ॥ १ ॥ अनुमानस्याशब्दत्वेनविजातीयतयातिबहिरंगत्वं । समयानांतुशब्दत्वेपिश्रु
तित्वाभावाद्बहिरंगत्वं । श्रुतेस्तुसिद्धांत्यभिमतसयुक्तिकश्रुत्यांतरंगत्वं । सयुक्तिकश्रुतेस्तुतयात्यंतां
तरंगत्वं । लोकेचातिबहिरंगादिविरोधज्ञानानंतरमेवबहिरंगादिविरोधधीरितिनिरसनीयविरोधधीक्र
मात्तत्क्रमः । यद्वा विरोधादेर्युक्त्यधीनत्वात्, मीमांसायायुक्तिपुरस्कारेणप्रवृत्तेः, समयानामपियु
क्तिमूलत्वात्, वेदोप्रमाणमाप्ताप्रणीतत्वादितिसाक्षात्कृत्स्नवेदाप्रामाण्यसाधकत्वात्, एकस्यसमयिनः
समयांतरइवयुक्तावनादराभावाच्चयुक्तिविरोधःसमयविरोधादपिप्रबलः । समयानांत्वनादिकालतो

प्र० ॥ यद्वेति ॥ तथाप्रतीतौबीजंवदन्श्लोकंव्याचष्टे ॥ अनुमानस्येति ॥ टीकोक्तपक्षंविवृणोति ॥ यद्वाविरोधादेरिति ॥ युक्ताविति ॥
चार्वाकस्यतत्रानादरेपितदन्यसर्वसमयिभिस्तत्रप्रामाण्यांगीकारादितिभावः । यद्वासमयांतरइववयुक्तौतेनाप्यनादरोनकृतः । संभावनाहे

प्र० तुल्येनयुक्तीनांस्वग्रंथेप्युपन्यासादितिभावः ॥ अविच्छेदेनेति ॥ प्रवाहतइतिभावः ॥ निर्मूलत्वेति ॥ तदीयप्रत्यक्षादिमूलत्वादितिभावः ॥ प्रबलइति ॥ श्रुतिविरोधस्तुप्रातीतिकत्वात्ततोदुर्बलइतितदानंतरिकइत्यर्थः ॥ इममेवेति ॥ प्राचीनपक्षद्वयंतुसूत्रभाष्यादौतत्रतत्रयुऽविच्छेदेनबहुजनपरिग्रहेणवेदतुल्यत्वेपिवेदवन्निर्मूलत्वाभावादत्यंतभ्रमहेतुतयातत्वज्ञानस्यातिविरोधित्वात्, तथाश्रुतिविरोधवत्समयविरोधस्यप्रातीतिकमात्रत्वाभावाच्च श्रुतिविरोधात्समयविरोधःप्रबलः । एवंचमहामल्लभंगन्यायेनपादक्रमः । इममेवचक्रममभिप्रेत्यटीकायां "तत्रसर्वविरोधानांयुक्तिमूलत्वेने"त्यादि । द्वितीयेपादेच "इतरविरोधत्रयेऽनादिकालानुवृत्तसमयविरोधस्यैवप्रबलत्वा"दित्युक्तं । अयंचमहामल्लभंगन्यायःपादत्रयएवाभिप्रेतः । चतुर्थपादस्यतुयुक्तिश्रुत्युभयाविरोधपरत्वाद्वामुमुक्षूणामंतेजिज्ञास्याध्यात्मविषयत्वाद्वांऽत्यतेतिद्रष्टव्यं । यद्वा उक्तरीत्यायुक्तेःप्रबलत्वादादौतदविरोधः । अथ "इतरेषांचानुपलब्धे"रित्याद्यपादोक्तहेतुप्रपंचनरूपत्वात्समयाविरोधः । अनंतरंयदि "विप्रतिषेधाच्चे"तिद्वितीयांत्यन्यायेनश्रुतिविरोधात्परस्परविरोधाच्चमतांतराप्रामाण्यं तर्हिततएवपरस्परविरोधाच्छ्रुतीनामप्रामाण्यमितिशंकोदयाच्छ्रुत्यविरोधः। पश्चाद्यदि "यावद्विकारंतुविभागोलोकव"दितियुक्त्यनुगृहीतयाऽऽकाशादेरुत्पत्तिश्रुत्याऽनुत्पत्तिश्रुतिर्गौणी तर्ह्युपादानाऽभावादियुक्तिसहितयाप्राणानामनुत्पत्त्यादिश्रुत्यातदनित्यत्वादिश्रुतिर्गौणीतिशंकोदयात्सयुक्तिकश्रुत्यविरोधः । इतिपाद

प्र० त्त्यादेर्दुर्बलत्वाद्युक्त्यासूचितमितिभावः ॥ हेत्विति ॥ फलव्यभिचारित्वरूपेत्यर्थः । अतएवतत्रभाष्यं "इतरेषांचानुपलब्धेरितिसामान्यतोनिराकरण"मित्यादीतिभावः ॥ युक्तीति ॥ वियदुत्पत्तिमत् विभक्तत्वादल्पशक्तित्वाद्घटवदित्यादियुक्त्यनुगृहीतया "आकाशस्संभूत"

प्र० इत्यादिश्रुत्या "अनादिर्वाअयमाकाश"इतिश्रुतिर्गौणीत्यर्थः ॥ **क्रमइति** ॥ निरसनीयशंकाक्रमात्क्रमइत्यर्थः । भाष्यानुभाष्ययोरैकार्थ्यं दर्शयितुंटीकोक्तेर्मूलमाह ॥ **तदुक्तमिति** ॥ "पूर्वेणोक्त"इत्यादिनोक्तंप्रमेयमित्यर्थः । चतुर्विधस्येतिनिर्धारणेषष्ठी । यौक्तः युक्तिनिरूप्य विरोधप्रतियोगिकइत्यर्थः । तथापि प्रथमपादेपि । स्मृतेः अविरोधस्साध्यतइत्यर्थः । अत्रश्लोकेत्रिपादीमात्रोपयोगेपितुरीयस्तूपयोक्ष्यत इतिभावेनोपात्तः । यद्यप्यत्राध्यायाद्यभिधेयमध्याययोस्संगतिश्चेत्येतावदेवभाति । नतुपादक्रमेबीजमपि । नचतन्मात्रएवोदाहरणं ।

क्रमः । तदुक्तमनुव्याख्याने "उक्तःसमन्वयःसाक्षादविरोधोत्रसाध्यते । चतु
र्विधस्यतस्यादौयौक्तस्तत्रापिचस्मृते"रिति ॥ अन्येतु आद्यपादेस्वपक्षस्यसां
ख्यादिस्मृतिभिस्तदुन्नीततर्कैश्चविरोधपरिहारः । द्वितीयेसांख्यादिमतानांदु
ष्टत्वोक्तिः । तृतीयेपूर्वभागेपंचमहाभूतश्रुतीनां उत्तरभागेतुजीवश्रुतीनांचतुर्थे

प्र० तथात्वेक्रमोक्तेःप्रागेवोदाहरणत्वप्रसंगात् । तथापिचतुर्विधविरोधमध्यआदौयौक्तइत्युक्त्याक्रमोपिसूचितइतिभावः । "नान्यथातद्दृष्टे"रितिपूर्वाध्यायभाष्यमत्रापिसंयोज्यपरमतद्वयोक्तार्थदूषणपरतयायोज्यमितिभावेन "स्वपक्षेस्मृतिन्यायविरोधपरिहारः प्रधानादिवादानांच न्यायाभासोपबृंहितत्वं प्रतिवेदांतंचसृष्ट्यादिप्रक्रियायाअविगीतत्व"मित्याद्यद्वैतिभाष्यंहृदिकृत्वापरमतंतावदनूद्यनिराह ॥ **अन्येत्विति** ॥ **पंचमहाभूतेति** ॥ "केचिदाकाशस्योत्पत्तिमामनंतिकेचिन्नतथाजीवस्यप्राणानांचैव"मित्यादि तत्रत्यतदीयभाष्यादवगम्यतइतिभावः ॥ ॥ ८४५ ॥

प्र० **लिंगेति** ॥ प्राणादेर्लिंगशरीरात्मकत्वादितिभावः ॥ **आद्यइति** ॥ ननुसिद्धांतेप्येषदोषस्तुल्यः । यदाहुः "आदौयौक्तस्तत्रापिचस्मृते"रिति । तृतीयेच "जीवपरमात्माधिभूताधिदैवेषुश्रुतीनांपरस्परविरोधमपाकरोती"तिचेतिचेन्मैवं । वक्ष्यमाणदिशा "स्मृत्यनवकाशदोषे"

लिंगशरीरश्रुतीनांपरस्परविरोधपरिहारइतिपादार्थानाहुः । तन्न ।
आद्येतृतीयेचपादएकोपाध्यभावात् । आद्येपि"इतरेषांचानुपलब्धेः ।
एतेनयोगःप्रत्युक्तः । स्वपक्षदोषाच्च । एतेनशिष्टाअपरिग्रहाअपि
व्याख्याताः" । इत्यादौपरमतानांदुष्टत्वोक्तेस्त्वयापिस्वीकृतत्वाच्च ।
नन्वाद्येतेषांदुष्टत्वोक्तिःस्वपक्षस्यतैर्विरोधनिरासार्थेतिचेन्न । द्वितीये
पितदुक्तेस्तदर्थत्वात् । अन्यथाद्वितीयस्याविरोधाध्यायासंगतिःस्या
त् । किंच यथाऽद्यपादस्थे "दृश्यतेत्वि"त्यत्रविलक्षणयोरपिब्रह्मप्रपं
चयोर्वृश्चिकगोमययोरिवकार्यकारणभावइत्येतदर्थप्रतिपादकेस्वपक्षे

प्र० त्यत्रयौक्ताविरोधस्यसत्त्वात् । तृतीयेचाभिधेयबहिर्भावेनश्रुत्यविरोधित्वेनैकीकरणात् । नचैवंपरस्यापिसुवचं । तुरीयसांकर्यापातात् । सिद्धांतेऽभिधेयबहिर्भावेनश्रुत्यविरोधित्वेनैवतस्यैकीकरणायोगात । तदंतर्भावेतूक्तोदोषइतिभावः ॥ **त्वयापीति** ॥ एतच्चाग्रेस्पष्टयिष्यते ।

प्र० तथाचद्वितीयसांकर्यमाद्यस्येतिभावः । अनेकोदाहरणेनप्रायिकत्वपरिहारोपिप्रत्युक्तः ॥ तर्केति ॥ ब्रह्मजगतीनोपादानोपादेयभाववती ।

तर्कविरोधपरिहारः। तथाद्वितीयेपि "महद्दीर्घवद्वे"तिसूत्रे "यथाद्व्यणुकादणोर्ह्रस्वाच्चसतोमहद्दीर्घंचत्र्यणुकादिजायते । नाणु नापिह्रस्वं । एवंचेतनाद्ब्रह्मणोचेतनंजगज्जनिष्यत"इतित्वयाभाषितत्वेनतत्रापितर्कविरोधपरिहारोस्त्येव । तृतीयस्यपूर्वभागेपि "अंतराविज्ञानमनसी"इत्यत्रत्वन्मते "एतस्माज्जायतेप्राणोमनःसर्वेंद्रियाणिचे"तिप्राणमनआदिविषयश्रुत्यविरोधस्याप्युक्तत्वेन नभूतश्रुत्यविरोधएवेतिनियमः । ननु "अन्नमयंहिसोम्यमनआपोमयःप्राणस्तेजोमयीवा"गिति श्रुतेर्मनआदीनिभूतान्येवेतितद्विचारोभूतविचारएवेतिचेत्तर्हिंचतुर्थे "तथाप्राणाः । सप्तगतेर्विशेषितत्वाच्च । अणवश्चे"त्यादिबह्वधिकरणैःकृतइंद्रियविचारोपितृतीयस्यपूर्वभागेस्यात् । चतुर्थेपि "संज्ञामूर्तिक्लृप्ति"रित्यत्र "अनेनजीवेने"त्यादिवाक्ये जीवस्यकर्तृतानोच्यते । किंतुब्रह्मणइतित्वयासिद्धांतितत्वान्नलिंगशरीरस्यैवविचारइतिनियमः। किंच तृतीयचतुर्थयोरप्याद्यवत्स्वपक्षविरोधपरिहाररूपत्वादाद्यानंतर्यंस्यात् । द्वितीयस्यतुपरपक्षदूषणरूपत्वादंत्यतास्यादिति ॥

प्र० चेतनाचेतनत्वादिनाविलक्षणत्वादित्यादितर्केत्यर्थः ॥ इंद्रियविचारोपीति ॥ तेषामपिभौतिकत्वादितिभावः । परस्परसांकर्यान्मतांतरो

प्र० क्तमपिपादाभिधेयमयुक्तमित्याह ॥ केचित्त्विति ॥ अधिकरणशरीराणित्वग्रेव्यक्तानि ॥ स्वपक्षेति ॥ “नकेवलंब्रह्मकारणवादस्यनि र्दोषतयैवैतत्समाश्रयणीयं । प्रधानकारणवादस्यदुष्टत्वाच्चे”त्यादिनात्वद्भाष्येपरपक्षेदोषोत्कीर्तनपरतयाव्याख्यातत्वादितिभावः । आदिप देन “तर्काप्रतिष्ठाना”दित्यादिग्रहः । “कपिलपातंजलतर्काणामन्योन्यव्याघातात्तर्कस्याप्रतिष्ठितत्वा”दित्यादेस्त्वयाभाषणादितिभावः ॥

केचित्तु आद्यपादेस्वपक्षेकारणविषयदोषोद्धारः । द्वितीयेपरपक्षेकारणविषयदोषोक्तिः । तृतीयचतुर्थपादयोस्तुस्वपक्षे कार्यविषयदोषोद्धारइतिपादार्थानाहुः । तन्न । आद्यपादेपि “स्वपक्षदोषाच्चे”त्यादौपरपक्षेदोषोक्तेः । द्वितीयेपि “उत्प त्त्यसंभवा”दित्यत्रपंचरात्राप्रामाण्यरूपस्वपक्षदोषोद्धारस्यत्वयापिस्वीकृतत्वाच्च । द्वितीयेतु “समवायाभ्युपगमाच्चे”त्या दिषुबहुसूत्रेषुपरपक्षेकारणादन्यत्रापिदोषोक्तेश्च । तृतीयेपि “नात्मा प्रकरणात् ज्ञोतएव उत्क्रांतिगत्यागतीना”मित्या दावकार्यभूतजीवविषयकदोषोद्धाराच्च । तृतीयचतुर्थयोर्भेदानुक्तेश्च । परपक्षेकार्यविषयकदोषोक्त्यर्थपादांतरापाताच्च । तृतीयचतुर्थयोःस्वमतदोषोद्धारकत्वसाम्येनाद्यानंतर्यापाताच्चेतिनपरोक्तापादव्यवस्थायुक्ता ॥ ॐस्मृत्यनवकाशदो षप्रसंगइतिचेन्नान्यस्मृत्यनवकाशदोषप्रसंगात्ॐ ॥ अत्रलौकिकार्थविषयाऽऽप्तवाक्यरूपस्मृत्यविरोधउच्यते ।

प्र० स्मृत्यनवकाशेति ॥ अत्रान्यैःकैश्चिच्चकापिलस्मृत्यविरोधउच्यतइत्युक्तं । तत्तुवक्ष्यमाणदिशानयुक्तमितिभावेन “प्रथमतस्स्मृत्यविरोधं दर्शयती”तिभाष्योक्तमधिकरणार्थमाह ॥ अत्रेति ॥ कृत्स्नावैदिकस्मृत्यविरोधोत्रसाध्यतइत्यर्थः । यद्वा टीकायां “पाशुपतादिस्मृतिविरोधा

ता. चं. १४२ भावंदर्शयती”त्युक्तमयुक्तमिव । शास्त्रयोनिसूत्रएवतदप्रामाण्यस्योक्तत्वादित्यतआह ॥ लौकिकेति ॥ तथाचदृष्टफलेष्वेवसंवादादिनाप्रा

प्र० माण्यमितिप्राप्तेतत्रैवव्यभिचारव्युत्पादनेनतदविरोधोत्रोच्यते। तत्रतुतदंशेप्रामाण्यमुपेत्यकारणत्वाद्यंशएवाप्रामाण्यमुच्यतइत्युक्तंभवति। अथवा श्रुतिविरुद्धस्मृतीनांपूर्वतंत्रे "विरोधेत्वनपेक्षंस्या"दितिविरोधाधिकरणएवाप्रामाण्यव्युत्पादनात्कथमत्रप्राक्समन्वितश्रुतिप्रामाण्याय स्मृत्यविरोधउच्यतइत्यतउक्तमाप्तवाक्यरूपेति ॥ तत्रश्रुतिमूलत्वेनैवप्रामाण्यांगीकारात्तत्रतथात्वेपिनेहतथेतिवक्ष्यतइतिभावः । नन्वलौकिकेकारणत्वादौकथमाप्तत्वं। संवादाभावादित्यतउक्तं लौकिकार्थेति ॥ "स्मृतीनांयुक्तिसमयादिरूपत्वेने"त्यादिटीकां "तस्याश्चतुस्स्वरू

नचस्मृत्यविरोधस्ययुक्तिपादेकथंनिवेशइतिवाच्यं। पाशुपतादिस्मृतीनांसमयरूपत्वेनस्वोक्तार्थेसंमतित्वेनश्रुतियुक्तिकथनेनचचतुःस्वरूपत्वात्तदविरोधस्यैकैकाविरोधप्रतिपादकेपादविशेषेऽनंतर्भावेप्यविरोधाध्यायांतर्भावेणाध्यायस्यादावंतेवानिवेशनेकर्तव्येप्रथमातिक्रमेहेत्वभावाच्चतुरात्मकत्वेनप्रबलतयाप्रथमंनिरसनीयत्वाच्चाध्यायादावेवनिवेशनात्। तदाहटीकाकारः "प्राथम्योपपत्ते"रिति। अभ्युपेत्यचेदमुक्तं। वस्तुतस्तु। चतुःस्वरूपत्वादस्यचतुर्ष्वपिपादेष्वंतर्भावसंभवादुक्तहेतुभ्यांप्रबलत्वाच्चाद्यपादस्यादौनिवेशः। तदाह। "पादार्थस्याप्यत्रसंभवेने"ति ॥ इतःपरंपूर्वपक्षादिकंनपृथगुच्यते। ग्रंथगौरवभीत्याचटीकादौचस्फुटत्वतः ॥ १ ॥

प्र० पत्वा"दित्यनुव्याख्यानानुसारेणशंकापूर्वंविवृणोति ॥ नचेति ॥ श्रुतीति ॥ तत्प्रामाण्यवादिस्मृत्यपेक्षयेदं। सुधोक्तंहेतुमुक्त्वा "प्रधानमल्लनिबर्हणन्यायेने"तिसन्न्यायरत्नावल्युक्तमाह ॥ चतुरात्मकत्वेनेति ॥ "पादार्थस्याप्यत्रसंभवेने"त्युत्तरटीकावाक्यंविवृणोति ॥ ॥ ८४७ ॥
अभ्युपेत्येति ॥ एतदर्थद्वयंसुधायांस्पष्टमुक्तमितिभावः। शास्त्रादिसंगत्युक्तिपरटीकाविवृतप्रायेतिभावेनविषयसंशयटीकांव्यनक्ति ॥

प्र० अत्रेति ॥ कारणत्वादावित्यादिपदेनसार्वज्ञसर्वैश्वर्याद्यनंतगुणत्वग्रहः। तेनचिंतायास्तत्सिद्धिरेवफलमित्युक्तंभवति। उक्तःसमन्वयइतिशेषः। सिद्धांत्यभिमतसमन्वयस्यैवाक्षेप्यत्वाद्विशिष्टसमन्वयस्यविषयतोपदर्शिता। तेनटीकापिसमन्वयपर्यंतपराव्याख्येयेतिसूचितं ॥ श्रुतिर्नेयेति ॥ श्रुतिगतोपक्रमादिकंनेयमित्यर्थः। तेनोपक्रमादिभिरेवश्रुतिर्नेया। नतुपाशुपतादिस्मृत्यनुरोधेनेत्यर्थस्यसमन्वयसूत्रएवसिद्धत्वान्नेहपुनर्विचार्यतेतिप्रत्युक्तं। वक्ष्यतेचैतद्ग्रंथकृतैव। यद्यप्यत्रस्मृतिविरोधाच्छ्रुतिरप्रमाणमुतनेतिचिंतायांनकाचिदनुपपत्तिः। नचत

अत्रपूर्वाध्यायोक्तेविष्णोःकारणत्वादौश्रुतिसमन्वयोनयुक्तोयुक्तोवेतिचिंता। तदर्थंकिंपाशुपतादिश्रुत्यनुसारेणश्रुतिर्नेयोतनेति। तदर्थंकिंस्मृतिःप्रबलोतनेति। पूर्वपक्षमाह ॥ [७९।१०] नविष्णोरित्यादिना ॥ अयंभावः। नश्रुतिसमन्वयेनविष्णोःकारणत्वं शिवादेःकारणत्वप्रतिपादकशैवादिस्मृतिविरोधात्। नचषोडशिग्रहणाग्रहणवद्व्यवस्थितविकल्पोवा

प्र० त्प्रामाण्यवादिमतएवंवक्तुंनशक्यमितिवाच्यं। विवक्षितार्थत्वेनप्रमाणमितिवक्तुंशक्यत्वात्। अन्यथातदप्रामाण्यवादिमतेश्रुतिर्नेयेत्यस्याप्ययोगात्। तथापीहवक्ष्यमाणदिशाश्रुतेरपौरुषेयत्वप्रामाण्येस्वीकृत्यपूर्वपक्षइत्यस्यसूत्राद्यनुगुणत्वात्तदनुरोधेनेयंचिंतोक्ता। अतएवटीका "अन्यार्थतोपपत्ते"रिति। सुधायांतुव्यक्तमेवैतत्। स्पष्टोत्रफलफलिभावः। अप्रतीतेराह ॥ पूर्वपक्षमाहेति ॥ "नचविरोधेप्यप्रामाण्याभावः। वस्तुनिविकल्पप्रसंगा"दितिटीकांव्यनक्ति ॥ व्यवस्थितेति ॥ व्यक्तमेतदधिकरणशरीरंसमन्वयसूत्रे। फलभूयस्त्वायग्रह

प्र० णानुष्ठानमन्यथातुनेतिव्यवस्थितत्वंध्येयं ॥ व्रीहीति ॥ द्वादशस्यतृतीयेपादे "एकार्थास्तुविकल्पेरन्समुच्चयेत्वावृत्तिस्स्यात्प्रधानस्ये"तिच तुर्थेऽधिकरणे "व्रीहिभिर्यजेतयवैर्यजेते"त्यादिषुसर्वांगोपसंहारिप्रयोगवचनानुग्रहायाष्टदोषनिदानविकल्पपरिहारायचसमुच्चयइतिप्राप्ते एकार्थानामेकस्मिन्नुपकारेऽन्योन्यनिरपेक्षतयाविनियुक्तानांविकल्पइत्युक्तंफलविशेषाद्यभावादव्यवस्थितत्वं । तथेत्यर्थः ॥ अजयेति ॥ विवृतमेतदधिकरणशरीरं "पत्यादिशब्देभ्य"इतिसूत्रे । आनतिरावर्जनं । एतेनटीकोपलक्षणंसमुच्चयनिरासस्येत्युक्तंभवति । "नचदेशकाले"त्यादि

व्रीहियववदव्यवस्थितविकल्पोवायुक्तः । पुंतंत्रेऽनुष्ठेयेविकल्पसंभवेपितदतंत्रेसिद्धेवस्तुनितदयोगात् । नहीदमेवमनेवंवाकर्तव्यमितिवदिदमेवमनेवंवाभवतीतिसंभवति । समुच्चयश्चसापेक्षयोरेव । प्रकृतेचश्रुतौस्मृतौचनिरपेक्षस्यैवविष्णोःशिवस्यचहेतुतोच्यते । "अजयाक्रीणाति हिरण्येनक्रीणाति वाससाक्रीणाती"त्यत्रसोमक्रयेप्रत्येकंतृतीयाश्रुत्यानिरपेक्षत्वेनप्रतीतानामप्यजादीनांविक्रेत्रानतिरूपद्वारभेदात्सापेक्षाणामेवसमुच्चयउक्तः। नचदेशकालकार्यभेदादविरोधः । श्रुतौस्मृतौचविष्णोःशिवस्यचसदासर्वत्रसर्वकार्यहेतुत्वोक्तेः । श्रुतौशिवस्यस्मृतौचविष्णोःकारणतायानिषेधाच्च ।

प्र० टीकार्थमाह ॥ नचेति ॥ यद्यप्यत्रश्रुत्यादौ "सइदंसर्वमसृजते"तिविष्णवादेस्सर्वकारणत्वोक्तिस्तत्तत्कालसृज्याभिप्रायासर्वस्रष्टृत्वयोग्यताभिप्रायावा । अन्यथाऽऽगामिन्यसृजतेत्यादेरयोगात् । श्रुतौशिवस्यस्मृतौविष्णोःकारणतानिषेधस्तु यथोदितहोमादिनिंदाऽनुदितहोमादिस्तुतिपरा तथाविष्णवादेःकारणताविधिपरइतिसुवचं । तथापिस्मृतेर्वक्ष्यमाणदिशाप्राबल्यात्तदनुरोधेनश्रुतिर्नेयेत्यत्रतात्पर्यं । अतएवसुधायांविकल्पादिपक्षमनुक्त्वास्मृत्याश्रुतिबाधपूर्वपक्षएवोक्तः । यद्येवंतर्हिशैवादिस्मृतिविरोधान्नश्रुतिःकारणत्वेमानमित्युक्त्वानचविरोधाधिकरणे

प्र० त्यादिग्रंथएववक्तव्यः । मध्येविकल्पशंकापरिहारौव्यर्थाविति चेत्तुल्यबलतामुपेत्यटीकायांसन्न्यायरत्नावल्यांचविकल्पादेराशंकनात्तदनुरोधे नात्रापितथोक्तः । व्यक्तमेतदाकरएवशास्त्रयोनिसूत्रे । यद्वा कणादादिमतेश्रुतेरप्याप्तिमूलत्वेनद्वयोस्तुल्यबलत्वाच्छ्रुत्यादावन्यकारणतानि षेधस्यान्यकारणताविधिपरत्वेलक्षणापत्तेः "असृजते"त्यादेर्भूतार्थेतात्पर्याभावादितिकणादादिमतानुरोधेनविकल्पावतारः । तन्मतेस्मृत्यनु सारेणश्रुतेर्नयनेबीजंवक्ष्यते । "नचवाच्य"मित्यादिटीकार्थमाह ॥ **नचविरोधेति** ॥ आद्यस्यतृतीयेपादे "विरोधेत्वनपेक्षंस्यादसतिह्यनुमा

नचविरोधाधिकरणन्यायेनस्मृतेरेवाप्रामाण्यं । वाक्यप्रामाण्यंप्रत्याप्तेर्मूलत्वात् । शैवादिस्मृतीनांचसर्वज्ञत्वादिनाप्रसिद्धशि वादिप्रणीतत्वेनसमूलत्वात् । श्रुतीनांचापौरुषेयत्वेननिर्मूलत्वात् । समूलानुसारेणचनिर्मूलस्यनेयत्वात् । विरोधाधिकरणे तुश्रुतिमूलत्वेनाभिमतायाःसर्ववेष्टनादिस्मृतेःस्पर्शनश्रुतिविरोधेनस्पर्शनार्थंद्वित्रांगुलंहित्वातदितरसर्ववेष्टनरूपमर्थांतरमुक्तं भाट्टैः । प्राभाकरैस्त्वप्रामाण्यं । पाशुपतादिस्मृतिस्तुशिवादिप्रत्यक्षमूला । एतेनसुंदोपसुंदन्यायेनश्रुतिस्मृत्योःपरस्परव्याघा तादुभयाप्रामाण्यमितिनिरस्तं । स्मृतेःप्रबलत्वादिति । सुधायांतु "स्मृतयोविस्पष्टवादिन्यः । प्रणेतृव्याख्यानसंप्रदाययुक्ताश्च ।

प्र० न"मितिद्वितीयेधिकरणे "औदुंबरींस्पृष्ट्वोद्गाये"दितिश्रुतिविरुद्धा "औदुंबरीसर्वावेष्टयितव्ये"तिस्मृतिर्मानमुतनेतिविशये मूलश्रुत्यनुमानसं भवेनव्रीहियववद्विकल्पेनोभयंमानमितिप्राप्ते शीघ्रप्रवृत्तप्रत्यक्षश्रुत्यास्मृतिमूलश्रुत्यनुमानप्रतिबंधादप्रमाणंविरुद्धस्मृतिजातमित्युक्तं । तन्न्याये नेत्यर्थः । स्मृतिप्राबल्येनतद्वैषम्योक्तिपरटीकांव्यनक्ति ॥ **वाक्येति** ॥ "क्वचिच्छ्रुतिविरोधेनस्मृतेरर्थांतरकल्पनादी"तिटीकांव्यनक्ति ॥ **विरोधाधिकरणेत्विति** ॥ आदिपदार्थोक्तिःप्राभाकरैरिति । तत्रप्रतीतानुपपत्तिंनिरसितुमनुवदति ॥ **सुधायांत्विति** ॥ स्वातंत्र्ये

प्र० त्यादित्वभिप्रायविवरणं ॥ पूर्वपक्षिणोभावइति ॥ एतदनुसारेणश्रुत्यर्थस्यस्मृतिसंवादैकनिबंधनत्वाभावादितिसिद्धांतभागस्यापियदिस्मृ
त्यनुसारेणश्रौतोपक्रमादिकंनेयमित्युच्यते तर्हिस्मृतावप्युपक्रमादिनैवार्थनिर्णयात्तत्रापिस्मृत्यंतरानुसरणेऽनवस्थास्यात् । यदितुस्मृतावुपक्र

श्रुतयस्त्वस्फुटविक्षिप्तवादिन्योऽव्यवस्थितालौकिकशाब्दलक्षणविषयाअशक्याध्ययनानंतापरिपूर्णवाक्यरूपानार्थविशेषनिष्ठाः
प्रणेतृव्याख्यानसंप्रदायहीनाश्चनस्वतोर्थबोधकाः । किंतुसहजसिद्धेनयोगर्द्धिलब्धेनवाप्रत्यक्षेणाशेषार्थदर्शिनामाप्तानांवच
नानुसारेणनेयाइतिनस्मृतिबाधिकाः । स्वातंत्र्यदशायामबोधकत्वात् । पारतंत्र्यदशायांतूपजीव्यविरोधा"दित्युक्तं । तत्रय
द्यप्युपक्रमादिभिरेवतात्पर्यनिर्णयइतिसमन्वयसूत्रएवोक्तं । शाखानामनंतत्वेप्यविरोधइतितु "गतिसामान्या"दित्यत्रोक्तं ।
पदार्थनिर्णयस्तुव्याकरणनिरुक्तादिभिरेवसुलभः । साकांक्षवाक्यपूरणंचाध्याहारादिनेतिलोकतएवसिद्धं । तथापिसमू
लस्मृतिविरोधेनिर्मूलश्रुतिप्रामाण्यायोगात्स्मृत्यनुसारेणश्रौतोपक्रमादिकंनेयमितिपूर्वपक्षिणोभावः । अत्रचयेषांपाशुपतसां
ख्यादीनांमतेवेदस्यापौरुषेयत्वप्रामाण्ये तन्मतेस्मृत्यनुसारेणश्रुतिर्नेयेतिश्रुतिप्रामाण्येनपूर्वःपक्षः । अतएवसूत्रेशंकाभागेप्रसं
गशब्दः । भाष्येच "अप्रामाण्यमेवस्या"दितिस्याच्छब्दः । "श्रुतेरप्रामाण्याख्यदोषप्रसंगा"दितिटीकाच । येषांतुकणा
दादीनांमतेपौरुषेयत्वप्रामाण्येतइहनपूर्वपक्षिणः । स्वतःसर्वज्ञेशकृताश्रुतिःकणादादिस्मृत्यनुसारेणनेयेत्यत्रबीजाभावात् ।

प्र० मादिकंस्वतएवनिर्णायकंतर्हिश्रुतावपितथास्यादित्याशयऊह्यइतिभावः । ननुश्रौतोपक्रमादिकंनेयमित्ययुक्तं । कैश्चिच्छ्रुतेरपौरुषेयत्वानभ्युप
गमेनाप्तोक्ततयोभयोस्तुल्यबलत्वात् । कैश्चित्प्रामाण्यस्यैवानभ्युपगमादित्यतोविवेकमाह ॥ अत्रचेति ॥ तत्वप्रदीपेस्पष्टंकणादादिशब्दप्र

प्र० योगात्तदनुरोधेनाह ॥ यद्वेति ॥ सुधास्थेति ॥ "पाशुपतबौद्धार्हतादी"त्यत्रत्यादिशब्दइत्यर्थः । अस्मिंश्चपक्षेटीकाविरोधंनिराह ॥
सौत्रस्येति ॥ एवंचसूत्रस्यवृत्त्यंतरंव्यवस्थितमित्युक्तंभवति । "तस्याश्चतुस्स्वरूपत्वा"दित्येतदपिव्यवस्थितमित्याह ॥ तत्रेति ॥ तथाच

अतएवेहटीकायांसुधायांचकणादादिशब्दाप्रयोगः । यद्वा कणादादिस्मृतेःस्पष्टार्थत्वंसयुक्तिकत्वंचतत्रबी
जमितितेपिपूर्वपक्षिणः । अस्मिंश्चपक्षेसुधास्थादिशब्दःकणादादिपरः । बौद्धादिमतेतु आप्तप्रणीतबौद्धाद्या
गमविरोधादाप्ताप्रणीतोवेदोप्रमाणमित्येवपूर्वःपक्षः । अतएवसुधायां "पाशुपतसांख्यबौद्धार्हतादी"तिबौद्धा
दिशब्दः । सौत्रस्यशंकाभागस्यत्वेतट्टीकायामिवसांख्यादिस्मृतेरनवकाशत्वेनश्रुतेरप्रामाण्याख्यदोषप्रसंगइ
तिनार्थः । नापिपरिहारभागस्यपांचरात्रादिस्मृतेरनवकाशत्वेनशैवादिस्मृतेरप्रामाण्याख्यदोषप्रसंगादित्य
र्थः । किंतूभयत्रापितासांस्मृतीनामेवानवकाशत्वेनाप्रामाण्यदोषप्रसंगइत्यर्थइतिसुधायां तत्वप्रदीपेचोक्तं ।
तत्रसांख्यशैवादिस्मृतिभिरेवपूर्वपक्षश्चतुर्विधविरोधात्मकोनतुबौद्धार्हतादिस्मृतिभिरितिज्ञेयं । अत्रचाप्रामा
ण्येनपूर्वपक्षेसर्वथाश्रुतेःस्मृतिविरोधः । प्रामाण्येनपूर्वपक्षेतुसिद्धांत्यभिमतेश्रुत्यर्थे । ततोनाध्यायासंगतिः ।
सिद्ध।तेत्वयंभावः । प्रतिरुंधेस्मृतिस्तावत्परामर्शेतुबाधते । श्रुतिःसस्मृतिकात्यंतंबाधतेन्यस्मृतीःपुनः ॥ १ ॥

प्र० नप्राक्तनग्रंथविरोधइतिभावः ॥ ततइति ॥ पक्षद्वयेप्यप्रामाण्येनपूर्वपक्षस्यप्राप्तत्वादित्यर्थः । अत्रसिद्धांतटीकायामवैदिकस्मृतेर्बाधा
दितिबाधमात्रोक्तिप्रतीतावप्यन्यत्रोक्तंप्रतिरोधपक्षमुपलक्षणत्वेनोपादायसिद्धांतप्रमेयंसंगृह्याह ॥ प्रतिरुंधइति ॥ श्लोकंव्याचष्टे ॥

प्र० आपाततइति ॥ श्रौतेति ॥ श्रुत्यनुसारिणीपंचरात्रादिस्मृतिरित्यर्थः । एतेन "श्रौतस्मृतिविरुद्धत्वा"दित्यणुभाष्यसंवादःप्रतिरोधपक्षेसूचि
आपाततस्तावच्छ्रौतस्मृतिःशैवादिस्मृतीःप्रतिरुंधे । विष्णवादिसार्वज्ञ्यादेरपिलोकप्रसिद्धत्वेनतत्स्मृतेर्विंसष्टत्वेनचतुल्यबलत्वा
त् । सिद्धांतीष्टंतुशैवादिस्मृतिषुवैदिकस्मृतिभिःप्रतिरुद्धास्वप्रतिबद्धश्रुतिभिरेवसेत्स्यति । विमर्शेतु "नित्यंवृद्धिक्षयापेत"मित्या
दिना विष्णोरनुपचरितसर्वज्ञत्वात्तदुक्तस्यश्रुतिसंवादित्वाच्चनितरामाप्तत्वात्प्रबलातत्स्मृतिरन्यस्मृतीर्बाधते । परोक्तरीत्याश्रु
तेःशैवादिस्मृतितोदुर्बलत्वेपिप्रमाणत्वाद्युक्तस्तत्संवादेनशिवादिभ्योपिविष्णोराप्तत्वनिश्चयः । युक्तिसंवादरहितार्थकथकादपि
तत्संवाद्यर्थकथकस्येव । अतिविमर्शेतुशैवादिस्मृतेःसमबलाभिरधिकबलाभिर्वाश्रौतस्मृतिभिःसहितयाश्रुत्यातिबाधः । अश्वे
नगजेनवासहितेनपदातिनाऽश्वस्येव । शैवादिस्मृतीनांतुनश्रुतिसंवादोनवातत्सहायत्वं । श्रुतीनांविष्णौसमन्वयस्योक्तत्वात् ।
अत्रचस्मृत्यास्मृतिबाधप्रतिरोधौसौत्रपरिहारभागस्थस्मृतिशब्दवाच्यार्थानुसारिणौ । श्रुत्यास्मृतिबाधस्तूक्तस्यश्रुतिसमन्वय
स्यस्मृतिविरोधेशंकितेश्रुतिंत्यक्त्वाप्रतिस्मृतिमात्रोक्तेरयुक्तत्वात्सूत्रेचस्मृत्युपन्यासस्यश्रुतिप्राबल्यार्थत्वेनोपपत्तेःसूत्राभिप्रा
यानुसारी । तत्रप्रतिरोधो "मानंह्युभयत्रसमंभवे"दित्यनुव्याख्याने "तथाचपाशुपतादिस्मृतीनांसत्प्रतिपक्षत्व"मितिसुधायां
चोक्तः । बाधस्तु "नितरांसर्वज्ञै"रितिभाष्ये "रुद्रादीनांसकाशाद्विष्णवादीनामेवाप्तत्वं । श्रुत्यनुसारित्वा"दितिन्यायविव
रणे "परमाप्तै"रितिटीकादौचोक्तः । अतिबाधस्तु "श्रुतेराधिक्यंसिध्यती"तिभाष्ये "सुतरांतत्साहाय्यवत्याश्रुत्ये"त्यादि
प्र० तोभवति ॥ नित्यमिति॥ "नित्यंवृद्धिक्षयापेतंविष्णोःपूर्णंतुवेदनं । स्पष्टातिस्पष्टविशदंब्रह्मणोशेषवस्तुगं । अन्येषांक्रमशोज्ञानंमितवस्तुगतं

प्र० सदे”तिद्युभ्वादिपादीयानुव्याख्यानोक्तवचनेनेत्यर्थः ॥ **टीकादाविति** ॥ आदिपदेनसुधायामितिगृह्यते ॥ **भाष्योक्तरीत्येति** ॥ “अतो न्योग्रंथविस्तारोनैवशास्त्रंकुवर्स्मतत् । सांख्यंयोगःपाशुपतंवेदारण्यकमेवचेत्यारभ्ये”त्यादिनोक्तरीत्यासाक्षादप्रामाण्योक्तेरित्यन्वयः ॥ **वारा हइति** ॥ जिज्ञासासूत्रभाष्योक्तमेतत् ॥ **पाद्मइति** ॥ प्रथमभारततात्पर्यनिर्णयोक्तमेतत् ॥ **भागवतइति** ॥ दशमस्कंधेवर्षेतुवर्णनप्र

टीकादौचोक्तः। उत्तराधिकरणन्यायेनतुश्रुतेरनाशंकितदोषतयास्वतएवाधिक्यसिद्धौशैवादिस्मृतीनामतितरांबाधः। शास्त्रयोनिसूत्रेभाष्योक्तरीत्याच “त्वंचरुद्रमहाबाहोमोहशास्त्राणिकारये”त्यादिवाराहे “स्वागमैःकल्पितैस्त्वंचजनान्मद्विमुखान्कुर्वि”त्यादिपाद्मे “पाषंडवामशैवाद्यैर्वेदमार्गाःकलौयथे”त्यादिभागवते “शैवान्पाशुपतांश्चैवलोकायतिकनास्तिका”नित्यादिस्मृतिषुचसाक्षादप्रामाण्योक्तेः। तथा “अन्यागमेषुविप्रत्वमपिचंडालजन्मनां। मंडलांतःप्रवेशेनक्रमशःप्रतिपाद्यत”इत्याद्यनुव्याख्यानोक्तरीत्याश्रुतिविरोधाद्धेतुदर्शनाच्चविरोधाधिकरणहेतुदर्शनाधिकरणन्यायविषयत्वेनातितमांबाधः । शास्त्रयोनिसूत्रेणास्यागतार्थत्वंत्वस्माभिस्तत्रैवोक्तं । पंचरात्रप्रामाण्यंतुशास्त्रयोनिसूत्रेभाष्यएवोक्तं । वक्ष्यतेच “उत्पत्त्यसंभवा”दित्यत्र ।

प्र० स्तावे “जलौघैर्निरभिद्यंतसेतवोवर्षतीश्वरे ।” पाषंडेतिपूर्वशेषः ॥ **इत्यादिस्मृतिष्विति** ॥ तत्रतत्रमूलग्रंथोक्तासु । रागादिदोषप्रदर्शनाय “अन्यागमेषुविप्रत्व”मित्युदाहरणं । तदर्थस्सुधायांव्यक्तः । हेतुदर्शनात् रागादिरूपहेतुदर्शनाच्चेत्यर्थः ॥ **हेतुदर्शनाधिकरणेति** ॥ विवृतमेतत्समाकर्षनये । एवमाद्यसूत्रभाष्यटीकातात्पर्यमुक्त्वा ननुकथमाप्तोक्तानामवैदिकस्मृतीनामप्रामाण्यमितिटीकोक्तशंकांहृदिकृत्वा

प्र० द्वितीयसूत्रभाष्यटीकातात्पर्यं "नचाप्तिनिश्चयस्तत्रशक्यतेव्यभिचारत" इत्यनुव्याख्यानसुधांहृदिकृत्वाव्यनक्ति ॥ **नचरुद्रादेरिति** ॥
टीकोक्तंसूत्रारूढतयादर्शयति ॥ **प्रत्यक्षेति** ॥ तस्मात् उपलब्ध्ययोग्यात्पुरुषार्थादित्यर्थः । तेनफलविशेषणत्वेऽनुपलब्धिनःफलादितरेषा
नचरुद्रादेराप्तत्वेमानमस्ति । बुद्धादिसार्वज्ञादावपिबहुजनप्रसिद्धेःसत्त्वात् । सर्वेपिहितस्यतस्याचार्यस्यसार्वज्ञादिकमाहुः ।
सार्वजनीनप्रसिद्धिस्तुनशिवादावपि । बहुजनपरिग्रहोप्युभयत्रसमः । नचपरस्परविरुद्धाःशैवादिस्मृतयःसर्वाअपिप्रमाणं ।
नचेयमेवप्रमाणंनान्येत्यत्रहेतुरस्ति । नचशैवाद्युक्तदृष्टार्थकर्मानुष्ठानेफलसंवादाच्छिवादेराप्तिसिद्धिः । क्वचित्तदुक्तदृष्टार्थ
कर्मानुष्ठानेपिफलस्यविसंवादात् । प्रामाण्यस्यहेत्वंतरेणसिद्धावेवचवैगुण्यनिमित्तकताविसंवादस्य । नतुसंवादेनैवसिद्धौ ।
अन्योन्याश्रयात् । क्वचित्संवादस्तुकाकतालीयः । लोकव्यामोहनायगुडजिह्विकावा । श्रुतेस्तदनुसारिस्मृतेश्चापौरुषेयत्वा
दिनाप्रामाण्येसिद्धेविसंवादोवैगुण्यादिनैवेत्युत्तराधिकरणेवक्ष्यतइति ॥ [८०।११] **प्रत्यक्षयोग्यत्वमितरेषामित्यनेनोच्यतइति** ॥
नविद्यतउपलब्धिर्यस्यासावनुपलब्धिरुपलब्ध्ययोग्यः । तस्मादितरेषां उपलब्धियोग्यानांफलानां । अनुपलब्धेः अनुपलं
भादित्येवंसौत्रानुपलब्धिशब्दःकाकाक्षिवदुभयत्रान्वेतीतिभावः । अथवा पूर्वसूत्रेयस्मिन्प्रत्यक्षायोग्येजगत्कारणत्वादौस्मृ
तिविरोधःशंकितस्तदितरेषांप्रत्यक्षयोग्यानामनुपलब्धेरितिसूत्रार्थः । कथमन्यथाऽनुपलब्धिमात्रेणासत्त्वसिद्धिरितिभावः ।
प्र० मितिस्यादितिनशंक्यं । यद्वा फलविशेषणत्वेपि "तृतीयादिषुभाषितपुंस्कंपुंवद्गालवस्ये" तिपुंवद्भावादनुपलब्धेरितिसाधु । जंबूजनिश्रियस्सु
मेरुश्रृंगस्येतिवत् । ननुकथमनुपलब्धेरितिपंचमी । "विभाषागुणेऽस्त्रिया" मितिनिषेधात् । सत्यं । अत्रोक्तंमंजर्यां "विभाषागुणइतियो

प्र० गविभागान्नास्तीहघटोऽनुपलब्धेरितिस्त्रियामपिक्वचिद्भवती"ति ॥ **उपयुक्तामिति** ॥ अभ्यधिकाशंकामितिशेषः । क्वचिच्छंकामित्यपि
पाठः ॥ **दिगिति** ॥ अयंभावः । यदिसौत्रप्रधानहेतावधिकाशंकाभावो यदिचाद्यसूत्रस्थस्मृतिपदेनयोगस्मृतेरपिग्रहणं तर्ह्यतिदेशोपिन
स्यादितिनशंक्यं । टीकोक्तरीत्याधिकाशंकासद्भावेनातिदेशोपपत्तेरित्यादिशंकानुदयादिति । नन्वेतदाशंक्योक्तंभामत्यां "वेदस्येश्वरबुद्धिपूर्व
"एतेने" तिसूत्रातिदेशोपयुक्तामधिकांशंकांदर्शयति ॥ [८०।१२] **नंतथापीत्यादिना** ॥ नचैवंपरमतइवेदंसूत्रमधिकरणांतरंस्यादिति
युक्तं । "नान्यस्मृती" तिसौत्रप्रधानहेतावधिकाशंकादेरभावात् । आद्यसूत्रस्थस्मृतिशब्देनयोगस्मृतेरपिगृहीततयाधिकर
णांतरत्वायोगाच्चेतिदिक् । यदुक्तमुभाभ्यां वेदांतानांबहुमुखतया परतंत्रप्रज्ञानांपुंसांतैःस्वतोर्थनिश्चयायोगेनस्मृत्यातद
र्थेनिश्चेतव्येसति मन्वादिस्मृतीनामनुष्ठेयपरत्वेनसावकाशत्वात्कापिलस्मृतेस्तुसिद्धार्थनिष्ठायामोक्षसाधनसम्यग्दर्शनमधिकृ
त्यप्रवृत्तायाअन्यपरत्वायोगान्निरवकाशत्वरूपदोषप्रसंगात्तदनुसारेणवेदांताअचेतनकारणत्वपरतयाव्याख्येयाइतिप्राप्ते म
न्वादिस्मृतिषुपुराणादिषुचबहूनांब्रह्मकारणत्ववादिवाक्यानांसत्त्वात्तेषामनवकाशत्वरूपदोषप्रसंगात्तदनुरोधेनचेतनकारण
त्वपरतयावेदांताव्याख्येयाइतिसिद्धांतइति ॥ तन्न ॥ वेदांतानांचेतनकारणतायामैकमुख्यस्य "गतिसामान्या" दित्यत्रोक्त
त्वेनसमन्वयाध्यायउपपादितत्वेनचबहुमुखत्वशंकानुदयात् । स्पर्शनश्रुतिविरोधेनसर्ववेष्टनादिस्मृत्यप्रामाण्यस्यपूर्वतंत्रएवो
प्र० क्तत्वस्यशास्त्रयोनिसूत्रेऽभिहितत्वात्कापिलस्मृतेरपितथात्वेनवेदतुल्यत्वादनन्यपरत्वेननिरवकाशत्वात्तर्कानुसारित्वाच्च श्रुतिरन्यथानेयेति
पुनराक्षेप" इतीतिचेन्न । वेदस्यापौरुषेयत्वेनबुद्धिपूर्वकत्वस्यप्रागेवनिरासात् । दुर्बलस्यबाध्यतायांनिरवकाशत्वस्याहेतुत्वात् । नहिशशशाब

प्र० कोनिरवकाशइतिसिंहेननबाध्यते । तर्कस्यचाप्रतिष्ठितत्वेनस्वयंदुर्बलत्वादितिभावः ॥ **अवैदिकस्मृतिमात्रेति** ॥ नन्वत्रोक्तंपरभाष्यादौ "एतेनेत्यत्रसतीष्वप्यध्यात्मविषयासुबह्वीषुबौद्धार्हतकापिलकाणादाद्यासुस्मृतिषु सांख्ययोगौपुमर्थहेतुतयाप्रख्यातौशिष्टपरिगृहीतौश्रौतलिंगे नचोपबृंहिताविततियोरेवनिरासःकृत" इतीतिचेन्न । तासामपिसर्वज्ञप्रणीतत्वेनाप्तमूलत्वादिनाबलवत्त्वोपपादनादितितात्पर्यात् । ननु स्मृत्यंतरंसमयपादेनिरसिष्यतइतिनतासामत्राचिंत्यत्वमितिचेत्समंकापिलस्मृतेरपीत्याह ॥ **यथाचेति** ॥ **परैरिति** ॥ कैश्चित्तु इतरेषांम

क्तत्वेनेहस्मृतिविरोधेनश्रुत्यस्वारस्यशंकानुदयाच्च । अस्याधिकरणस्यसौत्रस्मृतिशब्दासंकोचायावैदिकस्मृतिमात्रविषयत्वसंभवेतत्संकोचेनकापिलस्मृतिमात्रविषयत्वोक्त्ययोगाच्च । यथाच "महद्दीर्घवद्वे"त्यादौकणादादिमतंदूषयिष्यते तथा "रचनानुपपत्ते"रित्यत्रसांख्यमतमपि । यच्चोक्तंपरैः प्रधानादितरेषांमहदादीनामनुपलब्धेःसांख्यमतमयुक्तमितिद्वितीयार्थइति । तन्न । "नसंख्योपसंग्रहा"दित्यत्रैवश्रुत्यादिषुमहदादीनामुपलब्धेर्दर्शितत्वात् । यच्चोक्तं "विद्यामेतांयोगविधिंचकृत्स्न"मित्यादिश्रुत्यायोगस्यपरिगृहीतत्वान्नसांख्यतुल्यतेत्यधिकाशंकायां "एतेने"तितृतीयेऽतिदेशइति । तन्न । "तत्कारणंसांख्ययोगाधिगम्यंज्ञात्वादेवंमुच्यतेसर्वपापै"रित्यादिस्मृतिषुसांख्यस्यापिपरिगृहीतत्वेनाधिकाशंकाभावात् ।

प्र० न्वादीनांबहूनांकपिलोपदिष्टप्रकारेणतत्वानुपलब्धेस्तज्ज्ञानंभ्रमइत्यर्थइत्युक्तं । तन्मतेप्रधानादितत्वानामन्यत्रोपलंभात्तदद्दष्टसर्वानुपलंभस्य संदिग्धत्वादितिदूषणंध्येयं ॥ **यच्चोक्तमिति** ॥ परैरितिवर्तते । तेषांमते "वेदवेदांतप्रवर्तनाधिकृतहिरण्यगर्भप्रणीतत्वान्मोक्षसाधनतया विहितप्रयोगाभिधानादीश्वराभ्युपगमाच्चनसांख्यतौल्यंयोगस्येत्येवशंकाप्रदर्शनात् । श्रुत्या काठकश्वेताश्वतरगतयेत्यर्थः ॥ **तत्कारणमिति** ॥

प्र० परभाष्योदाहृतेयंस्मृतिः । ननु "ज्ञानंध्यानंसांख्ययोगशब्दाभ्यामभिलप्येते" इतिपरभाष्योक्तमाशंक्याह ॥ **तत्रेति** ॥ इहापि श्रुताव पीत्यर्थः । परमतेसूत्रत्रयदूषणंसंगृह्णाति ॥ **एवंचेति** ॥ एतेनकस्यचिच्छैवस्यमतमपिप्रत्युक्तंध्येयं ॥ ७ ॥ **स्मृत्यधिकरणं** ॥ १ ॥ ॥ **ॐनविलक्षणत्वात्ॐ** ॥ अपौनरुक्त्यायसुधोक्तंप्रमेयभेदमाह ॥ **स्मृतीति** ॥ **युक्तीति** ॥ वेदोप्रमाणं फलव्यभिचारित्वादितियुक्ति विरोधाभावउच्यतइत्यर्थः ॥ **पूर्वसिद्धांतेति** ॥ यथाफलव्यभिचारेणस्मृतीनामप्रामाण्यंतथैवश्रुतीनामितिप्रवृत्तेरापवादिकीसंगतिरित्यर्थः ॥

तत्रवैदिकंज्ञानमेवसांख्यशब्दार्थश्चेदिहापिज्ञानोपायएवयोगशब्दार्थोस्तु । एवंच पूर्वपक्षासमुत्था नमाद्येहेतोरसिद्धता । द्वितीयेऽभ्यधिकाशंकानुपपत्तिस्तृतीयके ॥ ७ ॥ स्मृत्यधिकरणं ॥ १ ॥

॥ ॐनविलक्षणत्वादस्यतथात्वंचशब्दात्ॐ ॥ स्मृत्यविरोधउक्तः । युक्त्यविरोधउच्यते । अत्रपूर्व सिद्धांतन्यायेनपूर्वपक्षप्रवृत्तेरनंतरसंगतिः । अत्रश्रुतिसमन्वयेनोक्तंविष्णोःकारणत्वादिनयुक्तमुतयुक्तमिति चिंता । तदर्थंवेदोप्रमाणमुतनेति । तदर्थंवेदैकदेशभूतकारीर्यादिवाक्यंयुक्तिविरुद्धमुतनेति । तदर्थंकारीर्या द्यनुष्ठानेपिवृष्ट्यदृष्टिःकिंव्यभिचारात्किंवाकर्त्रादिवैगुण्यादिनेति । तदर्थंवेदप्रामाण्यंकिंसंवादादुतस्वतइति ।

प्र० **वेदैकदेशेति**॥ तथाचतद्दृष्टांतेनकृत्स्नवेदाप्रामाण्यंतत्सामान्यादितरेषुतथात्वमितिन्यायादितिभावः । नन्वेकदेशेफलविसंवादेपिकथंसर्व त्राप्रामाण्यानुमानं । तत्प्रयोजकविसंवादस्यतत्राभावादितिचेन्न । प्रामाण्यनिर्णयस्यसंवादैकनिबंधनत्वोपगमेनक्वचिद्विसंवादेनाप्रामाण्येऽन्य

ता. चं. १४३ त्रापिप्रामाण्यनिश्चयहेतुसंवादाभावाद्विसंवाद्यैकदेशसाधारण्यानुमानाप्रतिहतेरितिभावः ॥**युक्तीति**॥ फलानुपलंभादित्यर्थः ॥**संवादादिति**॥

प्र० ज्ञायतइतिशेषः । स्पष्टःफलफलिभावः । टीकायामेवपूर्वपक्षस्यस्पष्टमुपपादितत्वात्स्वयंपूर्वपूर्वपक्षेणास्यफलभेदमाह ॥ **पूर्वत्रेति** ॥ इदंचसांख्यादिपूर्वपक्ष्येकदेश्यभिप्रायेण । विसंवादेनेत्युपलक्षणं । आप्तोक्तत्वरूपप्रामाण्यकारणगुणाभावेनेत्यपिध्येयं । "विलक्षणत्वा" दितिसौत्रांशव्यावर्त्यमुक्त्वा "तथात्वंचशब्दा"दित्यंशव्यावर्त्यमाह ॥ **अपौरुषेयत्वमेवनेतीति** ॥ विसंवादेनाप्रामाण्येप्राप्तेतत्कारणतयाभ्रांत्यादिमूलकत्वस्यावश्यंवाच्यत्वादितिभावः । अत्रटीकायांनित्यत्वाद्वेदस्यनिर्दोषत्वेनाप्रामाण्याभावएवोक्तोनतुप्रामाण्यं । अतोवेदस्यापौरुषेयत्वेना

पूर्वत्रश्रुतेरपौरुषेयत्वप्रामाण्येस्वीकृत्यदुर्बलासाप्रबलस्मृत्यनुसारेणनेयेतिपूर्वःपक्षः । अत्रत्वपौरुषेयत्वेपिशैवादिस्मृतिवद्विसंवादेनाप्रामाण्यमितिवाऽपौरुषेयत्वमेवनेतिवेतिपूर्वपक्षइतिभेदः । सिद्धांतमाह ॥ सिद्धांतयदित्यादिना ॥ अयंभावः । नतावदाद्योपौरुषेयत्वपक्षोयुक्तः । गुणाभावेपिवेदस्यप्रामाण्यंसाक्षिवत्स्वतः । अपवादकदोषस्यराहित्यादेवहिस्थितं ॥ १ ॥ प्रामाण्यस्योत्पत्तौस्वतस्त्वस्यदेवताधिकरणे

प्र० प्तोक्तत्वगुणाभावात्कथंप्रामाण्यमितिशंकातुनपरिहृतैव । तथाच "प्रमाणानुकूलत्वात्स्मृतेरपितत्सिद्धि"रित्युत्तरवाक्यायोगइत्यतः "नित्यत्वात्पुरुषोद्भवैः । उज्झितंसर्वदोषैश्चकथंनोमानतांव्रजे"दित्येतद्व्याख्यानेसुधायां "बोधकत्वेनखलुकरणानांप्रामाण्यं । दोषात्तुकदाचिदपनीयत"इत्यादिनोक्तमर्थंसंगृह्याह ॥ **गुणाभावेपीति** ॥ आप्तिमूलकत्वरूपगुणेत्यर्थः । प्रामाण्यं प्रमाजनकत्वं । स्वतः ज्ञानजनकत्वमिवसहजं । नत्वन्यतःप्राप्यं । प्रमाजननस्वभावस्यापिदोषवशादप्रमाजनकत्वमपिस्यादित्यतउक्तम**पवादकेति** ॥ **देवतेति** ॥ अतएवतदेव

प्र० श्लोकेत्रसंगृहीतमितिभावः । "स्वतश्चप्रामाण्य"मित्यादिभाष्यटीकाभावमाह ॥ **ज्ञप्ताविति** ॥ इदानींश्लोकार्थमाह ॥ **श्रुतेरिति** ॥ स्वतःप्राप्तइत्यस्यविवरणं**गुणानपेक्षइति** । भाष्यटीकयैवन्यायविवरणंविवृतंभवतीतिभावेनाह ॥ **तदुक्तमिति** ॥ पूर्ववाद्युक्तविसंवादयुक्तेःकागतिरित्यतः "दृश्यते"त्वितिसूत्रभाष्यविवृतिपरां "नफलादर्शनेनवेदादे(श्रुत्यादे)रप्रामाण्य"मित्यादिटीकांव्यनक्ति ॥ **विसंवादस्त्विति** ॥ वैपरीत्यंकिंनेत्यतआह ॥ **अपौरुषेयत्वमिति** ॥ कथमनुपपन्नमित्यतःपरंपरयेत्याह ॥ **दोषेति** ॥ एतेन "वेदस्य"त्विया

ज्ञप्तौस्वतस्त्वस्यचेहभाष्यादौसमर्थितत्वेनश्रुतेःस्वतःप्राप्तेगुणानपेक्षेप्रामाण्येऽपवादकस्यदोषस्याभावेनसाक्षिप्रत्यक्षस्येवप्रतिष्ठितेसत्यप्रामाण्यानुमितेर्बाधः । तदुक्तंन्यायविवरणे "साक्षिप्रत्यक्षसाम्यमेवे"ति । विसंवादस्त्वन्यथासिद्धः । कारीर्यादेर्वृष्ट्यादिहेतुताहितत्तद्वाक्यार्थः । नचसहकारिवैकल्यात्प्रतिबंधाद्वाकार्यानुत्पत्तावहेतुता । येनविसंवादोप्रामाण्येनविनाऽनुपपन्नःस्यात् । अपौरुषेयत्वंतुनप्रामाण्यंविनोपपन्नं । दोषाभावेप्यप्रामाण्येऽहेतुककार्यापातात् । दृश्यतेचवैगुण्याद्यभावेकारीर्यादिफलमितिनकाचित्कादर्शनेनाहेतुता । शैवादिस्मृतेस्तुसंवादात्प्रामाण्यमितिवैषम्यं । भेषजत्वेननिर्णीतादपिदैवात्क्वचिद्गुणः ।

प्र० दिटीकाविवृता । "तत्कुतःकल्प्यत"इतिटीकोक्तशंकांहृदिकृत्वा "योग्यानांफलदर्शना"दितिटीकार्थमाह ॥ **दृश्यतइति** ॥ "नचशंकनीयंपाशुपतादिस्मृत्युक्तफलव्यभिचारस्यापी"त्यादिटीकोक्तशंकांहृदिकृत्वा "पाशुपतादीनांतुफलदर्शनमंतरेणप्रामाण्यस्यसाधकाभावा"दितिटीकार्थमाह ॥ **शैवादीति** ॥ तेनस्वतस्त्वानभ्युपगमात् "तस्यापिस्वतःप्रामाण्यंचे"दित्यादिनाटीकायांस्वतःप्रामाण्यमाशंक्याप्रामाण्यस्यस्पष्टमुपपादितत्वादितिभावः । उपपादितंद्वितीयसूत्रभाष्यटीकाप्रमेयंसंगृह्याह ॥ **भेषजत्वेनेति** ॥ "वेदस्यनित्यत्वंकुतइत्यतआहे"त्यादि

प्र० टीकांव्यनक्ति ॥ नापीति ॥ "नचवाच्यंवेदप्रामाण्य"इत्यादिशंकापरटीकातात्पर्यमाह ॥ नचेति ॥ वाचाविरूपनित्ययेत्यादिश्रुतेः प्रामाण्येसतितेनवेदनित्यत्वसिद्धिः सिद्धेचतस्मिन्दोषरूपापवादकाभावेनस्वतःप्रामाण्यसिद्धिरित्यन्योन्याश्रयइत्यर्थः । "परेणापी"त्यादि टीकाभिप्रायंसंगृह्यसमाधिमाह ॥ विसंवादेति ॥ श्लोकंव्याचष्टे ॥ अत्रहीति ॥ सौत्रवैलक्षण्यपदस्यभाष्यादौव्यर्थतोक्तेःकृत्यमाह ॥

चेन्नदृश्येतकिंतस्यतावतातदहेतुता ॥ १ ॥ अपथ्यत्वेननिर्णीतादपिदैवात्क्वचिद्गुणः । दृश्यतेवदकिंतस्यतावतातत्रहेतुता ॥ २ ॥ नाप्यपौरुषेयत्वमेवनेतिद्वितीयः । "वाचाविरूपनित्यये"त्यादिश्रुत्यैवतत्सिद्धेः । नचान्योन्याश्रयः ॥ विसंवादविहीनेनश्रुतिवाक्येनसाधिता । नित्यतासर्ववेदानांविसंवादंधुनोतिहि ॥ १ ॥ अत्रहिपूर्वपक्षिणाविसंवादेतरहेतुकाप्रामाण्याभावंस्वीकृत्यविसंवादेनैकदेशस्यप्रामाण्यापवादेतदृष्टांतेनान्यस्यापिसशंक्यते । नचवेदनित्यत्वश्रुतेर्विसंवादोस्तीतिनिर्बाधयातयाकृत्स्नवेदप्रामाण्योपयोग्यपौरुषेयत्वसिद्धिरिति । अतएवबाधान्यथासिद्धीसूत्रारूढेकर्तुमपौरुषेयत्वंसंवादानपेक्षत्वं चसौत्रवैलक्षण्यशब्दार्थइतिभाष्यटीकयोरुक्तं । प्रामाण्यस्वतस्त्वापौरुषेयत्वादिसाधनप्रपंचस्त्वन्यत्रद्रष्टव्यः । अत्रचाद्यंसूत्रं अस्य श्रुत्यादेः । तथात्वं शैवादिस्मृतिवदप्रामाण्यं । न । श्रुतावपौरुषेयत्वादिरूपस्यश्रौतस्मृतौचतदनुसारित्वरूपस्यवैलक्षण्यस्यसत्त्वात् । तथात्वंच वैलक्षण्यंच । अपौरुषेयत्वरूपं । "वाचाविरूपनित्यये"त्यादिशब्दात् । संवादानपेक्षत्वरूपंतु

प्र० अतएवेति ॥ यद्वासूत्रानभिमतंबाधमन्यथासिद्धत्वंचाप्रामाण्याद्यनुमितेर्बाधइति विसंवादस्त्वन्यथासिद्धइतिचकस्मादुपपादितमित्यत आह ॥ अतएवेति ॥ द्वयोरत्राभिमतत्वादेवेत्यर्थः । अन्यत्र तर्कतांडवेप्रथमपरिच्छेदे । तथाचस्वतःप्रामाण्यसमर्थनटीकातात्पर्योनुक्तिरत्रनदोषइतिभावः । सूत्रार्थोक्तिपरटीकार्थंसूत्रारूढंदर्शयति ॥ अत्रचाद्यमिति ॥ अपौरुषेयत्वादीति ॥ संवादिनिरपेक्षत्वमादि

प्र० पदार्थः ॥ नचक्षुरिति ॥ चक्षुरादीनांपरमात्माप्रमापकत्वमुक्त्वावेदस्यैवतत्प्रमापकत्वोक्तेरितिभावः । उपन्यासेनास्पष्टीकृतानिकानि "नचक्षुर्नश्रोत्र"मित्यादिश्रुतेरितितथात्वमित्यस्योभयतःसंबंधंस्वीकृत्यभाष्यटीकाभ्यामेवयोजितं ॥ द्वितीयोनिरस्तंप्रायंइति ॥ प्रामाण्याग्रहणेशंकायाआवश्यकत्वादितिशेषः ॥ बांधकवदिति ॥ यथाबाधकस्यप्रामाण्यशंकानिरासाप्रामाण्यज्ञानयोर्व्यापारस्तथासंवादस्याप्रामाण्यशंकानिरासप्रामाण्यज्ञानयोर्व्यापारोस्त्वित्यर्थः ॥ बांधके नविनेति ॥ यथासुखादिज्ञानेसंवादेनविनानिवृत्ताप्रामाण्यशंकस्यप्रामाण्यबुद्ध्युदयोऽनुभूयते तथाक्वचिदपिबाधकेनविनानिवृत्तप्रामाण्यशंकस्याप्रामाण्यबुद्ध्युदयोनानुभूयते । प्रत्युततदनुदयएवानुभूयते । तेनसंवादाभावेपिसुखादिज्ञानेप्रामाण्यज्ञप्त्याव्यतिरेकव्यभिचारान्नसंवादस्यप्रामाण्यधीहेतुता । बाधकस्यत्वव्यभिचारादप्रामाण्यधीहेतुतेत्यर्थः ॥ अनुमानप्रामाण्येपिसंशयदर्शनाच्चेति ॥ बौद्धचार्वाकादिविप्रतिपत्त्यानुमानप्रामाण्येपिसंशयदर्शनादित्यर्थः । यद्वा लिंगादिज्ञानप्रामाण्यसंदेहेनतज्जन्यानुमितिप्रामाण्येपिसंशयदर्शनादित्यर्थः ॥ आपादनमात्रस्यक्रियमाणत्वादिति ॥ अन्यहेतुकस्याप्रामाण्यस्याभावंस्वीकृत्यविसंवादहेतुकाप्रामाण्यशंकामात्रस्यक्रियमाणत्वादित्यर्थः ॥ युक्तेश्चोपन्यस्तत्वादिति ॥ देवताधिकरणभाष्येऽपौरुषेयत्वेयुक्तेश्चोपन्यस्तत्वादित्यर्थः ॥ अधिकारित्वंनामेति ॥ कर्मवैगुण्यप्रतिबंधादिशून्यत्वरूपंयोग्यत्वमधिकारित्वमित्यर्थः ॥ ७ ॥ नविलक्षणत्वाधिकरणं ॥ २ ॥

प्र० चिद्वाक्यानिव्यनक्ति ॥ द्वितीयइत्यादिना ॥ ७ ॥ नविलक्षणत्वाधिकरणं ॥ २ ॥

प्र० ॥ ॐअभिमानिव्यपदेशस्तुॐ ॥ संगतिटीकादौयुक्तीत्येवोक्तिःपूर्वेणापौनरुक्त्यंसंगतिंचदर्शयितुं वृत्तवर्तिष्यमाणेवक्ति ॥ **पूर्वत्रेति** ॥
कैवल्यंनामान्यथोपपत्त्याश्रुतिप्रतीतार्थाप्रमापकत्वं । सोपानारोहणन्यायेनक्रमइतिभावः । भाष्यटीकयोरस्फुटत्वादाह ॥ **तदुक्तमिति** ॥
सर्वत्रेति ॥ नकेवलं "मृदब्रवी"दित्यादौ । किंतुसर्वत्रापिवेदवाक्ये दृढयुक्तिविरोधेसति ईदृशः अन्यार्थस्वीकारेणविरोधपरिहारेन्याय

॥ ॐअभिमानिव्यपदेशस्तुविशेषानुगतिभ्यांॐ ॥ पूर्वत्रकेवलयुक्त्यविरोधउक्तः । अत्रतुदृढयुक्त्यविरोधउच्यते । तदुक्तमनुव्याख्याने "दृढयुक्तिविरोधेतुसर्वत्रन्यायईदृश"इति । युक्तेर्दार्ढ्यंचनश्रुत्यप्रामाण्यंविनाऽनुपपद्यमानत्वं । सिद्धां तदशायामिहाप्यभावात् । पूर्वपक्षदशायांतुपूर्वत्रापिभावात् । किंतुश्रुतिप्रतीतार्थत्यागंविनाऽनुपपद्यमानत्वं । पूर्वत्रहिकारी र्यादेर्वृष्ट्यादिहेतुत्वरूपप्रतीतार्थात्यागेपिविसंवादोवैगुण्यादिनोपपन्नः । इहतुजडस्यमृदादेर्वक्तृत्वादिरूपप्रतीतार्थात्यागेजडत्वा दिकमनुपपन्नं । जडस्यकर्मज्ञानेंद्रियादिहीनस्यवक्तृत्वकामयितृत्वादेरयोगात् । इंद्रियाणामपिसंवादादिश्रवणात्तेषांचेंद्रियांत राभावात् । व्याप्तिपक्षधर्मतावत्त्वंदार्ढ्यमितिसुधायामपिश्रुतिप्रतीतार्थाभावेनसहहेतोर्व्याप्त्यादिमत्त्वंविवक्षितं । नत्वभिप्रेता

प्र० प्रकारोद्रष्टव्यइत्यर्थः ॥ **श्रुतिप्रतीतार्थत्यागंविनेति** ॥ अतएवसुधायां "युक्तिविरोधाःकिंप्रत्येकंपरिहरणीया"इत्यादिनापुनर्युक्तिविरो धपरिहारमाक्षिप्यात्रत्ययुक्तेर्व्याप्त्यादिमत्त्वोपपादनेननिरवकाशतोक्तेतिभावः ॥ **व्याप्तिपक्षधर्मतेति** ॥ प्रमितव्याप्तिपक्षधर्मतावद्युक्ती" तिसुधावाक्यतात्पर्यानुवादोयं ॥ **नत्वभिप्रेतेति** ॥ अप्रामाण्येनेत्यर्थः । "वेदोविषयः । प्रमाणंनवेतिसंशय"इतिटीकांफलचिंतोक्तिपूर्वं

प्र० व्यनक्ति ॥ **अत्रश्रुतीति** ॥ **युक्तीति** ॥ मृन्नवक्रीजडत्वादित्यादियुक्तीत्यर्थः ॥ **विग्रहवतामिति** ॥ वचनाद्युपपत्त्यर्थमेतत् । यद्यपि विग्रहादिमद्देवतासत्त्वमात्रेणमृदादिशब्दस्यनतत्परत्वं । तस्यतात्पर्यनिर्णायकाधीनत्वात् । तथापिवचनादेश्चेतनपरत्वतात्पर्यनिर्णायकस्या त्रव्यक्तत्वाद्बाधपरिहारायाभिमानिसत्त्वासत्त्वोपयुक्तैवचिंताप्रदर्शिता । तथाचायमर्थः । यद्यभावनिमित्तातेषामनुपलब्धिस्तदातेषामभा वेनतदभिप्रायेणवचनादेर्नेतुमशक्यत्वाद्युक्तिविरोधेनवेदोप्रमाणमितिनतेनजगत्कारणत्वस्यसिद्धिः । अन्यथातुसिद्धिरिति । "ननुनित्यत

र्थाभावेन । अत्रश्रुतिसमन्वयेनोक्तंब्रह्मणःकारणत्वादिकंनयुक्तमुतयुक्तमितिचिंता । तदर्थंवेदोप्रमाणमुतनेति । तदर्थं "मृदब्रवी"दित्यादिवेदैकदेशोयुक्तिविरुद्धउतनेति । तदर्थंमृदादिशब्दःकिंजडपरःकिंवाभिमानिचेतनपरइति । तदर्थमभि मन्यमानमृदाद्यनुगतानांविग्रहवतामभिमानिनामनुपलब्धिःकिमभावात्किंवांतर्धानादिति । नचवेदापौरुषेयत्वस्यपूर्वत्रसा धितत्वादपौरुषेयस्यचाप्रामाण्यायोगात्पूर्वपक्षानुदयइतिवाच्यं । अपौरुषेयत्वस्यप्रामाण्यंविनेवजडत्वादेर्वक्तृत्वाभावंविनानु पपत्तेर्नवेदप्रामाण्यनिश्चयइतिवा पिपीलिकालिपिवदप्रमाणानुकरणशुकादिवाक्यवच्चनपुरुषदोषाभावमात्रेणप्रामाण्यमितिवा युक्तिविरोधादपौरुषेयत्वमेवनेतिवेतिपूर्वपक्षोदयात् । एवंचास्याधिकरणस्योपाधिमभिदधता "दृढयुक्ती"त्यनुव्याख्याने

प्र० यावेदस्यप्रामाण्येऽव्यवस्थितेतद्विरुद्धायायुक्तेरेवाप्रामाण्यमुचितमिति । मैवं । व्याप्तिपक्षधर्मतोपेतायायुक्तेर्निरवकाशत्वात् । ततश्चसत्प्रति पक्षतयानिश्चायकत्वाभावेनाप्रामाण्यंवेदस्ये"तिसुधावाक्यंविवृण्वन्नेतदारंभमाक्षिप्यसमाधत्ते ॥ **नचेति** ॥ निश्चायकत्वाभावेनेत्येतदुप लक्षणमितिभावेनाह ॥ **पिपीलिकेति** ॥ "पिपीलिकालिपिश्चापिप्रमाणविरोधत"इत्युक्तेःसापिप्रमाणमेवेत्यनुशयादाह ॥ **अप्रमाणेति** ॥

प्र० ननुतत्रापिमूलपुरुषदोषवत्त्वमस्तीतिचेन्न । अनुकरणशब्दस्यशुकोदीरितस्यान्यत्वेनतज्जातीयेपुरुषदोषसत्त्वेपितत्रतदभावात् । एतदनुशयाद्वाप्रकारांतरंयुक्तीति ॥ युक्तिविरोधेभ्रांत्यादिमूलत्वावश्यंभावादितिभावः ॥ **संगतिरिति** ॥ सोपानारोहणरूपाऽऽक्षेपरूपावेत्यर्थः । “ननुमृदादिवचनाद्यभिधायकवाक्यस्यप्रत्यक्षविरोधएवे”त्यादिटीकांव्यनक्ति ॥ **नन्विति** ॥ **युक्तीति** ॥ विसंवादरूपयुक्तिसिद्धइत्यर्थः । तथाचतत्रयुक्तिविरोधशंकायुक्तेतिभावः । एतेनटीकायामियंशंकापूर्वाधिकरणपूर्वपक्षएवकुतोनकृतेतिचोद्यंनिरस्तं । कारीर्यादेर्वृष्टिहेतुत्वे

नास्यपूर्वेणसंगतिरगतार्थताचोक्तेतिज्ञेयं । ननु पूर्वत्रकारीर्यादेर्वृष्ट्यादिकंप्रतिकारणत्वस्यशक्तिरूपस्यातींद्रियत्वान्नतदभावःप्रत्यक्षः । किंतुयुक्तिसिद्धः । अत्रतुमृदादीनांवचनक्रियाद्यभावःप्रत्यक्षइतिप्रत्यक्षविरोधएवात्र नतुयुक्तिविरोधइतिकथंपादसंगतिरितिचेन्न । अस्मदाद्यप्रत्यक्षादिकालीनमृदादेरेववक्तृत्वादिश्रवणात् । न चादिकालीनमृदादेःश्रुत्येकगम्यत्वाद्धर्मिग्राहकश्रुतिबाधइतिवाच्यं । इदानींतनमृदादिकारणत्वेनादिकालीनमृदाद्यनुमानात् । परसिद्धमात्रस्यवापक्षीकरणात् । आदिकालीनमृदादेर्जडत्वंचमृत्त्वादिनानुमेयं ।

प्र० वाक्यबोध्येप्रत्यक्षविरोधाप्रसरेणविसंवादरूपयुक्त्यैवकारीर्यादेर्वृष्ट्यादिहेतुत्वाभावस्यवाच्यत्वेनयुक्तिविरोधस्यैवकारीर्यादिवाक्येप्रसरादिति । “तस्मादादिकालीनमृदादिकंपक्षइतिवक्तव्यं । नचतत्प्रत्यक्षादिसिद्धमितिवेदएवोपजीव्य”इत्यादिसुधोक्तशंकोत्तरेअत्रटीकायामपिबोध्येइतिभावेनसुधोक्तशंकासमाधीव्यनक्ति ॥ **नचादिकालीनेति** ॥ सुधायांमृत्त्वस्येहटीकायांजडत्वस्यहेतूकरणेतात्पर्यविवरीतुंशंकासमाधीआह

प्र० ॥ नचैवमिति ॥ अतएवेति ॥ द्वयोस्साध्यत्वादेवेत्यर्थः । टीकायांपूर्ववाद्युक्तेर्दोषोक्तेरस्फुटत्वात्तदनुक्तौचश्रुत्यप्रामाण्यानिरासादित्यतः "चेतनपक्षीकारेहेतोरसिद्धे"रित्यादिसुधोक्तंदूषणंसंगृह्याह ॥ अयंभावइत्यादिना ॥ श्लोकंव्याचष्टे ॥ नहीति ॥ धर्मिग्राहकेत्युक्तं । तत्कथमित्यतः "सर्वस्यास्यार्थापत्तितस्सिद्धत्वा"दित्यादिनासुधायां "अचेतनानांवचनाद्यदृष्ट्यानिर्दोषवाक्यस्याप्रामाण्यादृष्ट्याचतत्कल्पनोप

नचैवंमृत्त्वादिनैवावक्तृत्वाद्यनुमीयतामितिवाच्यं। वक्तृत्वादिनाजडत्वस्येवमृत्त्वादेर्विरोधाप्रतीतेरवक्तृत्वादिना मृत्त्वादेर्व्याप्तेरस्फुटत्वात् । अतएवात्रटीकायांस्फुटव्याप्तिकमस्फुटपक्षधर्मताकंजडत्वंहेतूकृतं । सुधायांतुस्फुट

८२।२१

पक्षधर्मताकमस्फुटव्याप्तिकंमृत्त्वादिकंहेतूकृतं । सिद्धांतमाह ॥ सिद्धांतयदित्यादिना ॥ अयंभावः । प्रसिद्धस्यपृथिव्यादेःपक्षत्वेसिद्धसाधनं । देवतायास्तुपक्षत्वेहेत्वसिद्ध्यादिकंभवेत् ॥ १ ॥ नहिप्रसिद्धस्यमृदादेःसिद्धांतेपिवक्तृत्वादिकं । नचधर्मिग्राहकमानेनवक्तृत्वादिनासिद्धायांदेवतायांजडत्वमृत्त्वादिकमस्ति । अभिमानिदेवतातद्विग्रहतदंतर्धानशक्त्यादिकं, तस्याएव "मृदब्रवी"दित्यादौविवक्षितत्वादिकंचार्थापत्तिसिद्धं ।

प्र० पत्ते"रितिटीकायांचोक्तमाह ॥ अभिमानीति ॥ आदिपदेनमृदादिशब्दानांतत्रवृत्तिस्तेषामभिमन्यमानव्यापित्वमित्येतद्गृह्यते । अचेतनानांवचनस्यनिर्दोषवाक्येऽप्रामाण्यस्यचादर्शनेनतदुभयान्यथानुपपत्तिरूपार्थापत्त्याविग्रहादिमदभिमानिचेतनस्य "मृदब्रवी"दित्यादिश्रुत्यर्थत्वेनकल्पनस्यावश्यकत्वात्तेषामभिमन्यमानपृथिव्याद्यव्यापित्वेतदनधिष्ठितदेशवद्देशांतरावस्थानोपपत्तौतद्वैयर्थ्येनव्यापित्वेवाच्येतदनुपलं

प्र० भबाधपरिहारायपिशाचादिवदंतर्धानशक्त्यादेःकल्प्यत्वादित्यर्थः । एतेनटीकायांदेवतासद्भावेपिकुतोत्रतद्व्यपदेशकल्पनेतिशंकानिवर्तकत्वे नार्थापत्त्युक्तिरूपलक्षणं । सुधोक्तदिशाउक्तसर्वार्थकल्पकत्वसंभवादितिसूचितं । एतेन "मृदाद्यभिमानिनीनांदेवतानामेवतत्रव्यपदेशा" दितिटीकोपपादिताभवति । टीकायां "नन्वप्रामाणिकदेवताकल्पनात्तासांचविशिष्टसामर्थ्यकल्पनाद्वरंवेदाप्रामाण्यग्रहणमेव । लाघवा" दित्याशंक्य "दृश्यतेचे"तिसूत्रोक्तमहत्प्रत्यक्षसिद्धत्वेनसमाधिरुक्तः । सतूपलक्षणमितिभावेनवा वक्ष्यमाणदिशातस्यारुचिग्रस्तत्वाद्वा । परिहारांतरंविवक्षुरर्थापत्तेरन्यथासिद्धिमाशंक्यनिराह ॥ **नचेति** ॥ "निर्दोषवाक्यस्याप्रामाण्यादृष्टयाचे"तिटीकासूचितमेवसमाधिमाह ॥

नचबहुकल्पनातोवेदाप्रामाण्यकल्पनमेववरमितिवाच्यं ॥ यतः प्रमितस्यप्रमात्वस्यसिद्धये बहुकल्पना । युक्तानतुततोभीत्याप्रमितस्याप्यपह्नवः ॥१॥ वेदस्यप्रामाण्यंहिनिर्दोषत्वात्प्र मितं । किंच भाष्योदाहृतस्मृत्यादिनाप्यभिमान्यादिसिद्धिः । नचतत्प्रामाण्येविवादः । तद्बीजस्ययुक्तिविरोधस्यतत्राभावात् । नह्यभिमान्यादिसत्त्वंजडस्यवक्तृत्ववद्युक्तिविरुद्धं ।

प्र० **यतइत्यादिना** ॥ श्लोकेनान्वयः । प्रमात्वस्य प्रामाण्यस्य । "तत्तन्नामानएवैतेतत्तद्वस्त्वभिमानिनः । संतितेषांविशेषेणशक्तिरन्येभ्यउच्यत"इत्यत्रसुधायां "उच्यतइति पृथिव्याद्यभिमानिन्यइत्यागममप्यत्रसंवादिनंदर्शयती"त्युक्तं । तद्व्यनक्ति ॥ **किंचेति** ॥ **तद्बीजस्येति** ॥ पूर्वोक्तरीत्यायुक्तिविरोधेतरहेतुकाप्रामाण्याभावमुपेत्ययुक्तिविरोधेनैवाप्रामाण्यशंकनादत्रचस्मृतौतदभावात् ॥ युक्तिविरोधविहीनेनस्मृतिवाक्येनसाधितं । अभिमान्यादिसत्त्वंतदप्रामाण्यंधुनोतिहि । इतिसमाधेयमितिभावः ॥ **नहीति** ॥ अनुपलंभस्तुपिशाचादिवदुपपन्नइति

प्र० भावः । "श्रुतियुक्त्योश्श्रुतेरेवप्राबल्या"दितिटीकोक्तशंकांबीजोक्तिपूर्वंसुधारीत्याव्यनक्ति ॥ **ननूपजीव्येति** ॥ पूर्वाधिकरणानुव्याख्यानइत्यर्थः ॥ **उपजीव्यप्रत्यक्षाद्यविरोधस्येति** ॥ इदानींतनमृदादिकारणत्वेनादिकालीनमृदाद्यनुमानेपि "मृदब्रवी"दित्यादिश्रुतिर्नमृदाद्यनुमापकयुक्तिमुपजीव्यप्रवृत्ता । किंत्ववक्तृत्वसाधकजडत्वयुक्तिमेवेत्यर्थः । टीकोक्तंसमाधिमुपलक्षणंमत्वा "व्याप्तिपक्षधर्मतोपेतायायुक्तेरप्रामाण्यायोगा"दितिसुधोक्तंतावदाह ॥ **जडत्वादीति** ॥ अनुपपत्तेरेवव्याप्तिशब्दार्थत्वेनतर्कतांडवेव्यवस्थापितत्वादितिभावः । उपजी

ननु "उपजीव्यविरोधेतुवेदस्यान्यार्थकल्पने"त्यनुव्याख्यानउक्तत्वादादिकालीनमृदादिवक्तृत्वादौचोपजीव्यप्रत्यक्षाद्यविरोधस्योक्तत्वाद्युक्तिमात्रस्यचश्रुतितोदुर्बलत्वात्तद्बाधेनप्रसिद्धस्यैवमृदादेर्वक्तृत्वादिकंश्रुत्यर्थोस्तु किमर्थांतरकल्पनयेतिचेन्न । जडत्वादियुक्तीनामप्यवक्तृत्वादिकंविनाऽनुपपत्त्यानिरवकाशत्वात् । अतएवोक्तमनुव्याख्याने "दृढयुक्ती" ति । अभिमानिरूपान्यार्थकल्पनेप्यभिमन्यमानगतमृत्त्वादिप्रवृत्तिनिमित्तस्याभिमान्यधीनत्वात् "तदधीनत्वा"दितिन्यायेनमृदादिशब्दानामभिमानिषुमृदादिभ्योपिमुख्यत्वेनामुख्यार्थत्वाभावाद्युक्तेःश्रुत्यविरोधेनतदबाध्यत्वाच्च ॥

प्र० व्यविरोधेत्वित्येतत्प्राबल्योपलक्षणमितिसुधायामेवोक्तमितिनात्रतस्यगत्युक्तिः । सुधोक्तेर्मूलमाह ॥ **अतएवेति** ॥ सौत्रतुशब्दसूचितं "अन्यार्थकल्पनेमुख्यार्थलाभा"दितिटीकोक्तंसमाधिंसुधोक्तदिशाविवृणोति ॥ **अभिमानीति** ॥ अयंचपरिहारोयुक्तेर्दौर्बल्यमुपेत्येतिध्येयं ॥ **तदबाध्यत्वादिति** ॥ भ्रांतिरेवबाध्यते । नतुश्रुत्यर्थइत्यर्थः । ननुश्रुतिर्दुर्बलांयुक्तिमेवबाधतांकिमितितामनुरुंध्यादित्यतआह ॥

प्र० प्रबलैरिति ॥ “अत्रचनास्तिसे”त्येतद्व्याचष्टे ॥ नचेति ॥ ननुमृदादिशब्दानामचेतनेष्वेवमुख्यतयारूढत्वेनतत्त्यागेकथंनश्रुत्यर्थबाधइत्यतः “बालरूढिंविनैवापिविद्वद्रूढिसमाश्रया”दित्यनुव्याख्यानंहृदिकृत्वाह ॥ मूर्खेति ॥ दुर्गमवाक्यानामक्षरार्थमाह ॥ विग्रहस्येत्या प्रबलैर्बाध्यतायांहिहेतुर्दुर्बलतैवन । किंतुतत्प्रतिकूलत्वविशिष्टात्रचनास्तिसा ॥ १ ॥ महाराजकुमारोपिस्वस्वाच्छंद्याविरोधिनः । बाधतेनैवलोकेपिदुर्बलान्भिक्षुकादिकान् ॥ २ ॥ नचात्रयुक्तेःश्रौतमुख्यार्थविरोधितारूपाप्रतिकूलतास्ति । मूर्खप्रसिद्धादप्यमुख्यार्थात्तदप्रसिद्धोपिप्राज्ञप्रसिद्धोमुख्यार्थःश्रेयान् । प्रयुज्यंतेहिवेदेबहुषुस्थलेषुतत्तदभिमानिदेवतास्वेवतत्तच्छब्दाः । नचप्रबलस्यापिदुर्बलाबाधेनैवस्वारस्येसंभवतितद्बाधकतायुक्ता । तदधीनत्वादित्यनेनास्यागतार्थतातुतत्रैवोक्तेति ॥ विग्रहस्यग्राह्यत्वादिति ॥ अभिमानिनोव्यपदेशइत्येकवचनांतविग्रहस्येत्यर्थः ॥ नतत्रशक्तिमात्रमिति ॥ तासांसामर्थ्यमितिभाष्येप्युत्तरस्मृत्यनुसारेणदेवतापिविवक्षितेत्यर्थः । ननुवेदादिप्रामाण्येऽविवादात्तत्त्यागेनदेवतादौयोगिप्रत्यक्षोक्तिरयुक्ता। विवादबीजाभावस्योक्तत्वात्। अन्यथायोगिप्रत्यक्षेस्मृतेःप्रमाणीकरणायोगादितिपूर्वत्रारुच्याऽऽह ॥ अर्थवा विग्रहेति ॥ अत्रपक्षद्वयेपि “विशेषानुगतिभ्या”मितिहेत्वोः “नचदर्शनप्रसंग”इत्याद्यध्याहृतसाध्यान्वयादरुच्या “अभिमानिव्यपदेश”इतिश्रुतसाध्यान्वयेनमतांतरमाह॥ अर्थवावस्त्वंतरमिति ॥ अनुपलब्धिबाधपरिहारार्यसूत्रमिति ॥योगिभिरप्यनुपलभ्यमानत्वान्नास्त्यभिमानिदेवतेतिशंकानिरासाय “दृश्यतेचे”तिसूत्रमित्यर्थः॥छ॥अभिमान्यधिकरणं॥३॥

प्र० दिना ॥ पक्षद्वयेपीति ॥ टीकायांपूर्वमुक्तपक्षद्वयेपीत्यर्थः । सूत्रक्रमादिकंटीकायांव्यक्तमितिभावः ॥छ॥ अभिमान्यधिकरणं ॥३॥

प्र० ॥ ॐअसदितिचेन्नॐ ॥ अत्रटीकायामधिकरणोपाधेरस्पष्टत्वात्तुच्छकारणताशंकाप्रतीतेश्चागतार्थत्वायाधिकरणोपाधिमनुव्याख्यानोक्तं विवृण्वन्नाह ॥ अत्रचेति ॥ पदप्रयोजनानिस्वयमेवव्यनक्ति ॥ नत्विति ॥ अल्पत्वबहुत्वेगुणप्रधानत्वेइतिव्याख्यायांबीजंसुधाभिप्रेतं स्वयमाह ॥ अन्यथेति ॥ "स्मृतियुक्तिश्रुतिगुणयुक्तयोबहुयुक्तयः । एवंचतुर्विधानैवविरुध्यंतेन्वयंप्रति । इतिप्रथमपादेननिर्णीतेपी"ति

॥ ॐअसदितिचेन्नप्रतिषेधमात्रत्वात्ॐ ॥ अत्रचश्रुत्युपसर्जनकप्रागभावकर्तृत्वसाधकयुक्तिविरोधोनिरस्यते । नतुसमयप्राप्तमसत्कारणत्वं । तस्यद्वितीयेनिरसिष्यमाणत्वात् । नापिश्रुतिमात्रप्राप्तं । तस्यतृतीयएवसंगतेः । नापियुक्त्युपसर्जनकश्रुतिप्राप्तं । तस्यचतुर्थएवसंगतेः । नापिसमप्रधानश्रुतियुक्तिभ्यांप्राप्तं । तस्यतृतीयेपिसंगतेः । नापियुक्तिमात्रप्राप्तं । पूर्वाधिकरणेदृढयुक्तिविरोधेनिरस्तइहयुक्तिमात्रेणपूर्वपक्षानुदयात् । नापियुक्त्यादिप्राप्तंप्रागभावस्यकारणत्वमात्रं । तस्यब्रह्मकर्तृत्वाविरोधित्वेनानिरसनीयत्वात् । तदुक्तमनुव्याख्याने "अल्पवाक्ययुतायुक्तिर्बहुलैवविरोधिनी"ति । अत्रह्यल्पत्वबहुत्वेगुणप्रधानत्वे । अन्यथा "श्रुतिगुणयुक्तय"इत्यनुव्याख्यानविरोधादितिसुधायामुक्तं । एवंचेहश्रुतिसूत्रभाष्येष्वसच्छब्दःशतृप्रत्ययस्यासदभवनमिति

प्र०समयपादीयानुव्याख्यानेश्रुतिगुणयुक्तिपदोक्तिविरोधादित्यर्थः । एतच्चपादांतेस्वयमेवव्याकरिष्यति । प्रागभावकर्तृत्वेत्युक्तंप्रमेयंसूत्राद्यारूढंकरोति ॥ एवंचेति ॥ उक्तस्यैवैतदधिकरणप्रमेयत्वेसतीत्यर्थः । असभुवीत्यस्य "लटश्शतृशानचावप्रथमासमानाधिकरणे"इतिशतृप्रत्य

बा० चं. १४४ ये "श्नसोरल्लोप"इत्यकारलोपेसदितिरूपं । तस्यनञ्समासेऽसदितिभवति । ननु "लःकर्मणिचभावेचे"तिविहितकर्त्रर्थकलट्प्रत्ययस्यैव

प्र० शतृप्रत्ययविधानात्कथमभावार्थत्वमित्यतआह ॥ छांदसेनेति ॥ एतेन "असच्छब्दोत्रभावसाधन"इतिसुधाविवृता ॥ भावेति ॥ "द्व्येकयोर्द्विवचनैकवचने । मुक्तोपसृप्यव्यपदेशा"दित्यादाविवेतिभावः ॥ निषेधैकेति ॥ तुच्छस्यनिस्स्वरूपत्वेननिषेधस्वरूपत्वोक्त्याऽभावपरत्वप्रतीतेरितिभावः । अत्रैकेचोदयंति । श्रुत्यादौसर्वत्रासच्छब्देनशून्यमेवाभिमतं । नतुप्रागभावः । भाष्ये "श्रुतिप्राप्तमेवासन्मतमत्रनिषिध्यते । समयस्योपरिनिषेधा"दित्युक्तेः । नहिप्रागभावकर्तृत्वप्रापकस्समयोस्ति । टीकायामपि "शशविषाणादीनांकिंचित्प्रति

छांदसेनभावसाधनत्वेनवाऽसदसत्वमितिभावप्रधानत्वेनवाऽभावपरः । अतएवटीका "अत्रसर्वत्रासच्छब्देनप्रलयवर्तीप्रागभावोऽभिधीयते । कारणशब्देनचकर्ते"ति । एवंच "इतिचेन्ननिषेधैकस्वरूपस्यनकर्तृते"त्यनुव्याख्यानेनात्रत्यभाष्यस्याविरोधः । नचश्रुतेरुपसर्जनत्वेटीकायांमूलत्वोक्तिविरोधः । राजसेनावच्छ्रुतेर्मूलत्वेनवस्तुतःप्राधान्येपिब्रह्मणःकर्तृत्वनिषेधेनाभीरसेनावद्युक्तेरेवाग्रेसरत्वेनकार्यतःप्राधान्यात् । अतएवोत्तरटीका "श्रुतिविरोधपरिहारस्ययुक्तिविरोधपरिहारांगत्वा"दिति । अत्रश्रुत्यसहितयुक्त्यविरोधायमृदादिशब्दानामन्यार्थतायांश्रुतिसहितयुक्त्यविरोधायासदादिशब्दानामन्यार्थतेतिकिमुवाच्यमिति

प्र० कारणत्वंसंभवती"त्याद्युक्तेश्चेति । अत्रसमाधिमाहुः । तुच्छमितिपूर्वपक्षेनियतप्राक्सत्वरूपहेतुत्वायोगात् । "आसी"दितिसत्त्वोक्तिविरोधाच्च । तुच्छकारणत्वप्रापकसमयाभावेनभाष्यास्वारस्यस्यतुल्यत्वाच्च । अतएवशून्यमित्यपिपूर्वपक्षोनयुक्तः । हेतुत्वाद्ययोगात् । तस्यतत्त्वतयाशून्यवाद्यंगीकारेणसस्वरूपत्वांगीकारेच "नहिशशविषाणे"त्यादिटीकानुपपत्तेः । भाष्यंतुसमयप्राप्तंशून्यमेवात्राशंक्यनिषिध्यतइ

प्र० तिकुतोनेत्यतःप्रवृत्तमित्युपपन्नं । टीकायांतथैवावतार्यव्याख्यातत्वात् । "शशविषाणे"त्यादिटीकापाठपक्षेपियथाशशविषाणादेर्नकारणत्वं तथाप्रागभावस्यापिनकर्तृत्वमितिदृष्टांतपरतयायुज्यते । शास्त्रयोनिसूत्रे "नहिधर्मादिनिश्चयोऽनुमानेने"तिवाक्यवत् । नहितत्रतदनुरोधे नधर्मस्यपूर्वपक्षेविषयत्वमस्ति । शून्यमितिपक्षेपिशशविषाणादीत्यादिवाक्यायोगाच्च । नहिशून्यंतुच्छवन्निस्स्वरूपमितिशून्यवादिनोपेयते । तत्त्वमित्यंगीकारात् । अतएव "नासत"इत्यत्रसुधायां "अत्रसर्वत्रासत्त्वमापाद्य"मित्युक्तं । एवंचाभावपरसुधावाक्यान्यप्यनुकूलितानि भवंति । "प्रागभावोऽभिधीयत"इतिपूर्वोक्तटीकावाक्यंचानुकूलितंभवति । तथा "नह्यभावरूपस्यधर्मिणःकारणत्वंदृश्यत"इत्यादिसिद्धांत

पूर्वसिद्धांतन्यायेनपूर्वपक्षोत्थानादनंतरसंगतिरगतार्थताच । अत्रविष्णोर्जगत्कर्तृत्वंयुक्तिविरुद्धमुतनेतिचिंता । तदर्थंविश्वप्रागभावःकिंविश्वकर्तोतनेति । तदर्थंप्रागभावस्यकर्तृत्वसाधिकावक्ष्यमाणयुक्तिःकिंश्रुतिसंवादिन्युतनेति । तदर्थं "असद्वाइदमग्रआसीत् तदसदेवसन्मनोकुरुते"त्यादिश्रुतिःकिंप्रागभावस्यसंकल्पप्रतिपादिकोतान्यपरेति । पूर्वपक्षमाह ॥ तत्रपूर्वपक्षयतीति ॥

प्र० स्थिततत्वप्रदीपवाक्यान्यप्यनुकूलितानिभवंतीति ॥ पूर्वसिद्धांतन्यायेनेति ॥ इयंच "प्रागभावस्यापिस्वरूपसत्त्वादिनासदेवेत्यादिप्रयोगविषयत्वोपपत्ते"रितिसुधोक्त्यालब्धा । "नविलक्षणत्वा"दित्यत्रकेवलयुक्तिविरोधः । अभिमानीत्यत्रतुदृढयुक्तिविरोधोनिरस्तः । अत्रतुश्रुतिसंवादेनसुदृढयुक्तिविरोधोनिरस्यतइतिसोपानारोहणन्यायेनावांतरसंगतिस्स्पष्टेतितदनुक्तिः । तदुक्तंसुधायां "इहपुनर्वेदवाक्यसंवादेनसुदृढयायुक्त्याविरुद्धत्वा"दित्यादि । विषयसंशयटीकांव्यनक्ति ॥ अत्रविष्णोरिति ॥ कर्तृत्वमिति ॥ तन्निर्वाहश्श्रितफलमितिसू

प्र० चितं । यतोवेत्यादिश्रुत्युक्तमितिशेषः । लयवृत्तिविश्वप्रागभावोमहदादिकार्येहेतुः । अन्यत्रानुपक्षीणत्वेसतिनियमेनतत्पूर्वभावित्वात् । पटप्रागभाववदितिपरिशेषसध्रीचीनाभावकर्तृत्वसाधकयुक्तिविरुद्धमित्यर्थः । यदिश्रुतिःप्रागभावस्यतथात्वपरातदातत्संवादेनयुक्तेर्बलवत्त्वात्तयाप्रागभावस्यकर्तृत्वसिद्धिसंभवेनश्रौतंकर्तृत्वंविरुद्धं । यदित्वन्यपरातदातदसंवादियुक्तिमात्रस्य "यतोवे"त्यादिश्रुतिविरुद्धतयाप्रागभावकर्तृत्वसाधनासामर्थ्येनस्वयंदुष्टतयाश्रौतंब्रह्मकर्तृत्वंनयुक्तिविरुद्धमितिस्पष्टमितिभावः । टीकायांप्रागभावकर्तृत्वसाधकयुक्तेरस्फुटत्वात्सुधोक्त

अयंभावः। विश्वप्रागभावस्तावद्विश्वहेतुः। घटंप्रतिघटप्रागभावस्यैवानन्यथासिद्धनियतपूर्वक्षणवर्तित्वात्। अन्यथोत्पन्नोघटः पुनरुत्पद्येत । प्रागभावस्यहेतुत्वेतुतदभावादेवनोत्पन्नस्योत्पत्तिः । प्रागभावस्याहेतुत्वेचपाकजरसादीनांभेदोनस्यात् । कार्यभेदस्यकारणभेदाधीनत्वात् । प्रागभावादन्यस्यचकारणस्यतत्राभेदात् । श्रूयतेच "असद्वाइदमग्रआसी"दितिप्रागभावस्यहेतुता । नह्यत्रासच्छब्दःशून्यपरः। असतोनियतप्राक्सत्वरूपहेतुत्वायोगात्। आसीदितिसत्त्वोक्तिविरोधाच्च।

प्र० मेवतात्पर्यविवरणेनाह ॥ **अयंभावइत्यादिना** ॥ समुदायाभिप्रायमेकवचनं। प्रागभावानामनेकत्वात् ॥ **घटंप्रतीति** ॥ एतेनयोयत्स्तादृशपूर्ववर्तीसतत्कारणं । यथाघटप्रागभावइतिसामान्यव्याप्तिरित्युक्तंभवति । दृष्टांतेसाध्यवैकल्यमाशंक्याह ॥ **अन्यथेति** ॥ सुधायांप्रागभावस्यकारणत्वंतस्यैवपरिशेषेणकर्तृत्वंचप्रसाध्ययुक्तेः "सदेवे"त्यादिश्रुतिविरोधपरिहारायप्राबल्यसिद्ध्यर्थं "असदेवे"त्यादिश्रुती उक्ते । तत्रहेतुत्वे "असदेवेद"मितिश्रुतिः । कर्तृत्वेच "असदेवसन्मनोकुरुते"तिश्रुतिरसंवादिनीतिभावेनाह ॥ **श्रूयतेचेति** ॥ एतेनटी

प्र० कायांश्रुत्यापूर्वपक्षोयुक्तिमूलतयेतिभावउक्तोभवति । श्रुतावसच्छब्दादभावलाभःप्रागेवोक्तइतिभावः । ननु प्रागभावकर्तृत्वमीश्वरकर्तृत्वाप्र तिकूलमित्यादिसुधोक्तशंकांहृदिकृत्वा "स्यादेतदेवंयदीश्वरादीनांप्रलयेसत्त्वमेवस्या"दित्यादिसुधोक्तमेवव्यनक्ति ॥ एवंचेति ॥ हेतुत्वेसिद्धे सतीत्यर्थः ॥ कर्तृत्वमिति ॥ परिशेषात्सेत्स्यतीत्यन्वयः । तमेवाह ॥ विमताइति ॥ परिशेषानुमानेऽनुकूलतर्कमाह ॥ लघुचेति ॥ ननुविश्वप्रागभावानांप्रतियोगिभेदेनानेकत्वादेकस्येश्वरस्यैवकर्तृत्वमस्त्वित्यतउक्तं क्लृप्तस्येति ॥ "तथापिप्रागभावस्यैवकारणत्वंकर्तृत्वंचनका

एवंचसिद्धेप्रागभावस्यहेतुत्वेप्रागभावांतरेऽदृष्टमपिविश्वप्रागभावस्यकर्तृत्वं विमताभावाःप्रलयेऽसंतः भावत्वात् कार्यवदित्यनेनप्रलयेभावमात्रासत्त्वसिद्धेःकार्यस्यचसकर्तृकत्वनियमात्परिशेषात्सेत्स्यति । लघुच क्लृप्तस्यप्रागभावस्यकर्तृत्वमात्रकल्पनमीश्वरतत्कर्तृत्वादिकल्पनात् । दृश्यतेचाचेतनेपिकर्तरिविहिततृतीयादि । अशरीरत्वेपीश्वरस्येवोपादानत्वेपिब्रह्मणइवचजीवस्यापिचेतनत्वेपीश्वरमात्रस्येवाभावत्वेपिविश्वप्रागभावस्यकर्तृत्वमस्तु । "तदसदेवसन्मनोकुरुते"तिश्रुतावसच्छब्दार्थस्यविश्वप्रागभावस्यमनश्शब्देनवा

प्र० प्युपलब्धमितिचे"दितिसुधोक्तशंकांहृदिकृत्वाह ॥ प्रागभावांतरइति ॥ अदृष्टंकथंकल्प्यमित्यतः "अलौकिकार्थस्ययथागमंग्राह्यत्वा"दितिसुधोक्तिरुपलक्षणंमत्वाह ॥ दृश्यतेचेति ॥ चैत्रेणस्थीयतइत्यादौ "कर्तृकरणयोस्तृतीये"तिविहितकर्त्रर्थकतृतीयाकर्तृत्वाभावेनस्यादित्यथः । नतृतीयादियोगित्वमात्रंकर्तृत्वं । किंत्विच्छादियोगित्वमेवप्रकृतोपयुक्तमित्यतआह ॥ अशरीरत्वेपीति ॥ चेतनत्वेपिजीवस्यकर्तृत्वंनास्ति । किंतुब्रह्मणएव । तद्वदितिभावः । तत्रश्रुतिबलात्तथात्वमुपेयतइत्यतआह ॥ तदसदेवेति ॥ एतेनटीकायामादिपदेनेयंश्रुति

प्र० रुक्तपरिशेषमूलतयाग्राह्येतिसूचितं ॥ कर्त्रर्थेति ॥ "लः कर्मणिचभावेचाकर्मकेभ्य" इत्यत्रचकारात्कर्तर्यपिलकारविधानादितिभावः ॥ मनःप्रतीति ॥ ततःप्राङ्मनसोऽभावेनतन्निमित्तेच्छाभावादितिभावः । एतेन "अलौकिकार्थस्ययथागमंग्राह्यत्वा" दितिसुधाविवृता । अत्रोक्तपूर्वपक्ष्यभिप्रायनिरासस्यटीकायामस्पष्टत्वात् "इतिचेन्ननिषेधैकस्वरूपस्यनकर्तृता । बुद्धिपूर्वप्रवृत्तिर्हिकर्तृत्वमितिनिश्चित" मित्यनुव्या

कर्त्रर्थलकारेणवाज्ञानेच्छाद्युक्तेश्च । शब्दगम्योह्यर्थोयथाशब्दमंगीकार्यः । :(भावविशेषस्यकर्तृत्ववच्चाभावविशेषस्यतदस्तुइति)कथमन्यथाऽद्वैतिमतइच्छाद्युपाधिभूतंमनःप्रतिब्रह्मणःकर्तृत्वमिति । ८३।१९
सिद्धांतमाह ॥ सिद्धांतयदिति ॥ अयंभावः ॥ नतृतीयादियोगित्वंकर्तृतेहविवक्ष्यते । किंतुज्ञानादियोगित्वंतच्चाभावेनयुज्यते ॥ १ ॥ नहिजन्मादिसूत्रोक्तंकर्तृत्वं तृतीयादिप्रयोजकंवैयाकरणाभिमंतपारिभाषिकंकर्तृत्वं । किंतुज्ञानचिकीर्षादिमत्त्वं । नचचेतनत्वमचेतनप्रभेदेप्रागभावेयुक्तं । अन्यथेश्वरस्यैवप्रागभावइतिसंज्ञास्यात् । भावत्वादियुक्तिस्तु विमतोत्पत्तिर्भावाधीना उत्पत्तित्वात् । विमतोविनाशःसशेषः विनाशत्वात् । विमतःकालोभाववान् कालत्वादित्यादिबहुयुक्तिविरुद्धा ।

प्र० ख्यानसुधोक्तमेवाह ॥ अयंभावइत्यादिना ॥ एतेन "युक्तमेवविष्णोर्जगत्कारणत्वं नत्वसत" इत्यादिटीकाऽऽद्यसूत्रभाष्यव्याख्यारूपाविवृता । पूर्वोक्तयुक्तिविरोधइत्यतआह ॥ भावत्वादीति ॥ प्रागभावस्यहेतुत्वानुमानमिष्टमेव । कर्तृत्वोपयुक्तंभावत्वादिकंतुप्रतियु

प्र० क्तिविरुद्धंनकार्यक्षममित्यर्थः । ननुद्वयोर्युक्तित्वाविशेषेकथंनिर्णयइत्यतोबहुयुक्तिविरुद्धेत्युक्तं । तत्कथमित्यतः "नतुदृष्टांतभावा" दितिसूत्रभाष्याद्युक्तप्रयोगाउक्ताः विमतोत्पत्तिरिति ॥ भावत्वादियुक्तिमूलश्रुतिविरोधइत्यतआह ॥ असदेवेत्यादीति ॥ आगमस्यचबाहुल्य

"असदेवे" त्यादिश्रुतिस्तु "सदेवसोम्येदमग्रआसीत् सत्त्वेवसोम्येदमग्रआसीत् एकोनारायणआसी" दित्यादिबहुश्रुतिविरुद्धा । तदुक्तमनुव्याख्याने "युक्तेश्चयुक्तिबाहुल्यमागमादागमस्यच । कथंननिर्णयंकुर्यादित्यसत्कारणंनही" ति । नचश्रौतासच्छब्दोऽभावेस्वरसः । बाधकादभावपरश्चेत्ततएवब्रह्मपरोस्तु । अन्यथाऽत्यंतासदेवज्ञानादिमत्स्यादिति । भावेष्वप्यन्योन्याभावादिधर्मात्मनाप्रतिषेधत्वमस्तीतिव्यभिचारःस्यात् । अतः सूत्रेमात्रशब्दः । तथाप्यसिद्धिः । अभावस्याप्यभिधेयत्वादिधर्मात्मनाभावत्वात् । अतोमात्रशब्दाभिप्रायमाह ॥ ३।२ स्वरूपंतएवेति ॥ तस्यैवविवरणमभावधर्मात्मतामंतरेणेति ॥ "कारणत्वाद्युक्तिविरुद्ध" मितिभाष्येकारणत्वादेरुक्तिः श्रुतिः । तद्विरुद्धमितिविग्रहः । नतुकारणत्वाद्धेतोर्युक्तिविरुद्धमितिभिन्नंपदं । अनंतरभाष्यविरोधा

प्र० मित्यन्वयः । एतेनैतद्व्याख्यानसुधाचयुक्तिश्रुतिबाहुल्योदाहरणेनविवृताध्येया । ननुश्रौतासदादिशब्दस्यमुख्यार्थत्यागःस्यादित्यतआह ॥ नचेति ॥ भावसाधनत्वादेरयोगादितिभावः । बाधकात् सत्त्वोक्त्यादेरयोगरूपादित्यर्थः । टीकाक्षरार्थमाह ॥ भावेष्वित्यादिना ॥

प्र० इत्याहेति ॥ इतिभावेनभाष्यार्थमाहेत्यर्थः । कथमयंसौत्रपदलभ्योर्थइत्यतआह ॥ अत्रेति ॥ आगमप्रामाण्येति ॥ यद्यपि*तत्प्रामाण्येत्येवटीकापाठः । तथापितत्पदार्थविवरणेनप्रतीकग्रहणमेतत् । तृतीयांतत्वेऽन्वयायोगादाह ॥ घटादीनामिति ॥ टीकाक्षरार्थमुक्त्वा

दित्याह ॥ [८३।२३]कारणत्वप्रलयस्थितत्वेति ॥ [८४।१]अन्यथापौनरुक्त्यापातादिति ॥ अत्रापिसमयप्राप्तस्य निषेधेप्रागभावकर्तृत्वप्रापकसमयाभावेनशून्यकारणतानिषेधस्यैवप्रसंगादितिभावः । तद्वत्प्रसंगादितिसूत्राक्षराणियोजयति ॥ [८४।११]असन्मात्रावशेषप्रसंगइति ॥ अत्रसूत्रेतच्छब्दःसावधारणः । वदितिमतुप्प्रत्ययः । नतुपरमतइववतिरितिभावः ॥ [८४।१८]परंपर्यावेति ॥ सर्वेभावाःप्रलयेऽसंतः भावत्वादित्यादिरूपेणेत्यर्थः ॥ [८५।१]आगमप्रामाण्यानभ्युपगमादिति ॥ आगमप्रामाण्यसाधनंचतर्केणैवकार्यमितिभावः ॥ [८५।७]विरुद्धतर्काविति ॥ प्रमाणेनेतिशेषः । घटादीनांजीवकर्तृत्वाभावइतिपदच्छेदः । अत्राद्येसूत्रेऽभावइतिवक्तव्येऽसदितिश्रुत्यनुकरणार्थं । असच्छब्दस्यकर्तृसाधनत्वं

प्र० सूत्राक्षरार्थंविवेचयति ॥ अत्राद्येति ॥ असच्छब्दश्छांदसभावसाधनेनाभावपरइतिप्रागेवोक्तइतिभावः । उक्तंचसुधायां "अत्रासच्छब्दोभावसाधनःश्रुत्यनुगमार्थमभावेप्रयुक्तः । अपरापिवृत्तिर्भावत्वहेतुनाकार्यवदीश्वरादिकमपिप्रलयेऽसदनुमीयतइत्यत्रासच्छब्दःकर्तृसाध

---

* यद्यपिप्राचीनेषुलिखितेषुक्कचित् तत्प्रामाण्यानभ्युपगमादितिपाठोदृश्यते । तथापि आगमप्रामाण्यानभ्युपगमादितिपाठस्यबहुलमुपलंभात्तथैवास्माभिर्मुद्रितम् ।

प्र० न"इति ॥ भवितृति ॥ प्रागुक्तरीत्याभावसाधनत्वेपीतिभावः ॥ इतिसूचितमिति ॥ तथैवसुधोक्तेरितिभावः । तथाचपक्षासिद्ध्या सर्वासत्त्वानुमानंतवनस्यादितिभावः । टीकायामनुक्तेः "नहिजीवादीनांप्रतिषेधमात्रत्वमस्ति । येनोक्तविरोधस्स्या"दितिसुधोक्तामधिकाशं

भवितृप्रधानत्वंवाऽऽश्रित्य भावजातंप्रलयेऽसत् भावत्वात् कार्यवदितियुक्तिसूचनार्थंच । द्वितीयसूत्रे "अपीता"वित्यनेनप्रलयेभावमात्रासत्त्वेकालोपिनस्यादितिसूचितं । "एतेनशिष्टा"इतिसूत्रंपरेषामिवनास्माकमधिकरणांतरं । जीवकर्तृकत्वादि(अचेतनकर्तृकत्वादि)पक्षाणामपिश्रुत्युपसर्जनयुक्तिविरोधत्वरूपैतदधिकरणोपाध्युपहितत्वात् । दृष्टांताभाव(श्रुतिबाहुल्यसहितयुक्तिबाहुल्य)रूपसिद्धांतमूलहेतोरुपर्यधिकाशंकाभावाच्च । अतिदेशस्त्वाद्यसूत्रोक्तस्यप्रतिषेधमात्रत्वस्यजीवादावसिद्ध्याशंकासद्भावादिति । यदुक्तमुभाभ्यां "नविलक्षणत्वा"दित्यादि "एवमप्यनिर्मोक्षप्रसंग"इत्यंतंसूत्राष्टकमेकाधिकरणं । "नविलक्षणत्वा"दित्यस्यानंतरं "दृश्यते"त्वितिसूत्रंतुनास्त्येव ।

प्र० कामाह ॥ अतिदेशस्त्विति ॥यत्तूक्तमिति ॥ "प्रकृत्यासहसारूप्यंविकाराणामवस्थितं । जगद्ब्रह्मस्वरूपंचनेतिनोतस्यविक्रिया । विशुद्धंचेतनंब्रह्मजगज्जडमशुद्धिभाक् । तेनप्रधानसारूप्यात्प्रधानस्यैवविक्रिये"तिभामत्युक्तं, तथा "अस्यप्रत्यक्षादिभिरचेतनत्वेनाशुद्धत्वेनानीश्वरत्वे

प्र० ने"त्यादिरामानुजभाष्योक्तंचहृदिकृत्वासूत्रार्थमाह ॥ **अस्येति** ॥ अध्याहारेणान्वयमाह ॥ **नब्रह्मेति** ॥ **विज्ञानमिति** ॥ विज्ञानादिश ब्दानांकारणकार्यपरत्वादितिभावः ॥ **प्रतिषेधासमर्थत्वादिति** ॥ एतच्च "तदनन्यत्व"मित्यग्रेतद्भाष्यादावुच्यतइति । एतच्चाद्वैतिमते ।

अस्यजगतःस्थौल्यसावयवत्वाचेतनत्वपरिच्छिन्नत्वादिनाब्रह्मविलक्षणत्वान्नब्रह्मोपादानकत्वं । तथात्वंच वैलक्षण्यंच "विज्ञानंचाविज्ञानंचे"त्यादिशब्दात्सिद्धमित्याद्यसूत्रेणोक्त्वा नच"मृदब्रवी"दित्यादिश्रुत्याजगदपिचेतनरूपमेवेतिवैलक्षण्यमसिद्धमितिवाच्यं । तत्राभिमानिदेवताव्यपदेशादितिद्वितीयेनोक्तं । तथाचैतेपूर्वपक्षसूत्रे । एवंप्राप्ते वैलक्षण्येपिगोमयवृश्चिकादेः कार्यकारणभावोदृश्यतइतितृतीयसूत्रेणसिद्धांतयित्वा ननुतर्ह्यचेतनरूपंजगत्प्रागुत्पत्तेरसत्प्रसज्येत । तदाचेतनब्रह्ममात्रावस्थानात् । तच्चानिष्टंसत्कार्यवादिनस्तवेतिचेन्न । कार्यस्यकारणाभिन्नतयाकारणरूपेणसत्त्वसंभवात् । सत्कार्यवादप्रतिषेधस्यप्रतिषेधमात्रत्वात्सत्कार्यवादप्रतिषेधासमर्थत्वादितिचतुर्थसूत्रेणोक्त्वा ननुतर्हिप्रलयेकार्यकारणाविभागमापद्यमानंकारणमात्मीयेनधर्मेणदूषयेदितिकार्यवद्ब्रह्मणोप्यशुद्ध्यादिप्रसंगादसमंजसमिदमितिपंचमेनपूर्वपक्षयित्वा मैवं

प्र० रामानुजमतेतुकार्यकारणयोर्वैलक्षण्येतयोर्द्रव्यांतरत्वेनकारणेकार्यंनविद्यतइत्यसत्स्यादित्यसतएवजगदुत्पत्तिस्स्यादितिचेन्न । पूर्वसूत्रेसालक्ष

प्र० ण्यनिषेधस्यतन्नियमनिषेधमात्रत्वान्नतदैक्यंनेत्युक्तमित्यर्थः ॥ **शरावेति** ॥ यथाक्रममन्वयः । नविलक्षणत्वादनुपादानतेत्येतदप्यद्वैतिमते । मतांतरेतु चिदचिच्छरीरकस्यब्रह्मणएवकार्यकारणभावापन्नत्वेपिचिदचिच्छरीरगतदोषाणामासन्यनन्वयेदृष्टांतस्यशरीरगतबालत्वयुवत्वाद्यवस्थान्वयरहितजीवस्यसद्भावादितिपूर्वेणोक्त्वा निर्विकारचिन्मात्रपुरुषस्यजगत्प्रवृत्त्याद्यनुपपत्तेःकेवलप्रधानकारणत्वपक्षस्यदुष्टत्वाच्चेत्यर्थः ॥

शरावमायास्वप्नादिषुप्रलीनेषुतद्धर्माणांमृन्मायाविस्वप्नद्रष्ट्रादिष्वदर्शनेनकारणस्यकार्यदोषासंसर्गेदृष्टांतसद्भावादितिषष्ठेन सिद्धांतयित्वा किंचनविलक्षणत्वादनुपादानतेत्यादयोदोषाःसांख्यमतेपिसमाः । शब्दादिहीनंप्रधानंशब्दादिमज्जगदुपादानमितिसांख्यैःस्वीकारादितिसप्तमेनोक्त्वा किंच नतर्केणब्रह्मणःश्रौतकारणत्वापह्नवोयुक्तः । तर्काणामप्रतिष्ठितत्वात् । ननु अन्यथातर्कस्याप्रतिष्ठायथानभवतितथासूक्ष्मबुद्धिभिरनुमेयमितिचेदेवमपिविषयांतरेतर्कस्यप्रतिष्ठितत्वेप्यतिगंभीरेशब्दैकगम्येजगत्कारणेतर्कस्याप्रतिष्ठितत्वदोषादनिर्मोक्षइत्यष्टमेनोक्तमिति। तन्न। स्वीयप्रमाणविरोधेनपरकीयप्रमाणाप्रामाण्येपूर्वत्रोक्तेऽत्रस्वीयप्रमाणाप्रामाण्यशंकानिरासस्यैवसंगतत्वात् । अपिच अस्मद्रीत्या "अभिमानिव्यपदेश"इत्यादेरवश्यवक्तव्ययुक्तिश्रुतिसंवादियुक्त्यविरोधोक्त्यासिद्धांतसूत्रत्वेनप्रत्येकमधिकरणत्वेसंभवतिकथमाद्यद्वितीयपंचमसूत्राणांपूर्वपक्षत्वेनतृतीयादीनांचसिद्धांतत्वेनानभिप्रेतस्यब्रह्मजगतोर्विकारविकारिभावस्योक्त्यैकाधिकरणता ।

प्र० **स्वीयप्रमाणेति** ॥ "अन्यस्मृत्यनवकाशे"तिपूर्वसूत्रभागेनेतिभावः ॥ **अनभिप्रेतस्येति** ॥ उभाभ्यांब्रह्मणोविकारित्वस्यानभ्युपगमादितिभावः । नन्वस्मद्रीत्येत्ययुक्तं । प्राक्समन्वितकारणवाक्यएवयुक्तिविरोधनिरासस्यौचित्येनकारीर्यादिवाक्यविचारस्यानवसरदुष्टत्वा

प्र० दित्यतआह ॥ यथाचेति ॥ त्वयावितथास्वीकारादितिभावः ॥ तदभावेनेति ॥ सिद्धांतसूत्रनिरस्यपूर्वपक्षसूत्राभावेनेत्यर्थः ॥ सर्वंशास्त्रमिति ॥ श्लोकेनान्वयः ॥ अतत्वेति ॥ एतच्चाद्वैतिमते । अधिकरणानुत्थितिमाह ॥ किंचवैलक्षण्यादिति ॥ त्वन्मतइति ॥

यथाच "सप्तगतेर्विशेषितत्वाच्चे"त्यादौकारणवाक्यादन्यत्रापींद्रियसंख्यादिश्रुतौश्रुत्यंतराविरोधोक्तिस्तथेहापिकारीर्यादिश्रुतौयुक्त्यविरोधोक्तिरस्तु । अन्यथातद्दृष्टांतेनकारणवाक्यस्याप्रामाण्यापातात् । यदिचतुशब्दयुक्तत्वात्पूर्वसूत्रस्यपूर्वपक्षत्वं तर्हि "अभिमानिव्यपदेशस्तुविशेषानुगतिभ्यां । असंभवस्तुसतोनुपपत्ते"रित्यादौतुशब्दश्रवणात्ततःपूर्वसूत्राणांपूर्वपक्षत्वं स्यात् । यद्यपिपूर्वमीमांसादौपूर्वपक्षसूत्राणिसंति । तथापितत्राद्याध्यायाद्यपादएवपूर्वपक्षसद्भावादिहचत्वन्मतेपिप्रथमाध्याये तदभावेनान्यत्रापिसूत्रकृतःपूर्वपक्षत्वसूचकजैमिन्यादिग्रहणाभावेव्याकरणकल्पसूत्रादाविवतदकरणशैलीनिश्चयेसतिसर्वंशास्त्रं पूर्ववादिमतंकिंचित्किंचिच्चातत्ववेदकं । उपासनापरंकिंचिदितिकस्माद्भिनाश्यते ॥ १ ॥ अन्यथैकःपादोध्यायोवापूर्वपक्षःपादांतरमध्यायांतरंवासिद्धांतइतिस्यात् । किंच वैलक्षण्यादनुपादानत्वमितिशंकात्वन्मतेऽदृश्यत्वाद्यधिकरणएवनिरस्तेतितेनपुनरुक्तिः । अपिच केवलोपादानस्यसालक्षण्यनियमेपित्वन्मतेतंतुंप्रत्यूर्णनाभ्यादेरिवजगत्प्रतिब्रह्मणोवैलक्षण्येपि सिद्धांत्यभिप्रेतस्यनिमित्तत्वेसत्युपादानत्वस्यसंभवेनपूर्वपक्षःसिद्धांताविरोधी । किंच त्वन्मतेऽविद्यादेरविद्यादिविशिष्टस्यैव चोपादानत्वात्तस्यचजगतासालक्षण्याच्छुद्धस्यचविलक्षणत्वेपिजगद्भ्रमाधिष्ठानत्वादात्मनिचाऽनात्मभ्रमस्यसांख्यादिभिरपि ॥ ८६४ ॥

प्र० अद्वैतिमते ॥ निमित्तत्वेसतीति ॥ "प्रकृतिश्चे"त्यत्रोभाभ्यांतस्यैवोक्तेरितिभावः । अद्वैतिमतेदोषांतरमाह ॥ किंचत्वन्मतइति ॥

प्र० ॥ स्वीकारादिति ॥ अन्यथासंसाराभावप्रसंगादितिभावः । मतद्वयेपिसौत्राक्षरास्वारस्यमाह ॥ किंचात्रेति ॥ "तथालंचशब्दा" दितिसूत्रांशार्थंप्रत्याह ॥ किंचजगतइति ॥ श्रुत्यवगतब्रह्मवैलक्षण्यस्येत्यर्थः । अतएवरामानुजभाष्ये "अस्य प्रत्यक्षादिभिरचेतनत्वे

स्वीकारात्कथंपूर्वपक्षोदयः । किंचात्रममतथात्वशब्दोक्तस्यावैदिकस्मृतिसालक्षण्यस्यनिषेध्यता । तवतुतदनुक्तस्यब्रह्मकारणकत्वस्य । तथामम "विलक्षणत्वा"दित्यत्र"स्मृत्यनवकाशे"तिप्रकृतस्यप्रतियोगिता । तवतुतदप्रकृतस्यब्रह्मणः । तथामम "अस्ये"तिशब्दः "नान्यस्मृती"तिपूर्वप्रस्तुतस्वपक्षप्रमाणपरः । तवत्वप्रस्तुतजगत्परः । किंच जगतोब्रह्मवैलक्षण्यस्यप्रत्यक्षत्वात्तत्रशब्दोक्तिरयुक्ता । किंचयदि "विज्ञान"मित्यादि श्रुतिर्वैलक्षण्येप्रमाणंकथंतर्ह्युपादानत्वेनप्रमाणं । "सच्चत्यच्चाभव"दित्यादिपूर्ववाक्ये नोपादानत्वप्रतीतेः । अपिचविज्ञानाविज्ञानशब्दौनकार्यकारणपरौ । किंतुत्वत्पक्षेसत्त्यदादिशब्दवत्कार्यपरावेव । चशब्दाभ्यांप्रत्येकंभवनक्रिययान्वयप्रतीतेः ।

प्र० नाशुद्धत्वेनानीश्वरत्वेनदुःखासकत्वेनोपलभ्यमानस्ये"त्युक्तं । वैलक्षण्यविशेषज्ञापनार्थंशब्दाच्चेत्युक्तिरित्यप्ययुक्तं । व्यर्थत्वादितिभावः ।
ता० चं० १४५ व्याघातंचाह ॥ किंचयदीति ॥ चशब्दाभ्यामिति ॥ "विज्ञानंचाविज्ञानंचे"तिप्रत्येकंश्रुताभ्यामित्यर्थः । आद्यंसूत्रंनिरस्यद्वितीं

प्र० यादिनिराह ॥ अपिचेति ॥ पूर्वरूपेति ॥ प्रच्युतगोमयत्वाद्यवस्थानामेवावयवानांवृश्चिकादिशरीरोपादानत्वादितिभावः । तद्वत्प्रसं

अपिचयथाकथंचिद्वैलक्षण्यंहेतुश्चेत् “मृदब्रवी”दित्यादेरभिमानिपरत्वाभावेपिशुद्ध्यशुद्ध्यादिनापिवैलक्षण्यस्यप्रत्यक्षादिनापिसिद्धेस्तदुपपादनार्थंद्वितीयसूत्रंव्यर्थं । चेतनाचेतनत्वाभ्यामेववैलक्षण्यंहेतुश्चेदचेतनवृश्चिकशरीरादिकंप्रत्येवाचेतनस्यगोमयादेरुपादानतयाचेतनस्याचेतनोपादानतायाःक्वाप्यदर्शनात्तृतीयसूत्रायोगः । किंच “मृदब्रवी”दित्यादौमृदादीनांवक्तृत्वज्ञातृत्वादिसिद्धावपि “तथात्वंचशब्दा”दितिपूर्वसूत्रोक्तविज्ञानाविज्ञानत्वादिवैलक्षण्यापरिहारान्मृदादीनांवक्तृत्वेशंकायोगाच्च तत्परिहारार्थंद्वितीयसूत्रमित्ययुक्तं । तृतीयंचायुक्तं । गोमयादिवद्ब्रह्मणःपूर्वरूपहानेनजगद्भवनाभावेनतद्दृष्टांतोक्त्ययोगात् । चतुर्थेपिमम असत्कारणमितिचेन्न । तस्यप्रतिषेधमात्रत्वादितिबह्वध्याहारनैरपेक्ष्येणहेतुसाध्ययोःसामानाधिकरण्येनचान्वयस्साक्षाद्ब्रह्मकारणत्वाक्षेपश्च । तवतु असत्कार्यंप्रसज्येतेतिचेन्न । सत्कार्यप्रतिषेधमात्रत्वादितिबह्वध्याहारेणवैयधिकरण्येनचान्वयस्साक्षात्तदनाक्षेपश्च । पंचमेपि प्रलयेब्रह्मणःकार्यधर्मापत्तौकिंकार्यनाशोहेतुःकिंवाकार्यकारणयोरभेदः । नाद्यः । कार्यनाशेतद्धर्माणांसुतरांनष्टत्वेनब्रह्मणस्तदनापत्तेः । नांत्यः । अभेदेनतदापत्तेःस्थितावपितुल्यत्वेनसूत्रे “अपीता”वित्यस्यवैयर्थ्यात् । षष्ठेपिविलक्षणयोरपिकार्यकारणभावेदृष्टांतंकथयता “दृश्यते”त्वित्यनेनैवकार्यवृश्चिकधर्माणांकारणेगोमयेनापत्तावपिदृष्टांतस्योक्तत्वेनतेनपौनरुक्त्यं ।

प्र० गेत्यस्यार्थः कार्यधर्मापत्ताविति ॥ सप्तममपीति ॥ एतच्चपरमते । मतांतरेतु प्रधानकारणवादेहिनिर्विकारपुरुषसन्निधानात्प्रधानप्रवृत्तावितरेतरधर्माध्यासादयोदुरुपपादाः । अन्यत्रान्यधर्मानुसंधानरूपोध्यासोनिर्विकारपुरुषस्यनसंभवति । अचेतनायाःप्रकृतेरध्यास

सप्तममप्ययुक्तं । जलाहरणाद्यसमर्थस्यापिमृन्मात्रस्यतत्समर्थघटंप्रतीवशब्दादिहीनस्यापिप्रधानस्यशब्दादियुक्तजगत्प्रत्युपादानत्वसंभवेपि नचेतनस्याचेतनोपादानत्वं । क्वाप्यदर्शनान्निर्विकारत्वाच्चेतिपरेणत्वांप्रत्युक्तदोषस्यतत्पक्षेऽप्राप्तेः । अष्टममप्ययुक्तं । चशब्दाभावेनसिद्धांतहेत्वंतरत्वायोग्यस्यत्वयापि “अन्यथानुमेय”मित्यनेनैकसूत्रत्वेनस्वीकृतस्यच“तर्काप्रतिष्ठाना”दित्यस्यास्मदीयरीत्या अन्यथा “स्वपक्षदोषाच्चे”तिसूत्रोक्ताद्वैपरीत्येनानुमेयं । तर्काप्रतिष्ठानादित्येकवाक्यतयाश्रुतसाध्यान्वयेनशंकाशेषत्वेसंभवति श्रौतस्यविलक्षणयोरपिकार्यकारणभावस्यनहानिः । तर्कस्याप्रतिष्ठितत्वादित्येवमध्याहृतसाध्यान्वयेनवाक्यंभित्वासिद्धांतशेषत्वोक्त्ययोगादनिर्मोक्षप्रतियोगिनोऽनुषंजनीयत्वाच्च । प्रसंगशब्दवैयर्थ्याच्च । किंच किंतर्कमात्रस्याप्रतिष्ठितत्वंकिंवाश्रुत्याद्यननुगृहीतस्य । नाद्यः । तर्काप्रतिष्ठितत्वसाधकतर्कस्याप्यप्रतिष्ठितत्वेनतेनतर्काप्रतिष्ठानासिद्धेः । मीमांसानारंभापाताच्च ।

प्र० स्सुतरांनसंभवतीत्यर्थवर्णनात् ॥ अष्टममिति ॥ एतच्चमतद्वयेपिसमं ॥ एकसूत्रत्वेनेति ॥ एतच्चपरमताभिप्रायेण । मतांतरेतु तर्काप्रतिष्ठानादित्येतद्विभज्यतर्कमूलप्रधानवादप्रत्याख्यानपरत्वेनयोजनात् । तत्रचस्वपक्षदोषात्तर्काप्रतिष्ठानाच्चेतिविन्यासःस्वरसइत्यपिशब्दो

प्र० व्यर्थइतिध्येयं । अस्मदीयरीत्येत्यादिमतद्वयेपिसमं ॥ मंतव्यइति ॥ मननादेस्तर्कानुसंधानरूपत्वादितिभावः । "यस्तर्केणानुसंधत्तेस धर्मंवेदनेतर"इतिरामानुजभाष्योक्तामनुस्मृतिः ॥ यच्चोक्तमिति ॥ उभाभ्यामितिवर्तते । रामानुजमते "शिष्टाः परिशिष्टाइत्यर्थ" इत्येवविशेषः ॥ एतेनेति ॥ एतच्चाद्वैतिमतेनबोध्यं । सुधोक्तदोषमाह ॥ निरीश्वरेति ॥ रामानुजमतेतु "महद्दीर्घवद्वे"तिवक्ष्य

"मंतव्यः सोन्वेष्टव्यः यस्तर्केणानुसंधत्त"इत्यादिश्रुतिस्मृतिविरोधाच्च । नद्वितीयः । ब्रह्मणोनुपादानत्व साधकस्यवैलक्षण्यरूपतर्कस्य "निर्विकार"मित्यादिश्रुत्यननुगृहीतत्वादिति । यच्चोक्तं एतेन शिष्टैर्मनुव्या सप्रभृतिभिःकेनचिदंशेनपरिगृहीतस्यवैदिकदर्शनप्रत्यासन्नस्यप्रधानवादस्यनिरासेन । तैःकेनचिदप्यंशेना परिगृहीताः वैदिकदर्शनाप्रत्यासन्नाःपरमाण्वादिकारणवादाःप्रत्याख्याताइति "एतेने"तिसूत्रार्थइति । तन्न । "एतेनसर्वेव्याख्याता"इत्यत्रापित्वयास्यैवार्थस्योक्तत्वेनपुनरुक्तेः । निरीशसांख्यवादादपिसेश्व रवैशेषिकादिवादानामेवेश्वरवादिभिःशिष्टैःपरिगृहीतत्वादीशकारणत्ववादिवैदिकदर्शनप्रत्यासन्नत्वाच्च । तदुक्तमनुव्याख्याने "नचशिष्टागृहीतत्वंनिरीशादीशवादिन"इति ॥ ७ ॥ असदधिकरणं ॥ ४ ॥

प्र० माणेनपौनरुक्त्यंध्येयं । निरीश्वरेत्यादिनोक्तमर्थमूलारूढंकरोति ॥ तदुक्तमिति ॥ एतेनकस्यचिच्छैवस्यापिमतंनिरस्तंध्येयं । रीति द्वयान्यतरानुसारित्वात् । एवमग्रेपिबोध्यं । ग्रंथगौरवभयान्नप्रपंच्यते ॥ ७ ॥ असदधिकरणं ॥ ४ ॥

प्र० ॥ ॐभोक्त्रापत्तेःॐ ॥ अत्रटीकायामधिकरणोपाधेरस्फुटत्वादन्यत्रोक्तमनुपपत्तिनिरासेनस्थापयितुंस्मारयति ॥अत्रेति॥ **बहुश्रुतीति** ॥
यद्यपि "श्रुतिसिद्धलिंगत्वेनप्रबलये"त्येवतत्रपाठः । तथापि "स्मृतियुक्तिश्रुतिगुणे"त्युपाधिसंग्रहानुसारेणबह्वितितात्पर्योक्तिः । संग्रहा
भिप्रायस्यतथैवाग्रेऽभिधास्यमानत्वादितिभावः ॥ **नतत्प्रयुक्तेति** ॥ श्रुत्यसिद्धत्वप्रयुक्तोयःप्राबल्याभावःसनास्ति । मुख्यार्थत्यागेहिस

॥ ॐभोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत्ॐ ॥ अत्रसुधायांपूर्वंश्रुतिसंवादितयाप्रबलयुक्त्यविरोधउक्तोत्रतुब
हुश्रुतिसिद्धतयाप्रबलयुक्त्यविरोधउच्यतइत्युक्तं । तत्रासदादिशब्दानांपूर्वसिद्धांतरीत्याब्रह्मपरत्वेपिमुख्यार्थ
त्वादसत्कारणत्वेपूर्वपक्ष्युक्तश्रुतिसंवादाभावात्तत्प्रयुक्तप्राबल्यस्याप्यभावः । अत्रतु "एकीभवंती"त्यादीनामत्र
त्यसिद्धांतरीत्यास्थानैक्यादिपरत्वेमुख्यार्थहानेरैक्यश्रुतिसिद्धत्वस्यभावान्नतत्प्रयुक्तप्राबल्याभावः । तथाचपूर्व
त्रश्रुतिसंवादियुक्तिविरोधेपरिहृतेपीहबहुश्रुतिसिद्धतयाप्रबलयुक्तिविरोधाशंकायुक्ता । यद्यपिभावत्वादिकापूर्वा
धिकरणयुक्तिरपिश्रुतिसिद्धा । तथापिसाप्रलयेऽसत्त्वरूपसाध्यंविनाप्युपपन्ना । अत्रत्याजीवाभिन्नत्वादिकायु
क्तिस्त्वसर्वकर्तृत्वरूपसाध्यंविनाऽनुपपन्नेतिपूर्वपक्षोत्थानात्संगतिरगतार्थताऽधिकरणोपाधिश्चसिद्धाइतिभावः ।
यद्वा "नविलक्षणत्वा"दित्यत्रकारीर्यादिविधिवाक्यस्ययुक्तिविरोधेनाप्रामाण्ये "तत्सामान्यादितरेषुतथात्व"मिति

स्यात् । इहचपूर्वपक्षेमुख्यार्थस्यैवग्रहणादितिभावः ॥ भावत्वादिकेति ॥ विमताभावाःप्रलयेऽसंतोभावत्वादित्यादिका "असदेवेदमग्र
प्र० आसी"दित्यादिश्रुतिसिद्धेत्यर्थः । संगतिः प्रत्युदाहरणरूपेत्यर्थः ॥ इतिभावइति ॥ सुधोक्तेरितियोज्यं । स्वयंसंगत्यंतरमाह ॥ **यद्वेति** ॥

प्र० इतिन्यायादिति ॥ आद्यस्यद्वितीयपादेविधिवन्निगदाधिकरणे "विधिश्चानर्थकःक्वचित्तस्मात्स्तुतिःप्रतीयेततत्सामान्यादितरेषुतथात्व" मितिगुणसूत्रोक्तन्यायादित्यर्थः । तत्रहि "अप्सुयोनिर्वाअश्वोप्सुजोवेतसः । वेतसशाखयाचावकाभिश्चविकर्षती"ति । "आपोवैशांता श्शांताभिरेवास्यशुचंशमयती"त्येवंजातीयकेषुविधित्वमेव । नार्थवादत्वमितिप्राप्ते अप्सुयोनिरश्वःकर्तव्यइत्यादिविधिरशक्यत्वादनर्थकः ।

न्यायाद्ब्रह्मकारणवाक्यमप्यप्रमाणमितिशंकानिरस्ता । "अभिमानी"त्यत्रतुसिद्धार्थस्यकारीर्यादिविधिवाक्यवद्वैगुण्यादिभिरसमाधेयाप्रामाण्यस्यमृदादिवाक्यस्ययुक्तिविरोधेनाप्रामाण्येतत्सामान्यात्सिद्धब्रह्मकारणवाक्यमप्यप्रमाणमितिशंकानिरस्ता । "अस"दित्यत्रप्रलयेब्रह्मणएवाभावान्नतस्यकर्तृत्वं । किंतुप्रागभावस्यैवेतियःसाक्षाद्ब्रह्मकर्तृत्वस्ययुक्तिविरोधःसनिरस्तः । अत्रतुप्रलयेब्रह्मणःसत्त्वेपिसिद्धांत्यभिमतस्यब्रह्मैवकर्तृनजीवइत्यस्ययःसाक्षाद्युक्तिविरोधःसनिरस्यतइत्यवांतरसंगतिः । पृथगित्यत्रभेदश्रुतेः "तत्त्वमसी"त्याद्यभेदश्रुतिविरोधोनिरसिष्यते । अत्रतुसर्वकर्तृत्वस्यश्रुतिसिद्धाभेदरूपयुक्त्यविरोधउच्यतइतिभेदः ।

प्र० तस्मात्स्तुतिःप्रतीयेत शमयित्रीभिरद्भिरश्वस्यवेतसशाखानांचसंबंधोयजमानस्यकष्टंशमयतीति । तस्मात्सामान्याद्विध्यसंभवात्स्तुतिसंभवाच्चेतरेषु "ऊर्वाउदुंबर"इत्यादिषु । तथात्वं स्तावकतयार्थवादत्वमित्युक्तं । तथाचास्यापितत्तुल्यन्यायत्वात् "इतिन्याया"दित्युक्तं ॥ इत्यवांतरेति ॥ बहिरंगशंकानिरासानंतरमंतरंगशंकानिरासस्यावसरप्राप्तत्वादवसरसंगतिरित्यर्थः । पौनरुक्त्यशंकांनिराह ॥ पृथगिति ॥

प्र० अतएवेति ॥ सर्वकर्तृत्वस्ययुक्त्यविरोधकथनादेवेत्यर्थः । "फलत्वेपियुक्तिविरोधेंतर्भावादत्रोक्त"मित्युक्तमित्यर्थः । एतेन "मुक्तेश्वरयोर्भेदसमर्थनंफलाध्यायसंगतमतोनैतत्सूत्रार्थ"इतिटीकोक्तशंकानिरस्ताध्येया । विषयसंशयटीकांव्यनक्ति ॥ अत्रविष्णोरिति ॥ इति श्रुतिरिति ॥ "गताःकलाःपंचदशप्रतिष्ठादेवाश्चसर्वेप्रतिदेवतासु । कर्माणिविज्ञानमयश्चआत्मापरेव्ययेसर्वएकीभवंति । यथानद्यस्स्यंदमानास्समुद्रायणास्समुद्रंप्राप्यास्तंगच्छंतिनामरूपेविहाय । तथाविद्वान्नामरूपाद्विमुक्तःपरात्परंपुरुषमुपैतिदिव्य"मित्याथर्वणश्रुतिरित्यर्थः ।

अतएवेहब्रह्मणोमुक्ताभेदमात्रेनपूर्वपक्षपर्यवसानं । किंतुतदभेदरूपयुक्त्यासर्वकर्तृत्वंविरुद्धमितीयंचिंतेहैवपादेसंगता । नतुफलाध्यायइतिभाष्यएवोक्तं । अत्रविष्णोर्जगत्कर्तृत्वादिकंयुक्तिविरुद्धमुतनेतिचिंता । तदर्थंब्रह्मासर्वकर्तृजीवाभिन्नमुतनेति । तदर्थं "परेव्ययेसर्वएकीभवंती"तिश्रुतिःकिंस्वरूपैक्यपरत्वेनमुख्यार्थोतस्थानाद्यैक्यालंबनत्वेनोपचरितार्थेति । तदर्थंवाक्यशेषेदृष्टांतितंनदीसमुद्रैक्यंकिंस्वरूपैक्यंकिंवास्थानाद्यैक्यमिति । ननु "नह्यन्यस्यान्यत्वंयुज्यत"इतिभाष्येपूर्वभिन्नस्यपश्चादभिन्नत्वाभावःपूर्वपक्षयुक्तित्वेनोक्तः । "नान्यदन्यत्वमापन्नंक्वचिद्दृष्टंकथंचने"त्यनुव्याख्यानेतुसिद्धांतयुक्तित्वेन । तत्कथमितिचेदुच्यते ।

प्र० यदिस्वरूपैक्यंवाक्यशेषाभिमतंतदातदनुरोधेनपूर्ववाक्यार्थवर्णनात्तत्सिद्धासर्वकर्तृजीवाभिन्नत्वरूपयुक्तिविरुद्धंविष्णुजगत्कर्तृत्वमितितत्प्रतिपादकश्रुत्यप्रामाण्यं । यदितुस्थानैक्यंतदातादृशजीवाभेदाभावेनहेतोरसिद्धतयानयुक्तिविरुद्धंसर्वकर्तृत्वमितिनाप्रामाण्यमितिभावः । पक्षभेदेनभाष्यटीकांयोजयितुंविरोधमुद्घाटयति ॥ नन्विति ॥ तत्कथमितिचेदिति ॥ भाष्यरीत्याप्रागभेदस्यानुमतत्वेनप्रागसिद्धेनभेदे

प्र० नजीवोनान्यकालेपिब्रह्मणैक्यमापत्स्यते प्राक्ततोत्यंतभिन्नत्वात् यदेवंतदेवंयथाघटःपटेनेतिसाधनायोगात्तदनुरोधेनप्राग्भेदेंऽगीकृतेतेनैवहे तुनामुक्तावप्यभेदोनेतिपूर्वपक्षानुदयइतिभावः । "प्रागभिन्नस्यैवजीवस्यब्रह्मणैक्यमनेनोच्यत उतभिन्नस्याथभिन्नाभिन्नस्ये"तिसुधावाक्यंहृ दिकृत्वाह ॥ **अत्रत्रयइति** ॥ आद्यंविवृणोति ॥ **तत्रेति** ॥ **मुक्तेति** ॥ "गताःकला"इत्युपक्रमात् "परेऽव्यय"इतिश्रवणाच्चेतिभावः ॥ **मुक्तेरिति** ॥ आनंदानुभवरूपायाःप्रागसत्वायथोदयइत्यर्थः । "बलमानंदओजश्चसहोज्ञानमनाकुलं । स्वरूपाण्येवजीवस्यव्यज्यंतेपर माद्विभो"रित्यादिश्रुत्यापरमप्रेमास्पदत्वादिनेदानीमीषदुपलब्धेश्चानंदादिरूपत्वंजीवस्यसिद्धमपिव्यक्तिर्नसिद्धेति**मुक्तेरि**वेत्युक्तं । कारणत्वं

अत्रत्रयःपूर्वपक्षाःसंभवंति । तत्र "एकीभवंती"तिब्रह्मणस्तावन्मुक्ताभेदःश्रूयते । नचतावतैवब्र ह्मणोसर्वकर्तृत्वंसिध्यति । संसारिणइवमुक्तस्यसर्वकर्तृत्वेप्रत्यक्षादिविरोधाभावात् । पूर्वमसतोपि जीवेसर्वकर्तृत्वस्यमुक्तेरिवज्ञानेनोदयसंभवाच्चमुक्ताभिन्नस्यापिब्रह्मणःकथंचित्कारणत्वसंभवात् ।

प्र० तुप्राक्सर्वथानसिद्धं । प्रत्युततदभावएवसिद्धइति**कथंचि**दित्युक्तं । ननुचतुर्थस्यचतुर्थेपादेनवमेऽधिकरणे मुक्ताःकिंसृष्ट्यादिव्यापारवंतउ तनेतिसंदेहे "सर्वान्कामानाप्त्वाऽमृतस्समभव"दितिश्रुतेस्तेषांसत्यकामत्वेनकामितसर्वप्राप्त्युपपत्त्यासर्वशब्दसंकोचायोगान्मुक्तास्सृष्ट्यादिमंत इतिप्राप्ते "अस्माच्छरीरभेदादुत्क्रम्ये"तिजीवप्रकरणात्तेषांजगत्सृष्ट्यादेरभावात् "स्वाधिकानंदसंप्राप्तौसृष्ट्यादिव्याप्रृतिष्वपि । मुक्तानांनैव कामस्स्या"दित्यादिनातेषांतत्रकामनानिषेधेनचसर्वशब्दसंकोचोपपत्तेर्नजगद्व्यापारवंतोमुक्ताइतिमुक्तानांविश्वकर्तृत्वस्यनिषेत्स्यमानत्वात्कथमे

प्र० तदित्यतआह ॥ **जगदिति** ॥ **अत्रत्येति** ॥ तस्येदानीमनुत्थानात् । स्वर्गकामाधिकरणपूर्वपक्षदशायांभावाधिकरणस्येवेतिभावः । उपचारेबीजमाह ॥ **नह्यन्यस्येति** ॥ **भाष्येति** ॥ "नह्यन्यस्ये"तिभाष्येयुक्तेरेवोक्तेरितिभावः । तदुपलक्षणमस्त्वित्यतआह ॥ **पृथगिति** ॥

"जगद्व्यापारवर्ज"मित्यत्रत्वत्रत्यसिद्धांतन्यायेनभेदेसिद्धेपिमुक्तस्यसत्यकामत्वात्सर्वकर्तृत्वमितिशंकानिरासान्नात्रत्यपूर्वपक्षदशायांतत्रत्यसिद्धांतेनमुक्तस्यासर्वकर्तृत्वसिद्धिः । तस्मादसर्वकर्तृत्वेनप्रत्यक्षसिद्धसंसार्यभेदाद्ब्रह्मणोपितथात्वमितिवक्तुंमुक्तावभेदेनसंसारेप्यभेदःसाध्यः । "एकीभवंती"त्यभूततद्भावार्थच्विप्रत्ययस्तु "नह्यन्यस्ये"तियुक्तिविरोधाद्भेदभ्रमनिवृत्तेरभूततद्भावाभिप्रायः । "तत्त्वमसी"तीदानीमप्यभेदश्रुतेः च्विप्रत्ययोस्वरसइतितुन । भाष्यविरोधात् "पृथगुपदेशा"दित्यनेनगतार्थत्वापाताच्चेत्येकःपूर्वःपक्षः । एतंपक्षमाश्रित्यमुक्तावभेदेनपूर्वमभेदंवक्तुं "नही"त्यादिपूर्वपक्षभाष्यंप्रवृत्तं । द्वितीयस्तु च्विप्रत्ययस्वारस्यात्पूर्वंभेदः । मुक्तौत्वभेदः । "नह्यन्यस्ये"तियुक्तिस्तुच्विप्रत्ययरूपश्रुतिबाधितेति । एतत्पक्षदूषणायपूर्वसिद्धेनभेदेनपश्चादपिभेदंसाधयितुं "नान्यदन्यत्व"मित्यादिसिद्धांतानुव्याख्यानंप्रवृत्तमितिनभाष्यानुव्याख्यानयोस्तट्टीकयोर्वाविरोधः ।

प्र० तत्रश्रुत्यवष्टंभेनैवाभेदपूर्वपक्षकरणादितिभावः । एतेन "मुक्तजीवाभिन्नस्यापिकथंचिज्जगत्कारणत्वंनिर्वोढुंशक्य"मित्यादिटीकाविवृता । "द्वितीयेत्विदमुपतिष्ठते । नान्यदिती"तिसुधावाक्यंहृदिकृत्वाह ॥ **द्वितीयस्त्विति** ॥ **च्विप्रत्ययेति** ॥ अतएवटीकायां "योयथाश्रूय

प्र० तेसतथैवेतिव्याप्ते"रित्युक्तमितिभावः । एवंपक्षभेदेनाविरोधमुक्त्वापक्षैक्येनापितमाह ॥ तृतीयस्त्विति ॥ एतंवेति ॥ अयंचपक्षः "द्वितीयनिराकरणेनतृतीयपक्षस्यनिरस्तत्वा"दितिसुधावाक्यादवगम्यतइतिभावः । "जीवाभेदोह्युभयगतविरुद्धधर्मत्यागेनजीवस्येश्वरसालक्ष

तृतीयस्तुपूर्वंभेदाभेदौ । मुक्तौतुकेवलाभेदः । एवंचच्वि
प्रत्यययोयुक्तः । पूर्वंकेवलाभेदाभावात् । "नह्यन्यस्ये"त्या
दियुक्तिविरोधश्चन । पूर्वमप्यभेदस्यसत्त्वात् । एतंवापक्ष
माश्रित्यभाष्यानुव्याख्यानेप्रवृत्ते । तत्रभाष्येच्विप्रत्यये
नपूर्वंभेदस्यसिद्धत्वात्पूर्वपक्षानुपयुक्तत्वाच्चाभेदएवसाधि
तः । अनुव्याख्यानेपिपूर्वंभिन्नाभिन्नस्यापिपश्चात्केवलाभे
दोनास्तीतिभावेन"नान्यदन्यत्व"मित्युक्तं । अत्रचपक्ष
त्रयेप्रत्येकंपुनःपक्षत्रयंसंभवति । एकपदलक्षणयैववविरो
धपरिहारात्चिन्मात्राच्चिन्मात्रस्यभेदाप्रसक्त्यैक्योपदेश

प्र० ण्यग्रहणेनवेश्वरस्यजीवसालक्षण्यग्रहणेनवासंभवती"तिटीकांविवरीतुमाह ॥ अत्रचेति ॥ एकपदेति ॥ जीवपरवाचिपदयोर्मध्येइत्यर्थः

प्र० ॥ वैयर्थ्यादिति ॥ भेदभ्रमनिरासार्थत्वात्तस्येतिभावः ॥ असत्यंत्विति ॥ तदुक्तंसुधायां "नचकाल्पनिकंलक्षणमस्त्वितिवाच्यं । अनं
वैयर्थ्याच्चैकपदलक्षणायाएकत्रैवविशिष्टरूपत्यागेनब्रह्मणःप्रत्यक्षसिद्धासर्वकर्तृजीवसालक्षण्येनवाजीवस्यश्रुतिसिद्धसर्व
कर्तृब्रह्मसालक्षण्येनवामिथ्यावादिरीत्यापदद्वयलक्षणयाउभयत्रापिविशिष्टरूपत्यागेनचिन्मात्रैक्येनवेति । तत्राद्येलक्ष
णस्यासंभवः । द्वितीयेऽतिव्याप्तिः । सदापिशुद्धाभेदइतिपक्षेसंसारिणि मुक्तावेवाभेदइतिपक्षेमुक्तेःपूर्वंभेदाभेदावि
तिपक्षेपिमुक्तेऽभेदांशमादायसंसारिणिचातिव्याप्तेः । तृतीयेपिसत्यंकर्तृत्वमसंभवि । असत्यंतुप्रधानादावतिव्याप्तं ।
सिद्धांतिनोऽनिष्टंच । एतदेवपक्षत्रयमभिप्रेत्यटीकायां "जगत्कारणत्वादीश्वरैकनिष्ठंनसंभवती"त्युक्तं । एवंच
"उभयगतविरुद्धधर्मत्यागेने"तिटीकावाक्यउपरितनोवाशब्दोऽनुषंजनीयः । [यद्वा तत्राद्यद्वितीययोः "उभय
गतविरुद्धधर्मत्यागेने"तिटीकायांब्रह्मणःसर्वकर्तृत्वंजीवस्यतुतन्नेतिव्यवस्थात्यागएवाभिप्रेतः । नतुमिथ्यावादिरीत्यो
भयत्रविशिष्टरूपत्यागः । तृतीयेतु "जीवस्येश्वरसालक्षण्यग्रहणेनवेश्वरस्यजीवसालक्षण्यग्रहणेनवे"तिटीकायामन्य
तरपरिशेषमात्रमभिप्रेतं । नत्वेकगतधर्मत्यागः ।] पूर्वपक्षोपसंहारटीकायां "परमार्थत इत्युक्तिरपितात्त्विकाभे
देनाव्यवस्थाचेत्काल्पनिकभेदेनव्यवस्थाकिंनस्यादितिशंकायांपरमार्थतोब्रह्मैवकारणंनतुजीवइतिसिद्धांतहानिरितिस
माधातुं । नतुमिथ्यावादिप्रक्रिययाव्यवहारतोब्रह्मैवकर्तृनजीवइतिव्यवस्थासिद्धावपिपरमार्थतःसानसिध्यतीतिवक्तुं ।

प्र० गीकारात् । प्रधानादिष्वपिसंभवेनातिप्रसंगाच्चे"ति । उक्तलक्षणदोषेषुटीकाविरोधमाशंक्याह ॥ पूर्वपक्षेति ॥ नत्विति ॥ येनोक्ताति

प्र० व्याहत्यादिदोषोनयुक्तस्स्यादितिभावः ॥ प्रस्तुतेति ॥ "सर्वथानजगत्कारणत्वादीश्वरैकनिष्ठ"मितिप्रस्तुतेत्यर्थः । एतेन "नब्रह्मणोजग त्कारणत्वंवास्तवंभवती"तिसुधावाक्यमप्युक्ताभिप्रायमितिभावः । ननुतत्रजीवसालक्षण्यमेवभाति । तत्कथमित्यतआह ॥ सुधायांत्विति ॥ संग्रहंव्याचष्टे ॥ उक्तंद्विविधमिति ॥ एकपदलक्षणयोभयपदलक्षणयेत्युक्तद्विविधमित्यर्थः । प्राक्त्रैविध्योक्तावप्येकपदलक्षणापक्षेऽवांत

प्रस्तुतानुपयोगित्वात् । सुधायांतुप्रत्यक्षस्यप्राबल्याद्ब्रह्मणःप्रत्यक्षसिद्धासर्वकर्तृजीवसालक्षण्यमेववक्तव्यमि त्यसंभवएवनिर्धारितः । सिद्धांतमाह ॥ [८६१] नंत्र्यध्याहारेणेत्यादिना ॥ अयंभावः ॥ वाक्यांतरविरोधाच्च पूर्वापरविरोधतः । उपपत्तिविरोधाच्चनैवयुक्तंमतत्रयं ॥ १ ॥ उक्तंद्विविधंपक्षत्रयमपिमुक्तावभेदसापेक्षं । सएवत्वसिद्धः । "एकीभवंती"तिश्रुतेर्भाष्ये "यथोदक"मितिश्रुत्यंतरादिविरोधोक्तेः । न्यायविवरणेच "निरंजनःपरमंसाम्य"मितिपूर्ववाक्यविरोधस्य "परात्परंपुरुषमुपैतिदिव्य"मित्युत्तरवाक्यविरोधस्यचोक्तेः। अभेदपरत्वेचपरेणाव्ययेनेतितृतीयास्यान्नतुसप्तमी । तया "सायंगोष्ठेगावएकीभवंती"तिवत्स्थानैक्यस्यैव प्रतीतेः। तथा "कर्माणिविज्ञानमयश्चआत्मे"तिपूर्ववाक्यस्थकर्मशब्दविरोधः । कर्मणांब्रह्मणैक्यायोगादि

प्र० रभेदमविवक्षिततत्वाद्विविधमित्युक्तं । श्रौतत्वात्कथमसिद्धइत्यतआह ॥ एकीभवंतीति ॥ "उदकंतूदकेसिक्त"मितिस्मृतिरादिपदार्थः ॥ द्वितीयपादंविवृणोति ॥ न्यायविवरणेचेति ॥ एतेन "निरंजन"इत्यादिटीकैतन्मूलेत्युक्तंभवति । तृतीयपादंव्यनक्ति ॥ अभेदेति ॥

प्र० सहयोगेतृतीयाभिधानादितिभावः । ननुकर्माण्येकीभवंतीत्यस्यचित्स्वरूपेभ्रांत्यारोपितानिज्ञानेननिवर्त्यंतइत्यभिप्रायइत्यतआह ॥ **इत्यादि बाधकानांचेति** ॥ तथात्वेविज्ञानात्मनोपिनिवृत्तिस्स्यात् । सक्रुच्छ्रुतैकीभावशब्दस्यार्थद्वयायोगात् । "आकाशस्संभूत"इत्यादौत्वनन्यगत्यातथात्वमुपेयते । किंचकर्मणांनिवृत्त्युपगतौतेषांकलात्वेन "गताःकलाःपंचदशे"त्यत्रकर्मभिस्सहषोडशकलाइत्येवोक्तिस्स्यान्नतुपृथङ्निवृत्त्युक्तिः । "किंचकर्मणांविज्ञानात्मनासहोक्तिश्चव्यर्था । निवृत्त्यर्थत्वे "एकीभवंती"त्यत्रामुख्यार्थत्वस्यत्वयापिस्वीकार्यत्वा"दित्यादीनांतत्व

त्यादिबाधकानांचग्रंथांतरउक्तेः । भेदाभेदपक्षेपिपूर्वमप्यभेदस्यविद्यमानत्वेनाद्यांत्यपक्षयोःच्विप्रत्ययस्यचायोगात् मध्यांत्यपक्षयोः "नान्यदन्यत्व"मित्यनुव्याख्यानोक्तोपपत्तिविरोधाच्चान्यपरत्वात् । किंच भिन्ननद्यब्धिदृष्टांतंवदंतीयंश्रुतिः स्वयं । गौणार्थपरतांस्वस्याआचष्टेस्पष्टमेवनः ॥ १ ॥ श्रूयतेहि "एकीभवंती"त्यस्यानंतरमेव "यथानद्यःस्यंदमानाःसमुद्रायणाःसमुद्रंप्राप्यास्तंगच्छंती"तिभिन्ननदीसमुद्रदृष्टांतः । एवंच रथ्याजलंविष्णुपदीजलेनैकत्वमागतं । इतस्ततोगतागावःसायमेकत्वमागताः ॥ १ ॥ एकीभूतातुसासेनापांडवानभ्यवर्तत । इत्यादिवद्धवेदेकीभवंतीत्यादिवेदवाक् ॥ २ ॥

प्र० निर्णयटीकायांन्यायामृतेचोक्तेरित्यर्थः । ननुस्थानैक्यपरत्वेऽमुख्यार्थत्वंश्रुतेस्स्यादितिचेन्न । कथितबाधकैर्मुख्यार्थत्यागस्यावश्यकत्वात् । वाक्यशेषबलाच्चमुख्यार्थत्यागोयुज्यतइतिभावेनाह ॥ **किंचेति** ॥ अयंचपरिहारोभाष्येयथोदकंशुद्धेशुद्धमित्यादिस्मृत्युक्त्यातुल्यन्यायतया
ता. चं. १४६ सूचितः । तत्वनिर्णयेकंठोक्तः । व्याचष्टे ॥ **श्रूयतेहीति** ॥ पर्यवसितंश्रुत्यर्थमाह ॥ **एवंचेति** ॥ रथ्येतिस्वसंग्रहः ॥ **एकीभूतेति** ॥

प्र० न्यायविवरणोक्तोमत्यैक्येदृष्टांतोयं । प्राक्तनद्वयंतुस्थानैक्ये । तदुक्तं "जीवस्यपरमैक्यंतुबुद्धिसारूप्यमेवतु । एकस्थाननिवासोवाव्यक्ति स्थानमपेक्ष्यत्वि"ति । भिन्ननदीत्युक्तंभेदंसाधयति ॥ **नचेति** ॥ ननुमानभेदाद्भेदःप्रागेव "यतोवृद्धि"रितिस्मृत्युक्त्यासाधितः । पुनःक

नचजलस्यजलांतरमेलनेनैक्यं । "तादृगेवे"तिभाष्योक्तसावधारणश्रुत्या "यतोवृद्धिः प्रदृश्यत"इतिसयुक्तिकस्मृत्याचविरोधात् । किंच "मानभेदात्स्पर्शरसपूर्वभेदाच्चनीर योः । मेलनेप्यभिदानास्तियथैवक्षीरनीरयोः"॥ १ ॥ नकेवलं "यतोवृद्धि"रितिस्मृत्युक्तं परिमाणभेदमात्रं । किंतुशीतोष्णयोर्मधुरोषरयोस्संगतसरित्संबंधिजलयोर्मेलनेस्पर्शादि भेदोपिदृश्यते । अन्यथाहंसेनविविच्यमानयोःक्षीरनीरयोरप्यभेदःस्यात् । द्रुतस्वर्ण ताम्रयोर्मेलनेनाभेदेतत्कार्येपणादौकेवलस्वर्णादिकार्यपणान्मूल्यादिभेदश्चनस्यात् । क्षी रेसिक्तासुराचक्षीरंस्यात् । प्रसिद्धश्चलोकेसंगतानांकृष्णादिसप्तनदीजलानांगंगादिसह स्रनदीजलानांचपुनःप्रत्येकंसमुद्रसंगमार्थविभक्तानांविलक्षणपूर्वरूपरसादिमत्तयाभेदः ।

प्र० थंसंग्रहेतदुपादानमित्यतोविवृणोति ॥ **नकेवलमिति** ॥ **द्रुतेति** ॥ द्रवीभूतेत्यर्थः । ननु भवतुलोकेवृद्ध्याद्युपलंभेनभेदः । नदीसमुद्रयो स्तुतदनुपलंभात्कथंभेदइतिचेन्न । तुल्यन्यायतयानुमानसिद्धत्वात् । "नहिभिन्नानांनदीजलपरमाणूनांसामुद्राणुभिरैक्यंयुज्यत"इतितत्व

प्र० निर्णयादौभगवत्पादादिभिर्भेदसमर्थनाच्च । अंगीकृतश्चत्वयापीत्याह ॥ **किंचेति** ॥ दृष्टांतेभेदोपलंभोस्तिनात्रेत्यतोबीजमाह ॥ **द्रवेति** ॥ सुधोक्तंविवृण्वन्परमतमनूद्यनिराह ॥ **ब्रह्मणइति** ॥ **विवर्तेति** ॥ ब्रह्मतादात्म्यरूपशंकाबीजाभावादितिभावः । "भोक्तृत्वापत्तितइ

किंच "अवस्थितेरितिकाशकृत्स्न"इतिसूत्रेभामत्यामेव "कापुनर्नद्यभिमताऽऽयुष्मतः । किंपाथःपरमाणव उतैषांसंस्थानभेद आहोस्वित्तदारब्धोऽवयवी । तत्रसंस्थानभेदस्यवा ऽवयविनोवासमुद्रनिवेशेविनाशात्कस्यसमुद्रेणैकता । नदीपाथःपरमाणूनांतुसमुद्रपाथः परमाणुभ्यःपूर्वावस्थितेभ्योभेदएव । नाभेदः । एवंसमुद्रादपितेषांभेदएवे"त्यादिनानदी समुद्रयोरभेदोनिरस्तः । एवंच माषादिवच्चराश्यादौसभादौब्राह्मणादिवत् । जलेजलांतरस्या पिसंश्लेषोनत्वभिन्नता ॥ १ ॥ द्रवद्रव्यत्वेनान्योन्यंव्यामिश्रणात्तुभेदाप्रतीतिरिति । यदु क्तंपरैः ब्रह्मणउपादानत्वेभोक्तुःशरीरस्यभोग्यत्वापत्तेर्भोग्यस्यचशब्दादेर्भोक्तृत्वापत्तेस्तयो रविभागःस्यात् । द्वयोरपिपरमकारणब्रह्मणोनन्यत्वादितिप्राप्ते मैवं एकसमुद्रकार्याणांफेनत रंगादीनामिवविभागोपपत्तेरितिसिद्धांतइति । तन्न । विवर्तसिद्धांतेसांकर्यशंकानुदयात् ।

प्र० तियन्मतंतत्कुतोहरिः । भोक्त्रापत्तेरितिप्राहे"त्यनुव्याख्यानोक्तिरुपलक्षणं । पूर्वोत्तरपक्षदोषोक्तेरितिभावः । परिणामपक्षेपिदोषमाह ॥

प्र० किंचेति ॥ कार्यइति ॥ कार्यप्रपंचेचेतनाचेतनविभागाभावेनेत्यर्थः । ननुसुवर्णस्यैकैकभागेनकटकादिजनकतयाभिन्नावयवोपादानतया कार्यभेदोयुक्तः । नैवंब्रह्मणीत्यन्योपादानस्यैवान्यंप्रत्युपादानत्वात्सांकर्यशंकेत्याशंक्यनिरस्यति ॥ सुवर्णेति ॥ इतिपूर्वपक्षयितव्यमिति ॥

किंच पूर्वपक्षिणाकिंकार्याणांचेतनाचेतनत्वरूपेणविभागोनस्यादित्यापाद्यतेकिंवायेनकेनचिद्रूपेण । नाद्यः । चेतनस्यानादित्वेनकार्यैतद्विभागाभावेनेष्टापत्तेः । ननुचेतनस्यानादित्वेपिब्रह्माभेदाद्ब्रह्मकार्यत्वेनब्रह्माभिन्नं यज्जडंतद्रूपत्वापत्तिरितिचेन्न । "दृश्यते"त्वित्यतीताधिकरणस्थसूत्रेणैवजडोपादानत्वेपिब्रह्मणश्चेतनत्वाहानेरुक्तत्वेनब्रह्माभेदेनजीवस्यजडत्वाप्राप्तेः । नांत्यः । एकमहासुवर्णपिंडकार्याणांकटकमकुटाद्यवस्थानां भेदस्यैवदर्शनेनब्रह्मकार्याणामप्याकाशवाय्वादीनांभेदसंभवात् । सुवर्णपिंडंसावयवंब्रह्मतुनिरवयवमिति चेत्तर्हित्वन्मते "कृत्स्नप्रसक्ति"रितिसूत्रइवनिरवयवस्यब्रह्मणोयुगपदनेकद्रव्योपादानत्वंनयुक्तमितिपूर्वपक्षयितव्यं । नतुकार्याणांविभागोनयुक्तइति । तस्मान्नपूर्वपक्षोदयः । सिद्धांतोप्ययुक्तः । विवर्तवादेफेनतरंगादिदृष्टांतोक्त्ययुक्तेः । फेनतरंगादीनांभिन्नानेकजलावयवोपादानकत्वेनैकोपादानकत्वाभावाच्च ।

प्र० तत्सिद्ध्युत्तरकालीनत्वादेतद्विचारस्येतिभावः । सुधायामद्वैतिमतेयथानुव्याख्यानंसूत्राक्षरास्वारस्यमुक्त्वा "येतुव्याचक्षते चिदचिद्वस्तुशरीरत्वेब्रह्मणोजीववद्दुःखादिभोक्तृत्वापत्ते"रित्यादिनारामानुजमतमप्यनूद्यसंभोगसूत्रेणगतार्थत्वादिनादूषितं । तत्सूत्राक्षरास्वारस्यस्याप्युपल

प्र० क्षणमितिभावेनतन्मतेसूत्रार्थमनूद्यनिराह ॥ केचित्त्विति ॥ स्थूलसूक्ष्मचिदचिद्वस्तुशरीरस्यकार्यकारणरूपत्वात्स्वभावविभागउपपद्यतइत्युक्तं । तन्नयुक्तं । ब्रह्मणःशरीरित्वेतस्यजीववच्छरीरधातुसाम्यवैषम्यनिमित्तसुखदुःखादिभोक्तृत्वापत्तेस्स्वभावविभागोनस्यादितिचेन्न । यथाकांतारनिपतितस्यापिनृपस्यनदंशमशकाद्युपद्रवस्तथात्रापिस्यादित्याहुरित्यर्थः ॥ भावेति ॥ अयंचदोषःप्राचीनपक्षेपि

केचित्तु ब्रह्मणःशरीरित्वेजीववद्दुःखादिभोक्तृत्वापत्तेरविभागःस्यादितिशंकानिरासार्थमिदंसूत्रमित्याहुः । तन्न । अस्मद्रीत्याभोक्तुर्जीवस्यब्रह्मत्वापत्तेरित्यल्पाध्याहारेणोपपत्तौब्रह्मणःशरीरित्वइत्यापादकाध्याहारस्य आपाद्येपिदुःखादिपदाध्याहारस्य भोक्तृशब्देभावप्रधानतायाश्चकल्प्यत्वात् । अस्याःशंकायाः "संभोगप्राप्ति"रित्यत्रैवनिरस्तत्वाच्च । ननु तत्रशरीरांतरावस्थानमात्रप्रयुक्तभोक्तृत्वाशंकायानिरासः । इहतुशरीरस्वामित्वप्रयुक्तायाइतिचेन्न । तथापित्वयातत्र "नहिशरीरांतरवर्तित्वमेवसुखदुःखहेतुः । अपितुपुण्यपापरूपकर्मवशत्वं । तत्त्वपहतपाप्मनःपरमात्मनोनसंभवती"त्युक्तत्वात् । अत्रच "नहिजीवस्यशरीरधातुसाम्यवैषम्यनिमित्तसुखदुःखभोक्तृत्वंसशरीरत्वकृतं । अपितुपुण्यपापरूपकर्मकृतं । अपहतपाप्मनस्तुपरमात्मनःस्थूलसूक्ष्मरूपकृत्स्नजगच्छरीरत्वेपिकर्मसंबंधगंधोनास्ती"त्युक्तत्वात्परिहारभेदाभावात् । अतिदेशत्वेतुतदानंतर्यंस्यात् ।

प्र० योज्यः ॥ संभोगेति ॥ ननुतद्भाष्यएतदेवाशंक्यतत्रह्युपास्यतयाहृदयायतनेसन्निधानस्यशरीरांतर्वर्तित्वमात्रेणभोगप्रसंगोनविद्यतइत्युक्तं इहतुजीववद्ब्रह्मणोपिशरीरित्वेतद्वदेवसुखदुःखयोर्भोक्तृत्वप्रसंगोदुर्वारइत्युच्यतइत्यनेनसमाहितमित्यतस्तदाशंक्यनिराह ॥ नन्विति ॥

प्र० इष्टापत्तेरिति ॥ सर्वज्ञत्वादीश्वरस्यसुखदुःखादिसाक्षात्कारस्यत्वयापिस्वीकृतत्वादितिभावः ॥ ७ ॥ **भोक्त्रधिकरणं** ॥ ५ ॥
॥ ॐतदनन्यत्वंॐ ॥ टीकायामस्फुटत्वात्सुधोक्तमेवाधिकरणोपाधिंपूर्वापरापौनरुक्त्यायाह ॥ **अत्रेति** ॥ ननु सुधायां महदादिसृष्टिः कर्तृभिन्नस्वतंत्रकारणसापेक्षा । सृष्टित्वात्पटसृष्टिवत् । महदादिकंकर्तृव्यतिरिक्तकारणायत्तोत्पत्त्यादिकं । कार्यत्वात् घटवदित्यादिना

नन्वत्रोक्तंसुखदुःखादेःकर्मोपाधिकत्वंस्वीकृत्यसुखदुःखादिरहितस्यापीशस्यसन्निधानप्रयुक्तायाःजीवगतदुःखादिभोक्तृताशंकायास्तत्रनिरासइतिचेत् तत्रशंकितंभोक्तृत्वंकिंस्वगतत्वेनान्यगतदुःखाद्यनुसंधातृत्वंकिंवातत्साक्षात्कारित्वमात्रं । नाद्यः । जीवस्याप्यन्यगतदुःखादौस्वगतत्वभ्रांतेरभावेनतदापादनायोगात् । नांत्यः । इष्टापत्तेरिति ॥ ७ ॥ **भोक्त्रधिकरणं** ॥५॥
॥ ॐतदनन्यत्वमारंभणशब्दादिभ्यःॐ॥ अत्रबहुयुक्तिविरोधःपरिह्रियते । तत्रचबहुत्वं महदादिकंकर्त्रन्यस्वतंत्रकारणसापेक्षं । सृष्टत्वात् । घटवत् । तत्सृष्टिस्तत्सापेक्षा । सृष्टित्वात् । घटसृष्टिवदितिप्रयोगभेदमात्रान्नभवति । किंतु महदादिसृष्टिःकर्त्रनधीनसत्ताकाधिष्ठानसापेक्षा । तथातदनधीनशक्तिकाधिष्ठानसापेक्षा । तथोक्तरूपकरणसापेक्षा । सृष्टित्वात् ।

प्र० प्रयोगभेदोक्त्यातेनैवबहुत्वमितिभाति । तथात्वेपूर्वत्रापि ईशोनसर्वकर्ता । असर्वकर्तृजीवाभिन्नत्वात् । सर्वकर्तृत्वंवानेशनिष्ठं । असर्वकर्तृजीवाभिन्नेऽयुक्तत्वादित्यादिरूपेणपूर्वत्रापिप्रयोगभेदसंपादनसौलभ्यादित्यतआह ॥ **तत्रचबहुत्वमिति** ॥ "कर्त्रनधीनसत्ताशक्त्यादिमत्कारणांतरसापेक्षाखलुपटादिसृष्टिर्दृष्टे"तिसुधावाक्यंहृदिकृत्वाह ॥ **किंतुमहदादीति** ॥ प्रयोगभेदप्रदर्शनंतुशिष्यव्युत्पादनार्थमिति ॥ ८७३ ॥

प्र० भावः ॥ **एवमिति** ॥ स्थितिःकर्त्रनधीनसत्ताशक्त्यादिमदधिष्ठानसापेक्षा । एवंसंहृतिनियमनादयोपीत्यर्थः ॥ **तदुपेत्येति** ॥ एतेन "असदितिचे"दितिप्रागपिप्रलयेसर्वासत्त्वमाशंकितमिहापि "असद्व्यपदेशा"दितितदाशंक्यतइतिपौनरुक्त्यंनिरस्तंबोध्यं ॥ **संगतिरिति** ॥ सामान्यविशेषविचाररूपेण "अत्ता गुहां"इत्यत्रेवावसरसंगतिरित्यर्थः । "तज्जगत्सृष्ट्यादिकंविषय"इत्यादिटीकांव्यनक्ति ॥ **अत्रजन्मा**

एवंस्थित्यादिरपीतिप्रमेयभेदादितिनातिप्रसंगः । पूर्वत्रेश्वरस्यविश्वकर्तृत्वमेवनेतिशंकापरास्ता । अत्रतुश्रुतिसिद्धंतदुपेत्यस्वानधीनसत्तादियुक्तसाधनसापेक्षंतदितिशंकानिरस्यतइतिसंगतिः । अत्रजन्मादिसूत्रेविवक्षितं ब्रह्मणःस्वतंत्रसाधनांतरनिरपेक्षकर्तृत्वंयुक्तिविरुद्धमुतनेतिचिंता । तदर्थं "किंस्विदासीदधिष्ठानमारंभण"मित्यत्रकिंशब्दःकिंपरिहाराध्याहारेणप्रश्नार्थःकिंवातदनध्याहारेणाक्षेपार्थइति । तदर्थं "अद्भ्यस्संभूत"इत्यादिश्रुतिःकिंस्वतंत्रसाधनांतरपरोतपरतंत्रसाधनांतरपरेति । तदर्थंकर्तुःस्वतंत्रसाधनापेक्षाकिंकर्तृत्वप्रयुक्तोताशक्तिप्रयुक्तेति । पूर्वपक्षमाह ॥ **स्वतंत्रेति** ॥ अयंभावः । उक्तानुमानैरीशोपिस्वतंत्रसाधनापेक्षः ।

प्र० दीति ॥ **युक्तीति** ॥ प्रागुदाहृतयुक्तीत्यर्थः । सौत्रारंभणशब्देत्येतदंशसूचितांचिंतामाह ॥ **किंस्विदिति** ॥ "सत्वाच्चावरस्ये"तिसूत्रसूचितामाह ॥ **अद्भ्यइति** ॥ यद्याद्यःकल्पस्तदा ईश्वरस्यकर्तृत्वेनस्वतंत्रसाधनस्यावश्यकत्वेन "अद्भ्य"इत्यादेस्तत्परत्वावश्यंभावात्तदनुरोधेन "किंस्वि"दित्यस्यस्वतंत्रसाधनाक्षेपायोगेनप्रश्नार्थत्वात्तादृशकर्तृत्वंयुक्तिविरुद्धं । द्वितीयेतुनेतिव्यक्तमितिभावः । सूत्रांतरसूचितातूहनी

प्र० येतिभावः । प्रागुक्तसृष्टित्वादिहेतूनामनीशकर्तृकसृष्टित्वमुपाधिमाशंक्य “युक्ते”रितिसूत्रांशव्यावर्त्यसमाधिमाह ॥ **यदिचेति** ॥ **नापेक्षेतेति** ॥ तथाचबाधकतर्कसध्रीचीनतया “अनुकूलेनतर्केणे”तिन्यायात्पक्षएवोपाधेस्साध्यव्यापकताभंगइतिभावः । ननु युक्तिःश्रुतिबाधितेत्यतस्तांसावकाशयति ॥ **किंस्विदिति** ॥ “किंस्विदासीदधिष्ठानमारंभणंकतमत्स्वित्कथासीत् । यतोभूमिंजनयन्विश्वकर्माविद्यामौर्णोन्महिनाविश्वचक्षाः” । इत्यष्टमाष्टकस्थश्रुतौकिंशब्दस्यप्रश्नाक्षेपसाधारण्येपि “किंस्विद्धिमस्यभेषज”मित्यस्य “अग्निर्हिमस्ये”तिपरिहारा

यदिचेशत्वात्तदनपेक्षातर्हिततएवस्वाधीनसत्ताकमप्यांतरंज्ञानेच्छादिकंबाह्यंचकालकर्मप्रधानादिसाधनंनापेक्षेत। “किंस्विदासी”दितिवाक्यंतु “अद्भ्यःसंभूत”इत्यादिभिःस्वतंत्रसाधनोक्तेस्तदविरोधायपरिहाराध्याहारेणप्रश्नोवाऽस्मदादेरिवसर्गानंतरभाविसाधनंनेत्येवंपरंवा। यद्यपि “अद्भ्यःसंभूत”इत्यादौसाधनांतरमेवोक्तं। नतुतस्यस्वातंत्र्यं। तथापिपारतंत्र्यानुक्तौस्वातंत्र्यंस्वतःप्राप्तं।

प्र० नुरोधात्प्रश्नार्थत्वमिवात्रापितथात्वंयुक्तं। नचाध्याहारोनिर्बीजः। “अद्भ्यःसंभूतःपृथिव्यैरसाच्च विश्वकर्मणस्समवर्तताधि । तस्यत्वष्टाविदधद्रूपमेति तत्पुरुषस्यविश्वमाजानमग्रे” । इतितैत्तिरीयश्रुतौ तत्पुरुषाख्योहिरण्यगर्भोविश्वकर्मणोहरेस्सकाशादबाद्युपलक्षितभूतैरसोपलक्षिततन्मात्राभिश्चोत्पन्नइत्युक्त्यास्वतंत्राबादिसाधनप्रतीतेरित्यर्थः । आक्षेपार्थत्वमुपेत्याप्याह ॥ **अस्मदिति** ॥ श्रौताधिष्ठानादिशब्दस्तद्विशेषपरइत्यर्थः । भाष्येस्वतंत्रसाधनपरतयोदाहृतांश्रुतिमाक्षिप्यसुधोक्तमेवसमाधिमाह ॥ **यद्यपीति** ॥ एतेन “सत्त्वाच्चावरस्ये”तिसूत्र

प्र० व्यावर्त्योक्तिपरा "नन्वद्ध्य"इत्यादिटीकाविवृता । गौरवतर्कपराहतत्वाच्चोपाधेस्साध्यव्यापकत्वंनेत्याह ॥ लोकइति ॥ यद्वा "यदिचे" त्यादिनाहेतूनामप्रयोजकत्वशंकानिराकृता । "लोक"इत्यादिनासोपाधिकत्वमाशंक्यनिरस्यतइतिज्ञेयं ॥ सर्वस्येति ॥ "द्रव्यंकर्मचका लश्चस्वभावश्चेतनाधृतिः । यत्प्रसादादिमेसंतिनसंतियदुपेक्षये"त्यादिश्रुतिरित्यर्थः । ननुभवेदनादित्वेतदनधीनता । साधनादिकमपितेनैव सृष्टमस्त्वित्यतआह ॥ अन्यथेति ॥ "युक्तिविरुद्धंचानुमान"मित्यादिसौत्रादिपदोक्तयुक्तिविवृतिपरभाष्यटीकोक्तन्यायंसंगृह्णाति ॥ स्वतं

लोकेस्वतंत्रसाधनापेक्षत्वेचकर्तृत्वमेवतंत्रं । लाघवात् । नत्वशक्तकर्तृत्वं । गौर

वात् । सर्वस्येशाधीनत्वश्रुतिश्चतत्सृष्टविषया । नतुसृष्ट्युपकरणविषया । अन्य

थासाधनादिकमीशेनसाधनांतरेणसाध्यं । तदप्यन्येनेत्यनवस्थेति । सिद्धांतमाह॥

सिद्धांतयदिति ॥ अयंभावः । स्वतंत्रसाधनापेक्षालोकेऽशक्तिनिबंधना । ईश्व

रस्यत्वसामर्थ्येनकुत्रापीश्वरत्वतः ॥ १ ॥ द्रव्यस्यकर्मकालादेःश्रूयतेचेशतंत्रता ।

प्र० त्रेति ॥ एतेन स्वतंत्रकर्तृत्वादीश्वरोनोक्तविधसाधनापेक्षः । व्यतिरेकेणकुलालादिवदित्यादियुक्तिबाधिताःप्रागुक्तहेतवइत्युक्तंभवति । ननू क्तमप्रयोजकोयंहेतुरित्यतस्तदनुग्राहिकाश्रुतिरस्तीतिभावेन "सत्त्वाच्चे"तिसूत्रभाष्यटीकातात्पर्यमाह ॥ द्रव्यस्येति ॥ "द्रव्यंकर्मचे"ति श्रुताविति भावः । एतेन "अद्ध्य"इत्यादेरप्येतच्छ्रुत्यनुरोधेनपरतंत्रसाधनपरतयातत्संवादाभावेन "किंस्विदासी"दित्यादेराक्षेपपरतयापरतं

प्र० त्रसाधनपरानेकश्रुतिसहितयुक्तिबाधिताःपूर्ववाद्युक्तकेवलहेतवः । एतद्बलादेवगुर्वप्यनीशकर्तृत्वमेवोक्तसाध्येप्रयोजकंकल्प्यं । तेनप्रमित त्यागायोगादितिभावस्सूचितः । नन्वीशस्यस्वतंत्रत्वेमहदादिसाधनसंपादनेनकार्यनिर्माणमयुक्तं । साधननिरपेक्षेणैवकरणप्रसंगादित्यतः "युक्ते"रितिसूत्रांशभाष्यादितात्पर्यमाह ॥ **नानेति** ॥ नन्वीशस्यशक्तत्वाल्लोकवैषम्यमित्यतआह ॥ **स्वाधीनेति** ॥ तुरीयपादोक्तंव्य

नानाशिल्पेषुनिपुणःसाधनंस्वयमेवहि ॥ २ ॥ संपाद्यतेनकार्याणिकु
र्वँल्लोकेपिदृश्यते । स्वाधीनसाधनादानंत्वीशस्यनविरुध्यते ॥ ३ ॥
प्रमितत्वाच्चलीलात्वादीशत्वाघातुकत्वतः । लीलयादंडमालंब्य
गच्छन्किंपंगुतांव्रजेत् ॥ ४ ॥ अनादिसाधनानामपीशाधीनत्वा
न्नानवस्था । साधनांतरस्यच"अद्भ्यःसंभूत"इत्यादिभाष्योदाहृत
श्रुतिसिद्धत्वान्नतन्मात्राक्षेपः । किंतुस्वतंत्रसाधनाक्षेपएवेति ॥

प्र० नक्ति ॥ **लीलयेति** ॥ ननुसाधनानामीशायत्तत्वेऽनवस्थोक्तेतिचेन्न । अंततोऽनादित्वोपगमात् । नचानादित्वेऽन्याधीनत्वायोगः । गाय त्र्यधिकरणएवास्यार्थस्योपपादनादितिभावेनाह ॥ **अनादीति** ॥ ननु "किंस्विदासी"दितिसौत्रश्रुतौसाधनमात्राक्षेपोभाति । अन्यथात द्विशेषलक्षणापत्तेःकथंसाधनांतरोपगमनमित्यतआह ॥ **साधनेति** ॥ आद्यसूत्रे "सिद्धसाधनतास्यादित्यतोबह्वित्युक्त"मितिवाक्योक्त

प्र० सिद्धसाधनतांव्यनक्ति ॥ **बह्विति** ॥ एवमस्पष्टानिकानिचिद्वाक्यानिव्यक्तीकृत्यसूत्रविचारमारभते ॥ **यद्यपीति** ॥ अन्यत्तुतंत्रदीपिका

बह्वित्युक्तमिति ॥ "बहुसाधने"तिभाष्येसाधनस्यबहुत्वंज्ञानेच्छाद्यन्यदंडादिस्थानीयसाधनबहुत्वंविव क्षितमितिभावः ॥ **ईश्वरोपिमुक्तउच्यतइति** ॥ अद्वैतिमतेमुक्तेश्वरयोरभेदात् । "अजोन्य"इतिश्रुत्यै वब्रह्मणःसंसारिभ्योभेदोपिसिद्धइत्यर्थः ॥ **श्रुतियुक्तिभ्यामिति** ॥ प्राक्केवलायुक्तिःश्रुतिश्चशंकिता । अत्रतुश्रुतिसहितायुक्तिरितिभेदः । साक्षिप्रत्यक्षस्यसर्वस्मात्प्रबलत्वेपिप्रत्यक्षमात्रस्यश्रुतितोदुर्बलत्वात्पूर्वत्रा रुच्यादृष्टशब्दंप्रकारांतरेणव्याचष्टे ॥ **दृष्टमितीति** ॥ भाष्ये "अनुमाद्या"इत्यत्राद्यशब्दोऽनुमाविशे षार्थापत्त्यादिपरः । यद्यपि "किंस्विदासी"दितिश्रुतावधिष्ठानंप्रथममुक्तं । तथाप्यारंभणशब्दार्थस्यकरण स्यसाधनेष्वतिशयितत्वात्सूत्रआरंभणशब्दः । अनेनचप्रतीकतया "किंस्विदासी"दित्यारंभणाक्षेपवाक्यस्यगृ हीतत्वात्साधनांतराभावसिद्धिरितिसुधायामेवोक्तं । "आरंभणशब्दादिभ्य"इत्यत्रादिशब्देनेश्वरस्यस्वतंत्रसा धनानपेक्षत्वेस्वातंत्र्यादिरूपायुक्तिरुक्ता । "युक्ते"रित्यत्रतु साधनंविनाकर्तुंशक्तस्यापिस्वेच्छयालीलयास्वाधी नसाधनांतरोपादानमैश्वर्याविरोधित्वाद्युक्तमित्युक्तं । "पटवच्चे"त्यत्रतु साधनमात्रमस्तीत्यत्रसृष्टित्वादियु क्तिरुक्ता । "यथाप्राणादि"रित्यत्रतु साधनंस्वतंत्रं साधनत्वादितिपूर्वपक्षयुक्तेर्बाधाद्युक्तमितिनपुनरुक्तिः ।

प्र० यांव्यक्तीकृतमस्माभिः । "प्राचीनश्रुतिसंग्रहायशब्दांतरादित्युक्त"मितिटीकयैकार्थत्वप्रतीतेराह ॥ सत्त्वाच्चेति ॥ प्रकारांतरेणापिपौनरुक्त्यंनिराह ॥ अनुव्याख्यानेत्विति ॥ विरोधमाशंक्यवर्णकभेदेनसमाधत्ते ॥ तथेति ॥ "तद्वशस्यभावोनपरइत्य त"इत्यनुव्याख्याने इत्यर्थः । शिष्टंसुगममितिभावः । "नचान्यत्रप्रमाणमस्ती"त्यादिनापराभिमतंतदनन्यत्वमप्रामाणिकंप्रमाणविरुद्धंचेतिभाष्यटीकयोरुक्तं

"सत्त्वाच्चावरस्ये"त्यत्रतु स्वतंत्रसाधनास्तित्वेशंकिताया "अद्भ्यः संभूत"इत्यादिश्रुतेःपरतंत्रसाधनपरत्वं "कालआसी"दित्यादिश्रुत्यंतरसंवादेनोक्तं। "शब्दांतराच्चे"त्यत्रतु परतंत्रमपिसाधनंमास्त्विति शंकानिरासायतदस्तित्वे "अद्भ्य"इत्यादिश्रुतिरुक्तेतिभेदः। अनुव्याख्यानेतु "शक्तोपिभगवान्विष्णुरकर्तुंकर्तुमन्यथा। स्वभिन्नंकारणाभिन्नंभिन्नंविश्वंकरोत्यज"इतिसोपपत्तिकाश्रुतिरपिशब्दांतरशब्दार्थइत्युक्तं । तथानुव्याख्याने नकेवलंभाष्यरीत्या"तमआसी"दितिवाक्यशेषान्यथानुपपत्त्या "नासदासी"दित्यादेःस्वतंत्रसाधननिषेधपरता। किंतु "नपर"इतिसाक्षात्स्वातंत्र्यनिषेधाच्चेतिवक्तुं "तस्माद्धान्यन्नपरःकिंचनासे"तिवाक्यमपिसौत्रवाक्यशेषशब्दार्थइत्युक्तं । अन्येतु पूर्वत्राभ्युपेत्यव्यावहारिकंभेदं "स्याल्लोकव"दित्युक्तं । अत्रतु तत्वतःकार्यस्यविश्वस्यकारणब्रह्मणोनन्यत्वं "वाचारंभणंविकारोनामधेयं। इदंसर्वंयदयमात्मे"त्यादिश्रुतेरित्युच्यतइत्याहुः।

प्र० "कथंचतदनन्यता । जगतस्त्वविकारित्वउक्तन्यायेनसाधित"इत्यनुव्याख्यानसुधयोःप्रपंचितं । तद्व्यक्तीकर्तुंपरभाष्योक्तंसंग्रहेणानुवदति ॥ पूर्वत्रेति ॥ सौत्रादिपदोपात्तश्रुतिमाह ॥ इदंसर्वमिति ॥ किंमुख्याभेदोत्राभिमतउतभेदाभावमात्रंयद्वाब्रह्मव्यतिरेकेणासत्त्वमथतत्रा

प्र० रोपितत्वमितिविकल्पान्हृदिकृत्वाऽऽद्यंनिराह ॥ तत्रनतावदिति ॥ अनंगीकाराच्चेति ॥ "कारणात्परमार्थतोऽनन्यत्वंव्यतिरेकेणाभा
वःकार्यस्यावगंतव्य"इतितद्भाष्योक्तेरितिभावः । विवरणरीत्याशंकते ॥ अज्ञानेति ॥ विशिष्टेशुद्धंप्रविष्टमित्यतआह ॥ अन्यथेति ॥

तत्र नतावद्ब्रह्माभेदस्ततदनन्यत्वं । अनृतस्यविश्वस्यसत्यब्रह्माभेदायोगात् । अनंगीकाराच्च । अ
ज्ञानविशिष्टेनोपादानेनाभेदोस्तीतिचेन्न । मुमुक्षुज्ञेयशुद्धब्रह्मज्ञानादेवसर्वविज्ञानार्थंशुद्धेनैवाभेदस्य
वक्तव्यत्वात् । अन्यथाऽविद्यापि "येनाश्रुतंश्रुत"मित्यादिवाक्योक्तज्ञेयकोटिनिविष्टास्यात् । नापि
"नखल्वनन्यत्वमित्यभेदंब्रूमः । किंतुभेदंव्यासेधाम"इतिभामत्युक्तरीत्याततोभेदाभावमात्रंतदनन्य
त्वं । भेदाभावेऽभेदध्रौव्यात् । भेदाभावेसत्यानृतव्यवस्थायोगाच्च । अभेदाभावेनव्यवस्थायांतेनैवै
कविज्ञानेनसर्वविज्ञानाभावोपिस्यात् । यदिचैकविज्ञानेनसर्वविज्ञानानुपपत्त्याभेदाभावोव्यवस्थानु
पपत्त्याचाभेदाभावःकल्प्येत तर्हितदुभयानुपपत्त्यालाघवाय तथा "इदंसर्वंयदयमात्मानेतिनेती"
त्यादिसामानाधिकरण्यश्रुतिभेदश्रुत्योर्मृत्पिंडादिदृष्टांतस्यचस्वारस्यायभेदाभेदावेवकिंनकल्प्येते ।

प्र० द्वितीयमाशंक्यनिराह ॥ नापिनखल्विति ॥ अभेदेति ॥ परस्परविरुद्धयोरेकस्याभावेऽपरस्यसत्त्वनियमादितिभावः । विरोधेविप्र
अ. चं. १४७ तिपत्तावाह ॥ भेदेति ॥ लाघवायेति ॥ अभावापेक्षयाभावस्यलघुत्वादितिभावः । "एकधैवानुद्रष्ट"व्यमित्यादिश्रुतिविरोधभयादेवमा

प्र० श्रीयतइत्यतआह ॥ ब्रह्मणइति ॥ अनृततादात्म्यंसत्यब्रह्मणोनयुक्तमित्यतआह ॥ यथाचेति ॥ ननुयथातुच्छस्यनिस्स्वरूपत्वेनतत्रस त्यभेदोनास्ति अतएवभेदाभावेऽभेदध्रौव्यादित्यपिव्यभिचारि तथाचतत्रभेदाभेदयोरभावेपियथाव्यवस्थातथात्रापिस्यादितिचेन्न । तुच्छेस त्यभेदाभावेपिसत्येतुच्छभेदस्यसत्त्वात् । यथोक्तं "सदसद्वैलक्षण्येमिथ्यात्वेसिद्धसाधनते"त्यादौ । अतएवततोऽनृतादित्युक्तमत्रापिनिस्स्व रूपस्यापिप्रतियोगित्वंधर्मिसत्तानिरपेक्षधर्मत्वाद्युक्तमित्यन्यत्रव्यक्तमितिभावः । तृतीयंकल्पंपरभाष्योक्तमाशंक्याह ॥ नापीति ॥ विशे

ब्रह्मणएकरसत्वश्रुतिरप्यनेकरसात्प्रपंचाद्भेदाभावेप्यभेदाभावमात्रेणेवाऽभेदेपिभेदेनैवोपपन्नास्तु । यथाचसत्यस्यानृताभेदोनयुक्तस्तथाततोभेदाभावोपि । नापिब्रह्मव्यतिरेकेणासत्त्वंतदनन्यत्वं । विशे षनिषेधस्यशेषाभ्यनुज्ञानार्थत्वेनानंदादिवज्जीवचैतन्यवच्चब्रह्मात्मकत्वापातात् । ब्रह्मण्यारोपितत्वंतुन तदनन्यत्वशब्दार्थः । शुक्त्यारोपितेरूप्येतदनन्यशब्दाप्रयोगात् । प्रातिभासिकव्यावहारिकयोर्व्या वहारिकपारमार्थिकाभ्यामन्यत्वाभावेऽनिर्वाच्यत्वासिद्धेश्च [रूप्यमिदंनेतितदन्यशब्दस्यैवप्रयोगाच्च]

प्र० षेति ॥ अन्यथा "व्यतिरेकेणे"तिविशेषणवैयर्थ्यापत्तिरितिभावः ॥ आनंदेति ॥ तयोरपिब्रह्मातिरेकेणासत्त्वात्तयोरप्यनृतत्वापत्ति रितिभावः । चतुर्थंनिराह ॥ ब्रह्मणीति ॥ नन्वभिन्नेयथातदन्यत्वंनास्त्येवमधिष्ठानाध्यस्तयोरन्यत्वंनेतिगौण्यावृत्त्यातदनन्यत्वपदेनारो ॥ ८७७ ॥ पाधिष्ठानतोच्यतइत्यतआह ॥ प्रातिभासिकेति ॥ शुक्तिरूप्यप्रपंचयोश्शुक्तिब्रह्मभ्यामित्यर्थः ॥ अनिर्वाच्यत्वेति ॥ त्वदभिमतद्वि

प्र० रूपेत्यर्थः ॥ एकेति ॥ अधिष्ठानज्ञानेनाध्यस्तज्ञानादर्शनादितिभावः । एकविज्ञानेनेत्युक्तंप्रमेयं "नहिसत्यज्ञानेनमिथ्याज्ञानंभवति । नहिशुक्तिज्ञोरजतज्ञइत्युच्यत" इत्यादितत्वनिर्णयतट्टीकयोरुक्तरीत्याव्यनक्ति ॥ कथंहीति ॥ नन्वधिष्ठानज्ञानमन्वयव्यतिरेकाभ्यामध्यस्त ज्ञानहेतुः । तथाचाधिष्ठानब्रह्मज्ञानेसत्येवाध्यस्तप्रपंचज्ञानंनान्यथेत्यतउक्तं विज्ञानादिति । सत्यमेवं । तथापिप्रकृतेब्रह्मज्ञानंनयादृशता

एकविज्ञानेनसर्वविज्ञानायोगाच्च । मृत्पिंडादिदृष्टांतानुपपत्तेश्च ॥ कथंहिब्रह्मविज्ञानाद्विज्ञातंसकलंभवेत् । नहिशु क्तिस्वरूपस्यविज्ञानाद्रजतज्ञता ॥ १ ॥ प्रत्युत । शुक्तितत्वापरिज्ञानाद्यथैवरजतज्ञता । ब्रह्मतत्वापरिज्ञानात्त थासर्वज्ञतोचिता ॥ १ ॥ अत्रोक्तंभामत्यां रज्वांज्ञातायांभुजंगतत्वंज्ञातंभवति । साहितस्यतत्वं । एवंचब्रह्म ज्ञानात्सर्वंतत्वतोज्ञातंभवतीति । तन्न । एवंहिब्रह्मज्ञानेनब्रह्मैवज्ञातंभवतीत्यर्थःस्यात् । तच्चायुक्तं । स्वस्यस्वहे तुत्वायोगात् । "येनाश्रुतंश्रुतंभवत्यमतंमतमविज्ञातंविज्ञात"मितिश्रुतिगताश्रुतादिपदायोगाच्च । किंचासा धारणंस्वरूपमसाधारणधर्मोवातत्वं । नतुभ्रमाधिष्ठानं । तथात्वेचानंदोब्रह्मणोरज्जुत्वंचरज्जोस्तत्वंनस्यात् ।

प्र० दृशं । मुमुक्षुंप्रत्युपदिश्यमानत्वात् । किंतुब्रह्मतत्वज्ञानं । ब्रह्मणोधिष्ठानत्वेतन्नस्यात । शुक्तितत्वज्ञानादत्राध्यस्तरूप्यज्ञानादर्शनात् । अत एव "शुक्तिस्वरूपस्ये"त्युक्तमितिभावः । किंचारोपितत्वांगीकारएकविज्ञानप्रतिकूलइत्याह ॥ प्रत्युतेति ॥ ब्रह्मतत्वेति ॥ इहचतत्त्व ज्ञानेनसर्वज्ञतोच्यमानानयुक्तेतिभावः ॥ अश्रुतादिपदेति ॥ द्वयोरप्येकमेवतत्वंचेच्छ्रुतस्यैवश्रुतत्वंप्राप्तमितिभावः । असाधारणं सर्वतो

प्र० व्यावृत्तं । किमतोयद्येवमित्यतआह ॥ नचेति ॥ नन्वनारोपितंतत्वमधिष्ठानंचानारोपितमितितत्वंस्यादित्यतआह ॥ नचानारोपितमिति ॥ ततः आरोपितत्वादित्यर्थः । ननुयद्यधिष्ठानमध्यस्तस्यतत्वंनस्यात्तर्हितज्ज्ञानात्तद्भ्रमनिवृत्तिर्नस्यात् । तद्भ्रमस्यतत्तत्वज्ञाननिवर्त्य

नचरज्जूरज्जुज्ञाननिवर्त्यस्यसर्पस्यस्वरूपंधर्मोवा । नचपरस्परभिन्नानेकारोप्यानुगतमधिष्ठानमेकैकस्यारोपितस्यासाधारणं । नचानारोपितमित्येतावताततोन्यत्तस्यतत्वंभवति । स्वीकृतंचत्वयापिसर्पस्यरज्जुव्यतिरेकेणासत्त्वेनततोन्यत्वाभावेपिरज्जोःसर्पव्यतिरेकेणसत्त्वेनततोन्यत्वं । [किंचयदिरज्जुःसर्पस्यतत्वंतर्हिरज्जुज्ञःसर्पतत्वज्ञइत्युच्येत] किंचैवंरज्ज्वामयंसर्पइतिधीरानंदेब्रह्मधीरिवचप्रमास्यात् । तत्त्वेतद्धीत्वात् । रज्जुज्ञानेनसर्पभ्रमनिवृत्तिस्त्वधिष्ठानतत्वज्ञानस्यतदज्ञाननिमित्तकभ्रमविरोधित्वात् । नचघटादेर्मृदादावारोपितत्वात्तदृष्टांतोयुक्तइतिवाच्यं । मृत्तत्वज्ञानेपिघटाद्यनिवृत्तेः । यद्यपितार्किकमतइवमृदारब्धंद्रव्यांतरंनास्ति । तथापिकारकव्यापारसाध्योजलाहरणादिसमर्थोव्यावहारिकोमृदादितुल्योऽवस्थाविशेषरूपोघटशब्दार्थस्त्वन्मतेप्यस्ति ।

प्र० त्वादित्यतआह ॥ रज्जुज्ञानेनेति ॥ एकज्ञानेनसर्वज्ञानायोगमुपपाद्यमृत्पिंडादीत्युक्तमुपपादयति ॥ नचघटादेरिति ॥ तत्वतोऽवस्था

प्र० विशेषोनास्तीत्यतआह ॥ तत्वतइति ॥ तथाचतद्दृष्टांतोऽयुक्तइतिभावः । प्रकारांतरेणदृष्टांतानुपपत्तिमाह ॥ किंचेति ॥ अन्यथेति ॥ अनुगतत्वमात्रेणतत्तत्वरूपत्वइत्यर्थः । कथंतर्ह्येकविज्ञानेनसर्वज्ञानमित्यतआह ॥ अत्रस्वमतइति ॥ तत्वनिर्णयादौन्यायामृतेचोक्तमित्यर्थः ॥ पूर्वत्रेति ॥ "स्याल्लोकव"दित्यत्रेत्यर्थः । ननूक्तंव्यवहाराभिप्रायेण "स्याल्लोकव"दित्युक्तंपूर्वत्र । अत्रतुपरमार्थाभिप्रायेणतदनन्यत्वमु

तत्वतस्तुनमृदप्यस्ति । किंच यदिमृन्मात्रविज्ञानाद्विज्ञातंस्याद्घटादिकं । मृत्त्वंनिश्चित्यनपुनःसंशयीतघटादिके ॥ १ ॥ एतेन यदुक्तंभामत्यांमृज्ज्ञानेघटादयस्तत्वतोज्ञाताभवंति । मृदेवहिघटादीनांतत्त्वमिति तन्निरस्तं । मृत्तत्वज्ञानेपितत्संस्थानविशेषत्वरूपघटत्वाज्ञानेनघटस्तत्वतोनज्ञातइतिव्यवहारात् । घटेशरावत्वाद्यारोपानिवृत्तेश्च । अन्यथाजातिर्व्यक्तेस्तत्वंनस्यात् । अत्रस्वमतएकविज्ञानेनसर्वविज्ञानमन्यत्रोक्तमनुसंधेयं । प्रकृत्यधिकरणादृश्यत्वाधिकरणाभ्यामस्यपुनरुक्तिश्च । अद्वैतिमतेऽत्रेवोभयत्रापिब्रह्मविवर्ततायाएवोक्तत्वात् । किंचत्वन्मतेपूर्वत्रभेदोक्तेरत्रत्वभेदोक्तेर्विरोधः । नचप्रमाणयोःसूत्रयोर्विरोधएकस्यानृतविषयत्वेनपरिहर्तुंयुक्तः । किंचघटादेर्मृदनन्यत्वप्रतिपादकआरंभणशब्दोजगतोब्रह्मानन्यत्वरूपेत्वदीयसाध्येनसाक्षाद्धेतुः ।

प्र० च्यतइति । तत्राह ॥ नचेति ॥ सौत्रप्रतिज्ञाभागंनिरस्यहेत्वंशंनिराह ॥ किंचेति ॥ भामत्यांतदनन्यत्वएववैदिकमृन्मयदृष्टांतइत्युक्त्वा मृन्मययोर्भेदादन्यज्ञानेनान्यज्ञानायोगात्कथंमृदादिदृष्टांतइत्यवतार्य "वाचारंभणमितिश्रुतौमृदन्यस्यविकारजातस्यानृतत्वोक्तेर्घटशरावोदं

प्र० श्रयादितिभावः । “असद्व्यपदेशान्नेतिचेन्नधर्मांतरेणवाक्यशेषा”दित्येतदर्थमनूद्यनिराह ॥ **यच्चेति** ॥ व्यक्तत्वरूपधर्मांतरेणैवासत्त्वं । नस्वतः । प्रागसत्त्वेननिर्दिष्टस्यैवपुनस्तत्सदासीदितिवाक्यशेषेसत्त्वेननिर्देशादितिनिरस्यतइत्यर्थः ॥ **अस्यापीति** ॥ अत्रपूर्वत्रवाक्येच “इद”मितिषष्ठ्यर्थेद्वितीया । अस्याग्रइत्येवार्थइतिभावः ॥ **शंकायोगादिति** ॥ अन्योन्याश्रयापत्तेरितिभावः । “युक्तेश्शब्दांतराच्चे”त्ये

यच्चोक्तं “असदेवेदमग्रआसी”दितिव्यपदेशात्कार्यस्यप्रागसत्त्वमितिशंकाचतुर्थेनिरस्यतइति तन्न । अस्यापिवाक्यस्य “तदसदेवसन्मनोकुरुते”तिवाक्यशेषात्कारणपरत्वेनकार्यासत्त्वाप्रापकत्वात् । नचकार्यकारणयोरनन्यत्वांगीकारेणकार्यासत्त्वशंकेतियुक्तं कार्यसत्त्वस्याप्यनन्यत्वसिद्ध्यर्थत्वेनानन्यत्वांगीकारेणासत्त्वशंकायोगात् । यच्चोक्तमसदकरणादियुक्तेः “सदेवेत्यादिशब्दांतराच्चकार्यस्यप्रागुत्पत्तेःसत्त्वंकारणानन्यत्वंचेतिपंचमार्थइति तन्न । शब्दांतरादित्यस्यसत्त्वाच्चावरस्येत्यनेनगतार्थत्वात् । षष्ठसप्तमसूत्रोक्तौतुसंवेष्टितपटप्राणदृष्टांतौनविवर्तवादिनःपरस्यानुगुणौ । जगतोब्रह्मणीवप्रसारणादेःपटादावनध्यस्तत्वात् । संवेष्टितप्रसारितपटादाविवनिरवयवेब्रह्मणिसंकोचविकासयोरसंभवाच्च ।

प्र० तदर्थंनिराह ॥ **यच्चेति** ॥ **असदकरणादीति** ॥ असन्नोत्पद्यते । असतःकरणायोगात् । सदेवघटादिकंमृदादितउत्पद्यते । कारणकार्ययोस्समवायाभावेनतादात्म्यावश्यंभावाच्चेत्यादिरादिपदार्थः । प्रागुक्तासद्व्यपदेशादन्यस्मात् “सदेवसोम्ये”त्येवंरूपशब्दांतराच्चेतिभावः ॥ **षष्ठेति** ॥ “संवेष्टितप्रसारितपटन्यायेनेदंकारणात्कार्यस्यानन्यत्वंप्रागुत्पत्तेस्सत्त्वंचबोध्यं । प्राणायामेननिरुद्धाःप्राणादयोयथातथावे”

प्र० तित्वयाव्याख्यानादितिभावः ॥ ममेति ॥ प्रागेवैतद्व्यक्तीकृतमितिभावः। तस्मात्परमकारणाद्ब्रह्मणोऽनन्यत्वंजगतआरंभणशब्दादिभ्यस्त दुपपादयञ्चोऽवगम्यत"इत्यादिरामानुजभाष्यंहृदिनिधायाह ॥ सूक्ष्माव्यक्तादीति ॥ शुद्धेति ॥ चिदमिश्रेत्यर्थः ॥ विशिष्टेति ॥

ममममतइवप्रमेयविशेषाभावेनदृष्टांतद्वयस्यवैयर्थ्याच्च । केचित्तु सूक्ष्माव्यक्तादिविशिष्टस्यकारणस्यब्रह्मणःस्थूलमहदादिविशिष्टेनकार्येणब्रह्मणाऽनन्यत्वमत्रोच्यतइत्याहुः। तन्न । शुद्धाचेतनात्मकस्यविशिष्टरूपकार्यगतस्यविशेषणांशस्यमहदादेर्विशिष्टचेतनकार्यत्वाभावेनविशिष्टब्रह्माभेदाभावात् "इदंसर्वंयदयमात्मा सर्वंखल्विदंब्रह्मे"त्यादिश्रुत्यनिर्वाहात् । सर्वांतर्यामित्वादिनैवतन्निर्वाहेचकिंविशिष्टाभेदव्युत्पादनेन । किंचविशिष्टस्यकार्यत्वे "तत्सृष्ट्वातदेवानुप्राविश"दित्याद्ययुक्तं । स्वविशिष्टेस्वानुप्रवेशायोगात् । यच्चोक्तंश्रुतौ "वाचारंभण"मित्यत्रारभ्यते आलभ्यतेस्पृश्यते इत्यारंभणं इतिव्यस्तंपदं । तथाचविकारोघटादिनामधेयंचवाचा

प्र० सूक्ष्माव्यक्तादिविशिष्टेत्यर्थः ॥ इत्याद्ययुक्तमिति ॥ लक्षणयातत्रविशेषणमात्रपरत्वंतुपूर्वपादांतेऽभिहितरीत्यानिरसनीयमितिभावः । प्रतिज्ञाभागंनिरस्यहेतुभागंनिरसितुं "आरभ्यते आलभ्यतइत्यारंभण"मित्यादितदीयभाष्योक्तमनुवदति ॥ यच्चोक्तमिति ॥ वाचेत्यस्य

प्र० चतुर्थ्यर्थततामाश्रित्यार्थमाह ॥ **वागिति** ॥ स्पृश्यतइत्यस्यतात्पर्यमाह ॥ **एवंचेति** ॥ **प्रातिपदिकेति** ॥ वाक्पूर्वकेत्यस्यलक्ष्यत्वादि तिभावः ॥ **चतुर्थ्यर्थतायाइति** ॥ यद्यपितद्भाष्ये "वाचा वाक्पूर्वकेणव्यवहारेणहेतुनेत्यर्थ"इत्युक्तं । तथापि "तस्यव्यवहारस्यसिद्ध य"इत्युत्तरतद्भाष्यानुरोधादेवमाश्रीयतइतिभावः । सूत्रआरंभणादिशब्देभ्यइतिस्यादितिप्राचीनदूषणमत्रापिध्येयं । "ऐतदात्म्यमिदंसर्वं" मित्यादिशब्दस्यादिपदार्थत्वेनभाषणात् । रामानुजभाष्येहिकार्यस्यकारणानन्यत्वेकथंकारणापेक्षयाकार्येशब्दांतरव्यवहारइत्याशंक्यतदुत्तर

वाक्पूर्वकजलाहरणादिव्यवहाराय मृद्द्रव्येणस्पृश्यते । एवंचमृद्द्रव्यमेवव्यवहारायविकारादि भाग्भवतीतिश्रुत्यर्थइति तन्न । श्रुतौवाक्प्रातिपदिकेलक्षणायाः तृतीयाविभक्तौचतुर्थ्यर्थ तायाः आरंभणशब्देरलयोरभेदेनालंभनार्थतायाः नामधेयमित्यत्रचशब्दाध्याहारस्यमृद्द्रव्ये णेत्यस्याध्याहारस्यचायोगात् । मृद्द्रव्येणघटादेःस्पृश्यमानत्वोक्त्यातयोर्भेदस्यैवापाताच्च ।

प्र० त्वेन "भावेचोपलब्धेः । सत्त्वाच्चावरस्ये"तिसूत्रद्वयमवतार्य "कुंडलादिकार्यभावेचकारणभूतहिरण्यस्योपलब्धेः । इदंकुंडलंहिरण्यमिति हिरण्यत्वेनप्रत्यभिज्ञानादित्यर्थः । अवरकार्यस्यकारणेसत्त्वाच्च । लोकेसर्वमिदंघटशरावादिकंपूर्वाह्णेमृत्तिकैवासीदिति वेदेच "सदेवसोम्ये द"मितिव्यपदिश्यते । अतःकारणात्कार्यस्यानन्यत्वं । कारणमेवावस्थांतरमापन्नंकार्यमितिगीयतइतितन्निबंधनःशब्दांतरव्यवहारो नकार णात्कार्यस्यान्यत्वनिमित्तक"इतिसूत्रद्वयस्यार्थउक्तः । तत्रद्वयोरैकार्थ्येनैकस्यवैयर्थ्यमाशंक्यसूत्रयोर्भेदस्तद्व्याख्यानेसाधितः । तत्प्रकारमनू

प्र० द्यनिराह ॥ **यच्चेति** ॥ **नतुतृतीयमिति** ॥ परमतइवेत्यर्थः । तथात्वेह्यर्थभेदेनद्वयमर्थवत्स्यादितिभावः । अनन्यगत्यैवमाश्रीयतइत्य तआह ॥ **किंचमद्रीत्येति** ॥ सूत्रांतराणिपूर्ववन्निरसनीयानीतिभावः ॥ ७ ॥ **आरंभणाधिकरणं** ॥ ६ ॥

॥ ॐइतरव्यपदेशात्ॐ ॥ टीकायामस्फुटत्वादेतदुपाधिमाह ॥ **अत्रेति** ॥ एतन्मूलंत्वग्रेव्यक्तं । अनंतरसंगतिंत्वग्रेपूर्वपक्षनिष्कर्षक

यच्चोक्तं । यद्यपिद्वितीयेतृतीयेचकार्यकारणाभेदइदंकुंडलंहिरण्यमितिप्रतीतिरेवप्रमाणीक्रियते । नतुतृतीयंब्रह्म जगद्विषयं । तथापिद्वितीयेसोयमितिप्रत्यभिज्ञोक्ता । तृतीयेत्वयंसइत्यभिज्ञेतिवा द्वितीयऐक्यप्रतीतिरुक्ता । तृतीयेत्वैक्यव्यवहारइतिवाभेदइति । तन्न । उद्देश्यविधेयविनिमयादिमात्रेणसूत्रभेदेऽतिप्रसंगात् । सूत्राक्षरा स्वारस्याच्च । नहि "भावेचोपलब्धे"रित्यादिशब्दात्प्रत्यभिज्ञादिर्भाति । किंचमद्रीत्यासूत्राणांसाक्षाद्ब्रह्मविषय त्वेसंभवत्युभाभ्यामुक्तंलौकिककुंडलहिरण्यादिमात्रविषयत्वंनयुक्तमिति ॥ ७ ॥ **आरंभणाधिकरणं** ॥ ६ ॥

॥ ॐइतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिःॐ ॥ अत्रश्रुत्यनुभवसंवादियुक्त्यविरोधउच्यते । जी वकर्तृत्वसाधकचेतनत्वादियुक्तिर्हि "जीवाद्भवंतिभूतानी"त्यादिश्रुत्या जीवकर्तृत्वानुभवेनचसंवादिनी ।

प्र० रणाद्व्यक्तीकरिष्यामइतिभावेनविषयसंशयटीकांविवृण्वंश्च्छिंतामाह ॥ **अत्रेति** ॥ वक्ष्यमाणपूर्वपक्षद्वयाभिप्रायेणोक्तं **विवक्षितमित्यादि** ॥ घटादिस्वस्वकार्यांशेजीवस्स्वातंत्र्येणकर्ता । चेतनत्वान्महदादावीश्वरवत् । जीवःकर्ताचेतनत्वाद्व्यतिरेकेणघटादिवदित्यादियुक्तिविरुद्धंनवे

तात्पर्य- चंद्रिका.

॥ ४० ॥ द्वि. प्र. ७

प्र० त्यर्थः ॥ प्रत्यक्षेति ॥ जीवकर्तृत्वानुभवेत्यर्थः । अत्राद्यचिंता “अश्मादिवच्चे”तिसूत्रसूचिता । द्वितीयातु “इतरव्यपदेशा”दित्येतत्सूचिता । तृतीया “उपसंहारदर्शना”दित्येतत्सूचिता । हेतुहेतुमद्भावोत्रव्यक्तः । “अन्यथानुमितौचे”त्यादिटीकांव्यंजयन्गतार्थतामनुवदति

अत्रजन्मादिसूत्रेविवक्षितंब्रह्मणएवस्वतंत्रकर्तृत्वंयुक्तिविरुद्धंनवेतिचिंता । तदर्थंजीवस्यस्वतंत्रकर्तृत्वसाधकचेतनत्वादियुक्तिःश्रुतिसंवादिनीनवेति । तदर्थं“जीवाद्भवंती”त्यादिश्रुतिःकिंप्रत्यक्षानुसारात् [विग्रहादिमतःकर्तुर्ब्रह्मणोऽनुपलब्धिबाधितत्वाच्च]जीवविषयोत [अप्राकृतविग्रहादिमत्यपिब्रह्मण्यंतर्धानशक्तियोगात्पिशाचादेरिवानुपलब्धिबाधाद्यभावात्]प्रत्यक्षाप्राप्तब्रह्मपरेति । यद्यपिसमयप्राप्तंजीवकर्तृत्वंद्वितीयपादे “अन्यथानुमितौचे”त्यत्रनिषेत्स्यते । यद्यपिचश्रुतिसंवादियुक्तिप्राप्तंजीवादिकर्तृत्वं “एतेनशिष्टा”इत्यत्रनिषिद्धं । तथापीह “यथाप्राणादि”रितिपूर्वाधिकरणोक्तंप्राणादिजीवानामस्वतंत्रत्वमयुक्तं। जीवकर्तृत्वस्यानुभवादित्यनुभवसंवादेनाधिकहेतुना पुनर्जीवमात्रविषयायांशंकायामनुभवस्यगतिंहिताकरणादिदोषांतरंचवक्तुमिदमितिनपुनरुक्तिः ।

प्र० ॥ यद्यपीति ॥ नन्वधिकहेतुनापुनरारंभे “एतेनशिष्टा”इत्येतदानंतर्यमेवस्यादित्यतः “अत्रयथाप्राणादिरित्युक्तेपुनराशंकोदया”दितिटीकोक्तसमाधिंव्यनक्ति ॥ यथाप्राणादिरिति ॥ अधिकहेतुनेत्यादिनाग्रंथेन “विस्तरान्निराक्रियत”इतिभाष्यटीकयोःप्रयुक्तविस्तरशब्दार्थौ ॥ ८८२ ॥

प्र० विवृतोज्ञेयः ॥ अतएवेति ॥ चेतनत्वयुक्तेरनुभवसंवादिश्रुतिमूलकत्वरूपाधिकहेतुनाशंकोदयादेवेत्यर्थः । पूर्वोत्तरप्रस्थानयोःपक्षभेदेना विरोधंविवक्षुःपूर्वपक्षंनिष्कृष्याह ॥ अत्रेति ॥ टीकायामितितात्पर्यमुक्तमित्यन्वयः । एतेन "तथाही"त्यादिटीकान्यायविवरणमूलेत्युक्तं

अतएवसिद्धांते "इतरव्यपदेशा"दितिसूत्रेपूर्वपक्ष्यभिप्रेताश्रुतिः, "उपसंहारदर्शना"दित्यत्रानुभवः, "अश्मादिव"दित्यत्रयुक्तिश्चनिरस्ता। अत्रघटादेर्जीवैककर्तृकत्वेतदृष्टांतेनमहदाद्यपितथेत्येकः पूर्वःपक्षः। द्वितीयस्तु महदादिरीशकर्तृकोघटादिस्तुजीवैककर्तृकइति। अत्रचपक्षद्वये "जीवस्यैवकर्तृत्वांगीकारेकल्पनालाघव"मितिपूर्वपक्षहेतुपरंयन्न्यायविवरणं तस्य "तथाही"त्यादिटीकायामाद्यपक्षमाश्रित्य ईश्वरोऽयोग्यश्चेत्कदापिप्रत्यक्षोनस्यात्। योग्यश्चेत्सदासर्वत्रसत्त्वादिहेदानीमुपलभ्येत । नचाभिमानिदेवतासाम्यं । ईश्वरस्याव्यक्तस्वभावांगीकारात् । तस्मादप्रामाणिकईश्वरस्तस्यघटादौमहदादौचकर्तृत्वंकल्प्यं । जीवस्यत्वदृष्टद्वारामहदादावपिकर्तृत्वंक्लृप्तं । युक्तंचोपादानाद्यपरोक्षज्ञप्तिरहितस्यापिजीवस्यमहदादिकर्तृत्वं । चैत्रःशब्दंकरोतीत्यादौदर्शना

प्र० भवति। टीकांतातात्पर्यतोव्यनक्ति॥ ईश्वरइत्यादिना॥ अव्यक्तेति ॥ "तदव्यक्तमाहही"त्यत्रतृतीयेतथाऽभिधास्यमानत्वादितिभावः

ता० चं. १४८ ॥ अदृष्टद्वारेति ॥ कार्यमात्रस्ययथायथंजीवोपभोग्यतयाजीवादृष्टजन्यत्वादितिभावः ॥ शब्दमिति ॥ शब्दस्याकाशगुणतयाशब्दो

प्र० पादानाकाशापरोक्षहीनस्यापिचैत्रस्यशब्दकर्तृत्वदर्शनादित्यर्थः । नचद्रव्यकर्तृत्वएवायंनियमः । अप्रयोजकत्वादितिभावः ॥ इतीति ॥ इत्यभिप्रेत्येत्यर्थः ॥ इतितात्पर्यमिति ॥ तस्यन्यायविवरणस्येतिवर्तते । नन्वेवमाद्यकल्पःकथंसुधायांदूषितइत्यतआह ॥ यत्त्विति ॥

दितितात्पर्यमुक्तं । सुधायांतुद्वितीयपक्षमाश्रित्य कुलालादीनांघटादिकर्तृत्वंतावदनुभवसिद्धं । तत्रेश्वरस्यापि कर्तृत्वेगौरवमितितात्पर्यमुक्तं । यत्तुसुधायां "नह्यत्राधिकरणेपूर्वपक्षिणामहदादिसकलकार्यकर्तृत्वंजीवस्यशंकित"मित्युक्तं तत्राद्येजीवस्यमहदादिकर्तृत्वपक्षेऽनुभवविरोधः । नतुद्वितीये । किंतुतदानुकूल्यमेवेत्याद्येऽपरितोषमात्रमभिप्रेतं । अतएवात्रापिटीकायामाद्येऽपरितोषात् "यद्वे"त्यादिनाऽधिकरणांतेद्वितीयउक्तः । नत्वाद्यःसुधायांसर्वथानभिप्रेतः । तथात्वे "देवादी"त्युत्तरसूत्रईश्वरस्याद्दश्यत्वोत्त्ययोगात् । अत्रचाद्ये आरंभणशब्दादिभ्यईशस्यस्वतंत्रकर्तृत्वंचेत्नजीवात्कारणंपर"मित्यादिशब्दाज्जीवस्यापितदस्तु । उक्तरीत्येशस्यैवाभावान्नजीवशब्दस्तत्परइतिपूर्वपक्षोत्थानात्संगतिः । द्वितीयेतु पूर्वत्रकर्त्रंतररहितेमहदादावीशस्यस्वतंत्रकर्तृत्वमुक्तमत्रतुकर्त्रंतरसहितेपिघटादौतदुच्यतइतिसंगतिः । सिद्धांतमाह ॥ इतिप्राप्तेइत्यादिना ॥ ॥ ८८३ ॥

प्र० तथात्वे देवादिवदपिलोकइतिसूत्रव्यावर्त्यस्यानभिमतत्वइत्यर्थः। एवंपक्षभेदेनपूर्वपक्षंव्यवस्थाप्योभयत्रावांतरसंगतिमाह ॥ अत्रचेति ॥ भाष्ये "जीवकर्तृत्वपक्षेहिताकरणमहितकरणंचनस्या"दितिकर्तृत्वमात्रनिरासप्रतीतावपिटीकायांस्वतंत्रकर्तृत्वनिरासपरतयाव्याख्यानंनिर्बीज

प्र० मित्यतः कर्तृत्वमात्रस्यानुमतत्वादन्याधीनकर्तृत्वेचहिताकरणादिदोषासंस्पर्शादितिभावेनतदभिप्रायमाह ॥ अयंभावइत्यादिना ॥ इष्टमिति ॥ "कर्ताशास्त्रार्थवत्त्वा"दित्यादौसाधयिष्यमाणत्वादितिभावः । महदादिसर्वकर्तृत्वरूपाद्यपक्षस्यसुधाभिप्रायोक्तिव्याजेनदूषितत्वाद्वितीयएवदूष्यइतिभावेनोक्तं घटादिष्विति ॥ स्यादिति ॥ दोषइतिशेषः । हिताकरणादिकंदोषःप्रसज्येतेत्यर्थः । अयुक्तमापद्येतेतियावत् । हिताकरणादिकंनस्यादितिभावः । आदिपदेनाहितकरणं । तदेवविपर्ययेपर्यवसानेनोपपादयति ॥ कथमिति ॥ स्वहितंकरोत्येव स्वाहितंचनकरोत्येवजीवइतिवदंतंप्रति "यदिनामनतस्यवशेसकलंकथमेवतुनित्यसुखंनभवे"दित्यन्यत्रोक्तंहृदिकृत्वाऽनिष्टमाह ॥ तथाचेति॥

अयंभावः ॥ कर्तृत्वमात्रंजीवस्यममापीष्टंघटादिषु । अन्यानधीनकर्तृत्वेस्याद्धिताकरणादिकं ॥ १ ॥ कथंनकुर्यात्प्रेक्षावान्स्वतंत्रःस्वहितंसदा । कथंचस्वाहितंकुर्यात्तथाचसकलोजनः ॥ २ ॥ पूर्णानंदश्चनिर्दुःखःसर्वदैवप्रसज्यते । कर्मकालादिकस्यापिजडत्वान्नस्वतंत्रता ॥ ३ ॥ नैवबध्नातिपुरुषंस्वयंहिनिगडादिकं । जीवस्ततोदारुयोषावदन्याधीनचेष्टितः ॥ ४ ॥

प्र०स्वहितकरणस्वाहिताकरणयोर्भावेसतीत्यर्थः।नन्वेवमन्याधीनकर्तृत्वेपिजीवस्यकर्माद्यधीनंतदस्तु किमीश्वराधीनत्वोपगमेनेत्यतः "नचकर्मविमामलकालगुणप्रभृतीशमचित्तनुतद्धियतः" । इत्येतद्धृदिकृत्वाह ॥ कर्मेति ॥ तद्व्यनक्ति ॥ नैवेति ॥ एतेन "तस्याप्यस्वातंत्र्या"दितिटीकाविवृता । "अश्मादिवच्चतदनुपपत्ति"रितिसूत्रभाष्यटीकातात्पर्यमाह ॥ जीवस्ततइति ॥ अहितकर्तृत्वादेरित्यर्थः । "अस्वातंत्र्यस्यहिताक्रियादिनैवसिद्धे"रितिटीकायांहिताकरणादेरस्वातंत्र्येहेतुत्वोक्तेरितिभावः । चेष्टितः चेष्टनः । भावेनिष्ठा । अप्यर्थकसौत्रच

प्र० शब्दार्थमाह ॥ चेतनोपीति ॥ एतेनजीवोन्यनिरपेक्षतयाकर्ताचेतनत्वादीश्वरवदित्यनुमानमप्रयोजकमित्युक्तंभवति । जीवस्यस्वतंत्रकर्तृताज्ञानस्यभ्रमत्वव्युत्पादनाय “आनुभाविकत्वाच्चसर्वस्ये”तितत्वप्रदीपोक्तंबलवद्विपरीतंप्रत्यक्षमाह ॥ प्रत्यक्षंचेति ॥ “नजीवस्यस्वतः कर्तृत्वाभावोवक्तव्यः । अनुभवविरोधात् । सहियत्कर्तुमारभतेतदवसाययतीत्यनुभूयत”इतिटीकोक्तशंकांहृदिकृत्वा “उपसंहारदर्शनान्नेतिचेत्क्षीरवद्धी”तिसूत्रपरिहारभाष्यटीकातात्पर्यमाह ॥ यत्रेति ॥ काकेति ॥ “समासाच्चतद्विषया”दितीवार्थेछप्रत्ययः । काकागमनमिव

चेतनोप्यस्वतंत्रोस्तुसूत्रप्रोतशुकादिवत् । प्रत्यक्षंचास्वतंत्रत्वंमृतिसुप्त्युद्भवादिषु ॥ ५ ॥ यत्रेशेच्छानुसारेणस्वस्यापीच्छोपजायते । कार्योपसंहृतिंकाकतालीयांतत्रवीक्ष्यतु ॥ ६ ॥ देहादियंतुश्चहरेरगृहीत्वास्वतोभिदां । स्वतंत्रकर्तृतांस्वस्यमन्यतेह्यबुधोजनः ॥ ७ ॥ चार्वाकस्ययथादेहेजडेस्वातंत्र्यधीस्तथा । [यथैवात्मपराधीनेदेहेस्वातंत्र्यधीस्तथा] । जीवबिंबेश्वराधीनेजीवेस्वातंत्र्यविभ्रमः ॥ ८ ॥

प्र० तालपतनमिवकाकतालीयं । दैवाज्जायमानामित्यर्थः । “प्रेरकःसर्वजीवानांप्राणधीचोदिताचसः । विष्णुस्संसारिणोन्योयस्तमविज्ञायमूढधीः । देहेंद्रियप्राणबुद्धिनेतृत्वंमन्यतेत्सन”इतितत्वनिर्णयटीकोक्तमाह ॥ देहादियंतुरिति ॥ अगृहीत्वेति ॥ स्पष्टमितिशेषः । “दधिस्थघृतवत्काष्ठवह्निवच्चजनार्दनः । देहेंद्रियादिजीवेभ्योविविच्यज्ञायतेनत्वि”तिसप्तमस्कंधतात्पर्योक्तेः । स्वतः स्वस्मात् । एतेन “तस्याप्यस्वातंत्र्या”दितिटीकाविवृता । स्वतंत्रकर्तृतामतेःकागतिरित्यतआह ॥ जीवबिंबेति ॥ तत्रदृष्टांतश्चार्वाकस्येति । एतेन नकेवलंप्रागुक्तहि

प्र० ताक्रियाद्यन्यथानुपपत्त्यस्वातंत्र्यप्रत्यक्षाभ्यां । किंतु “आभासएवचे”तिवक्ष्यमाणदिशाप्रतिबिंबस्यजीवस्यबिंबाधीनत्वाच्चस्वातंत्र्यमति विभ्रमइतिसूचितं । ननुहरिरेवनास्त्यनुपलंभादित्युक्तमित्यतः “देवादिवदपिलोक” इतिसूत्रभाष्यटीकातात्पर्यमाह ॥ **आविर्भावेति** ॥ एते नाव्यक्तैकस्वभावस्यापि “अतोनंतेनतथाहिलिंग” मित्यत्रवक्ष्यमाणदिशास्वशक्त्याविर्भावसंभवेन “अयोग्यश्चेत्कदापिप्रत्यक्षोनस्या” दितिप्रा गुक्तंप्रत्युक्तं । एवंचप्रागुक्तंगौरवमुद्धरति ॥ **गौरवमिति** ॥ “किंत्वश्रौतजीवकर्तृत्वांगीकारएवतद्भवती” तिटीकांव्यनक्ति ॥ **प्रत्युतेति** ॥

आविर्भावतिरोभावौशक्तियोगात्पिशाचवत् । ईश्वरस्योपपद्येतेसर्वत्रावस्थितस्यच ॥९॥ गौरवंतन्नभाराययत्प्रमाणस्यसंमतं । नहिभारायभवतिकांक्षितंभूषणादिकं ॥ १० ॥ प्रत्युत प्रामाणिकेशकर्तृत्वत्यागादप्रमितस्यच । जीवेतस्यस्वीकृतेश्चगौरवंपू र्वपक्षिणः ॥ १ ॥ इति । यत्त्वनुव्याख्याने कृत्स्नप्रसक्त्यादिशंकित्वाऽचिंत्येशशक्त्योपपत्तेर्नसाम्यमित्युक्तंतदुत्तराधिकर णप्रमेयंशिष्यहितार्थमिहोक्तं । इहैवाचिंत्यशक्त्युक्तौपुनरुत्तरत्रपूर्वपक्षानुदयादितिसुधायामेवोक्तं । “इतरव्यपदेशा” दिति

प्र० यत्त्वनुव्याख्यानइति ॥ “तस्यत्वशेषशक्तित्वाद्युज्यतेसर्वमेवचे” त्यनुव्याख्यानइत्यर्थः । सुधायामस्फुटत्वात्तत्तात्पर्यमाह ॥ **कृत्स्नेति** ॥ **इतिसुधायामिति** ॥ तत्तात्पर्यानुवादोयं । उत्तराधिकरणसुधायांहि “तस्यत्वि” त्यर्धंपूर्वाधिकरणानुव्याख्यानशेषतयापूर्वत्रयोजितमप्यु त्तराधिकरणार्थोक्तिपरतयापियोजयित्वा “ननुदुर्घटमपिजीवकर्तृत्वमीश्वरशक्त्याघटतइत्यतीताधिकरणेभिहितं । तथाचकथमत्रपूर्वपक्षाव काशः । योहिपरत्रप्रमितंघटयितुमीष्टेसस्वस्मिन्नेष्टइत्यसंभावितं । उच्यते । नैषोर्थस्सूत्रकृतातीताधिकरणेऽभिहितः” इत्यादिनाग्रंथेनैतत्प्र

प्र० मेयमुक्तमित्यर्थः । उत्सूत्रत्वभ्रमंवारयति ॥ **सूत्राक्षराणीति** ॥ यद्यादिपदानुपलंभादाह ॥ **अयंभावइति** ॥ **दोषेति** ॥ हिताकरणा देर्दोषत्वप्रसक्तिरित्यर्थः ॥ ६ ॥ **इतरव्यपदेशाधिकरणं** ॥ ७ ॥

॥ ॐश्रुतेस्तुॐ ॥ "जीवकर्तृत्वपक्षोक्तदोषस्यात्रापिसंभवा"दित्यादिटीकासूचितमेतदुपाधिंपूर्वोत्तरापौनरुक्त्यायाह ॥ **अनंशस्यापीति** ॥

सूत्राक्षराणियोजयति ॥ जीवकर्तृत्वस्येत्यादिना ॥ अयंभावः । सौत्रस्येतरशब्दस्यप्रस्तुतब्रह्मकर्तृत्वादितरजीवकर्तृ त्वमर्थः । "असद्व्यपदेशान्नेतिचे"दितिसूत्राच्चेदित्यनुवर्तते । सचयद्यर्थः । यदितर्ह्योश्चनित्यसंबंधः । तथाचयदिजीवक र्तृत्वव्यपदेशाज्जीवःस्वतंत्रःकर्ता तर्हिहिताकरणादिदोषप्रसंगइतिसूत्रार्थइति ॥ ६ ॥ इतरव्यपदेशाधिकरणं ॥ ७ ॥

॥ ॐश्रुतेस्तुशब्दमूलत्वात्ॐ ॥ अत्रानंशस्यापीशस्यैकदेशेनव्यापारेऽणीयस्त्वादियुक्तस्यचमही यस्त्वादौव्याघातइतिव्याघातपर्यवसायिप्रबलयुक्त्यविरोधउच्यते । पूर्वोक्तस्यजीवकर्तृत्वेकृत्स्नप्रस क्त्यादिदोषस्यब्रह्मण्युद्धारात्संगतिः । अत्रपूर्वोक्तंविष्णोःसर्वकर्तृत्वंनयुक्तमुतयुक्तमितिचिंता । तद र्थंतस्यकर्तृत्वेकृत्स्नप्रसक्त्यादिदोषोस्त्युतनेति । तदर्थमन्यत्रयुक्तिविरुद्धंब्रह्मण्यपितद्विरुद्धंनवेति ।

प्र० एकदेशस्यैवमहीयस्त्वात्तद्व्याहन्येत । साकल्येनप्रवृत्तौचब्रह्मांडपिपीलिकांडप्रवृत्तावेकप्रकारेणप्रवृत्तौप्रेक्षावत्त्वंव्याहन्येतेतिभावः । संगतिः आपवादिकी । विषयसंशयटीकांव्यनक्ति ॥ **अत्रेति** ॥ "श्रुतेस्त्वि"तिसूत्रांशसूचितांचिंतामाह ॥ **तदर्थमन्यत्रेति** ॥ "शब्दमूलत्वात् ।

प्र० आत्मनिचैवंविचित्राश्चही"त्येतत्सूचितामाह ॥ **तदर्थंब्रह्मणीति** ॥ **अतिप्रसंगइति** ॥ उपादानादिनाविनासृजेदित्यादिरित्यर्थः । व्यक्तःफलफलिभावः । ननु जीवइवकृत्स्नप्रसक्तावनुभवविरोधाभावाद्विशेषबलादिनापरिहारसंभवाच्छास्त्रयोनिसूत्रेतर्कागोचरत्वस्यस्थित

तदर्थंब्रह्मणितद्विरोधःकिंतस्यतर्कागोचरत्वाघटितघटनाशक्तिभ्यांसुपरिहरउतनेति । तदर्थंताभ्यांतत्परिहारेकिम तिप्रसंगउतनेति । तदर्थंसोपिकिमप्रमितेपिकिंवाप्रमितएवेतिपूर्वपक्षमाह ॥ नैयुक्तमिति ॥ अयंभावः । ईश्वरस्या ल्पकार्येपिसर्वशक्त्याप्रवृत्तौप्रेक्षावत्त्वंनस्यात् । एकदेशेनप्रवृत्तिस्तुविरुद्धा । भिन्नांशाभावात् । नापिविशेषबलाद विरोधः । जीवेपीश्वरमनपेक्ष्यविशेषबलादेवाविरोधापातात् । ईश्वरईशइतिपर्यायशब्दवाच्येनिर्विशेषाभिन्नेवि शेषाभावेनतत्राणुत्वमहत्त्वादेर्विरोधापाताच्च । प्रमितत्वादविरोधइतितुजीवेपिसमं । प्रमाणस्यज्ञापकत्वेनावि रोधाकारकत्वाच्च । नचाल्पकार्येनांशस्यप्रवृत्तिः । नापिगुरुकार्येकृत्स्नस्य । किंतुप्रयत्नतारतम्यमात्रमितिवा च्यं । जीवेपिसाम्यात् । यदिचास्माकंतृणादानएकदेशस्यगुरुतरभारादानेचकृत्स्नस्यप्रवृत्तिरनुभवसिद्धातर्हीशेपि साजीवांतरइवानुमानसिद्धा । ईश्वरस्यातर्क्यत्वान्नतत्रतर्कप्रसरइतिचेन्न । शास्त्रयोनौब्रह्मण्यसाधकस्यापितर्कस्य

प्र० त्वाच्चकथंजीवपक्षोक्तदोषप्राप्त्यापूर्वपक्षोदयइत्यतआह ॥ **अयंभावइति** ॥ **ईश्वरइति** ॥ ईशशब्दापेक्षयेश्वरशब्दस्य "स्थेशभासपिस कसोवर"जितिवरच्प्रत्ययांतत्वेनवा "ईशेभ्योवर"इतिचतुर्थगीताभाष्योक्तदिशावाऽतिशयार्थत्वात्तादृशोपिचेदीशशब्दपर्यायोहरौतदानिर्विशे

प्र० षाभिन्नत्वमेवप्राप्नोति । विशेषसत्त्वेत्वपर्यायत्वस्यैवप्राप्त्यापर्यायतानस्यादितिभावः ॥ **बाधकत्वादिति** ॥ प्राक्साधकत्वमेवनिरस्तमि
तिभावः । ‘‘शब्दमूलत्वा’’दित्येतद्व्यावर्त्यप्रपंच्य ‘‘आत्मनिचैव’’मित्येतद्व्यावर्त्यमाह ॥ **यदिचेश्वरस्येति** ॥ एतेनचिंतास्थपूर्वपक्षकोटी
नांहेतुहेतुमद्भावोपिव्यक्तीकृतोतिप्रसंगश्चविवृतः । उक्तशंकोपमर्दस्यटीकायामस्फुटत्वादाह ॥ **अयंभावइति** ॥ शब्दमूलत्वादित्येतदंश

बाधकत्वात् । अन्यथामीमांसावैयर्थ्यं । यदिचेश्वरस्याचिंत्यशक्तित्वादविरोधस्तर्हीश्वरउपादानं[अप्राकृतविग्रहं]
ज्ञानेच्छादिकंचविनैवसृजेत् । स्वयमेववोपादानंस्यात् । शून्यंचसत्कुर्यात् । मुक्तांश्चबध्नीयादितिबहुविप्लवःस्यादि
ति । सिद्धांतमाह ॥ **सिद्धांतयदिति** ॥ अयंभावः ॥ श्रोत्रादिगम्यशब्दादौचक्षुरादिनसाधकं । नचापिबाध
कंयद्वच्छुष्कतर्कस्तथेश्वरे ॥ १ ॥ शुष्कतर्कइतिविशेषणान्नातिप्रसंगः । अतएवभाष्ये ‘‘यद्वाक्योक्तंनतद्युक्तिर्वि
रोद्धुंशक्नुयात्क्वचित् । विरोधेवाक्ययोःक्वापिकिंचित्साहाय्यकारण’’मितिस्मृतिरुदाहृता । किंच बह्वावासत्वसूक्ष्मत्वे
अप्यन्यत्रविरोधिनी । विश्वकर्मादिसामर्थ्याद्दृश्यतेपुष्पकादिषु ॥ १ ॥ मनुष्यादावदृष्टंचदृश्यतेदेवतादिषु ।
अस्मदादावदृष्टंचदृश्यतेमनुजांतरे ॥ २ ॥ ज्ञातुंनपार्यतेयस्यपारमप्यस्मदादिभिः । सएवांभोनिधिःकुंभजन्मना
चुलकीकृतः ॥ ३ ॥ विरुद्धमेवमन्यत्रापीश्वरेनविरुध्यते । सविचित्राचिंत्यशक्त्यादुर्घटंघटयेद्यतः ॥ ४ ॥

प्र० भाष्यटीकार्थसंगृह्याह ॥ **श्रोत्रेति** ॥ ननूक्तंमीमांसावैयर्थ्यमिति । तत्राह ॥ **शुष्केति** ॥ अतएवशुष्कतर्कस्याबाधकत्वादेवेत्यर्थः ।
‘‘आत्मनिचैवंविचित्राश्चही’’त्येतत्सूत्रभाष्यटीकातात्पर्यंव्यनक्ति ॥ **किंचेति** ॥ मनुजांतरइत्युक्तंव्यनक्ति ॥ **ज्ञातुमिति** ॥ एतेनास्मं

प्र० भावनाव्युदस्ता । प्रागुक्तमतिप्रसंगमुद्धरति ॥ **यत्प्रमितमिति** ॥ “आत्मनिचे”त्यवधारणार्थकचशब्दाभिप्रायोक्त्याप्रागुक्तजीवसाम्यं निराह ॥ **जीवस्यत्विति** ॥ एतेन “स्वपक्षदोषाच्चे”त्येतद्भाष्यटीकातात्पर्यमुक्तंबोध्यं । अस्फुटत्वात्सूत्राणांभाष्याद्युक्तंतात्पर्यंव्यनक्ति ॥

यत्प्रमितंविरुद्धंचतस्यैवाचिंत्यशक्त्यानिर्वाहइतिनातिप्रसंगः । जीवस्यत्वचिंत्याद्भुतशक्तौनमानमस्ति । प्रत्युततदभावएवप्रत्यक्षादिसिद्धइतिवैषम्यमिति । अत्रपूर्वपक्षयुक्तीनांप्रबलत्वादेवसिद्धांतेतदुद्धारार्थं “श्रुतेस्त्वि”तिसूत्रेश्रुतेरित्यनेनेश्वरस्यविरुद्धगुणवत्त्वेश्रुतिमेवोक्त्वा“शब्दमूलत्वा”दित्यनेनेश्वरस्यतर्कागोचरतां “आत्मनी”ति “सर्वोपेते”तिचसूत्राभ्यामघटितघटनाशक्तिंचोक्त्वा “स्वपक्षदोषाच्चे”तिसूत्रेणजीवेतदभावउक्तः । यदुक्तमुभाभ्यां “इतरे”त्यादिसूत्रत्रयमेकमधिकरणं । तत्र इतरस्य जीवस्य ब्रह्मत्वव्यपदेशात्चेद्ब्रह्मजीवान्सृष्ट्यादिनादुःखयेत्स्वात्मानमेवदुःखयेदिति “हिताकरणादिदोषप्रसक्ति”रित्याद्येनपूर्वपक्षयित्वाश्रुतिषुभेदस्यापिव्यपदेशान्नदोषइतिद्वितीयादिनासिद्धांतितं । तत्राभेदःसत्योभेदस्त्वसत्यइत्यन्येषांमतं । केषांचित्तुभेदःसत्योऽभेदव्यपदेशस्तुशरीरशरीरिभावनिमित्तकः । जीवोहिब्रह्मणःशरीरमितिभेदइति । तत्राद्येसूत्रे “इतरव्यपदेशा”दित्यस्यैक्यव्यपदेशादित्यर्थो

प्र० अत्रेति ॥ **श्रुतिमिति** ॥ “योसौविरुद्ध”इत्यादिश्रुतिमित्यर्थः । एतेन “शब्दमूलत्वा”दित्यनेनैवपूर्वपक्षनिरासात् “श्रुते”रितिव्यर्थमितिनिरस्तंध्येयं ॥ **सर्वेति** ॥ तत्रशक्तीनांकतिपयविषयत्वंकिंचित्कालीनत्वमाशंक्यसर्वविषयकत्वसर्वकालीनत्वोक्तेरितिभावः । यद्येवंतर्हि

प्र० "स्वपक्षे"त्यस्य "सर्वे"त्येतदानंतर्यस्यादितिनवाच्यं। विचित्रशक्त्यादिनेश्वरेऽदोषत्वेजीवेपितथास्यादितिशंकया अत्रैवसंगतत्वात्। शक्त्यभावेभिहितेसर्वेत्यत्रोक्तार्थाभावस्यकैमुत्यसिद्धत्वादितिभावः ॥ **विरुद्धइति** ॥ इतरेत्यनेनभिन्नेतिप्रतीतेरितिभावः ॥ **द्वितीयेपीति** ॥ अधिकमित्यस्यजीवादर्थांतरभूतमितिव्याख्यानादन्येनैवोक्तशंकानिरासादिदंव्यर्थमित्यर्थः ॥ **तत्रापीति** ॥ "यआत्मनितिष्ठ"न्नित्यादिनाजीवात्मनिपरमात्मनोऽवस्थितेरितिव्याख्यायाभेदश्रुतेरेवंगतेरुक्तत्वादित्यर्थः । यद्वामत्यामुक्तं "अधिकं"त्वित्यत्र "परमात्मासर्वज्ञत्वाद्य

विरुद्धः। द्वितीयेपिभेदमात्रस्यवक्तव्यत्वेनसूत्रेऽधिकशब्दास्वारस्यं। केषांचित्पक्षे "अवस्थितेरितिकाशकृत्स्न"इत्यनेनपुनरुक्तिः। तत्राप्यभेदश्रुतिःशरीरशरीरिभावविषयेत्युक्तत्वात्। अन्येषांपक्षेचकथंब्रह्मणोदुःखाद्यनर्थाभावः। किंविशिष्टस्यमिथ्याभूतस्यजीवस्यैवदुःखाद्यनर्थयोगात्तस्यचब्रह्माभेदाभावात् किंवासत्यस्यविशेष्यस्यैवानर्थयोगाद्ब्रह्मणस्तदभेदाभावात् यद्वासत्यपितात्विकाभेदेभेदाध्यासात् अथवाब्रह्मणस्तत्वज्ञानित्वेनजीववदभिमानाभावात् आहोस्विद्दुःखादेःकल्पितत्वेनपरमार्थतोऽनर्थाभावात्। नाद्यः। बंधमोक्षयोःसामानाधिकरण्यनियमेनमोक्षान्वयिनःसत्यस्यविशेष्यस्यैवानर्थयोगात्।

प्र० थाजीवान्वस्तुतआत्मनोभिन्नान्पश्यति पश्यत्येवं नभावतएषांसुखदुःखादिवेदनासंयोगोस्ति अविद्यावशात्तेषांतद्वदभिमानइति। तथाच तेषांसुखदुःखादिवेदनायामहमुदासीनइतिनतेषांबाधनागारेविनिवेशोप्यस्तिक्षतिःकाचिन्ममेतिनहिताकरणादिदोषापत्ति"रिति । तत्पंचधा विकल्प्यप्रत्याचष्टे ॥ **किंविशिष्टस्येति** ॥ **विशेष्यस्यैवानर्थयोगादिति** ॥ तस्यचाभिन्नत्वादनर्थस्स्यादेवेतिभावः। बंधमोक्षयोस्सामाना ॥ ८८७ ॥

प्र० धिकरण्यंव्यनक्ति॥ **नहीति** ॥ तथात्वेहिबंधमोक्षयोःसामानाधिकरण्यंनस्यात्। तथात्वंचापुमर्थत्वप्रसंगादनिष्टमितिभावः ॥**जीवस्येति**॥ तथाचतेनाभेदाभावादनर्थाभावइतिभावः ॥ **बहुजीवेति** ॥ एकजीववादेशुकोमुक्तोवामदेवोमुक्तइत्यादेरर्थवादत्वेनजीवस्यमुक्तत्वेसर्वथानिवृत्तेरेवमापाद्नायोगेपिबहुजीववादेस्यादेवदोषइतिभावः ॥ **एकजीवेति** ॥ अयंचदोषःप्रागपिसमः। वादद्वयेपिदोषमाह ॥ **दुःखेति** ॥

नहिबंधाश्रयनाशोमोक्षः । किंतुसतितस्मिन्बंधमात्रस्य । अन्यथाऽऽत्मनाशोमोक्षःस्यात् । नचाविद्यासंबंधरूपोबंधश्चिन्मात्रस्य । दुःखाद्यनर्थस्तुप्रतिबिंबस्यजीवस्य । उपाधेःप्रतिबिंबपक्षपातित्वादितियुक्तं। बहुजीववादे मुक्तायद्वावमात्मास्तस्यचिन्मात्रस्यबंधापातात्। एकजीववादेपिबंधतत्कार्यदुःखाद्यनर्थयोर्वैयधिकरण्यायोगात् । दुःखानुभवरूपानर्थस्यमुक्तिरूपपुमर्थसामानाधिकरण्यनियमाच्च। दुःखमेवचस्वतोनर्थः । अन्यत्तुतद्वारा। यथाचत्वत्पक्षे अनादिभावरूपंननिवर्ततइतिसामान्यव्याप्तेरज्ञानंज्ञाननिवर्त्यमितिविशेषव्याप्त्याबाधः तथोपाधिःप्रतिबिंबपक्षपातीतिसामान्यव्याप्तेर्बंधोऽज्ञानंवास्वसमानाश्रयानर्थहेतुरितिविशेषव्याप्त्याबाधोस्तु ।

प्र० ननुबंधरूपानर्थसामानाधिकरण्यमस्तीत्यतआह ॥ **दुःखमेवेति** ॥ तथाचतेनैवतथात्वंवक्तव्यमितिभावः । ननूक्तमुपाधेरित्यादि तत्राह ॥ **यथाचेति** ॥ चिन्मात्रएवदुःखाद्यनर्थस्वीकारेतेनाभेदाद्ब्रह्मणोनर्थोदुर्वारइतिभावः । यउपाधिःसप्रतिबिंबपक्षपातीतिव्याप्तिमुपेत्योक्तं।

प्र० वस्तुतस्तुसैवनास्ति । व्यभिचारादित्याह ॥ **कथंचेति** ॥ **सार्वज्ञादेरिति** ॥ औपाधिकस्येतिवर्तते । एवमग्रेपि । छायादीत्यादिपदेनप्रतिमुद्रादिगृह्यते । द्वितीये ब्रह्मणइत्यनेनशुद्धमुच्यतेऽथविशिष्टमितिकल्पौहृदिनिधायाह ॥ **तत्पदेति** ॥ **भेदाध्यासायोगादिति** ॥

कथंचोपाधेःप्रतिबिंबपक्षपातित्वं । औपाधिकस्यभेदस्योभयत्र सार्वज्ञादेर्बिंबेब्रह्मण्येव लौहित्यस्यचस्फटिकेदर्शनात् । ममतुप्रतिबिंबंछायादिवद्वस्त्वंतरं । तत्रैवचमालिन्यादि । तवत्वनर्थस्सत्येचिन्मात्रइतिवैषम्यं । नद्वितीयः । तत्पदलक्ष्यस्यविशेष्यस्यशुद्धस्यब्रह्मणःत्वंपदलक्ष्येणानर्थाश्रयेणसदाप्यभिन्नत्वेनशुद्धेप्यनर्थापातात् । तत्पदवाच्यस्यविशिष्टस्यब्रह्मणस्त्वनर्थाश्रयाद्विशेष्याद्भिन्नत्वेपित्वंपदवाच्योजीवोपिविशेष्याद्भिन्नइतिजीवेप्यनर्थाभावापातात् । यथाचतत्पदवाच्यंविशिष्टमनर्थाश्रयाद्विशेष्याद्भिन्नमेवंत्वंपदवाच्यमपि । नतृतीयः । जीवस्यभ्रांतत्वेनस्वस्मिन्ब्रह्मतोभेदाध्यासेपिब्रह्मणस्त्वन्मतेप्यभ्रांतत्वेनस्वस्मिन्संसाराश्रयाज्जीवाद्भेदाध्यासायोगात् । यदिचब्रह्मणोपिभ्रांतिस्तर्हिभ्रांतत्वादेवहिताकरणादिसंभवात्तत्परिहारक्लेशोऽनर्थकःस्यात् । नहिस्वाप्नंस्वशिरश्छेदादिकंपर्यनुयोगार्हं । किंच भेदारोपेपितात्विकाभेदादनर्थःस्यात् । नहिवह्निर्गुंजापुंजत्वेनारोपितोनदहति ।

प्र० तथाचानर्थस्स्यादेवेतिभावः । ननु स्वाप्नंप्रातीतिकं । इदंतुव्यावहारिकमितितत्परिहाराभावेश्रुत्यादिविरोधस्स्यादित्युच्यते । नचभ्रांतत्वांगीकारेपितद्विरोधस्स्यादेवेतिवाच्यं । शुद्धविषयत्वेनोपपत्तेरित्यतोऽयुक्तश्चायंनिर्वाहइत्याह ॥ **किंचेति** ॥ ननु तात्विकाभेदेपिसंसाराश्र

प्र० योनात्मेत्यारोपादनात्मन्येवससंसरिष्यतीत्यतआह ॥ नापीति ॥ यदपिश्रुतेरशुद्धविषयत्वमुक्तं तच्चनेत्याह ॥ अपिचेति ॥ ब्रह्मणोऽनभिमानेकिंतत्पदवाच्योऽभिमानीतल्लक्ष्योवेतिविकल्प्याह ॥ किंचेति ॥ इत्युक्तमिति ॥ तत्पदवाच्यस्येत्यादिनेतिभावः ॥ इत्युक्तमिति ॥ तत्पदलक्ष्यस्येत्यादिनेतिभावः ॥ अन्यथेति ॥ अनर्थत्वाभावे ॥ तृतीयेति ॥ "अश्मादिवच्चतदनुपपत्ति"रित्यत्र "यथाचलोकेपृथिवी

नापिसंसारिण्यात्मन्यनात्मत्वारोपेसंसारोनात्मगतः। अपिच बिंबस्थानीयस्येश्वरस्यभ्रांतत्वेपियद्भावोमोक्षस्तस्य चिन्मात्रस्यभेदभ्रमाभावादनर्थोदुष्परिहरः । नचतुर्थः । तत्वज्ञानित्वेनानभिमानित्वेपिजीवन्मुक्तवद्दुःखित्वापरिहारात् । किंचाभिमानीत्वंपदवाच्यश्चेत्सएवसंसरेत् । नचतद्युक्तमित्युक्तं । त्वंपदलक्ष्यश्चेद्यद्भावोमुक्तिस्तस्यचिन्मात्रस्याप्यभिमानःस्यादित्युक्तं । नपंचमः । मिथ्यात्वेपिजीवंप्रतीवब्रह्मप्रत्यप्यनर्थत्वात् । अन्यथातन्निवृत्त्यर्थं वेदांतश्रवणादिवैयर्थ्यं । नहिजीवस्यापितत्वतोऽनर्थोस्ति। तृतीयसूत्रे "भोक्त्रापत्ते"रित्यनेनपौनरुक्त्यं। त्वन्मते "ब्रह्मविवर्तत्वेपिजीवजडयोर्वैजात्यंपृथिवीविकारत्वेपिवज्राश्मादीनामिवे"तितृतीयसूत्रउक्तेः । "भोक्त्रापत्ते"रित्यत्रापिफेनतरंगादिदृष्टांतेनतद्वैजात्यस्यैवोक्तेः । यदुक्तंपरैः "उपसंहारे"त्यादिसूत्रद्वयमेकमधिकरणं ।

प्र० त्वसामान्यान्वितानामप्यश्मनांकेचिन्महार्हमणयोवज्रवैडूर्यादयोऽन्येमध्यमवीर्यास्सूर्यकांतादयएवमेकस्यापिब्रह्मणोजीवप्राज्ञपृथक्त्वंकार्यवैचित्र्यंचोपपद्यतइत्यतः तदनुपपत्तिः परिकल्पितदोषानुपपत्ति"रितिव्याख्यातं । तद्दर्शयन्नेवपौनरुक्त्यंव्यनक्ति ॥ त्वन्मतइति ॥ यदुक्तमिति ॥ लोकेकुलालादेर्मृद्दंडचक्रसूत्रसलिलाद्यनेककारकोपसंहारेणघटादिकार्यकरणदर्शनादद्वितीयंब्रह्मासहायत्वान्नोपादानमितिचेत्क्षीरवद्धि

प्र० यथाक्षीरमन्यदनपेक्ष्यदधिभावेनपरिणमते तथेहब्रह्मापिस्वभावादेवभविष्यति । ''नतस्यकार्यंकरणंच नतत्समश्चाभ्यधिकश्च परास्यशक्ति''
रित्यादेः । नन्वचेतनस्यक्षीरादेःस्वतःपरिणामेपिनचेतनस्यब्रह्मणइत्यतोदेवादिवदपिलोकइत्युक्तं । यथादेवपितृऋष्यादयोऽन्यत्साधनमनपेक्ष्यैश्वर्य
योगादेवप्रासादरथादीनिनिर्मिमते । लोके लोक्यतइतिव्युत्पत्त्यामंत्रार्थवादेतिहासादिशब्दे तथोपलंभादेवंब्रह्मापीत्युक्तमित्यर्थः । कल्पतरूक्तंवि

तत्राद्येनासहायस्योपादानत्वेक्षीरंदृष्टांतयित्वाद्वितीयेनासहायस्याप्यधिष्ठातृत्वेदेवादयोदृष्टातिताः ''देवादयो
ह्यनपेक्ष्यबाह्यंसाधनमिच्छामात्रेणप्रासादादीन्निर्मिमतइतिवेदादिसिद्ध''मिति । तन्न । क्षीरादेरपिदधिभावे
क्वाथातंचनादिसापेक्षत्वात् । ''पयोंबुव''दित्यत्रक्षीरेपीशःकर्तेतिवक्ष्यमाणत्वेनतद्विरोधाच्च । क्षीरादिदृष्टां
तस्यविवर्तानुगुणत्वाच्च । शुद्धविवर्तत्वेप्यज्ञानविशिष्टब्रह्मपरिणामोजगदितिचेत्तथापिदेवादिदृष्टांतोनयुक्तः ।
नह्यज्ञातायाःशुक्तेरूप्यात्मनापरिणामोऽधिष्ठातृसापेक्षः । इंद्रजालतौल्यविवक्षायांतुक्षीरदेवादिदृष्टांतौनयुक्तौ ।
यदिचप्रासादादिर्देवादिभिरिवजगदीश्वरेणकृतंतर्हिमिथ्यानस्यात् । एवंचक्षीरदृष्टांतोचेतनंप्रधानंस्वयमेवपरि
णमतइतिवदतोनिरीश्वरसांख्यस्यानुगुणः । देवादिदृष्टांतस्तुभिन्नेनोपादानेनेच्छामात्रेणेश्वरःसत्यजगत्स्रष्टेति

प्र० वेकमाह ॥ तत्राद्येनेति ॥ सापेक्षत्वादिति ॥ नन्वेतदेवाशंक्योक्तंपरभाष्ये ''आतंचनाद्यनपेक्षणेनकिंचित्परिणमतएव । आतंचना
दिकंतुसमग्रपरिणामएवोपयुज्यत''इति । अतआह ॥ पयइति ॥ त्वयापितथाभाषणादितिभावः । ननु ''देवादावपिब्रह्माधिष्ठिताविद्ये
वदेवादिचेतनाधिष्ठितंशरीरमेवप्रासादादिरूपेणपरिणमत''इतिभाषितमित्यतोदुर्भाषणंतदित्याह ॥ नहीति ॥ अज्ञातायाः अज्ञानसहि

प्र० तायाः । चिंताफलंचनेत्याह ॥ किंचत्वत्पक्षइति ॥ त्रिभिरिति ॥ ''एकदेशेनपरिणामावस्थानयोश्श्रवणात् । नचोक्तदोषः । शब्दैक
गम्यत्वात् । शब्दैकगम्यस्यचयथाशब्दमंगीकार्यत्वात् । अचिंत्याःखलुयेभावानतांस्तर्केणयोजयेत् । प्रकृतिभ्यःपरंयच्चतदचिंत्यस्यलक्षण

वदतोममानुगुणः । तवतुद्वयमपिप्रतिकूलं । किंचाद्यसूत्रउपसंहारशब्दस्यमदुक्तंसमाहृत्यर्थत्वं
स्वरसं । त्वदुक्तंसहकार्यंतरापेक्षार्थत्वंतुक्लिष्टं । द्वितीयेपिममलौकिकपिशाचादिदृष्टांतोक्तेर्लौ
कशब्दःस्वरसः । तवतुलोक्यतेनेनेतिलोकइतिभामत्युक्तरीत्यावेदपरइतिनस्वरसः । [एतेन
असहायस्यहेतुत्वेलौकिकक्षीरदृष्टांतउक्तः । द्वितीयेनतुवैदिकदेवादिदृष्टांतइतिकेषांचिन्मतमपा
स्तं । सूत्रास्वारस्यस्यदृष्टांतप्रातिकूल्यस्यचोक्तत्वात् ।] किंचत्वत्पक्षे(पक्षद्वये)पिप्रकृतिकालकर्मा
देःसहकारिणःसत्त्वात्तदनपेक्षत्वव्युत्पादनमनर्थकं । यच्चोक्तंपरैः कृत्स्नेत्यादिसूत्रचतुष्टयमेकमधि
करणं । तत्रब्रह्मणःकार्त्स्न्येनपरिणामेमूलोच्छेदःस्यात् । एकदेशेनपरिणामेनिरवयवत्वशब्दव्याको
पइत्याद्येनपूर्वपक्षयित्वा शब्दमूलत्वेनब्रह्मणोनतर्केणापह्नवइत्याद्यभिप्रायेणत्रिभिःसिद्धांतितं ।

प्र० मितिवचना''दित्याद्येनोक्त्वा ''किंचात्मनिस्वप्नदृशिस्वरूपानुपमर्देनैवानेकाकारारथादिसृष्टिः अथरथान्रथयोगानित्यादौश्रुतौपठ्यतइति
नात्रविवदितव्य''मितिद्वितीयेनोक्त्वा ''स्वपक्षेभिहितोदोषःपरस्यापिसमः । तेनापिनिरवयवंशब्दादिहीनंप्रधानमताद‍ृशकार्यकारणंस्वीकृत''

प्र० मितितृतीयार्थमुक्त्वासिद्धांतितमित्यर्थः । भामत्युक्तचोद्यपरिहारावाह ॥ यद्यपीति ॥ स्वप्नदृष्टांतएवेति ॥ विपरीतभ्रांतिजनकान

"यद्यपिविवर्तस्यैवसिद्धांतितत्वात्कृत्स्नप्रसक्तिशंकानवकाशः । तथापिपूर्वोक्तक्षी
रादिदृष्टांतेनपरिणामभ्रांत्याशंकिते आत्मनिचेतिसूत्रेणस्वप्नदृगात्माहिमनसैवस्व
रूपानुपमर्देनरथादीन्सृजतीतिमायावादःस्पष्टीकृत"इति । तन्न । विवर्तस्यादृश्य
त्वाधिकरणप्रकृत्यधिकरणारंभणाधिकरणेषूक्तत्वेनपरिणामभ्रांत्ययोगात् । योगे
वाऽऽदावेवविवर्तप्रतिकूलंकुचोद्योत्पादकंक्षीरादिदृष्टांतमनुक्त्वातदनुगुणस्वप्नदृष्टां
तएववाच्यः । सिद्धांतेविवर्तविवक्षाप्ययुक्ता । तथात्वेहिद्वितीयसूत्रेशब्दगम्यत्व
तर्कागम्यत्वेनवाच्ये । नहितेभ्रांत्यधिष्ठानत्वोपयुक्ते । तृतीयेपिस्वप्नदृष्टांतः
किंब्रह्मणोजगद्विषयकभ्रांतिमत्त्वेजीवस्यस्वाप्नभ्रांतिमत्त्वं किंवाब्रह्मणोजगद्भ्रमा
धिष्ठानत्वेजीवस्यस्वाप्नभ्रमाधिष्ठानत्वं यद्वाब्रह्मणोमायाविवद्भ्रामयितृत्वेजीवस्य
भ्रामयितृत्वं । नाद्यः । दार्ष्टांतिकानानुगुण्यात् । नहिब्रह्मभ्रांतं ।

प्र० भिप्रेतजीवदृष्टांतोक्तौफलाभावादितिभावः । स्वप्नदृगात्माहीतिभामतीवाक्यत्वाद्विकल्प्यप्रत्याचष्टे ॥ तृतीयेपीति ॥ "संज्ञापूर्वकोविधिर

प्र० नित्य"इति "मितांह्रस्व"इत्येतदनाश्रित्यभ्रामयितृत्वइत्युक्तं ॥ उक्तंहीति ॥ "नप्रयोजनवत्त्वा"दित्युत्तरनये "नतावदुन्मत्तवदस्यमति

उक्तंहिभामत्यामपि "भ्रांतस्यसर्वज्ञत्वानुपपत्ते"रिति । कल्पतरौच "अज्ञातंनटवद्ब्रह्मकारणंशंकरोब्रवी"दिति । नद्वितीयः । दृष्टांतानानुगुण्यात् । जीवस्यस्वाप्नभ्रमाधिष्ठानत्वेह्यहंकर्तेतिवदहंगजइतिधीःस्यात् । पक्षद्वयेपिसूत्रेविचित्रशक्त्युक्त्ययोगाच्च । नहिभ्रांतत्वंभ्रांत्यधिष्ठानत्वंवाविचित्रशक्तिसापेक्षं । अतएवनांत्यः । नहिस्वप्नद्रष्टाऽन्यान्भ्रामयति । स्वाप्नसृष्टौ "नतत्ररथा"इत्यादिश्रुत्युदाहरणमपिपरकृतमयुक्तं । श्रुत्युक्तःस्वाप्नस्रष्टाजीवश्चेत् "सहिकर्ता तस्मिन्लोकाःश्रिता"इतिवाक्यशेषविरोधात् । ईशश्चेद्गगनादिवत्स्वाप्नस्यव्यावहारिकत्वापातात् । तस्मादात्मनीतिसूत्रंद्युभ्वाद्यधिकरणन्यायेनात्मशब्दमुख्यार्थस्यब्रह्मणःप्रस्तुतजगत्कर्तृत्वोपयोगिविचित्रशक्त्युक्तिपरं । नतुस्वप्नदृष्टांतेनजगन्मिथ्यात्वोक्तिपरमिति । यच्चोक्तंपरैः "सर्वोपेते"त्यादिसूत्रद्वयमेकमधिकरणं । तत्राद्येन "आत्मनिचैवंविचित्राश्चही"तिपूर्वसूत्रोक्तविचित्रशक्तित्वे "यःसर्वज्ञःसर्ववित् सत्यकामःसत्यसंकल्प"इत्यादिश्रुतिरुक्ता । द्वितीयेनविचित्रशक्तियुक्ताअपिदेवादयआध्यात्मिककरणसंपन्नाएवकार्यकराः । ब्रह्मतु "अचक्षुष्कमश्रोत्र"मित्यादिश्रुत्याकरणरहितमितिशंकिते "अपाणिपाद"इत्यादिश्रुतेरकरणस्यापिब्रह्मणो

प्र० विभ्रमाज्जगत्प्रक्रिया। भ्रांतस्यसर्वज्ञत्वानुपपत्ते"रित्युक्तं। श्रुतेरीशविषयत्वमभिप्रेत्यप्रागुक्तायुक्ततांव्यनक्ति॥ श्रुत्युक्तइति॥ ईशश्चेदिति॥

प्र० स्वाप्नस्रष्टेतिवर्तते । नहिसर्वज्ञोभ्रांतइतिप्रागुदाहृतत्वद्वाक्यविरोधादितिभावः ॥ सइति ॥ प्रपंचइत्यर्थः ॥ ७ ॥ श्रुतेस्तुश

देवादिभ्योतिशयितशक्तियोगात्कर्तृत्वमितिसिद्धांतितमिति । तन्न । "आत्मनी"तिसूत्रेत्वद्रीत्याभ्रांतत्वस्यवाभ्रमाधिष्ठानत्वस्यवामायावित्वस्यवोक्तत्वेनेहतद्विरुद्धेसर्वज्ञत्वसर्वशक्तित्वादौश्रुत्युक्त्ययोगात् । नहिसर्वज्ञोभ्रांतः । नवासर्वभ्रमाधिष्ठानं । नवामायावीमायिकद्रष्टा । नचतात्विकसृष्टौशक्तोमायिकंसृजति । किंचभ्रमाधिष्ठानत्वस्यविकरणत्वेनाक्षेपःशक्तिविशेषेणसमाधानंचायुक्तं । मायावित्वेचब्रह्मणोमायिकप्रपंचद्रष्टृत्वंविरोधि । भ्रांतत्वंतुब्रह्मणःपरमतेपिनास्ति । प्रपंचंप्रतिब्रह्मणःकर्तृत्वेतुससत्यःस्यादित्युक्तं । केचित्तु "कृत्स्ने"त्यादिसूत्रषट्कमेकमधिकरणं । निरवयवत्वाद्ब्रह्मानुपादानमितिप्राप्तेशब्दगम्यत्वात्सर्वशक्तित्वान्नतर्केणापह्नवइतिसिद्धांतइत्याहुः । तन्न । त्वन्मतेहिविशिष्टोपादानतायाःप्रकृत्यधिकरणादावुक्तत्वात्, "नतुदृष्टांतभावा"दित्यत्रबालयुवदृष्टांतेनोपपादितत्वाच्चैतत्पूर्वपक्षानुदयात् । सिद्धांतेपिसर्वशक्तित्वंनतावद्विशेष्यस्य । तस्यानुपादानत्वेनवैयधिकरण्यात् । नापिविशिष्टस्य । स्वस्यनानाविधहेयात्मनापरिणामनिवारणाशक्तस्यतस्यसर्वशक्तित्वानुपपत्तेः ॥ ७ ॥ श्रुतेस्तुशब्दमूलत्वाधिकरणं ॥ ८ ॥

प्र० ब्दमूलत्वाधिकरणं ॥ ८ ॥

प्र० ॥ ॐनप्रयोजनवत्त्वात्ॐ ॥ "यत्प्रयोजनार्थंसृष्ट्यादी"त्यादिभाष्यटीकासूचितसंगत्यादिकमाह ॥ पूर्वत्रेति ॥ हेतुःकारणंमुखंद्वारंयस्यायुक्तेरितिसातथा । ब्रह्मैकदेशेनहेतुरुतकात्स्न्र्येनेत्येवंरूपयुक्तिःपूर्वत्र । अत्रतुसृष्टेःफलमस्त्युतनास्तीत्येवंरूपेत्यर्थः । द्वितीयसूत्रसूचिता

॥ ॐनप्रयोजनवत्त्वात्ॐ ॥ पूर्वत्रहेतुमुखयुक्तिविरोधोपास्तोत्रतुफलमुखदृष्टयुक्तिविरोधोपास्यतइतिसंगतिरधिकरणोपाधिरगतार्थताच । अत्रपूर्वोक्तंविष्णोःस्रष्टृत्वादिकंनयुक्तमुतयुक्तमितिचिंता । तदर्थंस्रष्टृत्वेसृष्ट्यादिसाध्यस्यफलस्यपूर्वमभावादपूर्णत्वमापतत्युतनेति । तदर्थंकिंसृष्ट्यादिकंफलार्थमुतलीलारूपमिति । तदर्थंप्रेक्षावत्प्रवृत्तिःप्रयोजनोद्देशेनैवोततदनुद्देशेनापीति । तदर्थमुद्रिक्तानंदस्यपुंसोहासगाननृत्तादौप्रवृत्तिर्दयालोश्चपरार्थाप्रवृत्तिःकिंस्वप्रयोजनोद्देशेनैवोततदनुद्देशेनापिसुखोद्रेकादिसामग्रीतइति । पूर्वपक्षमाह ॥ ११।२० संयुक्तिकमित्यादिना ॥ अयंभावः । नतावदीश्वरस्यप्रयोजनमुद्दिश्यप्रवृत्तिः । अपूर्णत्वापातात् । नचप्रयोजनानुद्देशेप्यग्नेरूर्ध्वज्वलनादाविवस्वभावादेवप्रवृत्तिः । चेतनत्वात् । नचचेतनत्वेपिमत्तस्यनृत्तगानादाविवनिष्फलैवप्रवृत्तिः । प्रेक्षावत्त्वात् । नापिप्रेक्षावत्त्वेपिदययाप्रवृत्तिः । दयासाध्यफलाभावात् । आप्तकामत्वात् । तदनुद्देशेचप्रेक्षावत्त्वंनस्यादित्युभयथापिननिर्दुष्टंब्रह्मेति । सिद्धांतमाह ॥ ११।२३ सिद्धांतयदिति ॥ अयंभावः

प्र० माह ॥ किंसृष्ट्यादिकमिति ॥ ननुप्रयोजनानुद्देशेनापिजायमानायाःप्रवृत्तेर्लोकेदर्शनात् "प्रयोजनानुद्देशेनप्रवृत्तिरेवनदृष्टे"तिटीकाकथमित्यतःसुधोक्तमाह ॥ अयंभावइति ॥ उक्तशंकोपमर्दस्यास्फुटत्वात् "सदाप्रवृत्तिरीशस्यस्वभावादेवकेवलं । अंगचेष्टायथापुंसःकाश्चि

प्र० द्दुद्देशवर्जिताः । देवस्यैषस्वभावोयमित्याहश्रुतिरंजसे”त्याद्यनुव्याख्यानसुधोक्तंहृदिकृत्वाद्वितीयसूत्रभाष्यटीकातात्पर्यमाह ॥ **अस्वभावेति** ॥ व्यतिरेकमुक्त्वाऽन्वयमाह ॥ **स्वाभाविकाइति** ॥ पक्षधर्मतामाह ॥ **स्वभावभूतात्विति** ॥ ईशस्यत्विति लोकपुरुषवैलक्षण्यार्थस्तु शब्दः ॥ **क्रमादिति** ॥ पूर्वसृष्टिःसृष्टस्यपालनमित्येवमित्यर्थः । ईश्वरीयःसृष्ट्यादिव्यापारःफलोद्देशाभावेप्युपपन्नः । स्वाभाविकत्वात् ।

अस्वभावप्रवृत्तौहिप्राज्ञोप्याकांक्षतेफलं । स्वाभाविकानिमेषाद्यानह्युद्दिष्टप्रयोजनाः ॥ १ ॥
स्वभावभूतात्वीशस्यक्रमात्सृष्ट्यादिकर्तृता । चूतादीनांवसंतादौपुष्पितत्वादिकंयथा ॥ २ ॥
देवस्यैषस्वभावोयमितिहिश्रुतिरब्रवीत् । गानव्याख्यानपूर्वेषुशिरोहस्तादिचेष्टितं ।
प्रयोजनमनुद्दिश्यप्रेक्षावंतोपिकुर्वते ॥ ३ ॥ अपिच दुःखोद्रेकात्सुखोद्रेकाद्रोदनेहसि
तादिके । प्रयोजनमनुद्दिश्यप्रवर्तंतेपिपंडिताः ॥ १ ॥ अतएवरोदनेहसितादौकारणमे
वपृच्छंति । नतुप्रयोजनं । ईश्वरस्यसुखोद्रेकात्प्रवृत्तिरित्युक्तमानंदमयाधिकरणे ।

प्र० निमेषादिवदित्युक्तंभवति । हेतोरसिद्धिंनिरसितुंमूलभूतश्रुतिमाह ॥ **देवस्येति** ॥ एषः इच्छापूर्वकसृष्ट्यादिव्यापारः । निमेषाद्याइत्येतद्व्यनक्ति ॥ **गानेति** ॥ “यत्प्रवृत्तिश्चनृत्तगानादिकासुखात् । दुःखाद्रोदादिकाचैवे”त्याद्यानंदमयनयानुव्याख्यानसुधेहृदिकृत्वाह ॥ **अपिचेति** ॥ एतच्च “नप्रयोजनवत्त्वा”दितिसूत्रस्यवक्ष्यमाणयोराद्यांत्यवृत्त्योस्तात्पर्यमितिध्येयं । एतेन “मत्तादिलीलायाःफलानुद्देशेनसु

प्र० खोद्रेकादेवदर्शना"दितिटीकाविवृता । द्वितीयवृत्तितात्पर्यमाह ॥ किंचदयायाइति ॥ वास्राशिशुवत्सागौः । तदुक्तंचतुर्थस्कंधेध्रुवस्तुतौ "वास्रेववत्सकमनुग्रहकातरोस्मा"निति । "इच्छामात्रंप्रभोस्सृष्टिरितिसृष्टौविनिश्चिता" इत्यनुव्याख्यानसूचितंतात्पर्यमाह ॥ किंचा

किंच दयायायद्यपिफलंदयालुस्तूद्दिशेन्नतत् । वास्रादिरिववत्सादौदययैवप्रवर्तते ॥१॥ तथाचेश्वरस्यस्वप्रयोजनाभावेपिदययापरप्रयोजनायप्रवृत्तिर्युक्ता । किंच अतिप्रयत्नसाध्येषुफलमाकांक्षतेजनः । नत्वनायाससंसाध्येस्वांगुल्यग्रादिचालने ॥ १ ॥ अतएवांगुल्यग्रादिचालनेप्रयोजनाप्रश्नः । प्रश्नेपितूष्णीमेवेतिप्रतिवचनं । अन्यथा "वृथाचेष्टांनकुर्वीते"तिनिषेधोनिर्विषयःस्यात् । ईश्वरस्यचसृष्ट्यादिकंनायाससाध्यं । "इच्छामात्रंप्रभोःसृष्टि"रितिश्रुतेरिति । टीकार्थःस्पष्टः। सूत्राक्षरार्थस्तु ईश्वरप्रवृत्तिरन्येषामिवस्वप्रयोजनार्थंन । कुतः । प्रयोजनवत्त्वात् यदर्थंप्रवृत्तिस्तस्यप्रयोजनस्याप्तकामत्वेनप्रागेवसिद्धत्वादिति । दयालुप्रवृत्ताविवपरप्रयोजनवत्त्वादिति नञआवृत्त्यास्वप्रयोजनार्थंन । कुतः । नप्रयोजनवत्त्वात् व्याख्यानादौहस्तचलनादाविवसुखोद्रेकाद्गानादाविवचप्रयोजनवत्त्वराहित्यादितित्रेधेतिद्रष्टव्यं ।

प्र० तिप्रयत्नेति ॥ किंचेतिश्लोकाद्बहिः । "तस्यपूर्णानंदत्वेनप्राप्तप्राप्तव्यत्वा"दित्यादिटीकोक्तंव्यनक्ति ॥ यदर्थमिति ॥ सुधाभिप्रेतंवृत्तिद्वयंचाह ॥ दयाल्विति ॥ नप्रयोजनवत्त्वादिति "नैकध्य"मित्यादाविव "अमानोना:प्रतिषेध"इतिनिषेधार्थकनकारस्य "सुप्सुपे"तिस

प्र० मासोयं । "अज्झनगमांसनी"त्यत्रसमस्तस्याप्यज्ग्रहणस्यावृत्त्यानुवर्तमानांगग्रहणेनान्वयइवात्रापिनकारस्यसाध्येनान्वयोयुक्तः । उक्तंचमंजर्यां "अज्ग्रहणंसामर्थ्यादावर्ततइत्युक्तंभवती"ति । नञ्इत्यस्यनिषेधार्थकनकारस्येत्यर्थोध्येयः । यद्वा "नप्रयोजनवत्त्वा"दित्यत्रनञ्समासेपि "नलोपोनञ"इतिनलोपोनभवति । "रात्रेःकृतिविभाषे"तिविभाषाग्रहणानुवृत्तेःप्राग्दर्शितत्वादितिभावः ॥ **यदुक्तमिति** ॥

यदुक्तमुभाभ्यां प्रयोजनांतराभावेपिमहाराजस्यकंदुकादाविवलीलार्थेश्वरस्यप्रवृत्तिरित्येतदधिकरणार्थइति तन्न । श्रुतिसूत्रविरोधात् । श्रुतौहि "क्रीडार्थमितिचापर" इतिलीलाप्रयोजनत्वंमतांतरत्वेनोक्त्वा "देवस्यैषस्वभावोय"मितिस्वमतमुक्तं । सूत्रेपिलीलार्थेत्यनुक्त्वाकेवललीलेत्येवोक्तं । तदुक्तमनुव्याख्याने "लीलांप्रयोजनंकृत्वासृष्टिःश्रुतिविरोधिनी । इतिकेवललीलैवनिर्णीताप्रभुणास्वय"मिति । किंचान्येषांपक्षेब्रह्मणःप्रयोजनाभावेनभ्रमाधिष्ठानत्वाद्याक्षेपोलीलात्वेनसमाधानंचायुक्तं ।

प्र० "नखलुब्रह्मजगद्रचयितुमर्हति । प्रयोजनवत्त्वात्प्रवृत्तीनामीश्वरस्यप्रयोजनाभावादित्याद्येनपूर्वपक्षयित्वा "लोकवत्तुलीलाकैवल्य"मित्यनेनसिद्धांतितं । तत्रलोकवदितिसूत्रतात्पर्यं "केचिदिदंसूत्रमन्यथाव्याचक्षत"इत्यादिनासुधोक्तंसंगृह्यानुवदति ॥ **प्रयोजनेति** ॥ **श्रुताविति** ॥ "भोगार्थंसृष्टिरित्यन्येक्रीडार्थमितिचापर"इतिश्रुतावित्यर्थः । देवस्यायं सृष्ट्यादिविषयः एषः इच्छा तत्पूर्विकाप्रवृत्तिरितिसुधो

प्र० क्वोर्थः । इषुइच्छायामित्यतोभावेघञ्प्रत्ययः । ईशस्यभ्रमाधिष्ठानत्वंवाभ्रांतत्वंवामायावित्वंवा । पक्षत्रयेप्ययुक्तत्वंव्यनक्ति ॥ **नहीति** ॥ मायावित्वमपिकिंचिन्मात्रस्योतविशिष्टस्य । पक्षद्वयमपिनिराह ॥ **मायाविवदिति** ॥ **नचिन्मात्रस्येति** ॥ तस्योदासीनत्वादिति

नहिचेतनोचेतनोवाफलमुद्दिश्यभ्रमविषयोभवति । भ्राम्यतिवा । मायाविवद्व्यामोहयितृत्वमपिनचिन्मात्रस्य । नापिकल्पितस्यमायासंकल्पादिविशिष्टस्य । तत्प्रतितस्यैवकल्पकत्वआत्माश्रयात् । तद्व्यामोहनीयानांजीवानांकल्पकत्वेत्वन्योन्याश्रयात् । चिन्मात्रस्यचाद्रष्टृत्वेनाभ्रांतत्वेनचाकल्पकत्वात् । कल्पकंचविनाकल्पनायोगात् । यत्तूक्तंकल्पतरौ "प्रतिबिंबगताःपश्यन्नृजुवक्रादिविक्रियाः । पुमान्क्रीडेद्यथाब्रह्मतथाजीवस्थविक्रिया"इति । तन्न । संसारस्यबिंबप्रतिबिंबानुगतसत्यचिन्मात्रगतत्वेनप्रतिबिंबगतवक्रतादिवैषम्यादित्युक्तत्वात् । लोकेस्वस्यविकृतात्प्रतिबिंबाद्भेदभ्रमेणक्रीडायामपिस्वस्यदुःखिजीवाभेदप्रमावतोब्रह्मणःक्रीडायोगाच्च । तस्मादस्याधिकरणस्यस्वमतप्रतिकूलत्वादेवपरकीयभाष्ये "नचेयंपरमार्थविषयासृष्टि"रित्यादिनाभामत्यामपि "नेयंपारमार्थिकीसृष्टिर्येनानुयुज्येतप्रयोजनं । नहिगंधर्वनगरादिविभ्रमाःसमुद्दिष्टप्रयोजना"इत्यादिनाभ्युपेत्यवादतोक्तेति ॥ ७ ॥ नप्रयोजनाधिकरणं ॥ ९ ॥

प्र० भावः । अंत्येपिकल्पकंसवाजीवोवाचिन्मात्रंवा । पक्षत्रयेपिदोषमाह ॥ **तत्प्रतीति** ॥ उक्तत्वादिति ॥ "इतरव्यपदेशादित्यत्र ॥ प्रमावतइति ॥ "अधिकंतुभेदनिर्देशा"दित्यत्रभामत्यांतथोक्तेरितिभावः ॥ ७ ॥ **नप्रयोजनाधिकरणं** ॥ ९ ॥

प्र० ॥ ॐवैषम्यनैर्घृण्येॐ ॥ फलविषयेति ॥ कर्मापेक्षंफलदानंनतदनपेक्षमित्येवंरूपयुक्तीत्यर्थः ॥ संगतिरिति ॥ आक्षेपिकीत्यग्रे
व्यक्तं । अधिकरणोपाधिःपादांतेस्पष्टयिष्यतइतिभावः । यद्वा परप्रयोजनेत्यादिनोपाधिरप्युक्तोध्येयः । द्विविधंहिवैषम्यादिकं । कर्मानपे
क्षत्वप्रयुक्तमन्यत्तुतदपेक्षत्वेपिकर्मादेस्सत्तादेरपीश्वराधीनत्वप्रयुक्तं । तत्राद्योपयुक्तचिंतामाह ॥ नयुक्तमुतयुक्तमिति ॥ अंत्योपयुक्तामाह
॥ तस्येश्वराधीनत्वइति ॥ ननुकिमीश्वराधीनमित्यनधीनत्वपूर्वपक्षकोटेर्निरपेक्षत्वसाध्यंप्रतिकथंहेतुत्वमितिचेदेवमत्रहेतुहेतुमद्भावः ।

॥ ॐवैषम्यनैर्घृण्येनसापेक्षत्वात्तथाहिदर्शयतिॐ ॥ अत्रपूर्वाधिकरणोक्तपरप्रयोजनरूपफलविषययुक्त्यवि
रोधउच्यतइतिसंगतिः । अत्रविष्णोःसर्वकर्तृत्वंनयुक्तमुतयुक्तमितिचिंता । तदर्थंसुखदुःखकर्तृत्वेवैषम्याद्यापत्ति
रुतनेति । तदर्थमीश्वरःकिमनादिकर्मयोग्यतादिनिरपेक्ष उततत्सापेक्षइति । तदर्थंचकर्मयोग्यतादिकमीश्वरान
धीनमुतेशितव्यत्वात्तदधीनमिति । तदर्थंतस्येश्वराधीनत्वेपुनरापन्नंस्वाधीनानादिसिद्धयोग्यताद्यनुसारेणसुख
दुःखदत्वलक्षणंवैषम्यादिकंकिंवैषम्यादिकमित्येवदोषःकिंवावेदाप्रामाण्याद्यापादकतयेति ॥ पूर्वपक्षयतीति ॥

प्र० यदिवैषम्यादिकंतत्त्वेनैवदोषस्तर्हिकर्मादेरीश्वराधीनत्वेपिदोषतादवस्थ्यादनधीनत्वेवाच्येऽनधीनकर्मसापेक्षत्वेतस्यैवस्वतंत्रकर्तृत्वमित्यस्यभं
गापत्त्यातन्निरपेक्षत्वेनिर्निमित्तंसुखादिप्रयच्छतोवैषम्याद्यापत्त्यानकर्तृत्वंयुक्तं । यदितुवेदाप्रामाण्यप्रत्यवायाद्यापादकतयादोषस्तदातस्येशेऽभा
वादनधीनकर्मादिसापेक्षत्वेननिर्निमित्तंसुखादिदातृत्वाभावेनतन्निमित्तवैषम्याद्यापत्त्यभावात्कर्तृत्वंयुक्तमितिभावः । परप्रयोजनरूपफलवि

प्र० षययुक्त्यविरोधइत्यस्यटीकायामस्फुटत्वादाह ॥ **अयंभावइति** ॥ कर्मनिरपेक्षउतसापेक्षः । आद्यआह ॥ **एवंहीति** ॥ अयंप्रधानसौत्रहेतुनिरस्यः । द्वितीयंशंकते ॥ **नचेति** ॥ द्वितीयसूत्रभाष्यटीकोक्तचोद्यपरिहारावनूद्यपूर्वपक्षीप्रत्याह ॥ **ननुचेति** ॥ "उपपद्यतेचाप्युपलभ्यतेचे"तिसूत्रव्यावर्त्यमाह ॥ **अनादिकर्मप्रवाहेति** ॥ कर्माद्यपेक्षाप्रयुक्तंवैषम्यादिकमीशेस्ति । तत्तुनदोषः । तदनपेक्षत्वप्रयुक्तं

अयंभावः । परप्रयोजनायसृष्टिरितिपूर्वोक्तंनयुक्तं । एवंहिसर्वेपिसर्वदासुखिनःस्युः । ईश्वरोहिकांश्चित्सुखयन्कांश्चिद्दुःखयन्विषमोनिर्घृणश्चस्यात् । नचकर्मसापेक्षत्वाददोषः । "एषह्येवसाधुकर्मकारयती"त्यादिश्रुत्याकर्मणोपीश्वरकारितत्वात् । ननुच पूर्वपूर्वकर्मापेक्ष्योत्तरोत्तरकर्मकारयति । नचयत्रपर्यवसानंतदारभ्यदोषइतिवाच्यं । अनादित्वात्कर्मप्रवाहस्येतिचेन्न । अनादिकर्मप्रवाहसत्तास्वभावादेरप्यारंभणाद्यधिकरणन्यायेनेशाधीनत्वेपुनर्वैषम्याद्यापातात् । अनधीनत्वेतुस्वातंत्र्यंनोपपद्येतेत्युभयथापिननिर्दोषंब्रह्मेतिपक्षः । सिद्धांतमाह ॥ सिद्धांतं[१२।१]यदिति ॥ अयंभावः । वैषम्यनैर्घृण्येहिकिंधर्माधर्मावनपेक्ष्येश्वरस्यसुखदुःखदत्वेतयोःसुखदुःखहेतुत्वप्रतिपादकवेदाप्रामाण्यापादकतयादोषौ किंवातत्सापेक्षत्वेनवेदाप्रामाण्याभावेपितस्यापीशाधीनत्वेनेश्वरस्यदोषौ । नाद्यः । कर्मादेरपेक्षणात् ।

प्र० तुदोषः । तत्तुनास्त्येवेत्यस्यटीकायामस्फुटत्वाददोषत्वस्योपपादनसापेक्षत्वात् सुधायां "नचेदंवेदाप्रामाण्याकारणं । कर्मादिसापेक्षत्वांगीकारात् । नापिजीवानामिवेश्वरस्यप्रत्यवाययहेतुः । तदभावा"दित्युक्तमुपलक्षणंमत्वाऽनेकविकल्पपूर्वटीकांविवृणोति ॥ **अयंभावइति** ॥

पूर्व ?

प्र० द्वितीयेपिकिमिति ॥ "वैषम्यादेरदुःखरूपतयास्वतोदोषत्वाभावा"दितिसुधोक्तेरितिभावः । समोहमितिगीतावाक्यंनवमाध्यायस्थं ॥ अनादीति ॥ "देशकालौगुणांश्चैवभक्त्यादीनप्यपेक्ष्यतु । योग्यतांचतथाकर्मसमइत्यभिधीयत"इतिसप्रमस्कंधतात्पर्योक्तेरितिभावः ॥

द्वितीयेपिकिंजीवानामिवप्रत्यवायहेतुतयादोषौ यद्वा "समोहंसर्वभूतेष्वि"त्यादि शास्त्राप्रामाण्यापादकतया अथवासमत्वरूपसद्गुणविरोधित्वेननीचत्वापादकत या । नाद्यः । ईश्वरस्यविधिनिषेधातीतत्वात् । अनादिसिद्धयोग्यताद्यनुसारि त्वस्यैवतत्रसमशब्दार्थत्वात् । उक्तंहि "सेवायोग्यातिरेकेण स्वानामपिनदा स्यति । अपराधातिरेकेण नान्यस्यातस्समोहरि"रिति । "यत्रयस्ययथावृत्ति र्विहितावर्तनंतथा । ज्ञानंवापिसमत्वंतद्विषमत्वंततोन्यथे"तिच । अतएवयमस्य समवर्तित्वप्रसिद्धिः ॥ नहिमातृकलत्रादौगुरुशिष्यादिकेपिच । वसिष्ठपुल्कसादौ चसमधीस्समउच्यते ॥ १ ॥ नवादुष्टान्निगृह्णन् शिष्टांश्चानुगृह्णन्राजाविषमः ।

प्र० उक्तंहीति ॥ षष्ठस्कंधतात्पर्ये ॥ प्रसिद्धिरिति ॥ "समवर्तीपरेतरा"डित्यादिनिघंटौ "ऋषभःपापिनांशास्तात्वंयमःसमदर्शन"इत्यादौ पुराणेचेत्यर्थः । तदेवव्यतिरेकेणोपपादयति ॥ नहीति ॥ "शुनिचैवश्वपाकेचपंडितास्समदर्शिन"इत्यादिगीतोक्तिःकथमित्यतआह ॥

प्र० शुनिचेति ॥ नन्वयोग्यस्ययोग्यताकरणाद्दयालुत्वगुणलाभस्स्यादित्यतआह ॥ स्वभावाननुसारीति ॥ स्वभावनियामकत्वस्येत्युक्तार्थे

"शुनिचैवश्वपाकेचे"त्यादित्वधिष्ठानवैषम्येपितदधिष्ठितस्यभगवतस्तदभावपरं । तृतीयेपि किंविविधतत्तत्स्व भावकरणाद्वैषम्यादिकं किंवानादिनित्यतत्तत्स्वभावोल्लंघनात् यद्वाऽनादिसिद्धविविधतत्तत्स्वभावस्यान्यथा करणेशक्तत्वेपितदकरणात् अथवाऽनादितत्तत्स्वभावनियमनात् । नाद्यः । चेतनस्वभावस्यानादित्वात् । न द्वितीयः । ईश्वरस्यतत्तत्स्वभावानुसारेणैवफलप्रदत्वात् । नतृतीयः । तस्यवैषम्याद्यनापादकत्वात् । स्वभा वमन्यथाकर्तुंयश्शक्तोप्यनुवर्तते । नासौलोकेपिविषमोनवानिर्घृणउच्यते ॥ १ ॥ समर्थोपिहिहंसादीन्काकी कर्तुंचयोमुनिः । नकाकीकुरुतेऽयंकिंलोकेविषमउच्यते ॥२॥ समर्थोपिचकाकादीन्हंसीकर्तुंहियोमुनिः । नहंसी कुरुतेऽयंकिंलोकेनिर्घृणउच्यते ॥३॥ नचतुर्थः । स्वभावनियामकत्वस्यनिरतिशयस्वातंत्र्यरूपमहागुणानुगुणत्वे ननीचत्वानापादकत्वात् । स्वभावाननुसारिदयायाश्चेश्वरेगुणत्वाभावेनानपेक्षितत्वात् । अन्यथेश्वरोदयालु त्वाद्दुःखमपिसुखमधर्ममपिधर्मंकुर्यात् । खिद्येतचलौकिकदयालुवत्प्राणिनांदुःखदर्शनेन । उक्तंहि "विषमत्वंतुदो षायशुभाशुभविपर्यये । शुभाशुभनियंतृत्वंनदोषोगुणएवस"इति । "नविष्णोर्विषमत्वंतुयोग्यतापेक्षयाक्वचित् ।

प्र० संमतिमाह ॥ उक्तंहीति ॥ सप्तमस्कंधतात्पर्येप्रथमेध्यायउक्तमित्यर्थः । "विपर्यय"इत्यनंतरं "अतस्तादृशवैषम्यंब्रह्मसूत्रेनिराकृत"मित्य

योग्यतायास्तन्नियत्याविषमत्वंक्वचिद्भवे"दितिच । [जीवाँनामिवप्रत्यवायहेतुतयादोषौ यद्वा "समोहंसर्वभूतेष्वि"त्यादि
शास्त्राप्रामाण्यापादकतया अथवासर्वसमत्वरूपसद्गुणविरोधित्वेननीचत्वापादनतया । नाद्यः । प्रवाहतोनादिकर्मापेक्षाभा
वात् । परंतुतत्कर्मेशाधीनं । नद्वितीयः । ईश्वरस्यविधिनिषेधातीतत्वात् । नतृतीयः । अनादिसिद्धयोग्यताद्यनुसारित्वस्यै
वतत्रसमशब्दार्थत्वात् । उक्तंहि "सेवायोग्यातिरेकेणस्वानामपिनदास्यति । अपराधातिरेकेणनान्यस्यातःसमोहरि"रिति ।
"यस्ययत्रयथावृत्तिर्विहितावर्तनंतथा । ज्ञानंचापिसमत्वंतद्विषमत्वमतोन्यथे"तिच । अतएवयमस्यसमवर्तित्वप्रसिद्धिः ।
नहिमातृकलत्रादौगुरुशिष्यादिकेपिवा । वसिष्ठपुल्कसादौचसमधीःसमउच्यते ॥ १ ॥ नहिदुष्टान्निगृह्णन्राजाविषमः ।
"शुनिचैवश्वपाकेचे"त्यादित्वधिष्ठानवैषम्येपितदधिष्ठितस्यभगवतस्तदभावपरं । चतुर्थेपिकिमनादिनित्यतत्तत्स्वभावोल्लंघ
नाद्वैषम्यादिकं यद्वाऽनादिसिद्धविविधस्वभावस्यान्यथाकारणेशक्तत्वेपितदकारणात् अथवाऽनादितत्तत्स्वभावनियमनात्
किंवाविविधतत्तत्स्वभावकरणात् । नाद्यः । ईश्वरस्यतत्तत्स्वभावानुसारेणैवफलप्रदत्वात् । नद्वितीयः । तस्यवैषम्याद्यनापा
दकत्वात् । "स्वभावमन्यथाकर्तुंयःशक्तोप्यनुवर्तते । नासौलोकेपिविषमोनवानिर्घृणउच्यते ॥ १ ॥ समर्थोपिचहंसादीन्का
कीकर्तुंहियोमुनिः । नकाकीकुरुतेऽयंकिंलोकेविषमउच्यते ॥ २ ॥ समर्थोपिचकाकादीन्हंसीकर्तुंहियोमुनिः । नहंसीकुरुतेऽ
यंकिंलोकेनिर्घृणउच्यते ॥ ३ ॥ नतृतीयः । स्वभावनियामकत्वस्यनिरतिशयस्वातंत्र्यरूपमहागुणानुगुणत्वेननीचत्वानापा ॥ ८९६ ॥

* कुंडलांतर्गतंपाठांतरं ॥

प्र० र्धस्येहानुपयोगादनुदाहृत्य “शुभाशुभे”तितदुत्तरार्धमेवोदाहृतं । “गुणएवस”इत्यनंतरं “अतस्तदिष्टंकृष्णस्यब्रह्मसूत्रकृतोविभो”रितिशेषोबोध्यः । “नविष्णो”रितितुतत्रैवोक्तस्कांदस्मृतिः ॥ वेदाप्रामाण्येति ॥ कर्मानपेक्षत्वनिमित्तमित्यर्थः । अन्यत्तु स्वाधीनतत्सापेक्षत्वनि

दकत्वात् । स्वभावाननुसारिदयायाश्चेश्वरेगुणत्वाभावेनानपेक्षितत्वात् । अन्यथेश्वरोदयालुत्वाज्जडमपिचेतनंसुरापानादिचधर्मसाधनंकुर्यात् । खिद्येतचलौकिकदयालुवत्प्राणिनांदुःखदर्शनेन । उक्तंहि “विषमत्वंतुदोषायशुभाशुभविपर्यये । शुभाशुभनियंतृत्वंनदोषोगुणएवस” इति । “नविष्णोर्विषमत्वंतुयोग्यतापेक्षयाक्वचित् । योग्यतायास्तन्नियत्याविषमत्वंक्वचिद्भवे”दितिच । नचतुर्थः । चेतनस्वभावस्यानादित्वेनेशाकृतत्वात्] तदेतदभिप्रेत्योक्तमनुव्याख्याने “वैषम्यंनिर्घृणत्वंचवेदाप्रामाण्यकारणं । नांगीकार्यमतोन्यत्तुनवैषम्यादिनामक”मिति । सूत्रेप्यनुव्याख्यानोक्तमाद्यपक्षमाद्येननिरस्यद्वितीयसूत्रेतर्हिस्वातंत्र्यंनोपपद्येतेतिशंकां “उपपद्यत”इत्यनेननिरस्य “उपलभ्यत”इत्यनेनानुव्याख्यानोक्तोद्वितीयःपक्षः

प्र० मित्तमित्यर्थः । उक्तार्थसूत्रारूढंकरोति ॥ सूत्रेपीति ॥ नकेवलमनुव्याख्यानइत्यपेरर्थः । आद्येन सापेक्षत्वादित्यंशेन । द्वितीयसूत्रे उत्पन्नशंकामितियोज्यं ॥ तर्हीति ॥ अनादिकर्मसापेक्षत्वइत्यर्थः ॥ निरस्येति ॥ “स्वाधीनसाधनादानंत्वि”त्युक्तदिशेतिभावः ॥

प्र० स्वीकृतइति ॥ "उपलभ्यतेचेश्वरस्यैताद्दशंवैषम्यंनिर्घृणत्वंचप्रमाणै"रितिसुधोक्तेः । टीकायामपिव्यक्तमुक्तेश्चेतिभावः । सूत्राक्षरार्थोऽति रोहितइतितात्पर्यार्थमनुवदति ॥ ईश्वरइति ॥ यद्यपीदंपरभाष्यएवोक्तं । तथापि "निमित्तमात्रएवासौसृज्यानांसर्गकर्मणि । प्रधानका रणीभूतायतोवैसृज्यशक्तय"इत्यादिपराशरस्मृतिमुदाहृत्य "सृज्यानांदेवादीनांकर्मशक्तिरेवदेवादिवैचित्र्यहेतु"रित्यादिवदतोरामानुजभाष्यकृ

स्वीकृतइतिद्रष्टव्यं । यदुक्तमुभाभ्यां ईश्वरःसस्येपर्जन्यइवसाधारणकारणं । कर्माणितुबीजा नीवासाधारणकारणानि । बीजशक्तिवैचित्र्याद्धिव्रीहियवादिसस्यवैचित्र्यं । तस्मान्नेश्वरस्यवैषम्या दीत्याद्यसूत्रार्थइति । तन्न । असाधारणकारणस्यापिकर्मणः "एषह्येवसाधुकर्मकारयती"त्यादि श्रुत्या "पुण्यपापादिकंविष्णुःकारये"दित्यादिस्मृत्याचेश्वरकारितत्वेनवैषम्याद्यनिस्तारात् । न चाबाधउपचरितार्थत्वंबहुश्रुत्यादेर्युक्तं । उक्तंहि "परात्तुतच्छ्रुते"रित्यत्रभामत्यामपि "एषह्ये वसाधुकर्मकारयतीत्येवमादयस्तावच्छ्रुतयःसर्वव्यापारेषुजंतूनामीश्वरपरतंत्रतामाहुः । तदसति बाधकेनप्रशंसामात्रपरतयाव्याख्यातुमुचित"मिति । एतेन यत्कैश्चिदुक्तं "जीवईश्वरदत्तया

प्र० तोप्यनुमतत्वादुभाभ्यामुक्तमित्युक्तं । उपचरितार्थत्वं प्रशंसार्थत्वं । ननुभामत्यामेतदाशंक्य "जन्मजन्मयदभ्यस्तंदानमध्ययनंतपः । तेनैवाभ्यासयोगेनतच्चैवाभ्यस्यतेपुन"रित्याद्युदाहृत्यकर्मानादित्वेनसमाहितमितिचेन्न । पूर्वकर्मणोप्यन्यथाकरणशक्तिमत्त्वेन "स्वभावमन्य ॥ ८९७ ॥

प्र० थाकर्तुंयश्शक्तोप्यनुवर्तत"इत्यादिनाऽस्मदुक्तसमाधेरेवानुसर्तव्यत्वादितिभावः ॥ साधारण्येति ॥ सदसत्प्रवृत्तिसाधारण्येत्यर्थः । एत

साधारण्यास्वातंत्र्यशक्त्यास्वयमेवशुभाशुभयोःप्रवर्तते । ईशस्त्वशुभउपेक्ष ते । शुभेत्वनुमन्यतइतिनवैषम्यादि । तदुक्तं आदावीश्वरदत्तयैवपुरुषःस्वा तंत्र्यशक्त्यास्वयंतत्तज्ज्ञानचिकीर्षणप्रयतनान्युत्पादयन्वर्तते । तत्रोपेक्ष्यत तोनुमन्यविदधत्तन्निग्रहानुग्रहौतत्तत्कर्मफलंप्रयच्छतिततःसर्वस्यपुंसोहरि" रितीति । तन्न । शुभाशुभप्रवृत्तिहेतुस्वातंत्र्यदानप्रयुक्तवैषम्याद्यनिस्ता रात् । "यआत्मानमंतरोयमयति एषह्येवसाधुकर्मकारयति नकृतेत्व त्क्रियतेकिंचनारे"इत्यादिश्रुत्या "यथादारुमयींयोषांनरःस्थिरसमाहितः । भ्रामयन्सर्वभूतानियंत्रारूढानिमायये"त्यादिस्मृत्याचविरोधाच्च । ईश प्रेरणंविनाप्रवृत्तौचकथंजीवस्येश्वरशरीरत्वं । कथंचजीवस्यस्वाहितेस्वय मेवप्रवृत्तिः । हितभ्रांत्याचेद्भ्रांतेरपीश्वरकर्तृकत्वेनवैषम्यादिदुर्वारं ।

प्र० च "कर्ताशास्त्रार्थवत्त्वा"दित्यत्रविवरिष्यते । एतेनेत्युक्तमेवव्यनक्ति ॥ शुभाशुभप्रवृत्तीति ॥ स्मृत्याचेति ॥ श्रुतौस्मृतौचसर्वत्रपार

प्र० तंत्र्यस्यैवजीवेप्रतीतेरितिभावः। यदप्यशुभउपेक्षतइति तदपिनेत्याह ॥ **किंचेति** ॥ "नकर्माविभागा"दितिसूत्रार्थंप्रत्याचष्टे ॥ **यच्चेति** ॥ सृष्टेःप्राक्कर्मनविद्यते । कुतः । अविभागात् । "सदेवसोम्येदमग्रआसीदेकमेवाद्वितीय"मित्यविभागश्रवणात् । सृष्टेरूर्ध्वमीश्वरःकर्मापेक्षः

किंचेश्वरस्यशक्तस्याप्युपेक्षायांनिर्घृणत्वादिदुर्वारं । अशक्तत्वेतु "आत्मनिचैवंविचित्राश्चहि सर्वोपेताचतद्दर्शना"दित्यादिसूत्रैः "परास्यशक्ति"रित्यादिश्रुतिभिश्चविरोधः । एतेनैवेश्वरेच्छा अस्त्वित्येवंसामान्याकारा । नतुविशेषाकारा ततोनवैषम्यादीतितार्किककल्पनाप्यपास्ता । यस्यकस्यापियत्किंचिदस्त्वित्येवमाकारत्वेहि कदाचिदीश्वरस्यदुःखंसुकृतादिमतोनरकादिकंचस्यात् । नापिमदिष्टमस्त्वित्येवमाकारा । तदिच्छास्वरूपस्याद्याप्यनिरूपणात् । तस्यतस्यतत्तत्कर्मानुसारेणसुखाद्यस्त्वित्येवमाकारत्वेचकर्मणईशानधीनत्वेश्रुत्यादिविरोधः । अधीनत्वेचवैषम्यादिदुर्वारं । तस्मादनादियोग्यतानंगीकारेवैषम्यादिदुर्वारं । यच्चोक्तमुभाभ्यां आदिसृष्टौकर्मैवनेतिनशंक्यं । अनादित्वात्संसारस्येति द्वितीयार्थइति । तन्न । ममरीत्यासुप्रसिद्धांसंसारानादितामुपेत्यापेक्षितंकर्मापीशकारितमित्यवश्यपरिहर्तव्यप्रबलशंकापरिहारपरत्वस्य "अनादित्वात्कर्मणश्चे"तिभाष्योदाहृतस्मृत्यनुसारिणःसंभवेऽन्यपरत्वायोगात् । तृतीयस्यापि

प्र० प्रवर्ततां । प्राक्त्वविभागादेकरूपैवसृष्टिस्स्यादितिशंकार्थः ॥ **तृतीयस्यापीति** ॥ परमतएवतृतीयत्वं । मतांतरेतुपूर्वेणैकयोगत्वात् । अनादित्वंकथमित्यवतार्य "उपपद्यतेसंसारानादित्वं । अन्यथाकृतहानाकृताभ्यागमप्रसंगात् । उपलभ्यतेचतदनादित्वंधातायथापूर्वमित्या

प्र० दा"वित्युक्तंपरैः । तत्प्रत्याख्याति ॥ ममेति ॥ परोक्तेति ॥ मायावाद्युक्तेत्यर्थः ॥ ज्ञानायोगेनेति ॥ मायाविनोमायिकादर्शनादिति

ममरीत्या नचकर्मसापेक्षत्वेस्वातंत्र्यानुपपत्तिः । कर्मणामीशाधीनत्वेनतदुपपत्तेः । नचैवंपुनर्वैषम्याद्याप त्तिः । स्वाधीनकर्मापेक्ष्यविचित्रफलप्रदत्वस्यश्रुत्यादिषूपलभ्यमानत्वेनेष्टापत्तेरित्यवश्यपरिहार्यशंकाद्वय निरासकत्वसंभवेपरोक्तसंसारानादित्वोपपत्त्यादिपरत्वमयुक्तं । नहिसंसारानादित्वेऽनुपपत्तिशंकास्ति । यद्यप्याद्यसूत्रेवैषम्यनैर्घृण्येद्विवचननिर्दिष्टे । तथापि "सकारयेत्पुण्यसथापिपाप"मितिविषयवाक्यउभ यकारयितृत्वस्यैकवचनेननिर्देशात्तदनुसारेणेहसूत्र "उपलभ्यतेचे"त्येकवचनं यथा "आत्मनी"तिपूर्व सूत्रेपुंलिंगेनात्मशब्देननिर्देशेपि "सर्वोपेते"तिसूत्रेविषयवाक्यस्थदेवताशब्दानुसारेणस्त्रीलिंगंतद्वत् । परेषांत्विदमधिकरणमत्यंतासंगतं । भ्रांतत्वेनवाभ्रमाधिष्ठानत्वेनवावैषम्यादिशंकानुदयात् । नहिस्वप्ने ऽयंसुख्ययंदुःखीतिभ्रांतिमतस्तद्विषयस्यवावैषम्याद्यस्ति । मायावित्वेचेश्वरस्यस्वमायाकल्पितकर्मादिज्ञा नायोगेनतत्सापेक्षत्वोक्त्ययोगात् । अतएवभामत्यां "अभ्युपेत्यचसृष्टेस्तात्विकत्वमिदमुक्तं । अनि र्वाच्यातुसृष्टि"रित्यस्याधिकरणस्यस्वमतप्रतिकूलतोक्ता ॥ ७ ॥ वैषम्यनैर्घृण्याधिकरणं ॥ १० ॥

प्र० भावः ॥ ७ ॥ वैषम्यनैर्घृण्याधिकरणं ॥ १० ॥

प्र० ॥ ॐसर्वधर्मोपपत्तेश्चॐ ॥ "उपसंहरती"तिभाष्यादिसूचितमाह ॥ एकैकेति ॥ कर्तृत्वादौवैषम्याद्यभावादौचेत्यर्थः । अधिकरणोपाधिरगतार्थताचादिपदार्थः । "विष्णोर्गुणपूर्णत्वंविषय"इत्यादिटीकांव्यनक्ति ॥ अत्रेति ॥ यदिदोषित्वप्रयुक्तंगुणित्वंतदभावेचतदभावस्तदाविष्णोर्दोषित्वेविशेषणाभावाद्दोषाभावेचविशेष्याभावान्ननिर्दोषगुणपूर्णत्वं । यदितुद्वितीयस्तदोभयत्रशक्तत्वान्निर्दोषगुणपूर्णंब्रह्मेतिस्पष्टः

॥ ॐसर्वधर्मोपपत्तेश्चॐ ॥ पूर्वाधिकरणेष्वेकैकगुणएकैकदोषाभावेचयुक्त्यविरोधउक्तः । अत्रतूपसंहारसूत्रेसर्वत्रेतिसंगत्यादिकं । अत्रविष्णोरुक्तंनिर्दोषगुणपूर्णत्वंनयुक्तमुतयुक्तमितिचिंता । तदर्थंकिंगुणित्वेकदाचिद्दोषित्वंप्रयोजकं अतएवदोषाभावेगुणाभावउतदोषित्वेदोषपरिहाराशक्तिर्गुणाभावेचगुणसंपादनाशक्तिःप्रयोजिकेति । पूर्वपक्षस्तु । गुणिनःकदाचिद्दोषित्वनियमादीश्वरस्यगुणित्ववद्दोषित्वंवादोषाभाववद्गुणाभावोवा । नतुचेतनांतरेष्वदृष्टासर्वगुणपूर्तिर्दोषमात्रराहित्यंचेति । सिद्धांतस्तु । नित्यनिर्मुक्तदोषंचसदासंप्राप्तसद्गुणं । परंब्रह्मभवेत्तत्रप्रेप्साशक्तियुतत्वतः ॥ १ ॥ ब्रह्म सदाप्राप्तसर्वसद्गुणं । तत्प्रेप्सुत्वेसतितत्रशक्तत्वात्संमतवत् । तथा सदात्यक्तसर्वदोषं । तज्जिहासुत्वेसतितत्रशक्तत्वात् । संमतवत् ।

प्र० फलफलिभावइतिभावः । टीकायामस्फुटत्वात्सुधातात्पर्यविवरणेनटीकांव्यनक्ति ॥ पूर्वपक्षस्त्विति ॥ "उपपत्ते"रिति सौत्रन्यायंसुधायांविवृतंसंगृह्याह ॥ नित्येति ॥ सद्गुणंचेत्यन्वयः । न्यायद्वयमेतत् । प्रेप्सेतिचोपलक्षणमितिभावेनसंग्रहंव्याचष्टे ॥ ब्रह्मेति ॥ सत्त्वा

प्र० दिव्यावृत्तयेसदितिगुणविशेषणं । तेन "केवलोनिर्गुणश्चे"त्यादिश्रुतिबाधःप्रत्युक्तः । विशेषणासिद्धिंनिराह ॥ प्रेप्सेति ॥ विशेष्यंतुप्रेप्सादिकंचप्रेक्षावत्त्वेनेत्युपपत्त्यनुगृहीतयासौत्रचशब्दोपात्तया "गुणाःश्रुता"इत्यादिभाष्योदाहृतयाश्रुत्यागुणदोषाभावरूपसर्वधर्मसिद्धिरिति । इदंसूत्रंसर्वधर्मविनिर्मुक्तब्रह्मवादिनांप्रतिकूलमितिस्फुटमेव । अस्मिन्पादआद्येऽधिकरणत्रिकेवेदस्याप्रमाणत्वादीश्वरस्यैवाभावाज्जन्मादिसूत्रोक्तंलक्षणमसंभवीत्याक्षिप्यतन्निरासइत्याद्यत्रिकमेकापेटिका । तत्राप्याद्येऽधिकरणेस्मृतिविरोधेनसाक्षात्सर्ववेदप्रामाण्याक्षेपः । द्वितीयेकारीर्यादिविधिवाक्याप्रामाण्यसाधकयुक्तिविरोधमुखेनसर्ववेदप्रामाण्याक्षेपः । तृतीये "मृदब्रवी"दित्यादिसिद्धार्थवाक्याप्रामाण्यसाधकदृष्टयुक्तिविरोधमुखेनसर्ववेदप्रामाण्याक्षेपः । चतुर्थमारभ्याधिकरणचतुष्टयेवेदप्रामाण्यमीश्वरस्वरूपंचस्वीकृत्योक्तलक्षणाक्षेपइत्यधिकरणचतुष्टयमेकापेटिका । तत्राद्येश्रुत्युपसर्जनकयुक्तिविरोधेनलक्षणमसंभवीत्याक्षेपः । द्वितीयेबहुश्रुतिसिद्धयुक्तिविरोधेनलक्षणमसंभव्यतिव्याप्तंचेत्याक्षेपः । तृतीयेविष्णोःकर्तृत्वेपिबहुयुक्तिविरोधाज्जन्मादिसूत्राभिप्रेतंस्वतंत्रकर्तृत्वमसंभवीत्याक्षेपः । चतुर्थेतुविष्णोर्महदादौस्वतंत्रकर्तृत्वेपिश्रुतिप्रत्यक्षसंवादियुक्तिविरोधान्नघटादिकर्तृत्वमित्याक्षेपः । अष्टमेसप्तमोक्तोजीवस्यस्वतंत्रकर्तृत्वेयस्तर्कविरोधःसर्वईश्वरेपिसमइतिव्याघातपर्यवसायितर्कविरोधेशंकितेशुष्कतर्कागोचरत्वादिनातदुद्धारः । एवंहेतुमुखयुक्तिविरोधेषुनिरस्तेषुनवमदशमाभ्यांफलमुखैरीश्वरस्यदोषित्वपर्यवसायिभिर्लिंगश्रुत्यनुगृहीतैर्दृढतर्कैर्विरोधेशंकितेतन्निरासइतिद्विकमेकापेटिका । एकादशेतुजिज्ञासा

प्र० "आत्मनिचैवंविचित्राश्चही"त्यादिनासिद्धमितिभावः । उक्तप्रमेयस्यसंग्रहेणबुद्ध्यारोहायपेटिकासंगतीराह ॥ अस्मिन्निति ॥ कथंत्रित्व

प्र० मित्यतोऽवांतरभेदमाह ॥ तत्रापीति ॥ समयपादीयाद्यनुव्याख्यानस्यैतत्पादीयसर्वाधिकरणोपाधिपरत्वंसुधायांनप्रतीयतइतिस्वयंतद्वि

सूत्रेब्रह्मशब्देनसूचितस्यजन्मादिसूत्रेसंभावितस्यपूर्णगुणत्वस्याक्षेपे तदुद्धारइतिद्रष्टव्यं । अत्रानुव्याख्याने "स्मृतियुक्तिश्रुतिगुणयुक्तयोबहुयुक्तयः । एवंचतुर्विधानैवविरुध्यंतेऽन्वयंप्रति" इत्येतत्पादीयाधिकरणानामुपाधयउक्ताः । तत्राद्येधिकरणेस्मृत्या द्वितीयेयुक्त्या तृतीयेदृढयुक्त्या चतुर्थेश्रुतिसंवादियुक्त्याविरोधनिरासइतिस्पष्टं । स्मृतियुक्तीत्यत्रयुक्तिशब्दस्यदृढादृढयुक्तिपरत्वात् । पंचमेबहुश्रुतिसिद्धयुक्त्या षष्ठेबहुयुक्तिभिः सप्तमेबहुप्रमाणसंवादियुक्त्या अष्टमेव्याघातपर्यवसायितयाबहुमतयुक्त्या नवमेप्रयोजनोद्देशेनुद्देशेचदोषइति बहुसुदृढयुक्त्या दशमेकर्मादिसापेक्षत्वेऽनपेक्षत्वेचदोषइतिबहुमुखदृढयुक्त्या एकादशेनिर्दोषत्वेतिपूर्णगुणत्वमहाप्रमेयविरोधित्वेन बहुमतयुक्त्याविरोधनिरासइतिपंचममारभ्यसप्ताप्युपाधयोबहुयुक्तिशब्देनविवक्षिताइति द्रष्टव्यं ॥ ७ ॥ सर्वधर्मोपपत्त्यधिकरणं ॥ ११ ॥ इतिश्रीमद्ब्रह्मण्यतीर्थपूज्यपादानांशिष्येणव्यासयतिनाविरचितायांश्रीमद्भाष्यटीकाविवृतौतात्पर्यचंद्रिकायांद्वितीयाध्यायस्यप्रथमःपादः ॥ २ ॥ १ ॥

प्र० वृणोति ॥ अत्रानुव्याख्यानइति ॥ बहुमुखेति ॥ अनेकत्वोपलक्षणमितिभावः ॥ ७ ॥ सर्वधर्मोपपत्त्यधिकरणं ॥ ११ ॥ इति श्रीमत्सर्वतंत्रस्वतंत्रसुधींद्रगुरुपादशिष्यराघवेंद्रयतिकृतेचंद्रिकाप्रकाशेद्वितीयस्यप्रथमःपादः ॥ २ ॥ १ ॥

प्र० ॥ श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ ‘‘सर्वविरोधाना’’मित्यादिटीकोक्तपादार्थमाह ॥युक्तीति॥
पौर्वापर्यबीजंतुप्रागेवविवृतमितिभावेनसर्वविरोधानांयुक्तिमूलत्वेनेत्याद्यंशस्तुनात्रविवृतः । ‘‘नचवाच्य’’मित्यादि ‘‘भावइत्यंत’’टीकांविवृण्वन्
‘‘नन्वनारंभणीयएवायंपाद’’इत्यारभ्य ‘‘समन्वयस्योक्तत्वा’’दित्यंतंसुधोक्तंचोद्यमनूद्यतत्रोक्तसमाधानेनपादसार्थक्यमाह ॥ यद्यपीति ॥ निर्दो

॥ श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ युक्त्यविरोधउक्तः । समयाविरोधउच्यते ।
यद्यपिवेदानां ‘‘नविलक्षणत्वा’’दित्यत्रापौरुषेयत्वेननिर्दोषत्वमाद्याध्यायेब्रह्मणिसमन्वयश्चोक्तः । वेदविरोधिनांसांख्यादिस
मयानांतु ‘‘इतरेषांचानुपलब्धे’’रित्यत्रानाप्तमूलत्वयुक्तीनांचगतपादएवाभासत्वमुक्तं । तथापि ‘‘अनादिकालतोवृत्ताः
समयाहिप्रवाहतः । नचोच्छेदोस्तिकस्यापिसमयस्येत्यतोविभु’’रित्यनुव्याख्यानोक्तरीत्यासमयानांवेदवदनादितोनुवृत्तत्वाद
भियोगतोबहुजनपरिगृहीतत्वाद्बहुयुक्त्युपबृंहितत्वात्प्राज्ञैःकपिलादिभिःप्रवर्तितत्वाच्चवेदवदेवप्रामाण्यमितिमंदस्यशंकायां
‘‘दौर्लभ्याच्छुद्धबुद्धीनांबाहुल्यादल्पवेदिनां । तामसत्वाच्चलोकस्यमिथ्याज्ञानप्रसक्तितः । विद्वेषात्परमेतत्वेतत्ववेदिषुचा
निशं । अनादिवासनायोगादसुराणांबहुत्वतः । दुराग्रहगृहीतत्वाद्वर्ततेसमयाःसदे’’त्यनुव्याख्यानोक्तरीत्या प्रवाहानाद्यनुवृ
त्तिबहुजनपरिग्रहयोरन्यथाप्युपपत्तेर्वेदवच्चस्वरूपानादित्वस्याभावाद्युक्तीनांचवक्ष्यमाणदृढयुक्त्यागमबाधितत्वेनाभासत्वा

प्र० षत्वमिति॥ तथाचनमतविरोधादप्रामाण्यं। समन्वयस्योक्तत्वान्नमतानांश्रुत्युपेतत्वेनप्राबल्यं। आप्तमूलश्रुतित्वेनवायुक्त्युपेतत्वेनवाप्राबल्यं
नास्ति । प्रागेवस्मृतीनामनाप्तमूलत्वेनयुक्तीनामाभासत्वेननिरासादितिनसमयाविरोधायायंपादआरब्धव्यइतिशंकाभिप्रायः ॥ अनादीति॥

प्र० एतेन “नह्यनादिकाले”त्यादिटीकैतन्मूलेत्युक्तंभवति । अभियोगतः आग्रहतः ॥ विशेष्योक्त्येति ॥ एतेन “अत्रविशेषतोनिराकरणा”दितिटीकाविवृता । नन्वेवंविधसमयानामुत्सादनासंभवात्प्रपंचनंव्यर्थमित्यतः “अधिकारिणोनिश्शंकाप्रवृत्तिर्भवती”तिटीकाभिप्रायमाह ॥ प्रपंचनंचेति ॥ “तथापिशुद्धबुद्धीनामीशानुग्रहयोगिनां । सुयुक्तयस्तमोहन्त्यु”रित्याद्यनुव्याख्यानोक्तेरितिभावः ।

दतएवचप्रवर्तकानामप्यप्राज्ञत्वादित्येवं “इतरेषांचानुपलब्धे”रित्यनेनोक्तानाप्तत्वस्यतत्त्वप्रमेयेषुदृढयुक्तिविरोधस्यविशिष्योक्त्याप्रपंचनार्थोयंपादः । प्रपंचनंचनसमयानामुच्छेदनार्थं । तेषांप्रवाहतोऽनंतत्वात् । किंत्वीशानुग्रहयोगिनांसतांपुंसांतन्निमित्तसंशयादिनिरासार्थं । विहितंचासन्मतनिराकरणंमुमुक्षोः “विद्यांचाविद्यांचे”त्यादिश्रुतिष्विति सार्थकोयंपादः । तत्रसमयाद्विविधाः । हैतुकाःपाषंडाश्चेति । उक्तंहि “योगसांख्यकणादाक्षपादावैहेतुवादिनः । पश्वीशशाक्तबुद्धाद्याःपाषंडाइतिकीर्तिताः”इति ।

प्र० परकीयदोषोत्कीर्तनेकथंनदोषइत्यतआह ॥ विहितंचेति ॥ अविद्यां मिथ्याज्ञानिनिंदां । “विद्यांचाविद्यांचयस्तद्वेदोभयꣳसह । अविद्ययामृत्युंतीर्त्वाविद्ययाऽमृतमश्नुत”इत्यादिश्रुतिष्वित्यर्थः । एतत्पादीयद्वादशाधिकरणपूर्वपक्षादेरत्राप्रपंचनाद्युगपदेवसर्वाधिकरणसंगतीर्विवरीतुकामः “समयाद्विविधाः”इत्यादिटीकांसप्रमाणंविवृणोति ॥ तत्रेति ॥ उक्तंहीति ॥ एकादशस्कंधेऽष्टादशाध्यायतात्पर्यइत्यर्थः । ॥ ९०१ ॥

प्र० टीकायांगीतातात्पर्योक्तनारदीयस्मृत्युक्तावप्यत्रस्मृतौशाक्तस्याधिकस्याप्युक्तेस्तज्ज्ञापनायैतत्स्मृत्युक्तिः । ननुकथंद्वैविध्यं । “वेदवादरताःपार्थनान्यदस्तीतिवादिन”इतिगीतायां “वेदवादरतोनस्यान्नपाषंडीनहैतुकी”तिभागवतेचविधांतरस्याप्युक्तेरित्यतः “वेदवादिना”मित्यादिटीकांशंकापूर्वंविवृणोति ॥ यद्यपीति ॥ इत्युक्तेति ॥ एकादशस्कंधतात्पर्योदाहृतवचनोक्तलक्षणाइत्यर्थः । तथाचसिद्धांतिनामपिवेदवा

यद्यपि “वेदेनसहवादोयोवेदवादइतीरितः । तर्केणवेदस्यान्यार्थकल्पनंतद्विदोविदु”रित्युक्तलक्षणावेदवादिनोपि “वेदवादरतोनस्यान्नपाषंडीनहैतुकी । वेदवादरताःपार्थनान्यदस्तीतिवादिनः”इत्यादौपाषंड्यादिवदेवनिषिद्धाः । तथापितआद्यपादएवनिरस्ताइतिनेहनिरस्याः । तदाह “वेदवादिनांप्रथमपादेनिराकृतत्वा”दिति । तत्रहैतुकाहेतुभिःप्रबलाइत्यादौनिराकार्याः । हैतुकेष्वपिसेश्वरेभ्योवैशेषिकादिभ्यःप्रायेणनिरीश्वराःसांख्यादयोवैदिकस्येश्वरवादस्यातिविरोधिनः । यद्यपिचार्वाकोत्यंतविरोधी । तथापितन्मतस्यातितुच्छत्वेन “इतरेषांचानुपलब्धे”रितिन्यायसंचाराविषयत्वेनचप्रथमंनिरासानर्हत्वादादौसांख्यानिराकार्याः ।

प्र० दित्वात्कथंतन्निरासइतिप्रत्युक्तं ॥ तदाहेति ॥ टीकाकृदित्यर्थः । ततःकिमित्यतः “तत्रपाषंडेभ्योहैतुकाःप्रबला”इत्यादिटीकांव्यनक्ति ॥ तत्रेति ॥ आदौ पूर्वषट्के । “तेषुचे”त्यादिटीकार्थमाह ॥ हैतुकेष्वपीति ॥ “अत्रचार्वाके”त्यादिटीकार्थमाह ॥ यद्यपीति ॥ इतिन्यायेति ॥ फलविसंवादिसाधनोपदेष्टृत्वादप्रामाण्यमागमस्येत्येवंरूपन्यायेत्यर्थः । तेनप्रत्यक्षमात्रप्रामाण्योपगमेनेष्टापादनादितिभावः ।

प्र० यद्वा दृष्टफलसाधनेफलविसंवाददृष्टांतेनादृष्टफलसाधनेपिफलविसंवादानुमानात्तदुपदेष्टुरनाप्तत्वमित्येवंरूपन्यायेत्यर्थः । तेनादृष्टानभ्युपगमात्तत्रोक्तन्यायविस्मृतिरूपत्वादस्यपादस्येतिभावः । "सचद्विविध" इत्यादिव्यनक्ति ॥ सांख्यमतमपीति ॥ ईशकर्तृत्ववादविरोधस्फोरणायोक्तंकेवलाचेतनकर्तृत्वेत्यादि । बुद्धिपूर्वककृतिमत्त्वादेरचेतनेऽयोगाट्टीकोक्तमेवाह ॥ इहचेति ॥ टीकोपलक्षणमितिभावेनाह ॥

सांख्यमतमपिकेवलाचेतनकर्तृत्वचेतनसहिताचेतनकर्तृत्वाभ्यांद्वेधा । इहचकर्तृत्वंनामस्वतएवप्रवृत्तिमत्त्वं । तत्राद्यं वैदिकस्यस्वतंत्रचेतनकर्तृत्वस्यचेतनरूपविशेष्यस्यैवानंगीकारेणात्यंतविरोधीत्याद्याधिकरणेतन्निरासः । द्वितीयमपि सांख्यमतंगुणभूतेश्वरानुगृहीतप्रधानकर्तृत्वेनजीवसहितप्रधानकर्तृत्वेनचेतिद्वेधा । तत्रयद्यपिनिरीश्वरंद्वितीयंसेश्वरादाद्यादतिविरोधि । तथाप्याद्यस्यसेश्वरस्य "नऋत"इत्यादिश्रुतेर्गुणभूतेश्वरविषयत्वसंभवात् "व्यतिरेकानवस्थिते"रितिप्रथमाधिकरणोक्तदोषोनेत्याक्षेपेणप्रवृत्तेर्द्वितीयाधिकरणेनिरासः । इदंचमतंसेश्वरमपिसांख्यमतत्वादीश्वरस्यस्वातंत्र्यास्वीकारेणफलतोनिरीश्वरवादांतर्भावाच्चनसेश्वरवैशेषिकादिपरीक्षायांनिरस्तं । किंत्विहैवसांख्यपरीक्षायां । तृतीये माभूत्केवलमीश्वरगुणकंवाजडंकर्तृ । तथापीश्वरोनकर्ता । सदेहस्यैवचेतनस्यकर्तृत्वात् । ईश्वरस्यचादेहत्वात् ।

प्र० द्वितीयमपीति ॥ व्यतिरेकेति ॥ "नऋतेत्वत्क्रियत"इत्यादेरीशव्यतिरेकेणकस्याप्यनवस्थितेरित्युक्तदोषइत्यर्थः । द्वितीये "अन्यत्राभावाच्चनतृणादिव"दित्यत्र । तृतीये "अभ्युपगमेप्यर्थाभावा"दित्यत्र ॥ केवलमिति ॥ रचनेत्यत्रोक्तं ॥ ईश्वरेति ॥ "अन्यत्राभावा

प्र० चे"त्यत्रोक्तमित्यर्थः ॥ **श्रुतीति** ॥ "एतस्यवाअक्षरस्यप्रशासनेगार्गि नक्रतेत्वत्क्रियत"इत्यादिश्रुत्या विमतासृष्टिश्चेतनेच्छानुसारिणी सृष्टित्वात्पटसृष्टिवदित्याद्यनुमानेनचेत्यर्थः ॥ **वक्ष्यमाणेति** ॥ अचेतनंशरीरमेवस्वतःप्रवृत्तिमत्त्वरूपकर्तृत्ववदितिमतस्यनिरासेहिचेतनाधिष्ठितमेवशरीरंप्रवर्ततेनकेवलमितिसिद्ध्यापुरुषाधिष्ठितंशरीरंयथाऽश्मानयनादौप्रवर्तते तथाप्रधानमितिवक्ष्यमाणदृष्टांतनिर्वाहइतिदृष्टांत

श्रुत्यनुमानाभ्यांकेवलस्येश्वरगुणस्यवाजडस्यकर्तृत्वनिरासोप्ययुक्तः। तयोरप्रमाणत्वादितिद्वितीयाक्षेपेणमध्यउत्थितस्य तथा वस्तुतोचेतनस्यदेहस्यैवकर्तृत्वांगीकारेणसांख्यमतसन्निकृष्टस्य तथा उत्तरसूत्रवक्ष्यमाणपुरुषाश्मदृष्टांतनिर्वाहकनिरासविषयस्यचचार्वाकस्यनिरासः। अनंतरंचार्वाकंप्रत्युक्तोविषयाद्यभावदोषोनास्माकमितितृतीयाक्षेपेणोत्थितस्यजीवसहिताचेतनकर्तृत्वस्यनिरासः। जीवसहितस्यप्रधानस्यकर्तृत्वमपिजीवस्योपसर्जनत्वप्राधान्याभ्यांद्वेधा। तत्रचेतनस्याचेतनंप्रत्युपसर्जनत्वरूपस्याद्यस्यातिविरुद्धत्वाच्चतुर्थेतन्निरासः। पंचमेतुचतुर्थोक्तांगित्वानुपपत्त्युद्धारेणोत्थितस्य द्वितीयस्यनिरासः। एवंनिरीश्वरेचतुर्विधेसांख्येसचार्वाकेऽधिकरणपंचकेननिरस्ते षष्ठे निरीश्वरपक्षोक्तोदोषोनास्माकमीश्वरवादिनां। किंत्वीश्वरोष्टगुणकएव। नत्वानंदादिगुणकइतिपंचमाक्षेपेणसमुत्थितसेश्वराक्षपादकणादादिनिरासः।

प्र० निर्वाहकनिरासेत्युक्तं ॥ **चतुर्थइति** ॥ "पुरुषाश्मवदितिचेत्तथापी"त्यत्र ॥ **पंचमइति** ॥ "अन्यथानुमितौचज्ञशक्तिवियोगा"दित्यत्र। षष्ठे। "महद्दीर्घवद्वाह्रस्वपरिमंडलाभ्या"मित्यत्र। सिद्धांतप्रातिकूल्यंव्यनक्ति ॥ **अष्टगुणकइति** ॥ ननुयोगस्यापिहैतुकत्वेनस्मृतावुक्तेः

प्र० कुतोन्नतन्निरासइत्यतआह ॥ योगस्त्विति ॥ "समुदायउभयहेतुकेपी"त्यधिकरणोपक्रमगतां "द्विविधसमयिनांमध्येहैतुकनिरासानंतरं पाषंडिनांनिराकरणंप्राप्त"मित्यादिटीकांप्रसंगादत्रविवृण्वन्नुत्तराधिकरणानामपिसंगतिमाह ॥ एवमिति ॥ "पाषंडिनोपिद्विविधाः । अवै

योगस्तु "एतेनयोगःप्रत्युक्त"इत्यतीतपादएवविशिष्यनिरस्तः । एवंहैतुकेषुनिरस्तेषुपाषंडनिरासावसरः । पाषंडोपिवेदप्रामाण्यानंगीकारांगीकाराभ्यांद्वेधा । तत्राद्योतिविरोधित्वादादौनिराकार्यः । सचबौद्धजैनभेदेनद्वेधा । तत्रबौद्धशास्त्रस्यप्रथमनिर्मितत्वात्प्रबलत्वाच्चादौबौद्धानिराकार्याः । तेपिवैभाषिकाः सौत्रांतिकाः माध्यमिकाः योगाचाराश्चेतिचतुर्धा । तत्रयद्यपिपरमाणुपुंजरूपःक्षणिकोबाह्यार्थोघटादिःसन्प्रत्यक्षश्चेतिवदतःसौत्रांतिकात्सोनुमेयइतिवदन्वैभाषिकोत्यंतंविरोधी । ततोपिज्ञानातिरेकेणबाह्यार्थएवनास्तीतिवदन्योगाचारोतितरांविरोधी । ततोपिसर्वशून्यवादीमाध्यमिकोतितमांविरोधीतिमाध्यमिकयोगाचारवैभाषिकसौत्रांतिकाःक्रमेणनिराकार्याः । तथापिपरमाण्वारंभवादनिरासेनतत्पुंजवादोपस्थितेःपुंजरूपबाह्यार्थसत्त्ववादित्वेनैकीकृत्यावांतरभेदमविवक्षित्वा तार्किकंप्रत्युक्तमीश्वरस्यवैदिकत्वमयुक्तं । वेदस्यैवाप्रमाणत्वादितिषष्ठाक्षेपेणप्रवृत्तयोर्वैभाषिकसौत्रांतिकयोस्सप्तमेनिरासः । अथपरमाणुपुंजवादिनंप्रत्युक्तोदोषोनास्माकमितिसप्तमाक्षेपेणोत्थितस्यशून्यवादस्यविज्ञानवादादप्यतिविरुद्धत्वादष्टमेतन्निरासः । परिशे

प्र० दिकावैदिकाश्चे"त्यादिटीकावाक्यार्थंव्यनक्ति ॥ पाषंडोपीति ॥ "बौद्धानांबहुविधत्वेपी"त्यादिटीकार्थंव्यनक्ति ॥ तेपीति ॥ "तेचचतुर्विधा"इत्यादिसुधोक्तेरितिभावः ॥ सप्तमइति ॥ "समुदायउभयहेतुकेपितदप्राप्ति"रित्यत्र । अष्टमे "नासतोदृष्टत्वा"दित्यत्र । नवमे ॥ १०३ ॥

प्र० "नभावोऽनुपलब्धे"रित्यत्र । दशमे "नैकस्मिन्नसंभवा"दित्यत्र । "अवैदिकपाषंडिसमयनिरासानंतर"मित्यादिपत्युर्नयटीकांव्यनक्ति ॥ एवमिति ॥ अत्रगाणपतेतिपाठस्साधुः । गणपतिशब्दस्यपत्युत्तरपदत्वेपि "अश्वपत्यादिभ्यश्चे"त्यण्प्रत्ययेनैवभाव्यत्वात् । चतुर्थाद्यपा

षान्नवमेशून्यवादिनंप्रति "नासतोदृष्टत्वा"दित्युक्तोदोषोनास्माकमित्यष्टमाक्षेपेणसमुत्थितस्यविज्ञानवादस्यनिरासः । दशमेशून्यवाद्युक्तमसत्त्वंविज्ञानवाद्युक्तंसत्त्वंचस्यादितिवदतांस्याद्वादिनामस्माकंनैकैकपक्षोक्तदोषइतिनवमाक्षेपेणप्रवृत्तस्यक्षपणकस्यनिरासः । एवमवैदिकेपाषंडेनिरस्तेवैदिकपाषंडनिरासावसरः । सचशैवस्कांदसौरगाणपत(त्य)शाक्तादिभेदेनानेकधा । तत्रसर्वेभ्योपिशैवसमयःप्रबलइतितस्यशैवपाशुपतकालामुखमहाव्रतभेदेनचतुर्विधस्यक्षपणकंप्रति "नैकस्मिन्नसंभवा"दित्युक्तोदोषोनास्माकमितिदशमाक्षेपेणप्रवृत्तस्यैकादशेनिरासः । यद्यपिस्कांदसौरगाणपतादिवन्महावाममध्यमवामाणुवामभेदेनत्रिविधंशाक्तमतमपिशैवमतनिरासकन्यायेनैवनिरस्तं । तथापिस्त्रीमात्रादुत्पत्त्यसंभवइतिविशेषदोषविवक्षयाद्वादशेनिरस्तमित्यधिकरणानामवांतरसंगतिः । अत्रतत्तत्समयोक्तानांपूर्वपक्षन्यायानांतद्विरोधिनांसिद्धांतन्यायानांचप्रसिद्धत्वादत्रभाष्यटीकयोःस्पष्टत्वादनुव्याख्यानसुधयोःप्रपंचितत्वाच्चनास्माभिःपृथगुच्यंते । उक्तंचन्यायविवरणे "उक्तविरोधिनस्तत्तत्समयसिद्धाःपूर्वपक्षन्यायास्तद्विरोधिनोन्यइतिप्रसिद्धमेवे"ति ॥ ॐरचनानुपपत्तेश्चनानुमानंॐ ॥

प्र० देऽश्वपत्यादिसूत्रेमंजर्यां "गाणपत्यइत्यपशब्द"इत्युक्तत्वाच्च । एकादशे "पत्युरसामंजस्या"दित्यत्र । "पूर्वन्यायेननिरस्तमपिशक्तिमत"मित्यादिचरमाधिकरणटीकांव्यनक्ति ॥ यद्यपीति ॥ द्वादशे । "उत्पत्त्यसंभवा"दित्यत्र ॥ ॐरचनानुपपत्तेश्चॐ ॥ पूर्वपादांत्यो

प्र० त्तरपादाद्याधिकरणयोर्नावश्यंसंगत्यपेक्षेतितदनुक्तिः । ''विष्णोस्सर्वकर्तृत्वंविषय''इत्यादिटीकांव्यनक्ति ॥ अत्रेति ॥ उत्तराचिंतोत्थाना र्थंश्रुतिसमन्वयेनोक्तमित्युक्तं । फलफलिभावोत्रव्यक्तः । ''नकार्यंस्वसदृशकारणवत् । कार्यत्वा''दित्यादिटीकोक्तंसूत्राक्षरारूढंदर्शयति ॥ अनुमानमिति ॥ अनुमीयतइत्यनुमानमिति ''कृत्यल्युटोबहुल''मितिकर्मणिबाहुलकल्युडंतत्वमुपेत्यार्थमाह ॥ सांख्येति ॥ अनुमा

अत्रश्रुतिसमन्वयेनोक्तंब्रह्मणःस्रष्टृत्वादिकंनघटतउतघटतइतिचिंता । तदर्थंसांख्यसमयविरोधात्किंश्रुतिरप्रमाणमुतनेति । तदर्थंयुक्तिमूलत्वेनाभिप्रेतसांख्यसमयोक्तंप्रधानस्यजगद्रचयितृत्वादिकंकिंयुक्तमुतनेति । एवमन्यत्राप्येतत्पादीयाधिकरणेषुचिंतापरंपरोह्या । अस्मिन्नधिकरणेटीकास्पष्टार्था । सूत्राक्षरयोजनातु अनुमानं सांख्योक्तानुमानकल्पितंप्रधानंनस्वतंत्रकारणं । जडस्यरचयितृत्वानुपपत्तेः । चशब्दोक्तान्मानाभावाच्च । नचानुमानंमानं । महदादिकं सकारणकंसजातीयकारणजन्यंवा सजातीयोपादानकंवा स्वतंत्रकारणजन्यंवा कार्यत्वादित्याद्यनुमानरचनायाःसिद्धसाधनेनस्वतंत्रजडजन्यमितिरचनायाश्चदृष्टांताभावेनानुपपत्तेरितिद्रष्टव्या । द्वितीयाधिकरणे ''यच्चकिंचि''दित्यादिभाष्योदाहृतश्रुतौसर्वगतत्वोक्तेःप्रकृतोपयोगंदर्शयितुंटीकायां ''सत्तादिप्रदानाये''त्युक्तं । ''सएवे''त्यादिभाष्यंसौत्रचशब्दव्याख्यानमित्याह

प्र० नान्यग्रेव्यक्तानि । ''प्राचीनानुमानंतुकारणत्वमात्रसाधक''मित्यादिटीकार्थमपिसूत्रारूढंदर्शयन्ननुमानपदंकरणल्युडंतमुपेत्य ''रचनानुपपत्तेस्तन्नसर्वज्ञानुमागत''मित्यनुव्याख्यानसूचितं सूत्रस्ययोजनांतरमाह ॥ नचेति ॥ सिद्धेति ॥ प्रधानेशयोर्मयाप्यंगीकारादितिभावः । सूत्रांतरयोजनास्फुटा । क्रमोपिपूर्वोक्तरीत्योहनीयइतिभावः । तत्रतत्रास्पष्टवाक्यानिव्यनक्ति ॥ यच्चकिंचिदित्यादिना ॥ अभ्युपगमे

प्र० पीत्यतःप्राक् “अन्यत्राभावाच्चे”त्येतन्नयटीकावाक्यविवरणं । समस्तपदत्वेकोर्थःसंपन्नइत्यतोनेत्यस्यविरोधार्थत्वमुपेत्यलब्धमर्थमाह ॥ ॥ नकेवलमित्यादिना ॥ नानुग्राहकत्वमात्रमितिसमस्तंपदं । तथाचनकेवलमन्यत्राभावादित्यनेनोक्तंकार्यस्येश्वराधीनत्वमेवसेश्वरसांख्योक्तस्यानुग्राहकत्वमात्रस्यविरोधि । किंतु सएवेत्यादिभाष्योक्तप्रमाणसिद्धसौत्रचशब्दसूचितंसर्वहेतुभूतप्रकृतिसत्तादेरीश्वराधीनत्वमपिविरोधीत्यर्थः ॥ सूचितमितिशेषइति ॥ सत्तादिप्रदत्वंचप्रामाणिकैरंगीकृतमितिसौत्रचशब्देनसूचितमित्यर्थः । “अभ्युपगमेप्यर्थाभावा”दितितृतीयाधिकरणसूत्रेर्थशब्देननकेवलंप्रयोजनमभिप्रेतं । किंतुविषयोपि । भाष्येपिप्रयोजनशब्देननकेवलंफलं । किंतुप्रयुज्यतेऽनेनेतिविषयोपीत्यभिप्रेत्याह ॥ नापिविषयइति ॥ अपरामर्शोऽदर्शनादित्यादि ॥ धर्मादिकंनास्ति । प्रत्यक्षेणानुपलंभादित्यादिपरामर्शाभावेधर्माद्यभावस्याप्रतीतेः । परामर्शेनधर्माद्यभावदर्शनंतुनानुमानाद्भिद्यते । परामर्शेत्यनेनानुमितिकरणस्यदर्शनशब्देनानुमितेश्चत्वयैवोक्तत्वादित्यर्थः । स्वव्याहतिमुपपादयति ॥ नह्यभ्युपगमोप्रयोजनश्चेतियुक्तमिति ॥ “मत्सिद्धांत”इत्यनेनसप्रयोजनत्वाद्यविनाभूतसिद्धांतत्वमभ्युपगम्य “मास्तुप्रयोजन”मित्यनेनाप्रयोजनत्वोक्तिर्व्याहतेत्यर्थः । अत्र भाष्ये “उपेक्ष्य”इत्यनेन टीकायां “नयुक्त”मित्यनेनचपूर्वसूत्रान्नञोनुवृत्तिर्दर्शिता । अनेनचत्वदीयशास्त्रस्यसिद्धांतत्वानभ्युपगमेसिद्धमस्मदिष्टं । अभ्युपगमेपितद्व्यापकयोर्विषयप्रयोजनयोरभावाभ्युपगमाद्व्याघातइतिसूत्राक्षरयोजनासूचिता । चतुर्थपंचमाधिकरणयोष्टीकास्पष्टार्था ॥ स्पष्टत्वात्पूर्वपक्षादिन्याप्र० तथाचेति ॥ अत्रेति ॥ अभ्युपगमेपीतिसूत्रेनञोऽनुवृत्तिर्दर्शितेत्यन्वयः । भाष्यादावदूषणेबीजमाह ॥ भाष्यकारेणेति ॥ ननुचा

प्र० र्वाकमतमतितुच्छत्वान्नदूष्यमित्यतआह ॥ किंचेति ॥ "देहव्यतिरिक्तात्मनस्सद्भावस्समर्थ्यते"इति "एकेलोकायतिका"इतिचपरभाष्यो क्तेरितिभावः । एतच्चाद्वैतिमते । रामानुजमतेतु "उपासकश्चात्मज्ञातृत्वकर्तृत्वाद्याकारतयैवनानुसंधेयः । किंत्वपहतपाप्मत्वाद्याकारतया

यानांभाष्यटीकयोः । अपव्याख्यैवसूत्राणामस्माभिर्दूष्यतेंजसा ॥ १ ॥ भाष्यकारेणसन्मार्गेगच्छतान्येकुमार्गगाः । निरस्ता इतिभावेनकंठतोननिराकृताः ॥ २ ॥ अत्रयदुक्तमुभाभ्यां "रचनानुपपत्ते"रित्यादि "विप्रतिषेधा"दित्यंतंसूत्रदशकमेक मधिकरणंचेतनानधिष्ठितस्यप्रधानस्यजगद्रचयितृत्वनिरासकमिति । तन्न । ममरीत्यानिरीश्वरसांख्यविंध्यादिमतेकेवलाचे तनकर्तृत्वमतस्य सेश्वरसांख्यपातंजलादिमतस्य पुनरपिनिरीश्वरसांख्येपुरुषोपसर्जनप्रकृतिकर्तृत्वमतस्य प्रकृत्युपसर्जनपुरु षकर्तृत्वमतस्यच पूर्वपूर्वदोषोद्धारेणोत्थितस्याऽवश्यनिरसनीयस्यचक्रमेणनिरासायाधिकरणपंचकसंभवेतदनिरासेनैकीकर णायोगात् । किंच तृतीयाध्यायस्यतृतीयपादे "एकआत्मनःशरीरेभावा"दित्यधिकरणंत्वयाचार्वाकमतनिरासकत्वेनव्या ख्यातं । ततोवरमत्रैवमतांतरनिरासावसरेतन्निरासः । किंच चिन्मात्रस्यापिकर्तृत्वभ्रांतत्वभ्रामयितृत्वानिनयुक्तानीत्युक्तं । भ्रमाधिष्ठानत्वंत्वचेतनस्यापियुक्तं । विकारस्त्वचेतनस्यैवयुक्तः । कर्तृत्वेतरपक्षेषुसौत्ररचनाशब्दास्वारस्यंच । यदिचचि न्मात्रआरोपितंवाऽविद्यांतःकरणादिविशिष्टेतात्विकंवाकर्तृत्वं तर्हिप्रधानेपिपुरुषभेदाग्रहादारोपितंवा पुरुषविशिष्टेतात्वि

प्र० पी"त्येवंपरतयाव्याख्यानात् । अद्वैतमतेदोषांतरमाह ॥ किंचेति ॥ उक्तमिति ॥ इतरव्यपदेशादित्यादौ ॥ कर्तृत्वेतरेति ॥ उक्तेषुच

प्र० तुर्षुपक्षेष्वित्यर्थः । "प्रवृत्तेश्चे"तिसूत्रार्थंप्रत्याचष्टे ॥ यत्त्विति ॥ रामानुजमते "प्राज्ञाधिष्ठिताचेतनस्यैवकार्यारंभप्रवृत्तेर्दर्शना"दितिव्या ख्यानात्परैरित्युक्तिः । टीकोक्तमनुभवमाह ॥ अहमिति ॥ अनुषंगार्थमिति ॥ "अपिपदंचेतनप्रवृत्तेराकर्षणार्थ"मितिटीकोक्तेस्त्वया पि "तत्रापीत्यस्यपयोंबुनोश्चैतन्याधिष्ठितयोरेवप्रवृत्तिरित्यनुमिमीमह" इतिभाषणादितिभावः ॥ नानुमानमिति ॥ नप्रधानंस्वतःप्रवृ

कंवा चेतनत्वकर्तृत्वादिकमस्तु । यत्तुपरैरुक्तमचेतनस्यप्रवृत्तेरप्यनुपपत्तेरितिद्वितीयार्थ इति तन्न । उदासीनस्वभावस्यचेतनस्यापिनप्रवृत्तिरित्यवश्यपरिहार्यसांख्यशंकायाअहंक रोमीत्याद्यनुभवबलेननिरासार्थं "पयोंबुवच्चे"दित्युत्तरसूत्रेऽनुषंगार्थं "रचनानुपपत्ते"रित्य नेनापौनरुक्त्यर्थंचद्वितीयस्थस्यप्रवृत्तिपदस्यचेतनप्रवृत्तिपरतायाएवन्याय्यत्वात् । तव पूर्वसूत्रेनिर्दिष्टस्यानुपपत्तेरित्यस्येहानुषंगः । ममतु नानुमानं । किंतुचेतनएवेतिपूर्वसूत्र एवप्रकृतस्यचेतनस्य । सांख्यशंकायाअवश्यपरिहार्यत्वादेवहित्वयापि "ननुचेतनस्या पिनप्रवृत्ति"रितिचोद्यपूर्वकं "सत्यमेवं । तथापी"त्यादिनासासूत्राद्बहिरेवपरिहृता ।

प्र० त्तिमत् । किंतुचेतनएवतथेत्यर्थसिद्ध्येप्रकृतस्येत्यर्थः ॥ चेतनस्येति ॥ अनुषंगइत्यन्वयः । त्वयापि भाष्यकृतेत्यर्थः । "सत्वरजस्तमसां साम्यावस्थानात्प्रच्युतानामंगांगिरूपापत्तिःप्रवृत्ति"रितिपरभाष्योक्तंहृदिकृत्वा "अपौनरुक्त्यार्थंचे"त्येतद्दृढीकर्तुंतन्मतेऽपौनरुक्त्यमाशंक्य

प्र० निराह ॥ **नन्विति** ॥ अंगांगिभावोगुणानामन्योन्यंगुणप्रधानभावः । "पयोंबुवच्चेत्तत्रापी"त्येतदर्थंनिराह ॥ **यच्चेति** ॥ परैरुक्तमिति वर्तते ॥ **शंकांशेति** ॥ परिहारार्थोनविरोधीतिभावः । तादर्थ्येन परिणामार्थेन । एतेनदध्यादिपरिणामप्रवृत्तयेपयोवन्नारिकेलादिरस

ननुकार्यरूपेणस्वतःपरिणामोरचना । तदर्थासत्वरजस्तमसांसाम्यावस्थातःस्वतःप्रच्युतिःप्रवृत्तिरित्यपौनरुक्त्यमिति चेन्न । तथापि "अंगित्वानुपपत्ते"रित्यनेनपुनरुक्तेः । तस्यापित्वया "साम्यावस्थात्यागेनांगांगिभवानुपपत्ते" रितिव्याख्यातत्वात् । यच्च यथावत्सविवृद्ध्यर्थमचेतनंपयःस्वतएवप्रवर्तते लोकोपकारार्थंचाबुस्यंदते । तथाप्रधानमपीतितृतीयेशंकांशार्थइति तन्न । ममरीत्या "एतेनहवावपयोमंडंभवती"तिश्रुत्यनुसारिसौत्रपरिहारानुसारेण पयःपरमप्रकृतेचेतननिरपेक्षाचेतनस्यपरिणामेदृष्टांतः । अंबुतुतादर्थ्येनप्रकृतेप्रवृत्तिमात्रेदृष्टांतइतिदृष्टांतद्वयसाफल्यसंभवेतत्त्यागायोगात् । पयसोधेन्विच्छादिनैवप्रवृत्त्यास्वतःप्रवृत्तौदृष्टांतत्वायोगाच्च । यच्चोक्तंकार्योत्पादनेप्रधानव्यतिरेकेणापेक्षणीयस्यानवस्थितेःप्रधानंनसहकार्यंतरापेक्षं । ततश्चसदाकार्यंस्यादितिचतुर्थार्थइति तन्न । मम रीत्यातृतीयसूत्रप्रकृतेश्वरस्यव्यतिरेकप्रतियोगित्वेन द्वितीयसूत्रप्रकृतचेतनप्रवृत्तेश्चानवस्थितेरित्यनेनान्वयंस्वीकृत्य "चेतनस्यापीशव्यतिरेकेणयदानप्रवृत्तिस्तदाजडस्यनेतिकिमुवाच्य"मितिसुधोक्तमार्गेणकैमुत्यन्यायपरत्वसंभवे

प्र० विशेषपरिणामप्रवृत्तांबुवच्चेतनानधिष्ठितंप्रधानंजगद्रूपपरिणामप्रवृत्तिनिमित्तमितिरामानुजमतार्थोपिप्रत्युक्तः। दृष्टांतद्वयसाफल्याभावात् । "व्यतिरेकानवस्थितेश्चानपेक्षत्वा"दित्येतदर्थंनिराह ॥ **यच्चोक्तमिति** ॥ परैरित्यस्ति ॥ **सुधोक्तेति** ॥ टीकायांप्रवृत्तिमात्रस्यैवतथात्वोक्ते

प्र० रितिभावः ॥ बह्विति ॥ अयंचदोषोरामानुजमतेपिबोध्यः । तन्मते "सत्यसंकल्पेश्वराधिष्ठानानपेक्षपरिणामित्वेसर्गव्यतिरेकेणप्रतिसर्गावस्थयाऽनवस्थितिप्रसंगाच्चे"त्यर्थवर्णनात् । प्रमेयदोषंचाह ॥ सांख्येति ॥ कर्मेति ॥ अदृष्टदेशकालादेरित्यर्थः । यत्तुभामत्यामेतदाशंक्यधर्मस्याधर्मप्रतिबंधोपयोगकथनेनसमाधानं तन्न । तथाप्यपेक्षायाअनिवृत्तेरितिभावः । "अन्यत्राभावाच्चनतृणादिव"दित्येतदर्थप्र

बह्वध्याहारायोगात् । सांख्यमतेपिकर्मादेरपेक्षणीयस्यसत्त्वाच्च । यच्चोक्तं तृणादेःस्वतएवक्षीरभाववत्प्रधानस्यापीतिनयुक्तं । धेनुशरीरादन्यत्रतृणादेस्तदभावादितिपंचमार्थइति तन्न । ममरीत्याऽवश्यनिरसनीयसेश्वरसांख्यमतनिरासकत्वसंभवे "पयोंबुव"दितिन्यायनिरस्ततृणादिदृष्टांतांतरनिरासकत्वायोगात् । यद्यपीहटीकायां "व्यतिरेके"तितुरीयसूत्रमयस्कांतादिदृष्टांतांतरनिरासार्थंप्रतिभाति । तथाप्यस्मिन्पक्षेऽपरितोषादेवसुधायां "यदे"त्यादिनाकैमुत्यन्यायार्थत्वमितिपक्षांतरमुक्तं । किंच परमतेपूर्वपादोक्तेन "क्षीरवद्धी"त्यनेनविरोधः ।

प्र० त्याह ॥ यच्चेति ॥ उभाभ्यामितिवर्तते । अन्यत्र अनडुहादौ ॥ इतिन्यायनिरस्तेति ॥ तत्प्रपंचनमेतदित्यपिव्यर्थत्वादयुक्तमितिभावः ॥ तुरीयेति ॥ प्रथमाधिकरणांतिमसूत्रमित्यर्थः ॥ विरोधइति ॥ स्वतोदध्यादिभावेनपरिणामेतत्रक्षीरस्यदृष्टांतितत्वादितिभावः । "उपसंहारदर्शनान्नेतिचेत्क्षीरवद्धी"त्यत्रतु "बाह्यनिमित्तनिरपेक्षमपिस्वाश्रयंकार्यंभवतीत्येतल्लोकदृष्ट्याभिहित"मित्यादिपयोंबुसूत्रपरभाष्यो

प्र० क्तमत्राशंक्यनिराह ॥ तत्रेति ॥ "अभ्युपगमेप्यर्थाभावा"दित्येतदर्थंप्रत्याह ॥ यच्चेति ॥ परैरितिविवर्तते । भामत्यां "पुरुषार्थाभावप्रसंगा"दित्युक्त्वा "अथवापुरुषार्थाभावादितियोज्य"मित्यन्योर्थोभाष्यस्यप्रकटितः । तत्राद्येदोषमाह ॥ अर्थेति ॥ अंत्यआह ॥ प्रवृत्तिमिति ॥ प्रयोजनाभावश्चतदीयभाष्येविवृतः । प्रसंगस्यविपर्ययेपर्यवसानावश्यंभावेनप्रवृत्त्यभावापादनेविरोधः । पक्षांतरेत्विष्टतामाह

तत्रलोकदृष्ट्याक्षीरंनैरपेक्ष्येदृष्टांतितं । अत्रतुशास्त्रदृष्ट्यासापेक्षत्वोक्तिरितिचेन्न । अत्रोक्तशास्त्रदृष्ट्यातत्रदृष्टांतस्यतत्वतःसाध्यवैकल्यापातात् । यच्चोक्तं प्रधानस्योक्तरीत्याप्रवृत्तिरेवनयुक्ता । तदभ्युपगमेपिस्वाभाविकत्वात्प्रवृत्तेः सहकार्यपेक्षाभाववत्प्रयोजनापेक्षाभावप्रसंगादितिषष्ठार्थइति तन्न। अर्थाभावादित्यनेनार्थापेक्षाभावप्रसंगस्यलक्षणीयत्वात् । प्रवृत्तिमभ्युपगम्यप्रयोजनाभावेनपुनःप्रवृत्तिनिरासेचविरोधात् । अप्रेक्षावत्त्वापादनेचप्रधानइष्टापत्तेः । अस्मन्मतेतुचार्वाकंप्रत्यर्थाभावोनोपपाद्यः । तदभ्युपगमेप्यर्थयोर्विषयप्रयोजनयोरभावादितिसूत्रार्थः। यच्चोक्तं स्वतोसमर्थस्याप्यन्यसन्निधानेनप्रवृत्तावंधपंगुपुरुषदृष्टांतमयस्कांताश्मसूचीदृष्टांतंचाशंक्यनिरसितुं सप्तममिति तन्न । ममरीत्या "अंगित्वानुपपत्ते"रित्युत्तरसूत्रानुगुणावश्यनिरसनीयपुरुषोपसर्जनप्रकृतिकर्तृत्वपक्षनिरासकत्वसंभवे "पयोंबुव"दित्यादिन्यायनिरस्तायस्कांतादिदृष्टांतनिरासकत्वायोगात् । अष्टमेपौनरुक्त्यं ।

प्र० ॥ अप्रेक्षावत्त्वेति ॥ एतेनयत्कैश्चिदुक्तंइदंसूत्रमन्यथानुमितौचेत्यनंतरंपठित्वा "अनुमानेनप्रधानसिद्ध्युपगमेपिप्रधानेनप्रयोजनाभावान्नतदनुमातव्यमित्यर्थ"इति तन्निरस्तं । विरोधादिति । "पुरुषाश्मवदितिचेत्तथापी"त्येतदर्थंनिराह ॥ यच्चेति ॥ उभाभ्यामित्यन्वेति ।

प्र० "अन्यथानुमितौचज्ञशक्तिवियोगा"दित्येतदर्थंप्रत्याचष्टे ॥ यच्चोक्तमिति ॥ उभाभ्यामित्यन्वेति । केषांचिन्मते "अभ्युपगमेपी"त्यस्यनवमत्वेपिवास्तवाभिप्रायमिदं । अष्टमार्थस्तुपौनरुक्त्येनप्रागेवनिरस्तइतिभावः ॥ दृढेति ॥ अतएवभामत्यां "अंगितानुपपत्तिलक्षणो

यच्चोक्तमुक्तदोषपरिहारेणान्यथानुमितावपिप्रधानस्यज्ञानशक्तिवियोगान्नरचयितृत्वमितिनवमार्थइति तन्न । ममरीत्या "अन्यथे"त्यनेन "अंगित्वानुपपत्ते"रित्यव्यवहितप्रकृतादचेतनप्राधान्यादन्यथात्वंविवक्षित्वाऽवश्यनिरसनीयप्रकृत्युपसर्जनपुरुषकर्तृत्वनिरासेसंभवतिव्यवहितप्रकृतादन्यथात्वंविवक्षित्वाबहुसूत्रोक्तदृढदोषाणामनुचितंपरिहारंचांगीकृत्य ज्ञशब्दस्यक्लेशेनज्ञानार्थत्वंचोपेत्य "रचनानुपपत्ते"रित्यनेनोक्तस्याचेतनत्वादरचयितृत्वस्यपुनरिहोक्त्ययोगात् । यच्चोक्तं क्वचित्सप्तेंद्रियाणिक्वचिदेकादशेतिसांख्यैरुक्तत्वाद्विप्रतिषिद्धंसांख्यमतमितिदशमार्थइति तन्न । इंद्रियसंख्याविरोधस्य "सप्तगतेर्विशेषितत्वा"दितिवक्ष्यमाणन्यायेन "सप्तप्राणाः प्रभवंति । तस्मात् दशेमेपुरुषेप्राणाआत्मैकादश"इत्यादिवेदांतेष्विवपरिहारसंभवात् । किंचसूत्रदशकस्यैकाधिकरणत्वे "पुरुषाश्मव"दितिसूत्रस्य "अभ्युपगमेपी"तिसूत्रानंतर्यमयुक्तं । नह्यभ्युपगमेपीत्यनेनार्था

प्र० दोषस्तावद्भिरशक्यःपरिहर्तुमितिवक्ष्यामः । अभ्युपगम्याप्यस्यादोषत्वमुच्यत"इत्युक्तमितिभावः ॥ क्लेशेनेति ॥ ज्ञशब्दस्य ज्ञाअवबोधनइत्यस्मात् "इगुपधज्ञाप्रीकिरःक"इतिकर्तरिव्युत्पन्नत्वादितिभावः । "विप्रतिषेधाच्चासमंजस"मित्येतत्परमतेप्रत्याचष्टे ॥ यच्चेति ॥

प्र० संगतेति ॥ अतएवरामानुजमतेतत्सूत्रमुत्कृष्यान्यत्रनिवेशितमितिभावः ॥ ७ ॥ रचनानुपपत्त्यधिकरणमारभ्य अन्यथानुमित्य धिकरणपर्यंतमधिकरणपंचकं ॥ १–५ ॥

भावउक्ते "पुरुषाश्मव"दित्यनेनांधपंग्वादिदृष्टांतशंकासंगतेति ॥ ७ ॥ रचनानुपपत्त्यधिकरणमारभ्य अन्यथानुमित्यधिकरणपर्यंतमधिकरणपंचकं ॥ १–५ ॥

॥ ॐमहद्दीर्घवद्वाह्रस्वपरिमंडलाभ्यांॐ ॥ कारणैकार्थप्रत्यासत्त्यादिनेति ॥ कार्यगतरूपादिगुणानांकारणगतरूपादयो गुणाःकारणैकार्थप्रत्यासत्त्याऽसमवायिकारणानि । कर्मत्वादिपदोपात्तयाकार्यैकार्थप्रत्यासत्त्येतिद्रष्टव्यं ॥ शिष्टषड्गुणायो ग्यइति ॥ कर्तृत्वार्थज्ञानेच्छाप्रयत्नानामावश्यकत्वेतदितरगुणेषुसंख्यादिपंचकातिरिक्तषड्गुणायोग्यइत्यर्थः ॥ संकेतमात्र मिति ॥ परमाणुद्व्यणुकगतपरिमाणमेवाणु । त्र्यणुकादिपरिमाणंतुमहदितिसंकेतोप्रामाणिकः । द्व्यणुकवद्व्यणुकेप्यापेक्षिका णुत्वस्य त्र्यणुकवद्व्यणुकेचापेक्षिकमहत्त्वस्यसंभवादितिभावः ॥ संख्यादेर्महत्वारंभकत्वप्रसंगादिति ॥ द्व्यणुकपरिमाणे परमाण्वादिसंख्यायाःकारणत्वेचतुरणुकारंभकानेकत्र्यणुकगतबहुत्वसंख्याप्रचययोश्चतुरणुकगतमहत्त्वारंभकत्वप्रसंगादित्य र्थः । "तदभाव"इतिसूत्रस्थतच्छब्दस्याप्रकृतपरत्वाशंकांनिरस्यति ॥ परिमाणाभिधानसन्निधापितमिति ॥ तदिति भाष्यप्रतीकोपादानं । तस्यव्याख्या तत्रेति । स्वपदस्यव्याख्या समवायेति ॥ तस्येति ॥ रूपिरूपादिनिष्ठविशेषणविशेष्य ॥ ९०८ ॥

प्र० ॥ ॐमहद्दीर्घवद्वाॐ ॥ संगतिचिंताप्रकारपूर्वपक्षाद्यनुक्तिबीजंप्रागेवव्यक्तं । अस्पष्टानिकानिचिट्टीकावाक्यानिव्यनक्ति ॥ कारणेति ॥

प्र० महदित्येकमिति ॥ महदित्यादिसूत्रमित्यर्थः । ननुयथाबौद्धप्रक्रियानिरासकत्वाविशेषेपि "नभावः नासतः" इत्यनयोस्त्वन्मतेभेदस्तथाम
मापीत्यतआह ॥ **विज्ञानेति ॥** अस्यस्वपक्षदोषोद्धारार्थत्वात्सार्थक्यमित्यतस्सूत्रप्रमेयंचानूद्यनिराह ॥ **यच्चोक्तमिति ॥** पादासंगतिंव्य
भावस्येत्यर्थः ॥ **विशेषणेऽतिप्रसंगइति ॥** घटाभावभूतलयोर्विशेषणविशेष्यभावेव्यभिचारनिरासायभावमात्रनिष्ठत्वे
नविशेषणेरूपादावपिविशेषणविशेष्यभावस्याभाववदेवसंबंधंविनाप्युपपत्त्याप्रयोजकत्वादप्रयोजकेनचसाधनेऽतिप्रसंगइत्य
र्थः । यद्वासंयुक्तानिष्ठत्वविशेषितेनविशेषणविशेष्यभावत्वेनाभावनिष्ठतदृष्टांतेनसंबंधाभावसाधनसंभवादतिप्रसंगइत्यर्थः ॥
सृगालवाक्यमिति ॥ सृगालरूपेणेंद्रेणतर्कविद्यानुरागस्यसृगालजन्महेतुतोक्तेत्यर्थः । अत्रयदुक्तंपरैः । महदित्येकंसूत्र
मेकमधिकरणं । उभयथेत्याद्यपरिग्रहादित्यंतंसूत्रषट्कमधिकरणांतरमिति तन्न । उभयोरपितार्किकप्रक्रियानिरासकत्वा
त् । विज्ञानशून्यवादयोरिवचेहावांतरप्रमेयभेदस्यादूषणात् । सांख्याधिकरणानामिवैकाधिकरणत्वस्यैवन्याय्यत्वात् । य
च्चोक्तं महद्दीर्घंचत्र्यणुकादिकंविजातीयाद्ध्रस्वादिरूपाद्द्व्यणुकादितइवचेतनाद्ब्रह्मणोऽचेतनंजगज्जायतइतिस्वपक्षदोषोद्धारा
र्थमाद्याधिकरणमिति तन्न। पादासंगतेः । पुनरुक्तेश्च । आद्येपादेस्वपक्षदोषोद्धारः । द्वितीयेतुपरपक्षदूषणमितिहितेमतं ।

प्र० नक्ति ॥ आद्यइति ॥ नन्वेतदाशंक्योक्तंकल्पतरौ "यदिप्रधानगुणानन्वयाज्जगन्नतत्प्रकृतिकंतर्हिब्रह्मविशेषगुणानन्वयान्नतदुपादानमित्ये
वांतरसंगतिलोभादत्रलिखितइती"तिचेन्न । तथात्वेपादादिसंगत्यभावशंकाकापिनोदियात् । सर्वत्राप्येवंसंभवात् । निर्गुणब्रह्मोपादानकत्व

प्र० पक्षेचैवंशंकानुदयात् । विवर्तोपादनतापक्षेसर्वथैवशंकानुत्थितिश्चेतिभावः । पुनरुक्तेश्चेत्येतव्द्यनक्ति ॥ उक्तंचेति ॥ परसिद्धदृष्टांतोक्त्यर्थ मिदमित्यतआह ॥ **नहीति** ॥ सूत्रार्थंचनिराह ॥ **किंचेति** ॥ भामत्युक्तमाशंकते ॥ **नन्विति** ॥ **पृथिवीत्वादिनेति** ॥ परमाणुत्वंवि

उक्तंच "नविलक्षणत्वा"दित्यत्रविजातीयादपिजन्म । नहितत्रसाक्षाच्चेतनाचेतनयोरुपादानोपादेयभावेवृश्चिकगोमयादिदृष्टांतेषुसर्वलौकिकपरीक्षकसंमतेषूक्तेष्वपिविजातीयमात्रयोस्तद्भावेपरमात्रसिद्धंदृष्टांतांतरमात्रंवक्तुमधिकरणांतरंयुक्तं । किंचमहतोदीर्घस्यचत्र्यणुकादिकस्यविजातीयाद्ध्रस्वाद्द्व्यणुकादुत्पत्तावपिपरिमंडलात्परमाणुतोनुत्पत्तेस्सूत्रे परिमंडलशब्दोव्यर्थःस्यात् । ननु सौत्रोवाशब्दश्चार्थस्सन्नपरिमंडलभूतद्व्यणुकसमुच्चयार्थः । तथाचपरिमंडलादपरिमंडलवदितिदृष्टांतांतरार्थस्सइतिचेत्तर्हिकार्यकारणयोर्वैजात्यस्फोरणायह्रस्वप्रतियोगित्वेनमहद्दीर्घपदमिवपरिमंडलप्रतियोगित्वेनापरिमंडलपदंप्रयुज्यमहद्दीर्घापरिमंडलवद्ध्रस्वपरिमंडलाभ्यामितिसूत्रणीयं । यथान्यासपक्षेहिसमासैकदेशस्यह्रस्वस्यमहद्दीर्घान्वयः । परिमंडलस्यतुवाशब्दसमुच्चितापरिमंडलान्वयइतिक्लिष्टं । किंच पररीत्याविजातीयंतंतुपटादिपरित्यज्याविजातीयस्यविलक्षणमात्रस्यपरमाणुद्व्यणुकादेर्दृष्टांतीकरणमयुक्तं । नहिपरमाणुत्वादिकंजातिः । पृथिवीत्वादिनासंकरात् । यद्यपिपरमाणुद्व्यणुकादिपरिमाणानितार्किकमतेविजातीयानि । तथापिनतेषामुपादानोपादेयत्वं । किंचायंदृष्टांतोविवर्तप्रतिकूलः । अपिच तवचेतनाद्ब्रह्मणोऽचेतनंजगदितिदार्ष्टांतिकोध्याहार्यः । ममतुन ।

प्र० नापृथिवीत्वंघटादौ पृथिवीत्वंविनापरमाणुत्वमाप्यपरमाणौ द्वयमपिपृथिवीपरमाणौसंकीर्णमितिभावः ॥ **ममतुनेति** ॥ सप्रकारष्टीकादौ

प्र० व्यक्तइतिभावः ॥ **केचित्त्विति** ॥ "असमंजसमितिवर्तते । वाशब्दश्चार्थे । ह्रस्वपरिमंडलाभ्यांद्व्यणुकपरमाणुभ्यांमहद्दीर्घवत्त्र्यणुकोत्पत्तिवादवदन्यच्चतदभ्युपगतंसर्वमसमंजसं । परमाणुभ्योद्व्यणुकादिक्रमेणजगदुत्पत्तिवादवदन्यदसमंजस"मितितदीयभाष्यंहृदिकृत्वार्थमनुवदति ॥ **परिमंडलादिति** ॥ यद्यपितद्भाष्यव्याख्यानेश्रुतप्रकाशे "सूत्रेह्रस्वपरिमंडलशब्दाभ्यांकारणद्वयमुक्तं । महद्दीर्घशब्दोऽणुह्रस्वस्यद्व्यणुकस्याप्युपलक्षणं । द्व्यणुकपरमाणुभ्यांत्र्यणुकद्व्यणुकादिकार्यवदन्यच्चासमंजसमित्यर्थ"इत्येवोक्तं । तथापि "परमाणुभ्योद्व्यणुकादि

केचित्तु परिमंडलात्परमाणुतोह्रस्वस्यद्व्यणुकस्य तस्माच्चमहद्दीर्घस्यत्र्यणुकादेर्जन्मतावदयुक्तं । अणोरण्वंतरसंयोगस्यव्याप्यवृत्तित्वेतत्कार्यपरिमाणाधिक्यायोगात् । एकदेशवृत्तित्वेचाणोर्निरंशत्वहानेः । सूत्रे वाशब्दस्तुचार्थः । तथाचपरमाणुभ्योद्व्यणुकादिक्रमेणजगदुत्पत्तिवद्वैशेषिकाभ्युपगतंगगननित्यत्वादिकमन्यदप्यसमंजसमितिसूत्रार्थइत्याहुः । तन्न । पंचमीनिर्दिष्टेह्रस्वशब्देषष्ठ्यंततायाआवृत्तेश्चकल्प्यत्वात् । किंच व्याप्यवृत्तित्वाव्याप्यवृत्तित्वविकल्पःकिंद्व्यणुकसंयोगविषयःपरमाणुसंयोगमात्रविषयोवा । नाद्यः । द्व्यणुकस्यसांशत्वेनतत्संयोगस्यैकदेशवृत्तित्वसंभवात् । द्वितीयेपरिमंडलाद्ध्रस्ववद्वेत्येवसूत्रणीयं । अन्यत्तुनिरर्थकं ।

प्र० क्रमेणे"त्यादिभाष्यपर्यालोचनयैवमेवसूत्रस्यार्थोयुक्तइतिभावेन परमाणुतोह्रस्वस्येति, तस्माच्चेति, ह्रस्वशब्दस्यषष्ठ्यंतत्वंपंचम्यंतत्वमावृत्तिंचाश्रित्यार्थोनूदितइतिज्ञेयं । श्रुतप्रकाशोक्तमाह ॥ **गगननित्यत्वादिकमिति** ॥ **षष्ठ्यंततायाइति** ॥ महद्दीर्घशब्दस्यद्व्यणुकोपलक्षकत्वेपिलक्षणादोषोव्यक्तः । त्र्यणुकद्व्यणुकवद्वेतिनिर्देशापाताच्चेतिव्यक्तं । महादीर्घवदितिवाच्येमहद्दीर्घवदितिक्लिष्टंच । दोषांतरंचाह ॥ **किंचेति** ॥

प्र० नकेवलंनिरर्थकमयुक्तंचेदंसूत्रमित्याह ॥ किंचेति ॥ मदीयेति ॥ युक्तिरित्यन्वयः । परिमाणपरत्वेमहत्त्वदीर्घत्वेत्यादिनिर्देशस्स्यादित्य तस्सुधोक्तमेवसमाधिमाह ॥ ममपक्षइति ॥ "कारणबहुत्वात्कारणमहत्त्वात्प्रचयविशेषाच्चमह"दितिकणादसूत्रेत्यर्थः । "उभयथापि नकर्मातस्तदभाव"इतिसूत्रार्थंत्रेधाभामत्युक्तमनूद्यनिराह ॥ यच्चेति ॥ हेत्वभ्युपगमेकुतोनकर्मेत्यतआह ॥ कर्महेतोरिति ॥ "उभय

किंच गगननित्यत्वाभावस्येवाणुभ्योजगज्जन्माभावस्यापिपरंप्रतिसाध्यत्वाद्दृष्टांतोनयुक्तः । अपिच मदीयाह्रस्वपरिमंडलपरिमाणयोःकार्यपरिमाणोत्पादकत्वेमहद्दीर्घपरिमाणप्रतिबंदीरूपायुक्तिःसूत्रारूढा । संयोगस्यव्याप्यवृत्तित्वमित्यादिकात्वदीयातुन । ममपक्षेसूत्रेत्वप्रत्ययायोगस्तु "प्रचयविशेषाच्चमह"दितिकणादसूत्रानुसारेण । यच्चोक्तंपरैः अणुष्वाद्यकर्मणोहेत्वभ्युपगमेऽनभ्युपगमेचनकर्मेतिवा कर्महेतोरदृष्टस्याणुगतत्वआत्मगतत्वेचनकर्मेतिवा सृष्टिकालेसंयोगोत्पत्त्यर्थंसंहारकालेविभागोत्पत्त्यर्थंचनकर्मेतिवा द्वितीयेऽधिकरणआद्यसूत्रस्यत्रेधार्थइति तन्न । आद्येऽनभ्युपगमपक्षस्यद्वितीयेपरमाणुगतत्वपक्षस्यचात्यंतासंभवित्वात् । द्वितीयेऽदृष्टस्याचेतनस्यचेतनानधिष्ठितस्याप्रवृत्तेरितित्वदुक्तस्यहेतोरसिद्धेः । अदृष्टमीश्वराधिष्ठितमितिहितन्मतं । तृतीये उभयार्थकर्माभावइतिसूत्रणीयं ।

प्र० थापितस्याचेतनस्यचेतनानधिष्ठितस्याप्रवृत्ते"रितिभामत्युक्तएवहेतुरस्मिन्पक्षेतृतीयपक्षेचध्येयः ॥ त्रेधेति ॥ "सूत्रमादौत्रेधायोजयती"तिकल्पतरूक्तेरितिभावः । अतःकर्माभावात् । तदभावः द्व्यणुकादिक्रमेणकार्याभावः । इतिशेषार्थोनविरुद्धइतिनानूदितः ॥ इतिहितन्मतमिति ॥ एतेननिमित्तकारणतामात्रेणेश्वरस्याधिष्ठातृत्वं "पत्यु"रित्यत्रनिराकरिष्यतइतिभामत्युक्तंप्रत्युक्तं । आपाद्यदोषत्वेपितन्म

प्र०ताननुसारित्वेनान्यतरासिद्धेरवर्जनीयत्वात्। एतेन ‘‘परमाणुगतंकर्मस्वगतादृष्टकारितमात्मगतादृष्टकारितंवा। उभयथापिनसंभवति। क्षेत्रज्ञपुण्यपापानुष्ठानजन्यस्यादृष्टस्यपरमाणुगतत्वासंभवा’’दितिकेषांचिदर्थोपिनिरस्तः । परमाणुगतत्वपक्षस्यात्यंतासंभावितत्वेनविकल्पकोटेरेवानुत्थितेः ॥ ममममतइवेति ॥ ईश्वरेच्छायाअनित्यत्वेनित्यत्वेचोभयथापीत्युक्त्यानित्यत्वपक्षेप्रलयेकर्मानुत्पादेनकार्यव्यभिचाररूपहेतोरनित्य

मममतइवसूत्रेहेत्वसूचनान्न्यूनताच । तस्मान्ममरीत्यासमवाय्यसमवायिकारणनिरासकसूत्रयोर्मध्यस्थमिदंसूत्रमवश्यनिरसनीयस्यसर्वव्यवस्थापकत्वेनपराभिप्रेतस्येश्वरेच्छानिमित्तत्वस्यनिरासकं । द्वितीयचतुर्थषष्ठानांपरकीयाव्याख्यानविरुद्धा । यत्तु अणवःप्रवृत्तिस्वभावावानिवृत्तिस्वभावावोभयस्वभावावाऽनुभयस्वभावावा । नाद्यद्वितीयौ । नित्यंप्रवृत्तेर्निवृत्तेर्वाभावप्रसंगात् । तृतीये विरोधः । चतुर्थे निमित्तवशात्प्रवृत्तिनिवृत्तीवाच्ये । निमित्तंचादृष्टंनित्यंसंनिहितमितिनित्यंप्रवृत्त्यादेर्भावप्रसंगादितितृतीयार्थइति तन्न । सूत्रे उभयथाचेत्यादाविवविकल्पसूचकाभावात् ।

प्र० त्वेभगवदिच्छारूपकारणाभावरूपस्यहेतोःपरमाणुकर्मनेत्युक्तसाध्येसूचनमस्ति। नत्वन्मते । बहिरेवहेतोरुक्तत्वादितिभावः ॥ निरासकमिति ॥ निरासप्रकारष्टीकादौव्यक्तइतिभावः ॥ द्वितीयेति ॥ पररीत्यैतत् । ‘‘समवायाभ्युपगमाच्चसाम्यादनवस्थितेः। रूपादिमत्त्वाच्चविपर्ययोदर्शनात् । अपरिग्रहाच्चात्यंतमनपेक्षे’’तिसूत्रत्रयव्याख्येत्यर्थः । ‘‘नित्यमेवचभावा’’दित्यस्यार्थंपरभाष्योक्तमनूद्यप्रत्याह ॥ यत्त्विति ॥

प्र० प्रमेयास्वारस्यंचाह ॥ **अस्यविकल्पस्येति** ॥ **आद्यसूत्रइति** ॥ “उभयथापिनकर्मातस्तदभाव”इत्यत्र । तथाचतवैवस्वव्याहतिर्नास्मत्पक्षइतिभावः ॥ **नित्यजातमिति** ॥ नित्यंजनिमदित्यर्थः ॥ **अध्याहारइति** ॥ एतेनसमवायस्यनित्यसंबंधत्वेसंबंधिनोजगतोनित्यमेवभावात्संबंधिजगन्नित्यत्वंस्यादितिकेषांचिदर्थोपिनिरस्तः । अनेकाध्याहारात् । भावादित्यस्यभावप्रसंगादित्यर्थस्यायोगादापाद्यदोषस्यक्लेशेनोपपादनीयत्वाच्चेति । “उभयथाचदोषा”दित्येतदर्थंपरभाष्याद्युक्तमनूद्यनिराह ॥ **यच्चेति** ॥ पृथिव्यादिभूतचतुष्टयेहिरूपादिस्प

अस्यविकल्पस्यस्वांगीकृतब्रह्माविद्यादिकारणेष्वपिसाम्याच्च । आद्यसूत्रेमयातार्किकंप्रत्युक्तदोषस्यममतेऽप्राप्तिस्तु “स्वतएवकालेविशेषांगीकृतेश्चे”तिभाष्यएवदर्शिता । किंच ममरीत्याभाष्योक्तमार्गेणसत्तासमवायोजनिरितितार्किकैःस्वीकृतत्वात्समवायस्यचनित्यमेवभावात्सर्वंनित्यजातंस्यात् । तथाचसृष्टिप्रलयानुपपत्तिरितिपूर्वसूत्रप्रकृतसमवायस्येहान्वयसंभवेप्रवृत्तेर्निवृत्तेर्वेत्यध्याहारोभावादित्यस्यप्रसंगहेतुताचनयुक्ता । यच्चोक्तं वायवीयादिपरमाणवोरूपादिहीनास्तैजसादयस्तुतद्युक्ताइतिपरमाणुषुगुणोपचयापचयौस्तोनवा । आद्येतेषुपरिमाणोपचयापचयावपिस्यातां । तयोस्ताभ्यांव्याप्तेः । द्वितीयेतैजसाद्यणुकार्येषुरूपादिनदृश्येतेतिपंचमार्थइति तन्न । तन्मतईश्वरादपिजीवे

प्र० र्शातैर्गुणैःपूर्वपूर्वभूतस्याधिक्यमुत्तरोत्तरस्यन्यूनत्वं । तेनैवगुणाधिक्येनपृथिव्यादिपूर्वपूर्वभूतस्यपरिमाणतःस्थूलत्वमुत्तरोत्तरभूतस्यचन्यूनगुणकत्वेनपरिमाणतस्सूक्ष्मसूक्ष्मतरत्वादिकमुपलब्धमितिपृथिव्यादिपरमाणुष्वपिक्कचिद्रूपरसगंधस्पर्शाः । आप्याणुषुरूपरसस्पर्शाः । तैजसाणुषुरूपस्पर्शौ । वायवीयाणुषुस्पर्शएवेतिगुणाधिक्यन्यूनत्वेविद्येतेनवा । आद्येपार्थिवाणुषुपरिमाणाधिक्यं आप्याणुषुपृथिवीपरमाणुतोन्यूनपरि

प्र० माणत्वं ततोपितैजसाणुषुन्यूनपरिमाणत्वं ततोपिवायवीयाणुष्वित्येवंपूर्वपूर्वभूतपरमाणूनांपरिमाणाधिक्यशब्दितपरिमाणोपचयः, उत्तरोत्तरभूतपरमाणुषुन्यूनपरिमाणत्वशब्दितपरिमाणापचयश्चस्यादित्यर्थः । तयोः रूपादिगुणोपचयापचययोः । ताभ्यां परिमाणोपचयापचयाभ्यां । व्याप्तेरित्यर्थः । पृथिव्यादिभूतचतुष्टयेदर्शनादितिभावः । तन्मते वैशेषिकमते । जीवेश्वरयोर्विभुत्वेनतुल्यपरिमाणत्वादितिभावः ॥ **त्वन्मतेचेति** ॥ आत्मनोनिर्गुणात् ज्ञानानंदादिगुणात्मकाद्वा “कामःसंकल्पोविचिकित्साश्रीर्ह्रीर्भीर्धीरित्येतत्सर्वंमनएवे”तिश्रुत्याकामाद्यनेकगुणकस्यमनसोमध्यमपरिमाणत्वेनापरिच्छिन्नात्मापेक्षयापरिमाणाधिक्याभावादित्यर्थः । मतद्वयेपिव्यभिचारस्थलमाह ॥ **आकाशादपीति** ॥

त्वन्मतेचात्मनोप्यंतःकरणे आकाशादपिपृथिव्यादौचगुणाधिक्येपिपरिमाणाधिक्यादृष्टेः ॥ केचित्तु अणूनांरूपादिमत्त्वेपूर्वसूत्रेणानित्यत्वदोषउक्तः । अत्रतुरूपादिराहित्येतत्तत्कार्येरूपादिर्नस्यादितिदोषउच्यतइत्याहुः । तत्र अन्यथाचदोषादितिसूत्रणीयं ॥ ७ ॥ **वैशेषिकाधिकरणं ॥ ६ ॥**

प्र० शब्दमात्रगुणकादितिभावः ॥ **केचित्त्विति** ॥ अणूनांरूपादिमत्त्वेतद्राहित्येचोभयथाचदोषादितिसूत्रार्थः कथंपक्षद्वयेदोषइत्यतस्तद्भाष्योक्तमाह ॥ **रूपादिमत्त्वइति** ॥ **अन्यथाचेति** ॥ रूपादिमत्त्वेपूर्वत्रैवदोषोक्तेरन्यथारूपादिराहित्येदोषादित्येवसूत्रव्याख्यानसंभवादितिभावः । ननु श्रुतप्रकाशएवैतदाशंक्यसमाहितं “अन्यथाचेतिनोक्तं । अपितूभयथेत्युक्तं । अत्रशिरोंतरंनास्तीत्यभिप्राय”इतीतिचेन्न । कोप्यंतराभावस्यस्फुटत्वेनतस्यासूचनीयत्वात् । सूचनेनफलातिशयाभावाच्च । शब्दप्रतिपत्त्योर्गौरवाच्चेतिभावः ॥ ७ ॥ **वैशेषिकाधिकरणं ॥ ६ ॥**

प्र० ॥ ॐसमुदायेॐ ॥ टीकाक्षरार्थान्व्यनक्ति ॥ रूपेति ॥ ननुसुखमप्यन्यदस्तीत्यतः "दुःखाभावंसुखंचाहु"रित्याद्यनुव्याख्यानोक्तमाह

॥ ॐसमुदायउभयहेतुकेपितदप्राप्तिःॐ ॥ [१००।११] रूपविज्ञानवेदनासंज्ञासंस्काररूपेणेति ॥ विषयें
द्रियाद्यात्मनास्थितारूपरसगंधस्पर्शशब्दात्मकाःपरमाणवोरूपस्कंधः । निर्विकल्पकंज्ञानंविज्ञानस्कंधः ।
दुःखंवेदनास्कंधः । सुखंतुदुःखाभावएव । सुखमपिवेदनास्कंधइतिकेचित् । कुंडलीगौर्गच्छतीत्यादिस
विकल्पकज्ञानंसंज्ञास्कंधः । तेषांवासनासंस्कारस्कंधइति द्रष्टव्यं ॥ [१००।२०] अतिपीडायामनवस्थेति ॥ अ
न्योन्याश्रयपरिहारायमेलनस्यमेलनांतरेणवासामीप्येनवाविशिष्टानेकहेतुकत्वेऽनवस्थेत्यर्थः ॥ तदंगी
[१००।२२] क्रियंतएवेति ॥ अनेकत्वसंख्यारूपस्यसमुदायस्यविरलेष्वपिपरमाणुषुसत्त्वेनतस्यसदातनत्वादितिभा
वः ॥ [१००।२३] व्यवहारादेरिदंचेदंचेतीति ॥ अनेकत्वसंख्यायाअपेक्षाबुद्धिव्यंग्यत्वेनतत्प्रतीतिव्यवहारयोरिदंचे
दंचेत्यपेक्षाबुद्ध्यधीनत्वादित्यर्थः ॥ [१००।२३] सामीप्यापेक्षेति ॥ विप्रकृष्टइदंचेदंचेत्यपेक्षाबुद्धेरदर्शनादितिभावः ॥
[१०१।१] पुरुषस्यापितथात्वमिति ॥ विषयवदात्मनोपिक्षणिकत्वेनपरमाणुदर्शनमपेक्षाबुद्धिःसमुदायव्यवहारइ
त्येतेषामेकविषयकत्वमिवैकाधिकरणत्वमपिनयुक्तमित्यर्थः ॥ [१०१।५] विशेषकार्योत्पत्तिमपिनिराकुर्वत्सूत्रमिति ॥ ॥ ९१२ ॥

प्र० ॥ सुखंत्विति ॥ "चशब्देनकेचित्सुखमपिवेदनास्कंधेऽतर्भावयंतीतिसूचयती"तिसुधोक्तेराह ॥ सुखमपीति ॥ एतेन "सुखदुःखेवेद

प्र० नास्कंध" इतितत्वनिर्णयटीकाविरोधःप्रत्युक्तः। कुंडलीतिद्रव्यविकल्पः। भाष्यटीकयोरनुव्याख्यानसुधाविरोधमाशंक्यवर्णकांतरत्वेनसमा

यद्यपि "इतिचेत्कार्यसंभूतिमात्रव्यापृतिकारणं। नतुकार्यविशेषेषुव्यापृतंकारणंभवे" दित्यनुव्याख्याने "कारणानिखलुस्वसदृशकार्यजननव्यापाराणि नतुविसदृशकार्यजननेव्यापृतानी" तिसुधायांचविसदृशकार्यरूपविशेषकार्योत्पत्तिरपिद्वितीयसूत्रएवनिरस्ता। सूत्रेमात्रशब्देनापेक्षाबुद्ध्यादेरिववैसादृश्यस्यापिव्यावर्तितत्वादित्युक्त्वा "उत्तरोत्पत्तिमात्रेणविनाशात्पूर्ववस्तुनः। नसंस्कारार्पकत्वंचयुज्यतेकस्यचित्क्वचित्" इत्यनुव्याख्याने "अथमतं। कारणक्षणाःकार्येषुसंस्कारानर्पयंति। अतःपूर्वपूर्वात्मसंस्कारयोगिनामुत्तरोत्तरेषामात्मनामनुमानादिव्यवहारइत्येतन्निराकरणायसूत्रमुत्तरोत्पादेचे" त्यादिसुधायांचतृतीयसूत्रंबौद्धमतेसंस्कारनिरासार्थमित्युक्तं। तथापीह "एकंकार्यमुत्पाद्यतस्यनष्टत्वात्परस्परप्रत्ययस्तदपेक्षयाव्यवहारइतिनयुज्यत" इतिद्वितीयसूत्रभाष्येतट्टीकायांचविरलपरमाणुकार्याणांमिलितपरमाणूनांक्षणिकत्वेनापेक्षाबुद्ध्यादिविषयत्वादिकमेवद्वितीयसूत्रेनिरस्तं। सूत्रेमात्रशब्देनापेक्षाबुद्धिरेवव्यावर्तितेत्युक्त्वा[त्वंनयुक्तमितिद्वितीयसूत्रार्थः। तत्रमात्रशब्दश्चापेक्षाबुद्ध्यादेरेवव्यावर्तकइतिविवक्षितं।] "नविशेषकार्योत्पत्ति" रित्यादितृतीयसूत्रभाष्येतट्टीकायांच

प्र० धिमाह॥ यद्यपीत्यादिना इतिद्रष्टव्यमित्यंतेन॥ "यःप्रतिक्षणंविनाश" इत्यादिटीकार्थे "प्रतिसंख्याप्रतिसंख्ये" तिसूत्राक्षरारूढंकर्तुंपर

प्र० मतानुवादत्वंचव्यंजयितुंशंकोत्तरेआह ॥ यद्यपीत्यादिनाऽविरोधइत्यंतेन ॥ अप्रतिसंख्याप्रतिसंख्यानिरोधशब्दार्थत्वेनोक्तावि

विसदृशकार्यरूपविशेषकार्योत्पत्तिरेवतृतीयसूत्रेनिरस्तेतिसूत्रद्वयंप्रकारांतरेणव्याख्यातमितिद्रष्टव्यं ॥ [१०१।८] अन्यथाक्षणिकत्वविरोधइति ॥ यदितुस्वतस्सदृशकार्यजनकाअप्यणवोऽदृष्टसहकृताआदावेवविसदृशानुत्पादयेयुः तर्हिस्वतःसदृशजनकोपिघटोऽदृष्टसहकृतःकदाचित्पटमुत्पादयेदितिभावः । पूर्वमविच्छेदेनोत्पत्तिर्यौगपद्यमित्यभिप्रेत्योक्तं । इदानींसहावस्थानंयौगपद्यमित्यभिप्रेत्याह ॥ [१०१।१२] तथाय स्मिन्क्षणइति ॥ यःप्रतिक्षणंविनाशइत्यादि [१०१।१५] ॥ यद्यपिबुद्धिपूर्वकाबुद्धिपूर्वकविनाशौप्रतिसंख्याप्रतिसंख्यानिरोधावितिबौद्धानांपरिभाषा । उक्तंहि "बुद्धिपूर्वविनाशोहिप्रतिसंख्यानिरोधधीः । अबुद्धिपूर्वकस्तेषांनिरोधोप्रतिसंख्यये"ति । तथापिप्रतिक्षणविनाशस्याबुद्धिपूर्वकत्वात्संतानेनसहविनाशस्यतुप्रायेणबुद्धिपूर्वकत्वात्प्रतिक्षणविनाशससंतानविनाशावप्रतिसंख्याप्रतिसंख्यानिरोधशब्दार्थत्वेनोक्तावित्यविरोधः ॥ स्वकार्यवियोगकालइति [१०१।१६] ॥ कार्योत्पत्तिक्षणेकारणंतावत्सदेव । क्षणिकस्यचोत्पत्तिकालएववियोगकालइतिवियोगकालेपिकारणंसदेवेतिभावः ॥ [१०२।८] त्वदनुमानेऽसि

प्र० तीति ॥ एतेनभाष्येसंतानविनाशस्यप्रतिक्षणविनाशपूर्वकत्वमभिप्रेत्यसौत्रपदयोर्व्यत्यासेननिस्संतानससंतानेत्यर्थोक्तिः । टीकापितथैवप्र

प्र० वृत्तेतिसूचितं । एतेन "विनाशद्वयस्वरूपंच बुद्धिपूर्वविनाशोहिप्रतिसंख्यानिरोधधी"रित्यादितत्वनिर्णयटीकाविरोधोपिप्रत्युक्तः ॥ ६ ॥

द्धिरित्यादि ॥ अर्थक्रियाकारित्वंकदाचित्कार्यकरत्वंचेद्गगनेपितस्यसत्त्वात्तत्रतन्नेतिवदतात्वया प्रतिक्षणंकार्यकरत्वमितिवक्तव्यं । तच्चपक्षेप्रपंचेदृष्टांतेदीपेचनेत्यसिद्ध्यादीत्यर्थः ॥ साऽऽकाशेनंनास्तीति [१०२।१] ॥ किंत्वस्त्येव । ततश्चमदीयहेतौत्वदुक्तंसाधनवैकल्यंनेतिशेषः ॥ [१०२।१२] कालादिभेदेनोपपत्तेरित्यादि ॥ चूतफलादौश्यामत्वाश्यामत्वादिःकालादिभेदेनोपपन्नः । यद्यपि तार्किकाणांतत्रापिभेदः । तथापितदेवेदमितिप्रत्यभिज्ञानान्नभेदोस्मत्संमतइत्यर्थः ॥ [१०२।१३] अन्यथैकक्षणेपीति ॥ अभेदेप्रमितेपिभेदश्चेदेकक्षणवर्तिनोर्घटपटयोर्भेददर्शनात्तद्दृष्टांतेनैकक्षणवर्तिनोपिघटस्यस्वस्माद्भेदःस्यादित्यर्थः । यद्वा एकक्षणवर्तिनोपिघटस्यपुरुषभेदेनज्ञातत्वाज्ञातत्वयोर्दृष्टेभेदःस्यादित्यर्थः ॥ एतेनप्रदीपोपिव्याख्यातइति [१०२।१३] ॥ बालयुवशरीरवद्दीपेप्यत्यंतभेदाभावेपि कालभेदेनपरिमाणभेदइतिभावः ॥ दृष्टांताभावादिति [१०२।१४] ॥ मुसलाहतैकक्षणवर्तिपरमाण्वात्मकघटरूपदृष्टांतस्वरूपेतत्रसाध्यसाधनयोश्चममविप्रतिपत्तेरित्यर्थः ॥६॥ समुदायाधिकरणं ॥७॥

प्र० समुदायाधिकरणं ॥ ७ ॥

प्र० ॥ ॐनासतोऽदृष्टत्वात्ॐ ॥ टीकोक्तंसूत्रारूढंकरोति ॥ सौत्रस्येति ॥ यदत्रेति ॥ "येसर्वास्तित्ववादिनोबाह्यमाभ्यंतरंचवस्त्वभ्यु
पगच्छंतितितांस्तावत्प्रतिब्रूम" इतिपरभाष्यं "येबाह्यार्थास्तित्ववादिनस्तेतावन्निरस्यंत" इतिरामानुजभाष्यंचहृदिकृत्वाऽऽह ॥ वैभाषिकसौ
॥ ॐनासतोऽदृष्टत्वात्ॐ ॥ सौत्रस्य "अदृष्टत्वा" दित्यस्य शून्यकारणत्वस्याप्रत्यक्षत्वादिति असतिकारणत्वस्यक्वाप्यन
नुभावादिति असत्कारणत्वआगमस्यादृष्टत्वादिति त्रेधार्थोभिप्रेतइतिभावेनाह ॥ [१०२।२१] नतावत्प्रत्यक्षमित्यादिना ॥ भाष्येसौ
त्रोदासीनशब्दव्याख्यानरूपं "हेयोपादेयबुद्धिवर्जिताना" मितिहेतुगर्भविशेषणमयुक्तं । तद्वर्जितानामपितत्वादीनांहेतुत्वा
दित्याशंक्यतद्बुद्धिविषयतावर्जितत्वंभाष्येविवक्षितं । तंत्वादयश्चतद्बुद्धिविषयाएवेतिनदोषइत्याह ॥ हेयोपादेयबुद्धिवि
[१०२।२४] षयतावर्जितत्वादिति ॥ भाष्यस्थंखपुष्पाद्यन्यबौद्धाभिमतशून्यप्रतिपादकं "अन्यत्रे" तिपदं "कार्यसिद्धि" रित्यनेनानु
षक्तेनान्वयार्थंपंचम्यर्थत्वेनव्याचष्टे ॥ [१०२।२५] अन्यत्रशून्यादिति ॥ यदत्रोक्तमुभाभ्यां "समुदायइत्याद्युदासीनानामित्यंतंसूत्र
दशकमेकमधिकरणं । वैभाषिकसौत्रांतिकमतांतरनिरासकमिति तन्न । ममरीत्या "नासत" इत्यादिसूत्रचतुष्टयस्यावश्यनिर
सनीयशून्यवादनिरासकत्वेनभिन्नाधिकरणत्वसंभवे एकत्वायोगात् । यत्त्वन्यआहुः योयमणुहेतुकोभूतभौतिक[शरीर]रू
पोनदीसमुद्रादिर्बाह्यस्संघातो यश्चचित्तचैत्यात्मकआध्यात्मिकस्संघातस्तस्मिन्नुभयहेतुकेऽपिसमुदायेऽभिप्रेयमाणेतदप्राप्तिः
प्र० त्रांतिकेति ॥ "वैभाषिकसौत्रांतिकयोरेकीकृत्योपन्यास" इतिभामत्युक्तेरितिभावः । सूत्रार्थंचानूद्यनिराह ॥ यत्त्वन्यइति ॥ चित्यचै
त्यात्मकइति ॥ रूपादिपंचस्कंधात्मकइत्यर्थः । रूपशब्देनसविषयेंद्रियाण्यत्रग्राह्याणि । समुदायाप्राप्तिः समुदायानुपपत्तिरित्यर्थः ।

प्र० भाष्यभामत्योरुक्तंहेतुमाह ॥ समुदायिनामिति ॥ रामानुजभाष्योक्तमनुवदति ॥ योयमिति ॥ भूतसमुदायःपृथिव्यादिः । भौतिक समुदायःशरीरेंद्रियादिः ॥ सूत्रारूढेति ॥ मेलनसमुदाययोरन्योन्यसापेक्षत्वस्यसूचनादितिभावः ॥ तवतुनेतिद्वावपिप्रत्युच्यते ।

समुदायाप्राप्तिः । समुदायिनामचेतनत्वात् । मृद्दंडचक्रादीनांहिसंघातश्चेतनाधीनोदृष्टइत्याद्यार्थइति । यच्च केचिदाहुः योयमणुहेतुकोभूतसमुदायो यश्चभूतहेतुकोभौतिकसमुदायस्तस्मिन्नुभयहेतुकेऽपिसमुदायेसमुदाय प्राप्तिर्नयुक्ता । समुदायिनामणूनांक्षणिकत्वाभ्युपगमादित्याद्यार्थइति । तन्न । तथात्वे "प्रतिसंख्याप्रतिसंख्या निरोधाप्राप्ति"रित्यादिवदुभयहेतुसमुदायाप्राप्तिरित्येवसूत्रणीयत्वेन समुदाये उभयहेतुके इतिसप्तम्योः अपि शब्दस्य तदप्राप्तिरित्यत्रतच्छब्दस्यचव्यर्थत्वात् । ममतइवसूत्रेहेतुसूनाभावेनन्यूनत्वाच्च । ममतेसमुदायए कैकहेतुकेविरोधः । एकस्मात्समुदायइत्यस्यव्याहतेः । उभयहेतुकत्वपक्षेपिसमुदायेविरलोभयहेतुकेसमुदायस्स दास्यात् । मिलितोभयहेतुकेऽन्योन्याश्रयइतियुक्तिःसूत्रारूढा । तवतुन । किंचत्वत्पक्षेउत्तरसूत्रेइतरेतरप्रत्य यत्वादिचेदितिशंकानयुक्ता । नहिसंहंतुश्चेतनस्याभावात्संघातोनयुक्तइत्युक्तेत्वदुक्तमविद्यासंस्कारजरामरण शोकादीनामन्योन्यंहेतुहेतुमद्भावेनपूर्वापरीभूततयाघटीयंत्रवदनिशमावर्तमानत्वरूपमितरेतरप्रत्ययत्वंशंकार्हं ।

प्र० अचेतनत्वक्षणिकत्वहेत्वोस्सूत्रेऽप्रतीतेः । मतद्वयेपिप्रथमसूत्रेकथितहेतुरुत्तरसूत्रस्थशंकाननुगुणश्चेत्याह ॥ किंचेति ॥ मायावादिमतंताव दुपपादयति ॥ नहीति ॥ शंकार्हमिति ॥ अविद्यादिप्रतीतिव्यवहाराणांसंघातसिद्ध्यधीनत्वेनतस्यैवासंभवेऽन्योन्यहेतुत्वशंकादूरापास्ते

प्र० तिभावः । तथाक्षणिकत्वादणूनांसंघातएवनोपपद्यतइत्युक्तेपुनःकथमन्योन्यहेतुहेतुमद्भावरूपेतरेतरप्रत्ययत्वंशंकार्हमित्युपपादनंध्येयं ॥ अतएवेति ॥ शंकानुत्थानादेवेत्यर्थः । यदत्रकैश्चिदितरेतरप्रत्ययत्वादुपपन्नमितिचेन्न । संघातभावानिमित्तत्वादितिपाठांतरंपरिकल्प्याय मेवाकृत्रिमोवृत्तिसिद्धःपाठइत्युक्तं । तदसांप्रदायिकमितिभावेनोपेक्षितं । मतद्वयेपिज्ञानेरूढस्यप्रत्ययशब्दस्यहेत्वर्थत्वंक्लिष्टं । संघातभावा निमित्तत्वेक्षणिकत्वहेतोर्वहिरेववाच्यत्वाच्च । "उत्तरोत्पादेचपूर्वनिरोधा"दित्येतत्तात्पर्यार्थपरमतेनिराह ॥ यच्चोक्तमिति ॥ उत्तरक्षणस्यो

अतएवद्वितीयसूत्रार्थोप्ययुक्तः । यच्चोक्तमेकैकहेत्वधीनंकार्योत्पादंस्वीकृत्यसमुदायाधीनःसद्वितीयेदूषितः । तृतीयेत्वेकैकहेत्वधीनोपिसदूष्यतइति तन्न । समुदायाधीनकार्योत्पादनिरासकेनपूर्वोक्तेनचेतनाभावेनैवैकै काधीनस्यापितस्य "पयोंबुव"दित्युक्तन्यायेनैवनिराससंभवात् । चतुर्थेतु "यौगपद्यमन्यथे"त्यस्य "उत्त रोत्पादेचपूर्वनिरोधा"दितितृतीयेनगतार्थता । तत्राप्यन्यथायौगपद्यंस्यादितिविपक्षेबाधकविवक्षांविनोत्तरो त्पादेपूर्वनिरोधस्यासिद्धेः । मममतेतुकार्याणांयौगपद्यमिहविवक्षितं । नतुत्वन्मतइवकार्यकारणयोः ।

प्र० त्पादेपूर्वक्षणस्यनिरोधइतिमतद्वयेपिसूत्रार्थोऽविशिष्टः ॥ इत्युक्तन्यायेनेति ॥ तत्रचेतननिरपेक्षकारणककार्यस्यनिरासादितिभावः । मत द्वयेपि "असतिप्रतिज्ञोपरोधोयौगपद्यमन्यथे"तिसूत्रेचरमांशस्य "उत्तरोत्पादेचे"तिपूर्वसूत्रेणपौनरुक्त्यमाह ॥ चतुर्थेत्विति ॥ पूर्वत्रह्यु त्तरस्यक्षणिककार्यस्योत्पादेपूर्वस्यनिरोधाद्विनाशादसतिकारणेकार्योत्पत्तौसर्वदाकार्योत्पत्तिस्स्यादित्युक्तं । इहत्वसत्यपिहेतौकार्योत्पत्तावुच्यमा नायांचतुर्विधान्हेतून्प्रतीत्यचित्यचैत्याउत्पद्यंतइत्यधिपतिसहकार्यालंबनसमनंतरप्रत्ययाश्चत्वारोविज्ञानोत्पत्तौहेतवइतित्वदीयप्रतिज्ञोपरोधः ।

प्र० अन्यथाकार्यस्यक्षणेकारणस्यसत्त्वेकारणकार्ययोर्यौगपद्यमित्युभाभ्यामर्थउक्तः । तत्रमतद्वयेपिपूर्वसूत्रे उत्तरोत्पादेपूर्वस्यनिरोधःकुतः । येनासतिहेतौकार्योत्पादस्स्यादितिशंकिते यौगपद्यमन्यथेत्यस्यावश्यंविवक्षणीयत्वादितिभावः । मतद्वयेपि "प्रतिसंख्याप्रतिसंख्यानिरोधे" तिसूत्रार्थमनूद्यनिराह ॥ यच्चोक्तमिति ॥ बुद्धिपूर्वविनाशोऽबुद्धिपूर्वविनाशश्चेत्यर्थः । निरन्वयः कारणान्वयशून्यः । निश्शेषइतिया वत् ॥ सनयुक्तइति ॥ एतेनप्रतिसंख्याप्रतिसंख्यानिरोधयोर्निरन्वययोरप्राप्तिरसंभवइतिसूत्रांशस्यार्थःसूचितोभवति । भामत्युक्तमेवाह

यच्चोक्तं प्रतिसंख्याविनाशोप्रतिसंख्याविनाशश्चवैनाशिकैर्निरन्वयःस्वीकृतः। सनयुक्तः। कुंडला दिविनाशेसुवर्णाद्यन्वयाविच्छेदात् । तप्तशिलातलपतितजलबिंदुविनाशोपिननिरन्वयः । यतः "उदबिंदौचसिंधौचतोयभावोनभिद्यते । विनष्टेपिततोबिंदावस्तितस्यान्वयोबुधा"वितिपंचमा र्थइति । तन्न । ममरीत्याऽध्याहारं विनानिरोधस्वरूपनिरासकत्वेसंभवत्यध्याहारेणनिरन्व यत्वविशिष्टनिरोधनिरासकत्वायोगात् । त्वदभिप्रेतमूलाविद्याविनाशस्यनिरन्वयत्वाच्च ।

प्र० ॥ तप्तशिलेत्यादि ॥ उदबिंदौ उपलतलपतिते सिंधौसमुद्रेच तोयभावः तोयत्वसामान्यं नभिद्यते । तस्मादुदबिंदौविनष्टेपितस्य बिंदोस्सामान्यरूपेणसिंधावस्त्यन्वयइतिश्लोकार्थःकल्पतरूक्तोध्येयः । रामानुजभाष्येपिनिर्वाणप्रदीपादौसूक्ष्मदशापत्त्याप्युनुलंभोपपत्ते रित्युक्तं । व्यभिचरितश्चाविच्छेदादिहेतुरित्याह ॥ त्वदभिप्रेतेति ॥ "उभयथाचदोषा"दित्येतत्सूत्रार्थपरभाष्योक्तमनूद्यनिराह ॥

प्र० यच्चोक्तमविद्येति ॥ परैरितियोज्यं । तत्वज्ञानादिनेत्यादिपदेनयमनियमादिश्श्रवणमननादिश्चभामत्युक्तोज्ञानसहकारीग्राह्यः ॥ संतानविनाशस्येति ॥ प्रतिसंख्याविनाशस्येत्यर्थः । "योयमविद्यानिरोधःप्रतिसंख्यानिरोधांतःपातीतिपरिकल्पित" इतित्वद्भाष्येऽविद्यानाशस्यसंतानना शांतःपातित्वेनानुवादादितिभावः । केषांचिन्मतेतु सतोनिरन्वयविनाशेसत्येकक्षणादूर्ध्वंकृत्स्नस्यजगतस्तुच्छत्वंस्यात् । पश्चात्तुच्छाज्जगदुत्पत्तौपुनस्तुच्छात्मकमेवस्यादित्युभयथातुच्छाज्जगदुत्पत्तौजगतस्तुच्छात्मकत्वोपगतौचदोषाच्चासमंजसंतन्मतं । आद्येजगतस्तुच्छतापत्तिर्दोषः ।

यच्चोक्तं अविद्यादिविनाशस्तत्वज्ञानादिनावा स्वयमेववा । आद्येनिर्हेतुर्नाशइति मतहानिः । द्वितीयेमोक्षसाधनोपदेशोनर्थकइतिषष्ठार्थइति तन्न । बाह्यैःस्वाभाविकस्यक्षणविनाशस्यनिर्हेतुकत्वेपिनैमित्तिकस्यसंतानविनाशस्यनिर्हेतुकत्वास्वीकारात् । यच्चोक्तं आकाशेचायुक्तोनिरुपाख्यत्वाभ्युपगमः । प्रतिसंख्याप्रतिसंख्यानिरोधयोरिवाकाशेपिवस्तुत्वप्रतिपत्तेरविशेषादितिसप्तमार्थः । अष्टमस्यतु

प्र० अंत्येऽभ्युपगमस्तुच्छत्वेनप्रतीत्यभावश्चदोषइत्यर्थः । तन्मतेतथाचदोषादितिसूत्रणीयं । पूर्वंसतोनिरन्वयविनाशोनसंभवतीत्युक्तं । इहतुतथानिरन्वयविनाशेदोषश्चास्तिजगतस्तुच्छतापत्त्यादिरितिव्याख्यानसंभवादितिस्पष्टत्वात्तन्नदूषितं । मतद्वयेपि "आकाशेचाविशेषा" दित्यस्य "अनुस्मृतेश्चे" त्यस्यचार्थमनूद्यनिराह ॥ यच्चोक्तमिति ॥ निरोधयोरिवेति ॥ एतच्चाद्वैतिमते । केषांचिन्मतेतुपृथिव्यादाविवे ॥ ९१६ ॥

प्र० त्यर्थः । अनुस्मृतेरनुभवमनुसृत्यवर्तमानास्मृतिरनुस्मृतिस्तद्बलाच्चात्मादेर्नक्षणिकत्वमितिसूत्रार्थंव्यनक्ति ॥ अहमर्थस्येति ॥ पृथक्सा ध्येति ॥ आकाशेचनिरुपाख्यत्वमयुक्तं । अनुस्मृतेश्चाहमर्थस्यात्मनःक्षणिकत्वमयुक्तमितिपृथक्साध्येत्यर्थः ॥ आत्ममात्रेति ॥ एतच्चा द्वैतिमतएव । मतांतरेज्ञातृज्ञेयज्ञानानांत्रयाणामपिस्थायित्वसाधनात् । अद्वैतिमतेदोषांतरमाह ॥ कथंचप्रत्यहमिति ॥ ''नासतोऽदृष्ट

अहमर्थस्यप्रतिक्षणंभेदेस्मृतिर्नस्यात् । अनुभवितुरेवस्मर्तृत्वादित्यर्थइति तन्न । ममरीत्यासप्तमाष्टमयोःक्षणभंगविरोधिस्था यित्वरूपैकसाध्यान्वयस्याष्टमस्थचशब्दानुगुणस्यसंभवेपृथक्साध्याध्याहारायोगात् । ममरीत्यासएवाहंतदेवेदमित्यात्माना त्मसाधारणेनप्रत्यभिज्ञानेनविप्रतिपन्नस्यसर्वस्थायित्वस्यसाक्षात्साधनसंभवेस्मृत्यनुभवयोःसामानाधिकरण्यान्यथानुपपत्त्या ऽऽत्ममात्रस्थायित्वसाधनायोगात् । कथंचप्रत्यहंसुषुप्तिदशायामहमर्थनाशंवदतस्तवमतेस्मृत्यनुभवयोःसामानाधिकरण्यं । कथंवासएवाहमितिप्रत्यभिज्ञा । कथंचदृष्टिसृष्टिमतेतदेवेदमितिप्रत्यभिज्ञा । कथंचतस्याभ्रांतित्वेक्षणिकत्वनिरासः । यदि चाप्रतीतिदशायामपिघटादिरस्ति तर्हिंनमिथ्या । यच्चोक्तं यद्यपिवैभाषिकसौत्रांतिकाभ्यामसतःकारणत्वंनस्वीकृतं । तथा पिहेतोःकार्योत्पादनेनिरपेक्षत्वेपुंव्यापारवैयर्थ्यं । सापेक्षत्वंतुक्षणिकस्यनयुक्तं । नचसापेक्षत्वनिरपेक्षत्वाभ्यामन्याविधास्ती

प्र० त्वा''दित्यस्यार्थमनूद्यनिराह ॥ यच्चोक्तमिति ॥ परैरितियोज्यं । भामत्युक्तंतात्पर्यविवरणपूर्वमनुवदति ॥ यद्यपीति ॥ नयुक्तमिति ॥ स्वस्मिन्नुत्पन्नेपश्चादतिशयाधायिनोह्यपेक्ष्यत्वंस्यात् । क्षणिकवादेस्वोत्पत्त्यनंतरंस्वस्यैवानवस्थानेनस्वस्मिन्नतिशयाधानायोगेनकथंतादृशस्या

प्र० न्यस्यापेक्षास्यादितिभावः ॥ **अर्थादापन्नमसतइति** ॥ यद्यपिभामत्यादौ "अर्थादभावाद्भावोत्पत्तिःपरिशिष्यत"इत्यभावपदप्रयोगए
वास्ति । तथासूत्रार्थोक्तिप्रस्तावे "नाभावात्कार्योत्पत्ति"रिति । तथापि "नहिशशविषाणादंकुरादिकार्याणामुत्पत्ति"रितिदृष्टांतोक्त्यासा
पेक्षत्वनिरपेक्षत्वाद्युपपादनेनचाभावशब्दोसत्परोभाष्यभामत्योरभिप्रेतइतिभावः । अतएवाभावकारणत्वनिरासपक्षोप्यग्रे "यदित्वि"त्यादि
नादूष्यते ॥ **स्वयमेवेति** ॥ यद्यपिमाध्यमिकेनापिशून्यस्यनासत्त्वमंगीकृतं । "पारमार्थिकसत्यत्वंशून्यादन्यस्यनेष्यत"इत्यनुव्याख्याने
तन्मतानुवादात् । "असत्त्वमत्राप्यापाद्य"मितिसुधोक्तेः । तथापि "भावार्थप्रतियोगित्वंभावत्वंवानतत्वत"इतितेनैवोक्तेर्वाऽसद्वादित्वेनतस्य

**त्यर्थादापन्नमसतःकारणत्वं "नासत"इत्यादिसूत्रद्वयेननिरस्यतइति तन्न । ममरीत्याऽवश्यनिरसनीयस्यशून्यवादिना
स्वयमेवांगीकृतस्यासत्कारणत्वस्यनिराससंभवेवैभाषिकमतेर्थादापन्नस्यनिरासायोगात् । यदितुनासतइत्यत्राभावस्य
कारणत्वंनिषिध्येततदाऽदृष्टत्वादितिहेतुरयुक्तः । विहिताकरणविशेषादर्शनादीनांप्रत्यवायभ्रमादिहेतुत्वदर्शनात् ।**

प्र० प्रसिद्धेर्वैवमुक्तमित्याहुः ॥ **वैभाषिकमतइति** ॥ सौत्रांतिकमतइत्यपिध्येयं । रामानुजमतेतुसौत्रांतिकमात्रनिरासपरमेतत् । तन्मते
"क्षणिकस्यार्थस्यज्ञानविषयत्वनिरसनपरं । ज्ञानेस्वाकारंसमर्प्यविनष्टोप्यर्थोज्ञानगतेननीलाद्याकारेणानुमीयते । अतोयदर्थाकारभाक्त्वं
यस्यज्ञानस्यसतस्यविषयइतिसौत्रांतिकेनोक्तेदूषणमिदंनासतोऽदृष्टत्वादिति । योयंज्ञानेनीलाकारउपलभ्यतेसोसतोविनष्टस्याकारोभवितुंना ॥ ११७ ॥
र्हति । धर्मिणिनष्टेतद्धर्मस्यार्थांतरेसंक्रमणस्यादृष्टत्वा"दित्यर्थउक्तः । तन्मतेपि "ममरीत्ये"त्येषदोषस्तुल्यः । अनेकाध्याहारदोषश्च ॥
विहिताकरणेति ॥ अतएवत्वयापि "नाभावात्कार्योत्पत्ति"रित्युक्त्वा "नहिशशविषाणादंकुरादिकार्याणामुत्पत्तिर्दृश्य"तइत्येव "अदृष्ट

प्र० त्वा"दितिसौत्रोहेतुरुपपादितः । नत्वभावस्यकारणत्वादृष्टिरुपपादितेतिभावः । मतद्वयेपि "उदासीनानामपिचैवंसिद्धि"रितिसूत्रार्थमनुव
दति ॥ **यच्चोक्तमिति** ॥ अनीहमानानामितिपरभाष्यं । अनुद्युंजानानामितिकेषांचिद्भाष्ये । परमतेतावद्दोषमाह ॥ **त्वदुक्तेति** ॥
मतद्वयेपिदोषमाह ॥ **किंचेति** ॥ **ततोवरमिति** ॥ इष्टापादनाद्वरमित्यर्थः । "मायीमाध्यमिकश्चैवद्वावुपेक्ष्यौबुभूषुभिः । यच्छून्यवा

**यच्चोक्तं उदासीनानामनीहमानानांजनानामभिमतसिद्धिःस्यादितिदशमार्थइति तन्न । त्वदुक्तातिप्रसंग
स्यत्वदभिमतदृष्टिसृष्टावपिसमत्वात् । किंच एवंहीहाभावेपिकार्योत्पत्तौबाधकमुक्तंस्यात् । नत्वसतःकार्यो
त्पत्तौ । तत्रचेष्टापत्तिः । क्वचिदनीहमानस्यापीष्टसिद्धेः । ततोवरंममरीत्योदासीनशब्देनहेयोपादेयबुद्ध्यवि
षयखपुष्पादीँल्लक्षयित्वातेभ्यःकार्यसिद्ध्यापादनं । तेनसतःकारणत्वस्यसाक्षात्सिद्धेः । नचममसकाशादिति
पदाध्याहारदोषः । उदासीनानांसंबंधिकार्यसिद्धिरितिषष्ठ्यर्थसंबंधस्यैवभाष्येसकाशपदेनविवृतत्वात् । यच्चो
क्तं शून्यवादस्यातिप्रमाणविरुद्धत्वात्सूत्रेनतन्निरासइति तन्न । त्वदुक्तस्यशून्यस्यत्वयानिर्विशेषब्रह्मशब्देन**

प्र० दिनश्शून्यंतदेवब्रह्मवादिना"मित्याद्यनुव्याख्यानं "नहिशून्यवादिनस्सकाशाद्वैलक्षण्यंमायावादिन"इत्यादिनातत्वोद्योतोक्तंचहृदिकृत्वाप
रोक्तमन्यदपिनिराह ॥ **यच्चेति** ॥ क्षणिकत्वाच्चेतिसूत्रेपरभाष्यइतियोज्यं ॥ **सूत्रइति** ॥ एतच्चयथाश्रुतभाष्याभिप्रायं । भामत्यां "नाभा
व"इत्यादिसूत्राणामेवतन्मतनिरासकतयावर्णकांतरस्यापिवर्णनात् । "सूत्रांतराणिनोच्यंते । एतान्येवावृत्त्यायोज्यंत"इतिकल्पतरूक्तेश्च ।

प्र० परतत्वेसाम्यमुक्त्वाऽपरतत्वेप्यैक्यमाह ॥ **संवृतेश्चेति** ॥ भामत्युदाहृतमेवश्लोकमाह ॥ **इदमिति** ॥ इदंवस्तुबलायातं अधिष्ठानवस्तु बलायातमित्यर्थः । जगत्स्वरूपमाह ॥ **यथायथेति** ॥ **विशीर्यंतइति** ॥ भामत्यांतुविविच्यंतइतिपठित्वानकचिदपिपक्षेव्यवतिष्ठंतइत्यर्थ इतितद्व्याख्यातं । विशीर्यंतइतिपाठांतरंवाऽर्थतोऽनुवादोवेतिध्येयं । देशिताः कथिताइत्यर्थः । प्रमेयेविगानाभावमुक्त्वाप्रमाणेष्वप्यविगा

संवृतेश्चाविद्याशब्देन "इदंवस्तुबलायातंयद्वदंतिविपश्चितः । यथायथार्थाश्चिंत्यंतेविशीर्यंतेतथातथा । बुद्ध्या विविच्यमानानांस्वभावोनावधार्यते । अतोनिरभिलाषास्तेनिःस्वभावाश्चदेशिता"इतितदुक्तस्यविचारासहत्वस्य त्वयाऽनिर्वचनीयशब्देनोक्तेः । द्वैतग्राहिप्रत्यक्षादीनांसांवृतिकसत्यविषयत्वेनपारमार्थिकाद्वैताविरोधित्वमिति चोभाभ्यामुक्तत्वात् । मिथ्याभूतस्वर्गादेर्व्यावहारिकंसत्त्वंनामसत्त्वेनव्यवहारमात्रं । नत्वर्थगतंसत्त्वमस्तीति त्वयापिवक्तव्यतयार्थात्स्वर्गादिविषयवेदाप्रामाण्यस्वीकारात् । दीर्घभ्रांतिहेतुत्वेनचातिशयिताप्रामाण्यस्यैवा पातात् । सत्यज्ञानादिवाक्यस्यपराभिप्रेतशून्यलक्षकतायास्त्वयैवोक्तत्वादद्वयवादीतिबौद्धसंज्ञायाश्चत्वयाद्वै तवादीतिधारणाच्चशून्यवादस्यत्वदभिप्रेतसिद्धांतत्वेनातिप्रामाणिकत्वात् ॥ ९ ॥ **असदधिकरणं** ॥ ८ ॥

प्र० नमाह ॥ **द्वैतग्राहीति** ॥ कालांतरेबाध्यत्वमित्येतदपिसमं । तथापिदोषांतरमाह ॥ **दीर्घभ्रांतीति** ॥ मयाब्रह्मज्ञानानंदलक्षणंस्वीकृत मित्यतआह ॥ **सत्यज्ञानेति** ॥ यद्वासत्यादिवाक्येतत्वावेदकत्वंमयांगीकृतमित्यतआह ॥ **सत्येति** ॥ ९ ॥ **असदधिकरणं** ॥ ८ ॥

प्र० ॥ ॐनभावोऽनुपलब्धेःॐ ॥ “नविज्ञानमात्रंजग”दित्यादिभाष्यटीकयोरुक्तमर्थंसूत्रारूढंकर्तुमाह ॥ **नाभावइति** ॥ एतेनतत्रापिकर्तृसाधनइतिसूचयति । कर्तासाधनंनिमित्तंप्रत्ययोत्पत्तौयस्यसकर्तृसाधनस्तेनेत्यर्थः । भूसत्तायामितिधातोः “भवतेश्चे”तिणप्रत्यये “अचोञ्णिती”तिवृद्धावावादेशेभावइतिरूपं सन्नित्यर्थः । ज्ञानमितियोग्यतालभ्यमितिभावेनाह ॥ **विज्ञानवादइति** ॥ **इतिवचनादिति** ॥

॥ ॐनभावोऽनुपलब्धेःॐ ॥ “नाभावउपलब्धे”रितिपूर्वसूत्रइवात्रापिसूत्रेकर्तृसाधनेनभावशब्देनसद्रूपंज्ञानमुच्यते । विज्ञानवादेज्ञानादन्यस्यासत्त्वात् । ज्ञानमित्यनुक्त्वाभावइत्युक्तिस्तु “नासतोदृष्टत्वा”दितिशून्यवादिनंप्रत्युक्तोदोषोनास्माकमितिपूर्वपक्षोत्थानार्थमितिद्रष्टव्यं । केचित्तु प्राप्तौभूकुशुद्धिचिंतयोरितिवचनाच्चिंतात्मकज्ञानार्थोपिभूधातुरस्तीतिवा

प्र० “भूलञुक्तौभूकङ्भूञ्प्राप्तौभू”गितिकविकल्पद्रुमोक्तेरित्यर्थः । भूधातुःप्राप्त्यर्थेशुद्ध्यर्थेचिंतार्थेचवर्ततइत्यर्थः । प्राप्ताविन्यस्यपूर्वेणान्वयः । ककारानुबंधश्चुरादिण्यंतत्वज्ञापनार्थः । कर्तरिपचाद्यच् । भास्शब्दस्सकारांतोत्रज्ञानवाची । भादीप्ताविितिधातुजत्वात् । भास्शब्दसकारस्यरुत्वयत्वयलोपेपुभावइतिनिर्देशइतिवा भादीप्तावित्यतोभावेविच्प्रत्यये भा इत्याकारांतएवायंशब्दइतिवाभावइतिनिर्देशइत्युपेत्यार्थांतर

प्र० माह ॥ वइति ॥ टीकाक्षरार्थान्व्यनक्ति ॥ नन्वित्यादिना ॥ यच्चोक्तंपरैरिति॥ कैश्चित्तुसूत्रत्रयंतथेत्युक्तमितियोज्यं ॥ विज्ञानवादेति ॥ एतच्चयथाश्रुतभाष्यदिशा । भामतीरीत्यातुशून्यवादनिरासकमपीतिबोध्यं । तत्राद्यसूत्रस्य ज्ञानव्यतिरेकेणबाह्यार्थस्याभावोन । कुतः । उपलब्धेः । उपलभ्यमानत्वादितिमतद्वयेप्यर्थः । स्वप्नदृष्टांतेनजागरितज्ञानानांयन्निरालंबनत्वमुक्तंतन्निरसितुं "वैधर्म्याच्चनस्वप्ना

वः युष्माकं भाः साकारत्वेनाभिमतंज्ञानमितिवाभिप्रेत्यभावइत्युक्तिरित्याहुः । अतएवभाष्ये "नविज्ञानमात्रं जग"दिति टीकायांच "नविज्ञानातिरिक्तंजग"दित्युक्तं । ननु तार्किकमतेस्ववृत्तिविरोधः । नतुसिद्धांते । साक्षिणस्स्वप्रकाशत्वांगीकारादितिपूर्वत्रारुच्यादोषांतरमाह ॥ १०३।१८ अज्ञानेव्यभिचारश्चेति ॥ ज्ञानप्रागभावादौ ज्ञानावरणेसंवृतौचव्यभिचारः । नहिज्ञानाभावादिरपिज्ञानं । विरोधादितिभावः ॥ १०३।१९ अधिकारिणंप्रतीति ॥ प्रतिवादिनाबौद्धेनश्रुत्यादिप्रामाण्यास्वीकारेपिशास्त्रेऽधिकृतंमुमुक्षुंप्रतितदंगीकृतप्रामाण्येनश्रुत्यादिनाविरोध उच्यतइत्यर्थः । यच्चोक्तंपरैः "नाभावउपलब्धे"रित्यादिसूत्रपंचकमेकमधिकरणंविज्ञानवादनिरासकमिति तन्न ।

प्र० दिव"दितिद्वितीयंसूत्रं । बाधभावात्स्वप्रादिज्ञानानांजाग्रद्दशोत्पन्नज्ञानानांतदभावेनस्वप्रादिवैधर्म्यान्नतद्वन्निरालंबनत्वमित्युभाभ्यांतस्यार्थ उक्तः । बाह्यार्थाभावेपिवासनावैचित्र्यान्नज्ञानवैचित्र्यमित्येतन्निरसितुं "नभावोऽनुपलब्धे"रितिसूत्रं । कदाचिदप्यर्थोपलब्ध्यभावान्नवासनानांभावस्सत्तासंभवतीतितस्यार्थःपरमते । मतांतरेतुकेवलस्यार्थशून्यस्यनभावःसत्तासंभवतीति । अकर्मकाकर्तृकज्ञानस्यानुपलब्धेरिति ॥ ९१९ ॥

प्र० ज्ञानस्यनिरालंबनत्वनिरासार्थमिदमिति । वासनानामाश्रयंनिरसितुंसूत्रं "क्षणिकत्वाच्चे"ति । ज्ञानादन्यस्यतन्मतेऽभावाज्ज्ञानस्यचक्षणिकत्वान्नवासनाश्रयत्वमितिपरमतेर्थः । मतांतरेतु "क्षणिकत्वाच्चे"तिसूत्रंनास्त्येव । बाह्यार्थवादविज्ञानवादशून्यवादरूपवादत्रयस्याप्यसंबद्धप्रलापत्वेनसर्वथानुपपत्तेश्चेतिपंचमार्थःपरमते । मतांतरेत्वग्रेव्यक्तं । स्वमतावष्टंभेनमतद्वयेपिदोषमाह ॥ नासतइति ॥ परारीत्यादो

"नासत"इत्यादिसूत्राभ्यांशून्यपरिणामेनिरस्तेऽवशिष्टमवश्यनिरसनीयं शून्यविवर्तत्वमनिरस्यान्यनिरासानवसरात् । किंचाद्यद्वितीयसूत्रेत्वयापि "किंपुनर्वैधर्म्यबाधाबाधावितिब्रूम"इत्यादिनाजगत्सत्यत्वसाधनेनव्याख्यातेइतित्वन्मतविरुद्धे । ननु योगाचारस्य नीलपीतादिर्ज्ञानाकारएव । नतुबाह्योर्थोस्ति । तत्रबाह्यार्थानुभवविरोधःसूत्रउक्तः । ममतुनीलपीतादिर्मिथ्याभूतोबाह्यएव । नतुज्ञानाकारइतिनसूत्रविरोधइतिचेन्न । "नाभावउपलब्धे"रितिसूत्रे उपलंभेनबाह्यार्थमिथ्यात्वस्यैवनिषेधात् । ज्ञानाकारत्वनिषेधेहि नज्ञानमनुपलब्धेरितिसूत्रणीयं । किंचतत्तदाकारवृत्त्यातत्तदज्ञाननिवृत्तिरितिवदतस्तवमतेपिज्ञानंसाकारमेव । किंचबाह्यार्थस्यानिर्वचनीयत्वंसूत्राभिमतंचेत्स्वप्नवैधर्म्योक्तिरयुक्ता । स्वप्नस्याप्यनिर्वचनीयत्वात् । व्यवहारदशायांबाधाभावमात्रेणचतद्वैधर्म्यविवक्षायांविज्ञानवादोप्यनिरस्तःस्यात् । तन्मतेपिजगतोव्यवहारदशायामबाधात् ।

प्र० षमाह ॥ किंचेति ॥ इत्यादिनेति ॥ त्वदीयभाष्येणेत्यर्थः ॥ तत्तदाकारेति ॥ तटाकोदकंछिद्रान्निर्गत्यकुल्याद्वाराकेदारान्प्रविश्यचतुष्कोणाद्याकारमिवांतःकरणंगोलकान्निर्गत्यरश्मिद्वाराघटादीन्संबध्यतत्तदाकारंजायतइतिप्रक्रिययेतिभावः । विज्ञानवादनिरासस्त्वन्मतप्र

प्र० तिकूलइत्याह ॥ किंचविज्ञानविवर्तइतीति ॥ द्वयोः विज्ञानवादिमायावादिनोः ॥ स्वप्नेति ॥ तस्यापिसदसद्विलक्षणत्वादितिभावः । उभयत्र असत्त्ववादेसदसद्वैलक्षण्यवादेचेत्यर्थः । सद्वैलक्षण्योक्त्यैवत्वयाप्यसत्त्वमंगीकार्यमेवेत्याशयेनाह ॥ सत्त्वेति ॥ तथाचनविज्ञानवादवैलक्षण्यमितिभावः । असद्वैलक्षण्यांगीकारांशेनतद्वैलक्षण्यंममेत्यतआह ॥ अपरोक्षेति ॥ सांवृतिकेति ॥ आविद्यकेत्यनर्थांतरं

किंचविज्ञानविवर्तइतिमतेऽधिष्ठानभूतज्ञानस्यमिथ्याभूतबाह्यार्थात्मनाधीस्तत्वतोबाह्यार्थभावश्चद्वयोःसमएव । ननु तस्यार्थोत्यंतासन् । ममतुसदसद्विलक्षणइतिचेन्न । तथापिस्वप्नवैधर्म्योक्त्ययोगात् । सत्त्वानुभवविरोधस्योभयत्रसाम्यात् । सत्त्वाभावादन्यस्यासत्त्वस्याभावाच्च । अपरोक्षधीविषयत्वार्थक्रियाकारित्वादिरूपस्यसांवृतिकसत्त्वरूपस्यचासद्वैलक्षण्यस्यपरमतेपिभावात् । परमार्थसत्त्वादिरूपस्यचतस्यत्वन्मतेप्यभावात् । यच्चोक्तं नभावोवासनानांयुक्तः । विज्ञानवादेबाह्यार्थानामसत्त्वेनानुपलब्धेः । उपलब्धेषुहिवासनेतितृतीयार्थइति । तत्रहेतुसाध्ययोर्वैयधिकरण्यं । वासनानामित्यध्याहारश्च ।

प्र० ॥ तस्येति ॥ असद्वैलक्षण्यस्येत्यर्थः ॥ वैयधिकरण्यमिति ॥ अर्थानामनुपलभ्यमानत्वाद्वासनानांभावोनास्तीत्युक्तेहेतोःपक्षधर्मताभावइत्यर्थः । नसंभवंतिवासनाः । उपलब्धिरूपकारणशून्यत्वादित्युक्तिस्तुनसूत्रारूढेतिभावः ॥ अध्याहारश्चेति ॥ केषांचिन्मतेप्यनेका

प्र० ध्याहारदोषस्सम: ॥ असत्त्वेनेति ॥ अनुपलब्धेरितिसौत्रपदस्यार्थानामसत्त्वेनहेतुनाऽनुपलंभादित्यर्थउक्तः । तथाचानुपलब्धावसत्त्वं कारणतयोपन्यस्तमित्यर्थानामसत्त्वेनहेतुनाऽनुपलब्धिवदतालयासत्त्वमेवार्थानामुपलब्धौतंत्रमितिवक्तव्यं । लाघवात् । नलसत्त्वाभावः ।

असत्त्वेनानुपलब्धिवददतालाघवेनसत्त्वमेवोपलब्धौतंत्रमितिवक्तव्यतयाऽनिर्वाच्यपक्षेपिदोषसाम्यंच । मम तु जगन्नभावः नञ्ज्ञानं तथानुपलब्धेरितिसामानाधिकरण्यं । पूर्वसूत्रप्रकृतजगतएवानुषंगादनध्याहारश्च । [समानार्थौ "ऋदोर"बित्यप्प्रत्ययांतोभवशब्दोभावार्थघञ्प्रत्ययांतोभावशब्दश्च। उपसर्गोधातुगतशक्तिद्योतकएवेतिभावेनसूत्रेऽन्वित्युपसर्गस्याप्रयोगः] यच्चोक्तं नालयज्ञानंसंस्काराश्रयः । क्षणिकत्वादितिचतुर्थार्थइतितन्न । ममरीत्येहविज्ञानवाद्यसाधारणस्यार्थोज्ञानाकारइत्यस्यदूषणसंभवे क्षणिकत्वप्रयुक्तसंस्काराभावस्यबौद्धमतसाधारणस्योक्तययोगात् । केचित्तुपंचमंशून्यवादिनिरासकमित्याहुः । तन्न । नासतइत्यत्रैवशून्यवाद्युक्तासत्कारणत्वनिरासप्रतीतेः । इहचशब्दास्वारस्याच्च ॥ ५ ॥ अनुपलब्ध्यधिकरणं ॥ ९ ॥

प्र० गौरवात् । तथाचजगतःसदसद्वैलक्षण्यरूपानिर्वाच्यत्वपक्षे उपलब्धिप्रयोजकस्यसत्त्वस्याभावेनजगदुपलब्ध्यभावस्स्यात् । तदभावाच्चबाह्यपदार्थवासनानामभावस्स्यादितितन्मतोक्तदोषसाम्यमित्यर्थः ॥ नालयेति ॥ आलयज्ञानमितिपदच्छेदः ॥ ५ ॥ अनुपलब्ध्यधिकरणं ॥ ९ ॥

प्र० ॥ ॐनैकस्मिन्नसंभवात्ॐ ॥ टीकाक्षरार्थमाह ॥ **सदसदुभयमित्यादीति** ॥ प्रतीकग्रहणमेतत् । टीकोक्तार्थेसंवादंदर्शयति ॥ **स्यादस्तीति** ॥ नन्वस्तिस्यादितिवर्तमानत्वविधिवाचिनोःकथमेकार्थपर्यवसानमित्यतस्तद्विवृणोति ॥ **अत्रचेति** ॥ एतेन "स्याद्वादिमतं दूषयती"तिभाष्यंविवृतं ॥ **वाक्येष्विति** ॥ स्यादस्तीत्यादिवाक्येषुस्यादित्ययंशब्दस्तिङंतसदृशोनिपातइत्यन्वयः । कोसावस्यार्थउक्तइत्यत

॥ ॐनैकस्मिन्नसंभवात्ॐ ॥ सदसदुभयमित्यादि ॥ तत्र सदित्याद्यःप्रकारः । असदितिद्वितीयः । उभयंसदसदात्मकमितितृतीयः । उभयविलक्षणमितिचतुर्थः । सदसदुभयविलक्षणमितिपंचमषष्ठौ । तत्र सत्तद्विलक्षणंचेतिपंचमः । असत्तद्विलक्षणंचेतिषष्ठः । सर्वंसदसदात्मकंनैतत्सर्वंसदसद्विलक्षणमितिसप्तमउक्तइति द्रष्टव्यं । स्यादस्तिस्यान्नास्तिस्यादस्तिचनास्तिचस्यादवक्तव्यंस्यादस्तिचावक्तव्यंचस्यान्नास्तिचावक्तव्यंचस्यादस्तिचस्यान्नास्तिचावक्तव्यंचेतिहिक्षपणकाआहुः । अत्रचस्याच्छब्दस्तिङंतप्रतिरूपकानेकांतद्योतकोनिपातः । यथाहुः । "वाक्येष्वनेकांतद्योतीगम्यंप्रतिविशेषणं । स्यान्निपातोर्थयोगित्वात्तिङंतप्रतिरूपक" इति ।

प्र० उक्तमनेकांतद्योतीति ॥ अनैयत्यद्योतकत्वंस्वातंत्र्येणनेत्याह ॥ **गम्यंप्रतीति** ॥ गम्यं अस्तीत्यादि । कुतोस्यानेकांतद्योतित्वमित्यतोर्थयोगित्वादिति । अर्थवत्त्वान्निमित्तात् । अर्थवत्त्वान्यथानुपपत्त्येत्यर्थः । यद्ययमनेकांतद्योतकोनस्यात्तर्हिस्यादस्तीतिवाक्येस्यादित्येतदनर्थकंस्यात् । अनेकांतद्योतकश्चेत्तदास्यादस्तिकथंचिदस्तीतिस्यात्पदात्कथंचिदर्थोस्तीत्यनेनानूदितःप्रतीयतइतिनानर्थक्यमितिभामतीकल्प

प्र० तर्वोरयंश्लोकोव्याख्यातः । स्यात्पदेनानेकांतद्योतनेकिंलब्धमित्यतस्स्यादस्तीतिवाक्यार्थंनिष्कृष्याह ॥ **एवंचेति** ॥ "एतच्चोपलक्षणं । नित्यत्वानित्यत्वभिन्नत्वाभिन्नत्वादिरूपेणानेकांतवादोऽवगंतव्य"इतिसुधोक्तेराह ॥ **एवमिति** ॥ ननुस्यादस्तीत्यादिवाक्यात्सत्त्वमसत्त्वमित्यादिप्रकाराःकथंलब्धाइत्यतस्तद्विवरणपरंतदीयश्लोकंसंवादयति ॥ **तद्विधानेति** ॥ बुद्धिस्थसत्त्वनित्यत्वादिधर्मविधानविवक्षायांस्यादस्तीतिगतिःप्रयोगोभवेदित्यर्थः । तन्निषेधे सत्त्वादिनिषेधे । असत्त्वादिप्रकारेविवक्षितइत्यर्थः । इत्यादीत्यादिपदेन "क्रमेणोभयवांछायांप्रयोगस्समुदायभाक् । युगपत्तद्विवक्षायांस्यादवाच्यमशक्तितः । आद्यावाच्यविवक्षायांपंचमोभंगइष्यते । अंत्यावाच्यविवक्षायांषष्ठभंगस

एवंचसत्त्वमसत्त्वंसदसत्त्वंसदसद्विलक्षणत्वंसत्त्वेसतितद्विलक्षणत्वमसत्त्वेसतितद्विलक्षणत्वंसदसत्त्वेसतितद्विलक्षणत्वमित्यनियतसप्तप्रकारंविश्वं । एवंनित्यत्वभिन्नत्वादावपिसप्तप्रकाराऊह्याः । उक्तंहि "तद्विधानविवक्षायांस्यादस्तीतिगतिर्भवेत् । स्यान्नास्तीतिप्रयोगस्स्यात्तन्निषेधेविवक्षित"इत्यादि ।

प्र० मुद्भवः । समुच्चयेनयुक्तश्चसप्तमोभंगइष्यत"इतिकल्पतरूदाहृतसार्धश्लोकौग्राह्यौ । अस्यार्थः । आद्यःसत्त्वैकांतवादःसांख्यादिभिरंगीकृतः । तद्विधिविवक्षायांस्यादस्तीतिप्रयोगः । शून्यवाद्यभिमतेतन्निषेधरूपासत्त्वप्रकारेविवक्षितेसतिस्यान्नास्तीतिप्रयोगः । मध्येसत्त्वंप्रागूर्ध्वंप्रागभावध्वंसकालेऽसत्त्वमितिक्रमेणोभयंसदसत्त्वंवैशेषिकादिभिरंगीकृतमितितद्वांछायांस्यादस्तिस्यान्नास्तीतिसमुदायप्रयोगः । युगपदेकदासदसत्त्वविवक्षायामशक्तितोशक्यत्वादवाच्यमनिर्वचनीयंस्यात् । सदसद्विलक्षणमितिस्यात् । स्यादवक्तव्यमितिप्रयोगस्स्यादित्यर्थः । आद्या

प्र० वाच्येतिसत्त्वतद्वैलक्षण्यविवक्षायांस्यादस्तिचावक्तव्यंचेतिपक्ष:पंचमइत्यर्थः । अंत्यावाच्येत्यसत्त्वतद्वैलक्षण्यविवक्षायांस्यान्नास्तिचावक्तव्यंचेतिपक्षःषष्ठभंगइत्यर्थः । समुच्चयेन सत्त्वासत्त्वयोस्तद्वैलक्षण्ययोश्चसमुच्चयेन सदसत्त्वेसतिसदसद्विलक्षणत्वमित्येवंरूपेणयुक्तइत्यर्थः । स्यादस्तिचनास्तीतिचावक्तव्यंचेतिपक्षस्सप्तमभंगइति कुतष्टीकायांनोक्तइत्यतआह ॥ टीकायांत्विति ॥ श्लोकार्थस्सुधायांव्यक्तः ॥ तृती

टीकायांतु "आहक्षपणकोविश्वंसदसद्द्वयमद्वयं । द्वयाद्वयमतत्सर्वंसप्तभंगिसनातन"मित्यनुव्याख्यानानुसारेणसंक्षिप्योक्तं । अत्राद्यतृतीयसूत्रयोरस्माकंपरेषांच प्रमेयेयोजनायांचाविरोधः । यत्तूक्तंपरैः यथैकस्मिन्सप्तभंग्यसंभव एवमात्मनोदेहपरिमाणत्वे अकात्स्न्यं परिच्छिन्नत्वंस्यात् । ततश्चानित्यत्वंस्यादितिद्वितीयार्थ इति तन्न । ममप्रतइवसूत्रेजैनमतप्रसंगसन्निधापितदेहपरिमाणत्वरूपापादकसूचनाभावेनन्यूनत्वात् । जैनमतप्रसंगसन्निधापितत्वादेवंशब्देनदेहपरिमाणत्वपरामर्शोऽयुक्तः । देहपरिमाणत्वेनैवानित्यत्वापादनसंभवेनमध्यआत्माकात्स्न्यापादन

प्र० येति ॥ "नचपर्यायादपी"त्यादिसूत्रइत्यर्थः । परेषामित्युपलक्षणं । केषांचिदपीत्यपिध्येयं । "एवंचात्माकात्स्न्यं"मितिद्वितीयसूत्रार्थंनिराह ॥ यत्त्विति ॥ कैश्चित्तु एवंशब्दस्यास्मद्रीत्यैवार्थमुपेत्यजीवस्यकायपरिमाणत्वेहस्त्यादिशरीरेस्थितस्यात्मनःपिपीलिकाशरीरेप्रविशतो

प्र० त्पदेशव्यापित्वेनाकात्स्र्न्यमपूर्णतास्यादित्यर्थउक्तइतिपरैरित्युक्तं ॥ **वैयर्थ्याच्चेति** ॥ पूर्वोक्तदूषणस्यैवंशब्देनदृष्टांतीकरणेप्रयोजनाभावाच्चेत्यपिध्येयं । केषांचिन्मतेतु अण्वादिशरीरस्थस्यहस्त्यादिशरीरेऽकात्स्न्र्यमित्यस्मद्भाष्योक्तएवार्थस्स्वरसोनतुतद्भाष्योक्तार्थः । त्वदुक्तार्थपक्षेऽस्मद्भाष्यटीकोक्तरीत्याऽतिरेकस्स्यादित्यापादनंस्वरसं । नत्वकात्स्न्र्यापादनमितिदूषणंबोध्यं । मतद्वयेपि "अंत्यावस्थितेरुभयनित्यत्वादविशेष"इतिप्रथमांतसूत्रपाठः । नत्वस्मन्मतइवपंचम्यंतः । अंत्यस्य मोक्षावस्थापरिमाणस्य । अवस्थितेः अवस्थितत्वात् । जीवस्यकायपरिमाण

वैयर्थ्याच्च । यच्चोक्तंमोक्षस्थस्यांत्यपरिमाणस्यनित्यत्वआदिमध्यपरिमाणयोरपिनित्यत्वप्रसंगादितिवाआदिमध्यावस्थयोरंत्यपरिमाणस्यस्थितिप्रसंगादितिवा चतुर्थ "उभयनित्यत्वा"दित्यस्यार्थइति तन्न । संसारस्यानादित्वेनपरिमाणस्यावस्थायावाऽऽदित्वायोगात् । आद्याभावेमध्यमत्वस्याप्ययोगाच्च । द्वितीयपक्षेनित्यपदस्यस्थितिलक्षकत्वापाताच्च । तस्माट्टीकोक्तरीत्योभयशब्दोदेहात्मपरः ॥ ७ ॥ नैकस्मिन्नधिकरणं ॥ १० ॥

प्र० पक्षेमुक्तौकायांतरप्रवेशाभावेनतत्रत्यपरिमाणस्यतन्मतेनित्यत्वात्तद्दृष्टांतेनोभयोराद्यमध्यमकालीनयोरपिपरिमाणयोर्नित्यत्वप्रसंगादविशेषप्रसंगः । सर्वशरीरेष्वेकरूपत्वमेवस्यादित्यादिरर्थःपरैरुक्तः । तत्रदूष्यांशमनूद्यदूषयति ॥ **यच्चोक्तमिति** ॥ परैरित्यनुषंगः ॥ **देहात्मपर इति** ॥ एतेन उभयनित्यत्वात् जीवपरिमाणयोरुभयोर्नित्यत्वादितिकेषांचिदर्थोप्यसमंजसइतिसूचितं । "अंत्यावस्थिते"रितिपूर्वत्रपरिमाणमात्रनित्यत्वस्यैवप्रस्तुतत्वेनजीवनित्यत्वस्याप्रसक्तेरित्यादेरितिभावः ॥ ७ ॥ **नैकस्मिन्नधिकरणं** ॥ १० ॥

प्र० ॥ ॐपत्युरसामंजस्यात्ॐ ॥ ब्रह्मतोप्याधिक्यभ्रांतिनिरासायार्थांतरंचदर्शयति ॥ सुधायांत्विति ॥ "ननुविष्णावप्येतेदोषाःप्रसरंत्ये वेतिकारणत्वानुपपत्तिरित्याशंकांसूत्रकृतानिरस्तामपिपुनःप्रमाणविशेषैःपरिहरती"त्यादिटीकांव्यनक्ति ॥ एतेचेत्यादिना ॥ उत्तरेति ॥

॥ ॐपत्युरसामंजस्यात्ॐ ॥ [१०४।२२]पंचममुखछेत्रइति ॥ सुधायांतुव्यत्ययमाश्रित्यब्रह्मद्विषांशरवेहिंसकाये तिव्याख्यातं । दक्षप्रजापतिद्विषइतिवाद्रष्टव्यं । एषशब्दस्य आ ईशइतिविग्रहः । शकारस्यचव्यत्ययेनष कारइत्यभिप्रेत्याह ॥ [१०४।२३]आंसमंतादीशस्येति ॥ सुधायांत्विच्छारूपस्येतिव्याख्यातं ॥ इतिचनं[१०५।११]जगत्का रणत्वमिति ॥ इतिहेतोश्चनकारणत्वमित्यर्थः । एतेचसंबंधानुपपत्त्यादयोदोषाःशिवस्यानुमानेनशैवाग मैश्चकारणत्वपक्षआपाद्यंते । स्वमतेतु "आत्मनिचैवंविचित्राश्चहि । सर्वोपेताचतद्दर्शनात् । विकरणत्वान्नेति चेत्तदुक्तं"इत्यादिसूत्रेषुश्रुतिबलादेवैतेदोषाउद्धृताः । शिवस्यतुनश्रुतिभिर्जगत्कारणत्वं । सर्वश्रुतीनांविष्णा वेवसमन्वयस्योक्तत्वात् । उत्तराधिकरणेप्येतदनुसंधेयं । अत्रयदुक्तमन्यैः ईश्वरःकर्तैव नतूपादानमि तिवदतांतार्किकसेश्वरसांख्ययोगमाहेश्वराणांमतमत्रनिरस्यतइति तन्न । केवलकर्तृत्वमेवश्रुतिसूत्रसंमतमि

प्र० "नचकर्तुःकरण"मित्यादिदोषनिरासायस्वमतेत्वित्यादिनोक्तमनुसंधेयमित्यर्थः ॥ अन्यैरिति ॥ ईश्वरःकर्तैवनतूपादानमितिवदतांनिरास इतिमतांतरेपिसमंयद्यपि । तथापिकापालकालामुखपाशुपतशैवभेदभिन्नचतुर्विधमाहेश्वरमतमात्रनिरासोपगमादन्यैरित्येवोक्तं । तथाचके

प्र० वलेतिवक्ष्यमाणोदोषस्तन्मतेपिध्येयः ॥ उक्तत्वादिति ॥ प्रकृत्यधिकरणारंभणाधिकरणादावित्यर्थः । इहापिनिरस्यतामित्यतआह ॥ नचेति ॥ किंचेतिचार्थः । अन्यमतेदोषांतरमाह ॥ तार्किकेति ॥ पाशुपतमतमेवेति ॥ एतेन "पाशुपतपक्षंनिराकरोती"तिभाष्यं समर्थितंज्ञेयं ॥ यच्चोक्तमिति ॥ अन्यैरित्यस्ति । पत्युरीश्वरस्येतिव्यक्तं । कैश्चित्पत्युः पशुपतेः मतंनादरणीयं । अन्योन्यव्याघातेन

त्युक्तत्वात् । किंच उपादाननिमित्तभेदःप्रकृत्यधिकरणेनिरस्तः । नचेहतद्भेदेदोषःसूत्रउक्तः । प्रत्युतहेयजगदुपादानत्वए वेश्वरस्यासामंजस्यं । तार्किकमतंशास्त्रयोनिसूत्रेसामान्येन "महद्दीर्घवद्वे"त्यत्रविशिष्यचनिरस्तं । योगमतंतु "एतेनयो गःप्रत्युक्त"इत्यत्रविशिष्यनिरस्तं । सेश्वरसांख्यमतंतुसांख्यपरीक्षायांनिरस्तमितीहपरिशेषात्पाशुपतमतमेवनिरस्यमितिव रं । यच्चोक्तमाद्यसूत्रे "असामंजस्या"दित्यस्यहीनमध्योत्तमभावेनप्राणिनिर्माणादीश्वरस्यरागद्वेषाख्यदोषप्रसंगादित्यर्थइति तन्न । "नोपादेयंमतंह्यस्यदेवस्यस्तुहिगर्तगं । उत्क्षिपेषशिरस्तस्यगृणीषेसत्वतिंपदं । यद्विष्णोरुपमंहंतुंरुद्रमाकृष्यतेमया । धनुर्यैकामयेतंतमुग्रंमाशिश्नदेवताः । घ्नन्शिश्नदेवानेकोसावासीन्नारायणःपरः । तस्माद्रुद्रःसंप्रसादश्चाभूतांवैष्णवंमखं । यज्ञेनयज्ञमयजंताबध्नन्पुरुषंपशुं । योभूतानामधिपतीरुद्रस्तंतिचरोवृषा । इत्यादिश्रुतिसामर्थ्यात्पारतंत्र्यंजनिर्मृतिः । परा धीनपदप्राप्तिरज्ञत्वंप्रलयेभवः ।" इत्यनुव्याख्यानोक्तरीत्या पारतंत्र्यादिरूपास्वव्याघातकसिद्धरूपदृढहेतुपरत्वेसंभवति

प्र० नारायणजगत्कारणत्वबोधकवेदविरोधेनचासामंजस्यादित्यर्थउक्तः । एतन्मते पूर्वस्मात् "ने"त्यनुवृत्तावप्यनैकाध्याहारदोषस्स्पष्टइत्युपे क्ष्यान्यमतएवदोषमाह ॥ तन्नेत्यादिना ॥ अनुव्याख्यानार्थस्सुधायांव्यक्तः ॥ सिद्धरूपेति ॥ त्वदुक्तरागादिदोषस्यापाद्यत्वेनासिद्धत्वमि

प्र० तिभावः ॥ **स्वव्याघातकेति** ॥ ब्रह्मवादिनोप्यस्यदोषस्यसाम्यादितिभावः ॥ **श्रुत्यनुसारेणेति** ॥ "सोकामयत । बहुःस्यांप्रजायेयेति । तदात्मानꣳस्वयमकुरुते"त्यादिश्रुत्यनुसारेणेत्यर्थः ॥ **जीवभ्रांतीति** ॥ निर्विशेषशुद्धस्याकल्पकत्वादात्मनैवकल्पितत्वआत्माश्रयाज्जीवभ्रांतिकल्पितत्वेनेत्युक्तं । "संबंधानुपपत्तेश्चे"तिसूत्रार्थमन्यमतेऽनूद्यनिराह ॥ **यच्चोक्तमिति** ॥ अन्यैरित्यस्ति । केषांचिन्मतेनास्त्येवेदंसूत्रं ।

स्वव्याघातकप्रसंगरूपाद्दृढहेतुपरत्वायोगात् । ननु मममतेश्रुत्यनुसारेणकर्मसापेक्षत्वादीश्वरस्यरागाद्यप्रसंगइतिनस्वव्याघातः । परस्यापितथाचेच्छ्रुत्यनुसारेणोपादानतापिस्यादितिचेन्न । त्वन्मतेपिविशिष्टचिद्रूपस्येश्वरस्यजीवभ्रांतिकल्पितत्वेनजीवकर्मापेक्षायोगात् । यच्चोक्तंसर्वगतत्वान्निरवयवत्वाच्चेश्वरस्यप्रधानादिनासहसंयोगस्याश्रयाश्रयिभावाभावेनसमवायस्यचायोगान्नतदधिष्ठातृत्वं । ममत्वनिर्वाच्यस्तादात्म्यलक्षणःसंबंधोस्तीतिद्वितीयार्थइति तन्न । सर्वज्ञस्येश्वरस्यस्वस्मिञ्जगत्तादात्म्यभ्रमाभावात् । ["अधिष्ठानानुपपत्ते"रित्युत्तरसूत्रएवस्वप्रधानस्याधिष्ठेयत्वाभावसाधकानामप्रत्यक्षत्वादीनामिवासंबंधत्वस्यापिविवक्षितुंशक्यत्वेनैतत्सूत्रवैयर्थ्यात् । तादात्म्यसंबंधेनाधिष्ठानत्वस्यक्वाप्यदृष्टेश्च । सर्वज्ञस्येश्वरस्यस्वस्मिञ्जगत्तादात्म्यभ्रमाभावाच्च । यच्चोक्तमप्रत्यक्षत्वात्प्रधानपरमाण्वादेरीश्वरस्यतदधिष्ठातृत्वानुपपत्तेरिතितृतीयार्थइति तन्न ।

प्र० नतदधिष्ठातृत्वं नप्रधानाद्यधिष्ठातृत्वमित्यर्थः ॥ **सर्वज्ञस्येति** ॥ "सर्वज्ञस्यभ्रांतत्वायोगा"दितिनप्रयोजनाधिकरणभामत्युक्तेरितिभावः । "अधिष्ठानानुपपत्तेश्चे"तिसूत्रार्थंपरमतेऽनूद्यनिराह ॥ **यच्चोक्तमिति** ॥ केषांचिन्मतेत्वशरीरस्येश्वरस्यप्रधानाद्यधिष्ठानानुपपत्तेरित्यर्थः

प्र० ॥ कर्तृत्वेति ॥ अधिष्ठातृत्वकर्तृत्वयोरेकत्वेनसाध्याविशिष्टतादोषापत्तेरितिभावः ॥ चतुर्थइति ॥ "करणवच्चेन्नभोगादिभ्य" इत्यत्र । अतएवेत्युक्तंव्यनक्ति ॥ ईश्वरंप्रतीति ॥ स्वमतेकरणशब्दस्यशरीरपरत्वमुपपादयति ॥ ममत्विति ॥ एतेन "जीवस्यकरणकलेवराद्य धिष्ठानमशरीरस्यैवदृश्यते । तद्वदीशस्याशरीरस्यापिप्रधानाद्यधिष्ठानंस्या" दितिकेषांचिदर्थोपिप्रत्युक्तः । पत्युरेवप्रकृतस्यप्रधानादिकंकरण

कर्तृत्वानुपपत्तेःसाध्यत्वेनहेतूकरणायोगात् । परमाण्वादेरीश्वरंप्रतिप्रत्यक्षत्वाच्च । अतएवयदुक्तं यथाह्यप्रत्यक्षंचक्षु रादिकरणंजीवोधितिष्ठत्येवमीश्वरोप्रत्यक्षंप्रधानादीतिचतुर्थेशंकाभागार्थइति तन्निरस्तं । ईश्वरंप्रतिप्रधानादेरप्रत्य क्षत्वाभावेनशंकानुदयात् । ममत्वात्मनस्तत्तत्कार्यजननेशरीरस्यसहकारित्वात्तत्रकरणशब्दोयुक्तः । यच्चोक्तमीश्वरो जीवादीनियत्तयापरिच्छिनत्तिनवा । आद्येतेषांपरिमितत्वरूपमंतवत्त्वंस्यात् । तथाचतेषांसर्वेषांमुक्तौशून्यवादापातः । जडस्यापिजीवार्थमेवसृष्टेः । अंत्ये ईश्वरस्यासार्वज्ञमितिपंचमार्थइति तन्न । सर्वमुक्तावपिचेतनानांजडानांच नित्यानांसत्त्वेनशून्यवादाप्रसंगात् । कार्याभावस्यचेष्टत्वात् । तवमतएवकल्पितस्यचिन्मात्रादन्यस्येश्वरादेःकाला देर्वेदादेःकर्मसृष्टिप्रलयादिप्रवाहस्यचकदाचिन्निःशेषनिवृत्त्यवश्यंभावेनशून्यवादापातात् । जीवादीनामसंख्यत्वेना

प्र० वदित्यन्वयसंभवेऽप्रकृतजीवाद्यनेकाध्याहारायोगादिति । "अंतवत्त्वमसर्वज्ञतावे" त्यस्यपरभाष्योक्तार्थमनूद्यप्रत्याह ॥ यच्चोक्तमिति ॥ जडसृष्टिसंभवात्कुतश्शून्यवादइत्यतआह ॥ जडस्यापीति ॥ चेतनानामिति ॥ त्वन्मतइवतन्मतेब्रह्मैक्याभावादितिभावः ॥

प्र० अविद्यमानायाइति ॥ अतएवभामत्यां "यस्यत्वंतएवनास्तितस्यतदग्रहणंनासर्वज्ञतामावहती"त्युक्तमितिभावः ॥ द्रव्यत्वादिनेति ॥ संख्यान्यत्वेसतिप्रमेयत्वमादिपदार्थः । ससंख्यत्वं संख्याविशेषवत्त्वमित्यर्थः ॥ स्वव्याघातकत्वाच्चेति ॥ संख्यावत्त्वेनांतवत्त्वसाधनस्येति भावः । नन्वेतदाशंक्यभामत्यामेव "अस्माकंचागमगम्यस्यैतद्बाधितविषयतयानुमानंभविष्यती"तिसमाहितं । कल्पतरौच "ननु ब्रह्म प्यंतवत् । एकत्वादेकघटवदितिकिंनस्यादतआह अस्माकंचेती"त्यवतारितमितिचेन्न । त्वन्मतेप्यवेद्यत्वरूपस्वप्रकाशत्वस्यब्रह्मणोंगीकारेण तस्यागमावेद्यत्वादितिभावः । केचित्तु बहुजीववादेपरमाणुप्रदेशेपिह्यनंताःप्राणिराशयइत्यादिप्रमाणबलेनजीवासंख्यत्वस्यत्वयापिवाच्यत्वेन विद्यमानायाइयत्तायाअज्ञानेसार्वज्ञाहानेश्च । नचद्रव्यत्वादिनाजीवानांससंख्यत्वंसाध्यमितिभामत्युक्तंयुक्तं । परमाण्वादौघटादौचव्यभिचारादप्रयोजकत्वात्स्वव्याघातकत्वाच्च । ममरीत्यांतवत्त्वस्याद्यसूत्रप्रकृतेश्वरधर्मिकत्वे "असर्वज्ञतावे"तिवैकल्पिकेनासर्वज्ञत्वेनसामानाधिकरण्येचसंभवति जीवादीनामितिधर्म्यध्याहारस्यवैयधिकरण्यस्यचायोगाच्च ॥ पत्युरधिकरणं ११

प्र० द्रव्यत्वादिनासंख्याविशेषवत्त्वानुमानंस्वव्याघातकमित्याहुः ॥ ममरीत्येति ॥ एतेन पूर्वत्र "भोगादिभ्य"इत्यनेनेश्वरस्यकर्मफलभोगप्रसंगउक्तः । ईश्वरस्यपुण्यपापरूपकर्मवत्त्वेंगीक्रियमाणेजीववत्सृष्टिसंहारास्पदत्वरूपांतवत्त्वमसर्वज्ञताचापद्यतइतिवाशब्दस्यचार्थत्वमुपेत्यां तवत्त्वासर्वज्ञतयोरीश्वरेसामानाधिकरण्यंवदतांकेषांचित्सूत्रार्थोपिप्रत्युक्तः । वाशब्देचशब्दार्थत्वस्यास्वारस्यात् । अतएव "वैकल्पिकेने"त्युक्तं । अंतवत्त्वादित्येवपूर्तौविशिष्यासर्वज्ञताग्रहणेप्रयोजनाभावाच्च । आपादकस्याध्याहार्यत्वाच्चेति । मन्मतेतु पत्युःकरणवत्त्वेइत्यापादकं प्रकृतं ॥ छ ॥ पत्युरधिकरणं ॥ ११ ॥

प्र० ॥ ॐउत्पत्त्यसंभवात्ॐ ॥ अन्येत्विति ॥ केषांचिन्मतमग्रेनिरसिष्यते । वासुदेवात् वासुदेवनामकपरमात्मनस्सकाशादित्यर्थः । तत्रहि वासुदेवात्संकर्षणोनामजीवः संकर्षणात्प्रद्युम्नोनाममनः प्रद्युम्नादनिरुद्धोनामाहंकारोजायतइत्युच्यते । तत्रवासुदेवोभगवान् । संकर्षणादयस्तुयथाक्रमंजीवमनोहंकाराइत्युभाभ्यामर्थउक्तः । तत्रोपयुक्तांशमनूद्यतन्निरासार्थत्वेनाद्यसूत्रार्थमनुवदति ॥ तन्नेति ॥ अकृता

॥ ॐउत्पत्त्यसंभवात्ॐ ॥ अन्येतु पंचरात्रेयदुच्यतेवासुदेवात्संकर्षणनामाजीवोजायतइति तन्न । जीवानादित्वस्यश्रुत्यादिसिद्धत्वेनकृतहानाकृताभ्यागमादिप्रसंगेनचजीवोत्पत्त्यसंभवादित्याद्येनोक्त्वा यच्चोच्यतेसंकर्षणाख्याज्जीवात्प्रद्युम्नोनाममनोजायतइति तदपिन । नहिकर्तुःकरणमुत्पद्यमानंदृश्यते । कर्ताचजीवःकरणंचमनइतिद्वितीयेनोक्त्वा अथसंकर्षणादयोनजीवरूपाः । किंतुपरमात्मरूपाएवेतितेषामपितद्वदेवज्ञानैश्वर्यादिसद्भावइतिमतं । तथाप्युत्पत्त्यसंभवस्याप्रतिषेधएव । सर्वेषांभगवद्रूपत्वेनातिशयाभावात् । भवितव्यंहिकार्यकारणयोरतिशयेनेतितृतीयेनोक्त्वा परस्परंवेदेनचविप्रतिषेधश्चास्मिन्शास्त्रेदृश्यते । ज्ञानैश्वर्यादीनांक्वचिद्गुणत्वोक्तेःक्वचिच्चस्वरूपत्वोक्तेः । चतुर्वेदेषुपरंश्रेयोऽलब्ध्वाशांडिल्यइदंशास्त्रमधीतवानित्यादिवेदनिंदादर्शनाच्चेतिचतुर्थेनोक्तं । तथाचपंचरात्राप्रामाण्यप्रतिपादकमिदमधिकरणमित्याहुः । तन्न ।

प्र०भ्यागमादीत्यादिपदेन "नात्माश्रुतेर्नित्यत्वाच्चताभ्य"इतिजीवोत्पत्तिनिरासकसूत्रविरोधोग्राह्यः । "नचकर्तुःकरण"मितिसूत्रार्थमनुवदति ॥ यच्चेति ॥ "विज्ञानादिभावेवातदप्रतिषेध"इतिसूत्रार्थमनुवदति ॥ अथेति ॥ अस्तुभगवद्रूपयोरपिजन्यजनकभावः । येनोत्पत्त्यसंभवोपरिहृतस्स्यादित्यतआह ॥ सर्वेषामिति ॥ "विप्रतिषेधाच्चे"तिसूत्रार्थमन्वाह ॥ परस्परमिति ॥ तद्व्यनक्ति ॥ ज्ञानेति ॥ श्रेयः

प्र० अलब्ध्वेतिपदच्छेदः । छांदोग्यवाक्यमाह ॥ ऋग्वेदइति ॥ वाक्यांतरमाह ॥ इतिहासेति ॥ पंचरात्रस्यश्लोकत्वमितिहासत्वंचवाक्य द्वयेनक्रमाद्व्यनक्ति ॥ कृतमिति ॥ पंचरात्रस्यमुक्तिहेतुपरब्रह्मज्ञानोपायत्वेस्मृतिमाह ॥ वेदेनेति ॥ वेदादितौल्येनशास्त्रत्वेस्मृतिमाह

"ऋग्वेदोयजुर्वेदःसामवेदोथर्वांगिरसइतिहासःपुराणंविद्याउपनिषदःश्लोका"इतिश्रुत्या "इतिहासपुराणःपंचमोवेदानांवेद"इत्यादिश्रुत्याचविरोधात् । "कृतंशतसहस्रंहिश्लोकानांहितमुत्तम"मितिभारतेपंचरात्रस्यनिरुपपदश्लोकशब्देनोक्तेः "भारतंपंचरात्रंचमूलरामायणंतथा । इतिहासइतिप्रोक्तंब्राह्माद्यंतुपुराणकं"इतिपाद्मेपंचरात्रस्येतिहासत्वोक्तेः "वेदेनपंचरात्रेणभक्त्यायज्ञेनचैवहि । दृश्योहंनान्यथादृश्योवर्षकोटिशतैरपि"इतिवाराहोक्तेः "ऋग्यजुस्सामाथर्वाश्चभारतंपंचरात्रकं । मूलरामायणंचैवशास्त्रमित्यभिधीयते । यच्चानुकूलमेतस्यतच्चशास्त्रंप्रकीर्तितं । अतोन्योग्रंथविस्तारोनैवशास्त्रंकुवर्त्मत"दितिचस्कांदोक्तेः "ऋगाद्याभारतंचैवपंचरात्रमथाखिलं । मूलरामायणंचैवपुराणंचैतदात्मकं । येचानुयायिनस्तेषांसर्वेतेचसदागमाः । दुरागमास्तदन्येयेतैर्नज्ञेयोजनार्दन"इतिचब्रह्मांडेनोक्तेः "वेदार्थपूरकंज्ञेयंपंचरात्रंयतोखिलं । तत्संक्षेपश्चगीतेयंतस्मान्नास्याःसमंक्वचि"दितिचब्रह्मवैवर्तोक्तेः

प्र० ॥ ऋग्यजुरिति ॥ सच्छास्त्रत्वेप्रमाणांतरंपठति ॥ ऋगाद्याइति ॥ वेदोपबृंहकत्वेस्मृतिमाह ॥ वेदेति ॥ एतेनपंचमवेदत्वमस्योपपादितंबोध्यं । यद्वाकृत्स्नपंचरात्रस्याप्युपादेयत्वेस्मृत्युक्तिरियं । एतेन "चतुर्वेदेष्वि"तिपरोक्तंवाक्यंवेदार्थपूरकत्वपरंपंचरात्रस्य । "यदिवि

प्र० द्याच्चतुर्वेदानितिवद्वेदपूरणं । पंचरात्रादितिकुतोद्वेषश्शांडिल्यवर्तन"इत्यनुव्याख्यानोक्तेरिति । एताश्चस्मृतयस्तत्रतत्रभाष्यतत्वनिर्णयादि ग्रंथेष्वाचार्योदाहृता: । कृत्स्नप्रामाण्येवाक्यांतरंपठति ॥ भारतइति ॥ ज्ञानानि ज्ञानजनकानि ॥ विस्तृतंचैतदिति ॥ सांख्यंयोग इत्यादिनोक्तं । शास्त्रयोनिसूत्रभाष्यादावितिपाठस्साधुः । यद्वा "एषमोहंसृजामी"त्यादिनापाशुपताद्यप्रामाण्यवैष्णवग्रंथप्रामाण्यादेरुक्त्या

भारते "सांख्यंयोगःपाशुपतंवेदारण्यकमेवच । ज्ञानान्येतानिभिन्नानिउताहोनेतिचोच्यता"मितिपृष्टे "सांख्यंयोगःपाशुपतंवेदारण्यकमेवच । ज्ञानान्येतानिभिन्नानिनात्रकार्याविचारणे"तिसांख्यादीनांपरस्परंविरुद्धत्वमुक्त्वा "पंचरात्रस्यकृत्स्नस्यवक्तानारायणःस्वयं । ज्ञानेष्वेतेषुराजेंद्रसर्वेष्वेतद्विशिष्यते । पंचरात्रविदोमुख्यायथाक्रमपरानृप । एकांतभावोपगतावासुदेवंविशंतिते"इतिप्राग्वेदारण्यशब्दोपलक्षितस्यपंचरात्रस्यविशेषोक्त्यार्थात्प्रामाण्योक्तेश्च । विस्तृतंचैतत्प्रथमसूत्रभाष्यादौ । तथा भारतएव "इदंमहोपनिषदं चतुर्वेदसमन्वितं । सांख्ययोगकृतांतेषुपंचरात्रानुशब्दितं । इदंश्रेयइदंब्रह्मइदंहितमनुत्तमं । ऋग्यजुःसामभिर्जुष्टमथर्वांगिरसैस्तथा । भविष्यतिप्रमाणंवैएतदेवानुशासन"मितिसाक्षात्प्रामाण्यवेदमूलत्वयोः

प्र० तदभिप्रायेण "प्रथमसूत्रे"त्यादिपाठः । रामानुजभाष्योक्तंवाक्यंपठति ॥ भारतएवेत्यादिना ॥ सांख्ययोगकृतांतेत्यत्रसांख्ययोगशब्दाभ्यां "ज्ञानयोगेनसांख्यानांकर्मयोगेनयोगिना"मितिगीतोक्तदिशाज्ञानकर्मयोगौग्राह्यौ । तेन "एतेनयोगःप्रत्युक्त"इत्याद्यविरोधः । कृतां

प्र० तेषु सिद्धांतेषु । प्रकारांतरेणप्रामाण्यंवाक्यांतराणिस्वयमुदाहृत्यसाधयति ॥ तथेति ॥ षष्ठ्यंतानां "उक्ते"रितिवक्ष्यमाणेनान्वयः । ननु

तथा "अस्मात्प्रवक्ष्यतेधर्मान्मनुःस्वायंभुवःस्वय"मितिमन्वादिस्मृतीनामपिपंचरात्रमूलकत्वस्य तथा "वेदैश्चतुर्भिःसंमितंकृतंमेरौमहागिरा"वितिसर्वमुनिजनसंकुलेपुण्यदेशेप्रवर्तितत्वस्य तथा "तत्रप्रशासतोराज्यंधर्मेणामित्रघातिनः । नानृतावाक्समभवन्मनोदुष्टंचनाभवत् । संस्थितेतुनृपेतस्मिन्शास्त्रमेतत्सनातनं । अंतर्धास्यतितत्सर्वमेतद्वःकथितंमये"तिसत्कालेप्रवृत्तेर्दुष्कालेतिरोधानस्य तथा "श्रुत्वाब्रह्ममुखाद्रुद्रःसदेव्यैकथयन्पुन"रिति [एकाग्रमनसोदांताऋषयःसमयेरताः । दिव्यवर्षसहस्रांतेसर्वेतेमुनयःसमं । नारायणानुशिष्टाहितदादेवीसरस्वती । विवेशतानृषीन्सर्वाँल्लोकानांहितकाम्यया ।] "ऋषीनुवाचतान्सर्वानदृश्यःपुरुषोत्तमः । कृतंशतसहस्रंहिश्लोकानांहितमुत्तम"मिति "उशनाबृहस्पतिश्चैवयदोत्पन्नौभविष्यतः । तदाप्रवक्ष्यतःशास्त्रंयुष्मन्मतिभिरुद्धृतं । युष्मत्कृतमिदंशास्त्रंप्रजापालोवसुस्ततः । बृहस्पतिसकाशाद्वैप्राप्स्यतिद्विजसत्तमे"त्यादिनाशिष्टपरिग्रहस्य तथा "वक्तानारायणःस्वय"मितिवक्तुर्भ्रांत्याद्यभावस्य "हितकाम्यये"त्यादिनाविप्रलिप्साभावस्यचोक्तेः । एतेनपाशुपतादिप्रतिबंदीनिरस्ता । तेषांश्रुतिस्मृतिषुप्रामाण्याद्यनुक्तेः । प्रत्युततत्प्रतिषेधात् । उक्तंचैतत् "स्मृत्यनवकाशे"त्यत्र । ननूक्तानिश्रुत्यादीन्यविरुद्धविषयाणि । जीवोत्पत्तिस्तुश्रुत्यादि ॥ १२७ ॥

प्र० पाशुपतसांख्यादेरपिसर्वज्ञपशुपत्यादिप्रणीतत्वात्प्रामाण्यंस्यादित्यतआह ॥ एतेनेति ॥ तदेवव्यनक्ति ॥ तेषामिति ॥ "सांख्यंयोगःपां

प्र०चरात्रंवेदाःपाशुपतंतथा । आप्तप्रमाणान्येतानिनहातव्यानिहेतुभि"रित्येतत्तुरामानुजभाष्ये "तत्तदभिहिततत्तत्स्वरूपमंगीकार्य"मित्युक्तरीत्यापाशुपताद्युक्ताविरुद्धप्रमेयांगीकारमात्रपरंवा वेदपंचरात्रंहेतुभिरपिनहातव्यमन्यत्तुस्वभावतएवहेयमित्येवंपरमितिवा मोहनपरंवा नेयमितिभावः । "अविरोधेश्रुतिर्मूल"मितिश्लोकः "विरोधेत्वनपेक्षंस्या"दितिस्मृतिपादीयद्वितीयाधिकरणपूर्वपक्षवार्तिकश्लोकः । कंठेत्यादितु

विरुद्धा । अतएवसांकरभाष्येपिवासुदेवतदाराधनादावन्यत्रसर्वत्रपंचरात्रप्रामाण्यमुपेत्यवेदविरुद्धजीवोत्पत्त्यादावेवाप्रामाण्यमुक्तमिति । तन्न । "अविरोधेश्रुतिर्मूलंनमूलांतरसंभवः । विरोधेत्वन्यमूलत्वमितिस्यादर्धवैशसं । कठमैत्रायणीयादिपठितश्रुतिमूलिकाः । दृश्यंतेस्मृतयःसर्वाय[थो]दोपनयनादिषु[काः] । तदातन्मध्यपात्येकंवाक्यंकिंचिदपश्रुति । मूलांतरोद्भवंवक्तुंजिह्वानोनप्रवर्तत"इतिभाट्टोक्तेस्तन्मतानुसारिणात्वयाप्यन्यत्रसर्वत्रश्रुतिसंवादिन्याःश्रुतिस्मृतिपरिगृहीतायाश्चपंचरात्रस्मृतेःश्रुतिविरुद्धांशेगौणार्थत्वस्यैववक्तव्यत्वेनाप्रामाण्योक्त्ययोगात् । उक्तंचकल्पतरावपि "बुद्धिपूर्वकृतिःपंचरात्रंनिश्वसितंश्रुतिः । तेनजीवजनिस्तत्रसिद्धागौणीनियम्यते"इति । नचेदमेवाप्रामाण्यं । "गौण्यसंभवा"दित्यादौश्रुतेरपिश्रुत्यंतरविरोधेनगौणार्थताया

प्र० "दर्शनाचे"त्यत्रत्यवार्तिकं । उपनयनादिषु विषये । तत्प्रतिपादकाइतियावत् ॥ तन्मध्यपातीति ॥ उपनयनादिबोधकमन्वादिस्मृतिमध्यपातीत्यर्थः । अपश्रुति अनुपलभ्यमानमूलश्रुत्युपेतमित्यर्थः । भाष्यभामत्योरुक्तमप्रामाण्यमरोचमानः "सिद्धांतस्त्वि"त्यादिनाप्रमेयं संजग्राह । तंश्लोकंपठति ॥ बुद्धिपूर्वेति ॥ व्याख्यातंच "अतःप्रमाणावधृतेविषयेगौणंतद्वचनं । नतुभ्रांत"मिति । श्रुतौभूतशब्दस्यज

प्र० डपरत्वमाशंक्याह ॥ नह्यचेतनस्येति ॥ आद्यसूत्रेक्तहान्यादिर्योदोषउक्तस्सतवैव नतुगौणोत्पत्तिपक्षइत्याह ॥ अविद्येति ॥ द्विती

वक्ष्यमाणत्वात् । किंच "यतोवाइमानिभूतानिजायंते । येनजातानिजीवंति । विज्ञानघनएतेभ्योभूतेभ्यःसमु त्थायतान्येवानुविनश्यति । यथाग्नेःक्षुद्राविस्फुलिंगाव्युच्चरंत्येवमेवास्मादात्मनःसर्वेप्राणाःसर्वएवात्मानोव्युच्च रंती"तिजीवोत्पत्त्यादिश्रूयते । नह्यचेतनस्यजीवनादियुक्तं । श्रुतिर्देहयोगादिपराचेत्पंचरात्रमपितथास्तु । श्रु तिष्विवपंचरात्रेपि "अनादिकर्मणाबद्धोजीवःसंसारमंडले । सह्यनादिरनंतश्चपरमार्थेननिश्चित"इत्यादौजीवनि त्यतोक्तेः । प्रत्युतपरपक्षएवविशिष्टरूपोजीवोननित्यः । जीवशब्दलक्ष्यंशुद्धंनित्यमितिचेज्जीवपदलक्ष्यस्याजी वत्वेनजीवानित्यत्वतादवस्थ्यात् । त्वन्मतेसंसरणस्यदर्पणमालिन्यादिवदनित्यविशिष्टरूपप्रतिबिंबगतत्वेनबंध मोक्षयोर्वैयधिकरण्यादिदोषापत्तेश्च । अविद्यावच्छिन्नचैतन्यरूपस्यवातत्प्रतिबिंबितचैतन्यरूपस्यवा जीवस्या नादित्वेप्यंतःकरणविशिष्टस्याहमर्थस्यप्रतिसर्गप्रतिजागरणंचोत्पत्तेरहमर्थस्यैवचकर्तृत्वांगीकारात्त्वन्मतएवकृत हान्याद्यापाताच्च । एवंजीवान्मनसउत्पत्त्यसंभवदोषोपिपरेषांपक्षएव । तैः "अनेनजीवेनात्मनानुप्रविश्यना मरूपेव्याकरवाणी"त्यादिश्रुत्याब्रह्मणोजीवरूपेणैवमनआदिजगत्स्रष्टृत्वस्यवक्तव्यत्वात् । वस्तुतस्तु "वासुदे वात्संकर्षण"इत्यादिकं "जीवाभिमानिशेषस्यनाम्नासंकर्षणस्यच । वासुदेवाज्जनिःप्रोक्ताप्रद्युम्नस्यततस्तथा ।

प्र० यसूत्रोक्तदोषोपितवैवेत्याह ॥ एवमिति ॥ इत्यादिकमन्यपरमित्यन्वयः । जनिर्देहयोगरूपा । ततः संकर्षणनामकाच्छेषात् । एवंशब्दे

प्र० नप्रद्युम्नादनिरुद्धसंज्ञकोहंकारोजायतइतिगृह्यते । अर्थांतरमप्याह ॥ साक्षादिति ॥ एतदर्थःसुधायांव्यक्तः । यदस्मिन्पक्षेदूषणं "तथा प्युत्पत्त्यसंभवस्याप्रतिषेध"इत्यादि तत्सुधोक्तानुव्याख्यानतात्पर्यविवरणेननिराह ॥ तत्तदिति ॥ सृजेतिवाक्यांतरं । सूत्रास्वारस्यंचाह

मनोभिमानिनःकामस्यैवंसाक्षाद्धरेःक्वचित् । संकर्षणादिनाम्नैवनित्याचिंत्योरुशक्तितः । व्यूहउक्तोन्यथानूद्यकथं दुष्टत्वमुच्यते" । इत्यनुव्याख्यानोक्तरीत्याऽन्यपरं । नतुजीवोत्पत्त्यादिपरं । तत्तद्व्यापारार्थतत्तदधिकार्यु पासनार्थंचाचिंत्यशक्तेर्भगवतःस्वेच्छयादशद्वादशचतुर्विंशत्यादिव्यूहरूपेणेव चतुर्व्यूहरूपेणाप्यवस्थानंयुक्तं । अन्यथा "सएकोभवति सत्रिधाभवती"त्यादिश्रुतिः "सृष्ट्वासंकर्षणंदेवंस्वयमात्मानमात्मना । सृजत्वमात्मना कृष्णप्रद्युम्नंचात्मसंभवं । प्रद्युम्नाच्चानिरुद्धंतंयंप्राहुर्विष्णुमव्ययं । अनिरुद्धोसृजत्सोयंब्रह्माणंलोकधारिण" मित्यादिभारतादिवचनंचाप्रमाणंस्यात् । किंचत्वन्मते "उत्पत्त्यसंभवा"दितिसामान्योक्त्यैवजीवोत्पत्त्यसं भववत्कर्तुःकरणोत्पत्त्यसंभवस्यापिविवक्षितुंशक्यत्वाद्द्वितीयसूत्रवैयर्थ्यं । किंचैवंकर्तुश्चकरणस्येत्येवसूत्रणीयं । "उत्पत्त्यसंभवा"दित्यनेनानुषक्तेनास्यान्वयसंभवात् । यथान्यासपक्षेपिह्युत्पद्यतइत्येतदध्याहार्यं । अध्याहा राच्चानुषंगोज्यायान् । तृतीयेपिमम "विज्ञानादिभाव"इत्यत्रद्वितीयेप्रकृतस्यकर्तुरित्यस्यान्वयः । तवतु संकर्ष णादीनामित्यध्याहारः । तदप्रतिषेधइतिवक्रोक्तिवैयर्थ्यंच । सइत्येतावतैवप्रकृतस्योत्पत्त्यसंभवस्यपरामर्शो

प्र० ॥ किंचेति ॥ द्वितीयसूत्रेति ॥ एतच्चकेषांचिन्मतेपिसमं । किंचैवमित्याद्यपिसममेवेतिबोध्यं । सुधोक्तमेवसमाधिंव्यनक्ति ॥

प्र० ज्ञानादीनामिति ॥ "यदिविद्याच्चतुर्वेदानितिवद्वेदपुराण"मित्याद्यनुभाष्योक्तंसुधोक्तदिशाव्यनक्ति ॥ यदिविद्यादिति ॥ रामानुजभाष्योक्तंसमाध्यंतरमाह ॥ प्रातःप्रातरिति ॥ "नहिनिंदानिंद्यंनिंदितुंप्रवर्तते । अपितुविधेयंस्तोतु"मितिवार्तिकोक्तन्यायेनेत्यर्थः । "अतःपरमपपत्तेः । ममतुतदप्रतिषेधः दूषितत्वेनसन्निहितस्यपाशुपतमतस्याप्रतिषेधः । अनुमतिः । तदंतर्भावइत्यर्थः । किंच उत्पत्त्यसंभवभयात्संकर्षणादीनांजीवत्वंत्यक्त्वापरमात्मत्वंशंकमानेनोत्पत्तिवाक्यस्यप्रादुर्भावाभिप्रायतायाअवश्यंविवक्षितत्वेनतंप्रत्युत्पत्त्यसंभवोक्तिरयुक्ता । चतुर्थोक्तस्तुविप्रतिषेधोसिद्धः । ज्ञानादीनांगुणत्वेपि "एवंधर्मान्पृथक्पश्य"न्नित्यादिश्रुतिभिःस्वरूपत्वात् । अन्यथा "आनंदोब्रह्म आनंदंब्रह्मण"इतिश्रुत्योरपिविप्रतिषेधःस्यात् । शांडिल्यवर्तनेपि "यदिविद्याच्चतुर्वेदान्सांगोपनिषदान्द्विजः । नचेत्पुराणंसंविद्यान्नैवसस्याद्विचक्षण"इत्यादाविवपंचरात्रेणवेदोपबृंहणस्यविवक्षितत्वेनवा "प्रातःप्रातरनृतंतेवदंति पुरोदयाज्जुह्वतियेग्निहोत्र"मित्यादिवन्नहिनिंदान्यायेनपंचरात्रप्राशस्त्यमात्रपरत्वेनवा वेदनिंदायाअभावात् । तथापंचरात्रस्यवेदाविरोधेनविरोधाधिकरणन्यायाविषयत्वात्स्मृत्यधिकरणन्यायेनवेदमूलत्वेनप्रामाण्यमेव । तस्मात् शाक्तपक्षेपक्षपाताद्विद्वेषाद्वैष्णवेमते । महासुरैःपंचरात्रनिरासइहकल्पितः ॥ १ ॥ केचित्तु आद्यसूत्रद्वयेनोक्तरीत्याजीवोत्पत्त्यादिनापंचरात्राप्रामाण्यंपूर्वपक्षयित्वा तृतीयेनसंकर्षणादीनांविज्ञानंचादिचेतिविग्रहेणविज्ञानादिभावे ब्रह्मभावेसति तत्प्रतिपादकशा

प्र० शास्त्रोरुद्वेषादुदितमासुरैः । दूषणंपंचरात्रस्ये"त्याद्यनुव्याख्यानंहृदिनिधायाह ॥ शाक्तपक्षइति ॥ सुधोक्तंविवृण्वन्मतांतरमप्यनूद्यनिराह ॥ केचित्त्विति ॥ चतुर्थेनविप्रतिषेधाच्चेत्यनेन । "अपिवाकर्तृसामान्यात्प्रमाणमनुमानंस्या"दितिस्मृत्यधिकरणसिद्धांतसूत्रेयथातथेत्यर्थः ।

प्र०सुधोक्तानेवदोषानाह ॥ तन्नपरमतेति ॥ ७ ॥ शाक्ताधिकरणं ॥१२॥ इति श्रीमत्सर्वतंत्रस्वतंत्रसुधींद्रगुरुपादशिष्यराघवेंद्रयति

स्त्रस्यप्रामाण्यंनप्रतिषिध्यते । संकर्षणादौजीवादिशब्दास्तुजीवाद्यधिष्ठानकत्वात् । ततश्चजीवोत्पत्त्यादिकमसिद्धमित्युक्त्वा चतुर्थेनचपंचरात्रेजीवोत्पत्तिः "सह्यनादिरनंतश्चे"त्यादिनाप्रतिषिद्धाचेत्युक्त्वाप्रामाण्यंसिद्धांतितं । तृतीयसूत्रस्थेनहिवाशब्देन "अपिवाकर्तृसामान्या"दित्यादिवत्पक्षोविपरिवर्ततइत्याहुः । तन्न । परमतनिरासकेस्मिन्पादेस्वमतसमर्थनस्यासंगतेः । जीवशब्दस्यानभिप्रेतार्थांतरंकल्पयित्वाछलेनसूत्रेपूर्वपक्षोक्त्ययोगाच्च । विज्ञानादिशब्देनब्रह्मोक्तेःक्लिष्टत्वाच्च । किंचैवं "तदप्रतिषेध"इत्यत्रलाघवायस्पष्टत्वायचतत्प्रामाण्यमितिवक्तव्यमिति । टीकार्थस्तु ॥ केषांचिच्छाक्तेयानामिति ॥ आद्यसूत्रनिरस्तमहावामातिरिक्तमध्यमवामानामित्यर्थः ॥ केचिदिति ॥ अणुवामाइत्यर्थः । अत्रपादे आद्यद्वितीयचतुर्थपंचमषष्ठानिहैतुकनिरासकत्वेनैकामहापेटिका । तत्रापिषष्ठंविनाचतुष्टयंसांख्यनिरासकत्वेनैकावांतरापेटिका । तृतीयेनमध्येसमुत्थितस्यचार्वाकस्यनिरासः । सप्तममारभ्यद्वादशपर्यंतंपाषंडनिरासकत्वेनैकामहापेटिका । तत्रापिसप्तमाष्टमनवमदशमान्यवैदिकपाषंडनिरासकत्वेनैकावांतरपेटिका । तत्रापिसप्तमाष्टमनवमानिबौद्धनिरासकत्वेनैकावांतरपेटिका । एकादशद्वादशेतु वैदिकपाषंडनिरासकत्वेनैकापेटिकेतिद्रष्टव्यं ॥ ७ ॥ शाक्ताधिकरणं ॥ १२ ॥ इतिश्रीमद्ब्रह्मण्यतीर्थपूज्यपादानांशिष्येणव्यासयतिनाविरचितायांश्रीमद्भाष्यटीकाविवृतौतात्पर्यचंद्रिकायांद्वितीयाध्यायस्यद्वितीयःपादः ॥ २ ॥ २ ॥

प्र० कृतेचंद्रिकाप्रकाशेद्वितीयाध्यायस्यद्वितीयःपादः ॥

प्र० ॥ श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ ॐप्रागुक्तसंगतिस्मरणायाह ॥ **समयेति** ॥ आद्यसूत्रसूचितांचिंतामाह ॥ **अत्रेति** ॥ "गौणी"तिसूत्रसूचितामाह ॥ **तदर्थंवियदिति** ॥ "अस्तित्वि"त्यादिसूत्रसूचितामाह ॥ **तदर्थमना**

॥ श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ समयाविरोधउक्तः । श्रुत्यविरोधउच्यतेऽस्मिन्पादे ॥ ॐनवियदश्रुतेः ॥ अत्रसमन्वयाध्यायोक्तंविष्णोःसर्वस्रष्टृत्वंवियदनुत्पत्तिश्रुतिविरुद्धंनवेतिचिंता । तदर्थंवियदनादित्वश्रुतिर्मुख्योतगौणीति । तदर्थमनादित्वश्रुतिरनुभवाद्यनुगृहीतत्वेनप्रबलोतनेति ॥ अधि[१०७।७]भूतादिविचारइति ॥ एकैकाधिभूतविचारइत्यर्थः ॥ वि[१०७।७]चारबाहुल्याभिप्रायेणक्रमोल्लंघनमिति ॥ सूचीकटाहन्यायेनवर्तिष्यमाणक्रमानुसारेणाधिभूताधिदैवपरमात्मजीवेतिवक्तव्ये "जीवपरमात्माधिभूताधिदैवेष्वि"तिजीवादिशब्दानांपूर्वनिपातोत्रजीवादिविचारस्यबह्वर्थविषयकत्वेनजिज्ञासुंप्रत्यभ्यर्हितत्वादल्पाच्तरत्वाच्चेत्यर्थः । "अनुभूतियुक्तिबहुवाग्विरोध"इतिन्यायविवरणोक्तपूर्वपक्षयुक्तिंविवृणोति ॥ **न[१०७।१२]ह्यवकाशस्योत्पत्तिरित्यादिना** ॥ अत्रन्यायविवरणे "अवकाशमात्रस्याव्याकृतात्मकत्वादनुत्पत्तिश्रुतीनांतद्विषयत्वं । उत्पत्तिवचनानामसितवर्णभूततदभिमानशरीरविषयत्वंपराधीनविशेषवत्त्वमात्रविषयत्वंवेतिव्यवस्थे"तिसिद्धांतयुक्तिरुक्ता । तांविवृणोति ॥ **[१०७।१२]तथाहीत्यादिना** ॥ नन्वत्राकाशद्वित्वमज्ञात्वा "आत्मनआकाशःसंभूत" इत्यभूत्वाभवनरूपोत्पत्तिश्रुतेः "अनादिर्वाअयमाकाश"इत्यनुभवाद्यनुगृहीतश्रुतिविरोधेनाप्रामाण्येपूर्वपक्षिते द्वावाकाशौ ।

प्र० दित्वेति ॥ अनुभवयुक्त्यनुगृहीतत्वेनेत्यर्थः । स्पष्टःफलफलिभावः । टीकाक्षरार्थमाह ॥ अधिभूतेति ॥ तामिति ॥ पराधीनेत्यादि

प्र० नोक्तांयुक्तिं । पूर्वांशोक्तिस्त्वग्रेतनशंकोत्थानाय ॥ इतिन्यायविवरणोक्तंपक्षांतरमिति ॥ इतिभावेनोक्तमित्यर्थः । "अवकाशमात्रस्ये" त्यादिप्रागुदाहृतमेवन्यायविवरणमुक्तपक्षांतरपरतयापिवाशब्दात्स्पष्टंप्रतीयतइतिटीकायांतथैवकस्मान्नव्याख्यातमित्यर्थः ॥ अतएवेति ॥

तत्रोत्पत्तिश्रुतिर्भूतविषया । अनुत्पत्तिश्रुतिस्त्ववकाशविषया । तस्मान्नविरोधइतिश्रुतिद्वयस्यापिमुख्यार्थत्वेनव्यवस्थेतिन्यायविवरणोक्तंपक्षांतरंटीकायांकस्मान्नोक्तमितिचेत् उच्यते । तथात्वेगुणपूर्तिसिद्धयेजन्मादिसूत्राभिप्रेतस्वेतरसर्वकारणत्वासिद्धिः । अत्राप्याद्यसूत्रस्थवियत्पदस्यसंकोचः । द्वितीयसूत्रेऽनादित्वश्रुतेर्गौणत्वोक्तिविरोधः । "ईशाधीनविशेषेणजन्याइत्येवकीर्तिताः" इत्यनुव्याख्यानविरोधः । षष्ठसूत्रीयभाष्योदाहृतश्रुतिस्थस्य "सइदंसर्वमसृजते" तिसर्वशब्दस्यसंकोचः । "आत्मावाइदमेकएवाग्रआसी" दित्यवधारणादिविरोधः । इत्यनेकदोषप्रसंगान्नोक्तं । अतएवन्यायविवरणेपिपूर्वत्रारुच्या "पराधीनविशेषवत्त्वमात्रविषयत्वंवे" तिपक्षांतरमुक्तं । न्यायविवरणेऽनुत्पत्तिवचनानामव्याकृताकाशविषयत्वोक्तिस्तुतस्यभूताकाशस्येवाभूत्वाभवनरूपोत्पत्तिर्नास्तीत्यभिप्राया ।

प्र०अनेकदोषप्रसंगादेवेत्यर्थः । पूर्वत्र आकाशद्वित्वोपगमेनव्यवस्थापक्षइत्यर्थः । नन्वेवंपराधीनविशेषावाप्तिरूपोत्पत्तेरव्याकृताकाशेपिसंभवात् "अव्याकृताकाशस्ये" त्यादिपूर्वभागोक्तिःकथमित्यतआह ॥ न्यायविवरणइति ॥ प्रकारांतरेणश्रुत्योर्व्यवस्थितत्वंवक्तुंशक्यमित्याक्षिप्यटी

प्र० कोक्तंसमाधत्ते ॥ अत्रयद्यपीत्यादिना मुख्यार्थेत्यादिनेत्यंतेन ॥ इत्यादिवचनादिति ॥ तत्वविवेकवचनादित्यर्थः । सर्वासर्ववि
अत्रयद्यप्यव्याकृताकाशस्यतदभिमानिचित्प्रकृतेश्च "सइदंसर्वमसृजते"त्यादिश्रुत्युक्तोत्पत्तिःपराधीनविशेषावाप्तिरूपा । भू
ताकाशस्यतु "आकाशःसंभूत"इतिश्रुत्युक्ताऽभूत्वाभवनरूपा । एवंचाव्याकृताकाशादेर्ब्रह्मवच्चतुर्विधनाशराहित्यरूपस्य
"स्वयंनित्यःपरात्पर"इत्युत्तराधिकरणभाष्योदाहृतस्मृत्यादिसिद्धस्यपरात्परनित्यत्वरूपस्यमुख्यनित्यत्वस्यासंभवादनादित्व
श्रुतिःस्वरूपानादित्वमात्रेणगौणी । भूताकाशादेस्तुस्वरूपानादित्वस्याप्यसंभवात्सूक्ष्मरूपनित्यत्वादिमात्रेणगौणी । "भूतें
द्रियप्राणगुणसूक्ष्मरूपंतुनित्यक"मित्यादिवचनादित्येवंगौणीतिसूत्रार्थः । अतएव "शब्दाच्चे"तिसूत्रे भाष्योदाहृता "भाग
शोह्युत्पद्यंत"इतिश्रुतिरपि भूताकाशस्यसूक्ष्मरूपेणनित्यत्वमुपचितरूपेणतुसादित्वमित्यभिप्रायासतीप्रकृतोपयोगिनीत्येव
मुत्पत्त्यनुत्पत्तिश्रुत्योर्व्यवस्थावक्तुंशक्या । तथापिसोत्तरसूत्रेऽतिस्पष्टेत्युपेक्ष्यसर्वविषयत्वासर्वविषयत्वाभ्यांतामाह ॥ सर्ववि
[१०७।२३] षयत्वादुत्पत्तिश्रुतिर्मुख्यार्थेत्यादिना ॥ पराधीनविशेषावाप्तिरूपोत्पत्तिर्हिभूतावकाशतद्देवतारूपचतुष्टयेप्यस्ति । अनुत्प
त्तिस्तूक्तोत्पत्त्यभावरूपाचेन्नक्वाप्यब्रह्मणि । स्वरूपानादित्वरूपात्ववकाशादावस्ति । नतुभूते । तथाचभूतेऽनुत्पत्तिश्रुतिच्छ
त्रिवल्लाक्षणिकीवा चिरंतनत्वमात्रेणगौणीवा स्यात् । उक्तचतुष्टयार्थकआकाशशब्दोवाभूतेतरस्मिन्नमुख्यःस्यादितिभावः ॥
[१०८।१६] तत्प्रकारश्चाकाशस्योक्तइति ॥ चतुष्टयात्मकआकाशश्चतुर्भिरपिभागैरुत्पद्यते । उक्तायाउत्पत्तेश्चतुर्ष्वपिसत्त्वादितिसर्व ॥ ९३१ ॥
प्र० षयत्वविवरणपूर्वंगौणतांव्यनक्ति ॥ पराधीनेति ॥ उक्तायाइति ॥ पराधीनविशेषावाप्तिरूपायाइत्यर्थः । पराधीनविशेषावाप्तिरूपैवो

प्र० त्पत्तिरत्राभिमतेत्येतत्समर्थयते ॥ इहचेति ॥ परेणाप्येतत्स्वीकार्यमितिभावेनाह ॥ परमइति ॥ तद्व्यनक्ति ॥ नहिपरमतेपीति ॥
विषयत्वादुत्पत्तिश्रुतिर्मुख्येत्यत्रोक्तमित्यर्थः ॥ [१०८।१६] प्राणस्योपरिवक्ष्यतइति ॥ भूततन्मुख्यामुख्याभिमानिरूपत्रितयात्मको
वायुस्त्रिभिरपिभागैरुत्पद्यत इत्युत्तराधिकरणेवक्ष्यतइत्यर्थः ॥ अनुत्पत्तिम[१०८।१७]च्छब्दस्यमुख्यार्थत्वदर्शनादिति ॥ यद्य
प्येकएवशब्दःप्रयोगभेदेनप्रवृत्तिनिमित्तवतिमुख्योऽन्यत्रामुख्यश्चदृष्टः । तथापीहशब्दैकगम्येशब्दादेवप्रवृत्तिनिमित्तस्या
पिकल्प्यत्वादनेकार्थत्वस्यान्याय्यत्वाच्च ब्रह्मणिनित्यशब्दप्रवृत्तौयन्निमित्तंतदेवान्यत्रापिवक्तव्यमितिवा "आकाशवत्सर्व
गतश्चनित्य"इत्यादौसकृत्प्रयुक्तस्यनित्यशब्दस्यब्रह्मतदन्ययोर्मुख्यत्वामुख्यत्वेनयुक्तेइतिवाशंकाभिप्रायः । परिहाराभिप्रा
यस्तु प्रवृत्तिनिमित्तस्यशब्दैकगम्यत्वेपिविरिंचिपरब्रह्मणोर्ब्रह्मशब्दवदाकाशब्रह्मणोरनुत्पत्तिमच्छब्दस्यबाधाबाधाभ्यांव्य
वस्था । अस्तिचात्राब्रह्मणिमुख्यत्वेप्रतिज्ञाहान्यादिकंबाधकं । दृश्यतेचद्वेब्रह्मणीइत्यादौसकृत्प्रयुक्तस्यापिब्रह्मशब्दस्यजी
वेष्वमुख्यतेति । इहचप्रकरणेसूत्रेपराधीनविशेषावाप्तिरेवोत्पत्तिर्विवक्षिता । नत्वभूत्वाभवनं । तथात्वेममते "ज्ञोतएवे"
त्युत्तरत्रजीवोत्पत्त्युक्तेः तथेह "प्रतिज्ञे"तिसूत्रे "इदंसर्वमसृजते"तिप्रतिज्ञाहान्युक्तेः परमतएकविज्ञानेनसर्वविज्ञानप्रति
ज्ञाहान्युक्तेः तथा "याव"दितिसूत्रेममतेऽल्पशक्तित्वस्यपरमतेभिन्नत्वस्यहेतुत्वोक्तेश्चायोगात् । नहिपरमतेपिब्रह्मणोऽन्य
दविद्यादिकमभूत्वाभवति । उक्तंचश्रीभाष्येपि "कार्यत्वंहिनामद्रव्यस्यावस्थांतरापत्तिः । तच्चजीवस्यज्ञानसंकोचविकास
प्र० केषांचिदप्येतत्संमतमित्याह ॥ उक्तंचेति ॥ "नात्माश्रुतेर्नित्यत्वाच्चताभ्य"इत्यत्रोक्तमित्यर्थः । एवंहितत्रवाक्यक्रमः "कार्यत्वंहिनामैक

तात्पर्य- प्र० स्वद्रव्यस्यावस्थांतरापत्तिः । तज्जीवस्याप्यस्त्येव । इयांस्तुविशेषः । वियदादेरचेतनस्ययादृशोऽन्यथाभावोनतादृशोजीवस्य । ज्ञानसंकोच चंद्रिका.
विकासलक्षणोजीवस्यान्यथाभावः । वियदादेस्तुस्वरूपान्यथाभावलक्षण"इति । भाष्याद्युक्तमाकाशद्वैतंसमर्थयते ॥ नचाकाशद्वित्वइति
॥ ९० ॥ द्वि. तृ.
लक्षणं । वियदादेस्तुस्वरूपान्यथाभावलक्षण"मिति । अस्तिचविशेषणस्योत्पत्तौविशिष्टस्योत्पत्तिः । पाकेनघटो
रक्तोजातइत्यनुभवात् । विशिष्टंचविशेष्याभिन्नं । यत्रचस्वरूपनित्यत्वंप्रमितंतत्रैवोत्पत्तिश्रुतिःपराधीनविशेषा १
वाप्तिपरा । अन्यत्रत्वभूत्वाभवनपरापीतिनातिप्रसंगः । नचाकाशद्वित्वेमानाभावः । भूताकाशातिरिक्तायादे
शकालापरिच्छिन्नायास्तार्किकाद्यभिमतदिशएवास्मन्मतेऽव्याकृताकाशत्वात् । प्राच्यादयोदिग्विशेषास्तुतद्भा
गाः । उक्तंहिटीकाकारैः "अवकाशमात्रंहिदिगित्युच्यते । अवकाशभागाएवदिग्विशेषा"इति । किंचप्रदेशरूप
आकाशोनीरूपःसाक्षिसिद्धश्च । अन्यथाऽवकाशेसंदेहेनांधकारादौहस्तचालनादिकंनस्यात् । नचमूर्तविशेषाभा
वइवतदाश्रयेदेशेकश्चित्संदिग्धे । भूताकाशंतु "भूतमप्यसितंदिव्यदृष्टिगोचरमेवचे"त्यादिरूपश्रुत्यारूपि । अप्र
त्यक्षंच । किंचभूताकाशं "सर्वंपंचभिराविष्टंभूतैरीश्वरबुद्धिजैः । पंचभूतात्मकेदेहे"इत्यादिस्मृतिभिर्देहाकारे
णविकारि । अवकाशस्तुकूटस्थनित्यत्वेनसाक्षिसिद्धः । नचसर्वाधारभूतौदेशकालौकिंचिद्द्रव्यात्मनाविकुरुतः ।
प्र० ॥ उक्तंहीति ॥ "अंधकारेपिदिङ्मात्रप्रतीते"रितितत्वनिर्णयवाक्यव्याख्यावसरइत्यर्थः । "भूतमप्यसितंदिव्यदृष्टिगोचरमेवतु । उत्पद्य ॥ ९३२ ॥
तेऽव्याकृतंहिगगनंसाक्षिगोचर"मित्यनुव्याख्यांहृदिकृत्वाह ॥ किंचप्रदेशेति ॥ साक्षिगोचरमित्युक्तिसूचितंयुक्त्यंतरमाह ॥ किंचभूतेति ॥

प्र० "यत्किंचिदिहलोकेवैदेहबद्धंविशांपते । सर्व"मितिमोक्षधर्मे । "पंचभूतात्मक"इतितृतीयस्कंधेकपिलवाक्यं ॥ कथंवेति ॥ निबिडताप्रसंगादितिभावः । "अभावोहिप्रदेशस्यनह्यत्राभावइत्यपी"तिन्यायविवरणोदाहृतश्रुत्युक्तयुक्तिंव्यनक्ति ॥ किंचावकाशइति ॥

कथंवाऽवकाशस्यपंचीकरणं । किंचावकाशः "अनादिर्वाअयमाकाश"इत्यादिश्रुतिभिरवकाशोपादानप्रागभावयोर्बुद्ध्यनारोहादियुक्तिभिश्चानादिः । ननुतामसाहंकारकार्यं । नहिपूर्वमाकाशोनासीत् । किंतुसर्वत्रवाकुत्रचिद्वा घनीभावएवासीदिति धीर्युक्ता । सर्वत्रेत्यादिनैवाकाशनिर्देशात् । भूतंतु "आत्मनआकाशःसंभूत"इत्यादिप्रकरणानुगृहीतश्रुतिभिः "तामसाच्च विकुर्वाणाद्भगवद्वीर्यचोदितात् । शब्दमात्रमभूत्तस्मान्नभःश्रोत्रंतुशब्दज"मित्यादिस्मृतिभिश्चतामसाहंकारकार्यं । किंच "एतदंडंविशेषाख्यंक्रमाद्वृद्धैर्दशोत्तरैः । तोयादिभिःपरिवृत"मित्यादिस्मृतिभिरेकमविभु । अन्यत्तुविभु । "आकाशवत्सर्वगतश्चनित्यः । सयथाऽनंतोऽयमाकाश"इत्यादिश्रुतेः । तथा अत्रदेशोनास्तीत्येतदिदानींकालोनास्तीतिवद्व्याहतं । अत्रेत्यनेनैवदेशनिर्देशात् । एवंब्रह्मवाऽन्यद्वादेशंविनाकुत्रचिदस्तीत्येतदपिव्याहतं । अतएव "सएवाधस्तात्सउपरिष्टात्सपश्चात्सपुरस्तात्सदक्षिणतःसउत्तरतः"इत्यादिश्रुतिः । "व्याप्तंत्वयैकेनदिशश्चसर्वा"इत्यादिस्मृतिश्चब्रह्मणोविभुदेशसंबंधेनैवविभुत्वमाहेत्यादियुक्तेश्च । किंच "मृतिकालेजहत्येनंप्राणाभूतानिपंचच । भागशोभागतस्त्वेनमनुगच्छंतिसर्वश"इत्यादिस्मृतिभिर्भूताकाशं गत्यादियोग्यभागवत् । अवकाशस्तुनगत्यादियोग्यभागवान् । नहिप्रदेशविशेषएतद्देशंत्यक्त्वाप्रदेशांतरंगच्छति । किंच

प्र० नत्विति ॥ भूतमित्यर्थः । युक्तिसूचनाय तामसाहंकारकार्यमित्युक्तिः । प्राणगतेश्चेत्यत्रभाष्योक्तस्मृतिमाह ॥ मृतिकालइति ॥

प्र० न्यायविवरणोक्तश्रुतिमाह ॥ आकाशोनीलमेति ॥ अन्येत्विति ॥ "अस्तित्वि"तिसूत्रार्थमनुवदति ॥ अस्तिहीति ॥ पूर्वपक्षयित्वेति ॥ पूर्वपक्षसूत्रमित्युक्त्वाभामत्यांतत्सूत्रभाष्यस्यतथैवव्याख्यानादितिभावः । नवियदश्रुतेरित्येतदर्थमन्वाह ॥ वियतइति ॥ गौण्यसंभवादितितृतीयसूत्रार्थमाह ॥ संभूतेति ॥ शब्दाच्चेतिचतुर्थार्थमाह ॥ आकाशवदिति ॥ स्याच्चैकस्यब्रह्मशब्दवदितिपंचमार्थ

"आकाशोनीलिमोदेतिनप्रदेशःकथंचने"तिश्रुत्यैवाकाशद्वित्वंकंठोक्तं । तस्मादाकाशद्वित्वंप्रामाणिकमेवेति ॥ अन्येतु॥ अस्तिहि "आत्मनआकाशःसंभूत"इतितैत्तिरीयआकाशस्यप्रथमंजन्म । "तत्तेजोसृजते"तिछांदोग्येतुतेजसः । तथाचतयोरन्योन्यंविरोधइतिद्वितीयसूत्रेणपूर्वपक्षयित्वा वियतउत्पत्तिर्नश्रूयते । संभूतश्रुतिस्त्वधुनावकाशोजातइतिवद्गौणी । विभोराकाशस्योत्पत्त्यसंभवात् । "आकाशवत्सर्वगतश्चनित्य"इत्यादिशब्दाच्च । स्याच्चैकस्यैवसंभूतशब्दस्याकाशेगौणत्वं । वाय्वादौतुमुख्यत्वं । यथानंदमयप्रकरणेब्रह्मशब्दस्यान्नादौगौणत्वमानंदेतुमुख्यत्वं । तस्मान्नश्रुत्योर्विरोधइत्याद्यतृतीयचतुर्थपंचमैःसिद्धांत्येकदेशिमतमुक्त्वा आकाशस्यब्रह्मकार्यत्वाभावेतद्व्यतिरेकापत्त्यैकविज्ञानेनसर्वविज्ञानप्रतिज्ञाहानिः।प्रतिज्ञाहि "यथासौम्यैकेनमृत्पिंडेने"त्यादिशब्दैरव्यतिरेकाभिप्राया ।

प्र० माह ॥ स्याच्चेति ॥ अन्नादाविति ॥ "अन्नंब्रह्मेतिव्यजानात् प्राणोब्रह्मेतिव्यजाना"दित्यन्नप्राणमनोविज्ञानेष्वित्यर्थः । तेषां "आनंदोब्रह्मे"त्युक्तानंदरूपेब्रह्मणिद्वारत्वेनाब्रह्मत्वादितिभावः ॥ सिद्धांतीति ॥ "एवंसिद्धांत्येकदेशिमतेप्राप्तइदमाहे"ति "प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्य"इत्येतद्भामत्यामवतार्यतत्सूत्रभाष्यस्यव्याख्यानादितिभावः । तत्सूत्रार्थमाह ॥ आकाशस्येति ॥ यावद्विकारंतुविभागोलो

प्र० कवदित्येतदर्थमन्वाह ॥ किंचेति॥ अत्यंताभावेति ॥ तात्विकत्वेनात्यंताभावप्रतियोगित्वस्यमिथ्यार्थत्वेतस्यनिर्धर्मकब्रह्मण्यतिव्याप्त्या स्वरूपेणतथात्वेवाच्येऽत्यंतासत्त्वापत्तेरितिभावः । श्रुत्यंतरोक्तोपसंहारःश्रुत्यंतरोक्तस्यश्रुत्यंतरेसंग्रहश्च "सर्ववेदांतेप्रत्ययंचोदनाद्यविशेषा"दि

किंचाकाशः विकारः कार्यं विभक्तत्वाद्भिन्नत्वाद्घटवदितिषष्ठसप्तमाभ्यांसिद्धांतितमित्याहुः। तत्रविरोधेनपूर्वपक्षइतितावदयुक्तं । छांदोग्येह्याकाशस्योत्पत्त्यनुक्तिमात्रं । नत्वनादित्वोक्तिः । नचानुक्तिस्तैत्तिरीयस्थोत्पत्त्युक्त्याविरुद्धा । ननु तैत्तिरीयआकाशस्यपूर्वंजन्मोक्तं छांदोग्येतुतेजसइतिविरोधइतिचेन्न । त्वन्मतेजगतोमिथ्यात्वेनात्यंताभावप्रतियोगिनोजन्मासंभवात् । आरोपितस्यजन्मादेःश्रुत्यबोध्यत्वात् । छांदोग्येक्रमानुक्तावपितैत्तिरीयोक्तस्य "सइदंसर्वमसृजते"त्यादाविवग्राह्यत्वेनाविरोधित्वाच्च । श्रुत्यंतरोक्तोपसंहारश्चसर्ववेदांताधिकरणसिद्धः । यद्यपि "तत्तेजोसृजत वायोरग्नि"रितिश्रुत्योर्विरोधधीः । तथापि "तेजोतस्तथाह्याहे"त्यत्रैवसनिरसिष्यते । किंचायंविरोधस्त्वन्मतआद्यस्यचतुर्थपादे "कारणत्वेने"त्यत्रशंकितइतितत्रैवनिरस्यः । नत्वत्र । प्रपंचितंचैतदस्माभिस्तत्रैव । किंचममरीत्या "अनादिर्वा अयमाकाशः आकाशवत्सर्वगतश्चनित्यः सयथानंतोऽयमाकाशः आकाशःसंभूत"इत्यनादित्वसादित्वश्रुत्योःस्पष्टविरोधेनपूर्वपक्षसंभवेनास्पष्टश्रुतिविरोधेनसयुक्तः । किंचाद्येनसिद्धांत्येकदेशिमतंप्रक्रम्यद्वितीयेनविरोधपूर्वपक्षमुक्त्वापुन

प्र०तितार्तीयाधिकरणसिद्धइत्यर्थः। पूर्वपक्षसंभवइतिपदच्छेदः। नास्पष्टेत्यत्रनञोयुक्तइत्यनेनान्वयः। उदाहरणानौचित्यासांगत्यपूर्वपक्षानुत्थानान्युक्त्वासूत्रयोजनांप्रत्याह ॥ किंचाद्येनेति ॥ अभावेपीत्यस्यनसूत्राणीत्यादिनान्वयः । छित्वा विक्षिप्येत्यर्थः । ऐककंठ्यमनुपेत्येतिवा

प्र० ॥ प्रकृतीति ॥ आदिपदेनारंभणाधिकरणं ॥ भावरूपेति ॥ तेषांयथाब्रह्मण्यारोपितत्वेनैकज्ञानेनसर्वज्ञाननिर्वाहस्तथेत्यर्थः । तथाचा

स्तृतीयादिभिरेकदेशिमतस्यविक्षिप्योक्तौनहेतुरस्ति। किंच चेदित्यादिपूर्वपक्षचिह्नस्य नेत्यादिसिद्धांत
चिह्नस्य एकइत्याद्येकदेशिमतचिह्नस्याभावेपि तथा ममरीत्याऽऽद्येपूर्वाधिकरणादनुवृत्तमुत्पत्त्यसं
भवंनवियदनुत्पत्तिमदितिवियतिनञानिषिध्य "अश्रुते"रित्यनेनतत्रानुत्पत्तिश्रुत्यभावहेतुमुक्त्वा तृ
तीयआद्योक्तहेतुसिद्ध्यर्थमनुत्पत्तिश्रुतेगौंणत्वोक्तिरित्येवंसर्वेषांसिद्धांतसूत्रत्वसंभवेनसूत्राणिछित्त्वापूर्व
पक्षत्वादिवर्णनंयुक्तं । सिद्धांतेपिषष्ठोक्तोहेतुरयुक्तः । त्वदुक्तस्यैकविज्ञानेनसर्वविज्ञानस्यप्रकृत्यधि
करणादौनिरस्तत्वात् । भावरूपाज्ञानादीनामिवाकाशस्याप्यनादित्वेप्येकविज्ञानेनसर्वविज्ञानोपपत्ते
श्च । कार्यत्वमारोपितत्वंचेच्छ्रुतिसूत्रविरोधः । नहि "आत्मनआकाशःसंभूत"इत्यादिविषयवाक्ये
षुतदनुसारिसूत्रेषुचाकाशादेरारोपउच्यते । तथात्वआकाशादेरप्युत्पत्तौमानाभावेनाविद्यादिवदना
द्यारोपितत्वमेवस्यात् । नात्माश्रुतेरित्यत्रजीवस्योत्पत्तिनिषेधोप्ययुक्तःस्यात् । विशिष्टरूपस्यजीवस्या
प्यारोपितत्वात् । असंभवस्तुसतोऽनुपपत्तेरित्यत्रचब्रह्मणआरोपमात्रस्यनिषेधःस्यात् । नतूत्पत्तेः ।

प्र० त्रनयेकार्यत्वोक्तिर्व्यर्थेतिभावः । तदेवतदित्युक्तावनेकंदोषमाह ॥कार्यत्वमिति॥ तथात्वे कार्यत्वस्यारोपितत्वरूपत्वे ॥मानाभावेनेति॥

प्र० संभूतशब्दस्यासृजतेत्यादिशब्दस्यचारोपार्थत्वावश्यंभावादितिभावः । प्रतिज्ञेतिसूत्राक्षरार्थंचानूद्यनिराह ॥ अपिचममेति ॥ आरोपितस्येति व्यधिकरणषष्ठी । आरोपितप्रतियोगिकस्येत्यर्थः । यद्वा भिन्नत्वादितिकिमारोपितभेदोहेतुरथधर्मिसत्तासमानसत्ताकोथ पारमार्थिकइतिविकल्प्याद्यद्वयेदोषोक्तिः आरोपितस्येत्यादिना । तत्रधर्मिसत्तासमसत्त्वंभेदस्यव्यनक्ति ॥ दृष्टोहीति ॥ अंत्यआह ॥ सत्यस्यचेति ॥ केचित्त्विति ॥ तन्मतेपि "नविय"दित्यारभ्य "असंभवस्तुसतोनुपपत्ते"रित्यंतंनवसूत्र्येकमधिकरणं । गौण्यसंभवा

अपिचममरीत्या "सइदंसर्वमसृजते"तिप्रतिज्ञयासाक्षात्सर्वजन्मसिद्धावेकविज्ञानेनसर्वविज्ञानप्रतिज्ञयार्था त्तदुक्तिरयुक्ता । सप्तमेविभागशब्दोक्तोभिन्नत्वरूपोहेतुरप्ययुक्तः । आरोपितस्यधर्मिसत्तासमानसत्ताकस्य तस्याधिष्ठानेऽनृतव्यावृत्तेश्चब्रह्मण्यपिसत्त्वात् । दृष्टोहिशुक्तौस्वारोपिताद्रूप्याद्धर्मिसत्तासमानसत्ताकोभेदः । सत्यस्यचतस्याकाशेप्यभावात् । केचित्तु । आकाशस्याजन्यत्वमित्याद्येनपूर्वपक्षे जन्यत्वमितिद्वितीयेनसिद्धांतः । पुनस्त्रिभिरुत्पत्तिश्रुतिर्गौणीतिपूर्वपक्षे एकविज्ञानेनसर्वविज्ञानादियुक्तिभिर्नगौणीति ।

प्र० च्छब्दाच्चेत्येकंसूत्रं । प्रतिज्ञाहानिरव्यतिरेकादित्येकं । शब्देभ्यइत्यपरं । वियन्नोत्पद्यते । छांदोग्येसृष्टिप्रकरणेवियदुत्पत्त्यश्रुतेरितिप्राप्ते "अस्तितु" । "आत्मनआकाशस्संभूतः खंवायुर्ज्योति"रित्यादितैत्तिरीयाथर्वणादावाकाशोत्पत्तिश्रुतिरस्तीतिद्वितीयार्थः । संभूतादिश्रुतिर्गौणी । "तत्तेजोसृजते"तिसृष्टेस्तेजआदितायाःप्रतिपादनेनवियदुत्पत्तिप्रतिपादनासंभवात् । "वायुश्चांतरिक्षंचैतदमृत"मित्यमृतत्वशब्दाच्च । एकस्यापिसंभूतशब्दस्याकाशेगौणत्वंवाय्वादौमुख्यत्वं "ब्रह्मनामरूपमन्नंचजायत"इत्यत्रप्रधानेगौणस्यापिब्रह्मशब्दस्य "तपसाचीय

प्र० तेत्रह्ये"त्यत्रमुख्यत्वमिवयुक्तं । तथाचाकाशस्यब्रह्माकार्यत्वान्नैकविज्ञानेनसर्वविज्ञानोपपत्तिरितिपुनश्शंकायां एकविज्ञानेनसर्वविज्ञानप्रतिज्ञाहानिः । आकाशस्यापिब्रह्मकार्यत्वेनतदव्यतिरेकात् । "सदेवसोम्ये"त्यादिशब्देभ्यश्चाकाशोत्पत्तिप्रतीतेः । किंच यावद्विकारंतु सर्वोपिविकारः । विभागः उत्पत्तिमान् । "ऐतदात्म्यमिदंसर्वं"मित्याकाशस्यापिविकारवचनादितिसूत्राणामर्थः । "एतेने"तिसूत्रद्वयार्थोऽग्रे व्यक्तः ॥ द्वाभ्यामिति ॥ राद्धांतसूत्रमवतारयतीतिश्रुतप्रकाशोक्तेरितिभावः । इत्याद्युक्तेत्यादिपदेन "अपिचे"त्युक्तदोषः, सर्वेषांसिद्धां

द्वाभ्यांसिद्धांतइत्याहुः। तन्न। जीवप्रकृत्यादीनामिवाकाशस्यानादित्वेप्येकविज्ञानेनसर्वविज्ञानोपपत्तेरित्याद्युक्तदोषसाम्यात् । मन्मतेतु अयमिहशक्तोत्रतुनेतिविभागरूपःसौत्रोहेतुः "विभागोह्यल्पशक्तिःस्या"दितिस्मृत्याल्पशक्तित्वरूपः। सचपराधीनविशेषावाप्तिरूपविकारव्याप्यएवेतिनकश्चिद्दोषः॥७॥ वियदधिकरणं ॥१॥

प्र० तसूत्रत्वसंभवइत्यादिदोषश्चग्राह्यः । यत्तु श्रुतप्रकाशे "यावद्विकारंत्वि"तिसूत्रंविभक्तत्वेनहेतुनाघटादिवन्नभसःकार्यत्वानुमानपरंवर्णितं । तदयुक्तमित्यादिनाविभक्तत्वस्यहेतुत्वखंडनं तत्परमतएव । नत्वस्मन्मतइत्याह ॥ मन्मतेत्विति ॥ इतिस्मृत्येति ॥ भाष्योक्तस्मृत्येत्यर्थः ॥ ७ ॥ वियदधिकरणं ॥ १ ॥

प्र० ॥ ॐएतेनमातरिश्वाव्याख्यातःॐ ॥ भाष्योक्ताभ्यधिकशंकोपयुक्तांचिंतामाह ॥ तदर्थंतस्याइति ॥ "तदभावउभयोस्स्वातंत्र्यंविरु

॥ ॐएतेनमातरिश्वाव्याख्यातःॐ ॥ अत्राधिकरणक्रम "आकाशाद्वायु"रितिश्रुतिक्रमात्पूर्वोक्तन्यायातिदेशाद्वा । अत्रोक्तंब्रह्मणःसर्वस्रष्टृत्वंकिंमुख्यवाय्वनुत्पत्तिश्रुतिविरुद्धंनवेतिचिंता । तदर्थंतदनादित्वश्रुतिर्मुख्योतगौणीति । तदर्थंतस्यागौणत्वेतेजोबन्नानामनित्यत्वमुक्त्वावायोर्नित्यत्वोक्तिर्नघटतउतघटतइति । तदर्थमनित्येभ्यस्तेजोबन्नेभ्योवायोर्विशेषःकिंस्वातंत्र्यरूपेणपरात्परनित्यत्वेनकिंवास्वरूपातिरिक्तज्ञाननित्यत्व(रूपे)मात्रेणेति । अतिदेशत्वसिद्ध्येभाष्योक्तमभ्यधिकाशंकाचतुष्टयंविवृणोति ॥ तथासतीत्यादिना ॥ ननु भाष्योदाहृतश्रुतावाकाशादिपदैर्भूतान्येवोच्यंते । तेभ्यश्चमुख्यवायोःस्वरूपनित्यत्वमेवविशेषइतिनेत्याह ॥ नचात्राकाशपदेनेति ॥ "अधिकमनुभूत्यादिविरुद्धत्व"मितिन्यायविवरणोक्तंपूर्वपक्षहेतुमुपपादयितुंश्रुतियुक्तिविरोधमुक्त्वानुभवविरोधमप्याह ॥ एवंविधस्यचेति ॥ नित्यत्वव्याप्तोक्तबहुहेतुमतउत्पत्तिरनुभवबाधितेत्यर्थः ॥ अत्यंतमिति ॥ आकाशादेरनित्यत्वमुक्त्वावायोर्नित्यत्वाद्युक्तिराकाशादधिकेत्यर्थः । सौत्रेण "एतेने"त्यनेनपूर्वाधिकरणोक्तःसर्वोपिहेतुर्विवक्षितइत्याह ॥ अनुत्पन्नत्वेनाश्रुतत्वादित्यादिना ॥ "मुख्यामुख्ये"तिभाष्यंव्याचष्टे ॥ अथैतानीति ॥ तदेवान्यथापिव्याचष्टे ॥ अनुत्पत्तिश्रुतिरिति ॥ "उभयोरपिपराधीनत्वप्राप्तेश्चान्योन्यानुरोधे। अन

प्र० द्वमेवे"त्यादिन्यायविवरणोपयुक्तचिंतामाह ॥ तदर्थमनित्येभ्यइति ॥ स्पष्टःफलफलिभावः । "तत्रवायोःपरात्परनित्यत्व"मित्यादिटी

प्र० कांशंकापूर्वंव्यनक्ति ॥ यद्यपीत्यादिना ॥ "महदाद्याश्चजायंतेपराधीनविशेषिता"इत्यनुव्याख्यानउक्तत्वादित्यर्थः ॥ प्रलयेपीति ॥ "एवंप्रलयकालेपिप्रतिभातपरावर"इत्यनुव्याख्यानोक्तेरितिभावः ॥ देहोत्पत्तेरिति ॥ "शरीरोत्पत्तिकारणात् । पराधीनविशेषेणजनिमानेवशब्दित"इत्यनुव्याख्यानोक्तेरितिभावः ॥ नित्यत्वमिति ॥ "मुख्यवायुर्नित्यसम"इत्युक्तेरितिभावः । एतेनानुव्याख्यानेटीकायां
१०९।१४
नुरोधेतुनसर्वैश्वर्य"मितिन्यायविवरणोक्तांयुक्तिंसंगृह्णाति ॥ अन्योन्येति ॥ यद्यपि "पुरुषःप्रकृतिःकालोदेवास्तदभिमानिनः । महदाद्याश्चजायंतेपराधीनविशेषिताः । इदंसर्वंससर्जेतिजनिमत्त्वमिहोदित"मितिपूर्वाधिकरणीयानुव्याख्यानेचित्प्रकृतेरपिपराधीनविशेषावाप्तिरूपोत्पत्तेरुक्तत्वान्मुख्यवायोरपिसाकैमुत्यन्यायसिद्धा । तथापि मुख्यवायोर्नपार्थिवादिवत्परानित्यत्वं । नापिभूताकाशाभिमानिविनायकादिवत्स्वरूपानादित्वेपिस्वरूपातिरिक्तज्ञानसादित्वरूपमनित्यत्वं । प्रलयेपिप्रतिभातपरावरत्वात् । नापीश्वरवत्स्वातंत्र्यरूपंपरात्परनित्यत्वं । परतंत्रत्वात् । नापिचित्प्रकृतिवद्देहादिनित्यत्वरूपंपरनित्यत्वं । देहोत्पत्तेःसत्त्वात् । किंतुस्वरूपातिरिक्तज्ञानस्यापिनित्यत्वमितिविशेषंवक्तुमिदमधिकरणमितिद्रष्टव्यं ॥ अन्येतु ॥ छांदोग्ये वायोर्भूतस्योत्पत्त्यश्रवणात्तैत्तिरीयेतुतच्छ्रवणाच्छ्रुत्योर्विरोधइतिपूर्वपक्षइत्याहुः । तन्न । उक्त्यनुक्त्योरविरोधादित्युक्तत्वात् ।

प्र०च्चज्ञाननित्यत्वेनैव "नित्योवायुरुदाहृत"इतिस्मार्तनित्यत्वनिर्वाहस्सयुक्तिकोदर्शितः । परानित्यत्वानित्यत्वयोरसंभवोपपादनेन "वायोर्मुख्यानुत्पत्त्यभाव"इतिटीकोक्तशंकानिरासःकृतः । तथा टीकायांपरात्परनित्यत्वपरनित्यत्वयोरभावोक्तौहेतुश्चोक्तोभवति ॥ अन्येत्विति ॥ "उक्त्यनुक्त्योर्विरोधाभावा"दितिटीकोक्तमेवहेतुमाह ॥ उक्त्यनुक्त्योरिति ॥ "तत्रविरोधेनपूर्वपक्षइतितावदयुक्त"मित्यादिनापूर्वत्रोक्त

प्र० त्वादित्यर्थः । “किंचनित्यविभुवियदुत्पत्ता”वित्यादिटीकार्थमाह ॥ भूतपरत्वइति ॥ भाष्यभामत्योरुक्तमाशंकते ॥ यद्यपीति ॥ अधिकेति ॥ एतेनयदुक्तंश्रुतप्रकाशे “अनस्तमितशब्दस्यामृतशब्दतुल्यार्थतयापृथक्परिहरणीयत्वाभावा”दिति तन्निरस्तं । “वायुश्चांत

भूतपरत्वेऽस्याधिकरणस्य “आकाशाद्वायु”रित्याकाशजेवायावाकाशसाम्यस्याप्यभावेनसुतरामधिकाशंकाभावेनातिदेशायोगाच्च । यद्यपि “वायुश्चांतरिक्षंचैतदमृत”मितिद्वयोरप्यमृतत्वमुक्त्वा “सैषानस्तमितादेवताय द्वायु”रितिवायोर्विशिष्यानस्तमितत्वोक्तिरधिका । तथापिसादेवताविषया । त्वन्मतेत्विदंभूतविषयं । नचास्याधिकरणस्यदेवताविषयत्वेप्रकरणविरोधः । उक्तरीत्यावियदधिकरणे “तत्तेजोसृजत तत्तेजऐक्षत तदपोसृजत ताआपऐक्षंते”तिवाक्यद्वयविषयउत्तराधिकरणद्वयेचदेवतायाअपिप्रकृतत्वात् । परंत्विदंदेवतामात्रविषयं । पूर्वमुत्तरद्वयंचोभयविषयमितिभेदः । केचित्तु अधिकाशंकाभावान्नेदमधिकरणांतरं । किंतुपूर्वाधिकरणशेषभूतंसद्भूतविषयमेवेत्याहुः । तन्न । अस्मद्रीत्याऽधिकाशंकाचतुष्टयसद्भावात् । “सैषानस्तमिते”तिश्रुतौदेवतापदस्य “कुविदंगे”त्यृचिदेवोपास्यत्वस्यश्रवणाच्च । अधिकाशंकाभावेपूर्वन्यायेनैवसिद्धेरेकाधिकरणत्वेप्यस्यसूत्रस्य

प्र० रिक्षंचैतदमृतमितिवायोरमृतत्वमुक्त्वापुनःपवनस्यविशेषेणाह सैषानस्तमितादेवतायद्वायुरिति । तस्मादभ्यासान्नापेक्षिकंवायोरमृतत्वमपि त्वात्यंतिकमेवे”तिभामत्युक्तस्यापरिहारात् । देवताविषयेत्येवसमाधानंयुक्तं । श्रुतप्रकाशोक्तंहेतुमाह ॥ अधिकाशंकाभावादिति ॥

प्र॰ वैयर्थ्याच्चेति॥एतेनयदुक्तंश्रीभाष्यतद्व्याख्यानयोः "वियन्मातरिश्वनोरुभयोरप्युत्पत्तिर्वक्तव्या । तत्रैकसूत्रेणवक्तुंशक्येपिपृथग्योगकरणं "तेजोतस्तथाह्याहे"तिमातरिश्वपरामर्शार्थे"मिति तन्निरस्तं । वियत्तुल्यन्यायतयामातरिश्वनोप्युपलक्षणतयोत्पत्तिसिद्धावप्युत्तरसूत्रपरा मर्शमात्रार्थपृथक्सूत्रकरणस्यानुचितत्वात् । वायोस्तेजस्तथाह्याहेतिसूत्रेणेपिसामंजस्यात् । अतइत्यस्यवायुपरामर्शित्वाभावाच्चेतिभावः ॥ ७ ॥ मातरिश्वाधिकरणं ॥ २ ॥

वैयर्थ्याच्च ॥ ७ ॥ मातरिश्वाधिकरणं ॥ २ ॥

॥ ॐअसंभवस्तुसतोऽनुपपत्तेःॐ ॥ एवमधिकरणद्वयेनाब्रह्मणोसंभवदुत्पत्तिकस्यापिनभःप्रभृतेःसर्वस्यो त्पत्तौश्रुत्योक्तायां तर्हितद्वदेवब्रह्मणोप्युत्पत्तिरस्त्वितिपूर्वपक्षोदयात्संगतिः । अत्रोक्तंब्रह्मणःसर्वस्रष्टृत्वादिकं ब्रह्मणउत्पत्तिमत्त्वश्रुतिविरुद्धंनवेतिचिंता । तदर्थं "असतःसदजायते"तिश्रुतिःकिमसतःसकाशाद्ब्रह्मणउत्प त्तिपराकिंवाब्रह्मणःसकाशाद्वायोरुत्पत्तिपरेति । तदर्थंब्रह्मानुत्पत्तिश्रुतिरपिकिंवाय्वाद्यनुत्पत्तिश्रुतिवत्पराधी नविशेषावाप्तिलक्षणोत्पत्तिसद्भावेपिस्वरूपोत्पत्तिमात्रस्यनिषेधिका किंवापराधीनविशेषावाप्तिरूपोत्पत्तेरपीति ।

प्र॰ ॥ ॐअसंभवस्तुॐ ॥ "असंभवद्वुद्भवयोर्नभोनभस्वतोरुत्पत्ता"वितिटीकायांद्विवचनमुपलक्षणमितिभावेनतत्सूचितांसंगतिमाह ॥ एव मिति ॥ सर्वस्येति ॥ "प्रकृतिःपुरुष"इत्यादिप्रागुक्तानुव्याख्यानात् "एवंसर्वस्यापिब्रह्मेतरस्योत्पत्तौसिद्धाया"मित्युत्तराधिकरणटीकोक्ते श्चेतिभावः । संगतिःअवसरप्राप्तिरूपाऽपवादरूपावेत्यर्थः । "ब्रह्मात्रविषय"इत्यादिटीकांव्यनक्ति ॥ अत्रोक्तमिति ॥ अत्राद्याचिंता "असंभव"इतिसूत्रांशसूचिता । द्वितीया "अनुपपत्ते"रित्यंशसूचिता । तृतीयात्ववधारणार्थकतुशब्दसूचिता । सदेवसोम्येत्याद्यनुत्प

प्र॰ त्तिश्रुतिः । पौनरुक्त्यंनिराह ॥ असदितिचेदित्यत्रेति ॥ सत्त्वमिति ॥ "सत्त्वंस्वातंत्र्यमुद्दिष्टंतच्चकृष्णेनचापरे । अस्वातंत्र्यात्तदन्ये षामसत्त्वंविद्धिभारते"त्येकादशस्कंधतात्पर्योक्तवाक्यं ॥ न्यायेति ॥ "नचसतःपराधीनविशेषवत्त्वं । स्वातंत्र्या"दित्युक्तइत्यर्थः । "एकै

"असदितिचे"दित्यत्रब्रह्मकारणत्वश्रुतेः "असतःसदजायते"त्यादिप्रागभावकारणत्वश्रुतिसंवादियुक्तिविरोधोनिर स्तः । "नासतोदृष्टत्वा"दित्यत्रसमयप्राप्तंशून्यस्यहेतुत्वंनिरस्तं । अत्रतुतस्याएव "असतःसदजायते"त्यादिकयाब्रह्म णोसत्कार्यत्वश्रुत्यैवविरोधोनिरस्यतइतिभेदः ॥ अनादित्वेयासमस्येति ॥ देहानादित्वादिनाचित्प्रकृतिसमस्ये त्यर्थः । अनेन "चित्प्रकृतेश्चसममेत"दितिन्यायविवरणोक्तापूर्वपक्षयुक्तिर्विवृता ॥ स्वातंत्र्याख्योहेतुरिति ॥ "सत्त्वंस्वातंत्र्यमुद्दिष्ट"मितिभारतोक्तेरितिभावः । अनेनन्यायविवरणोक्तःस्वातंत्र्यरूपोहेतुःसूत्रारूढोदर्शितः ॥ भेदैस्त्वादिसत्गुणत्वादिति ॥ "सद्भावेसाधुभावेचसदित्येतत्प्रयुज्यते"इतिगीतोक्तेरितिभावः ॥ एकैवेत्यर्थइति ॥ यद्यविभिन्नेत्यस्यभेदरहितेत्यर्थःस्यात्तर्हितत्प्रतियोगिसमर्पकस्य "भेदैरपिविभा(व्य)ष्यते"इत्यस्यभेदोर्थःस्यात् । नच तद्युक्तं । निर्भेदत्वात् । भेदैरितिबहुवचनायोगाच्च । एकेत्यर्थत्वेतुभेदैरित्यस्यापिद्वित्वत्रित्वादिसंख्याभिरित्यर्थो भवति । तथाचनिर्भेदेपिद्वित्वादिसंख्यानांसत्त्वान्नदोषइतिभावः । अन्येतु ब्रह्मकार्यं कारणत्वात् पटादिवदितिप्रासे

प्र॰ वे"तिव्याख्यानेबीजंवदन्नेव "भेदै"रित्यस्याप्यर्थमाह ॥ यदीति ॥ अन्येत्विति ॥ "सदेकस्वभावस्योत्पत्त्यसंभवः । कुतः । अनुपपत्ते"

प्र० रितिसूत्रार्थोभामत्यांव्यक्तः । तत्र सतोऽनुपपत्तेरित्यंशार्थोभाष्यउपपादितः । तमनुवदति ॥ सन्मात्रंहीति ॥ पादसंगतायाइति ॥ श्रुतिविप्रतिषेधशंकायाएवपादसंगतत्वेनयुक्तिविरोधशंकायाअसंगतत्वादित्यर्थः । सन्मात्रमित्यस्यकिंव्यावहारिकप्रातिभासिकरूपसद्विशेषानुगतसन्मात्रमित्यर्थउतपारमार्थिकसद्विशेषायावंतस्तावदनुगतपरमार्थसन्मात्रंवेत्यर्थइतिविकल्पौहृदिकृत्वाऽऽद्यआह ॥ परमार्थसतइति ॥

सन्मात्रंहिब्रह्म । तस्यनतावत्सन्मात्रादुत्पत्तिः । अतिशयाभावेकार्यकारणभावायोगात् । नापिसद्विशेषात् । विशेषात्सामान्यस्यानुत्पत्तेः । नाप्यसतः । तस्यनिरात्मकत्वादितिसिद्धांतइत्याहुः । तन्न । ममरीत्या "असतःसदजायते"त्यादिश्रुत्याब्रह्मणःकार्यत्वशंकायाःपादसंगतायाःसंभवेऽप्रयोजकेनकारणत्वेनतदसंगततच्छंकायोगात् । यच्चोक्तं सत्सामान्यंब्रह्मेति । तन्न । परमार्थसतोब्रह्मणोव्यावहारिकसदाद्यनुगत्ययोगात् । परमार्थसतिचसामान्यविशेषभावाभावात् । सद्व्यक्तीनांचसत्त्वाविशेषेपिशक्तशक्यत्वादिविशेषेणैवद्रव्यादिव्यक्तीनामिवकार्यकारणतोपपत्तेः । यत्तूक्तंभामत्यां

प्र० द्वितीयआह ॥ परमार्थसतीति ॥ तथाचसन्मात्रमित्यस्यपरमार्थसन्मात्रमित्यर्थोनयुक्तइतिभावः । यदपितस्यनतावत्सन्मात्रादुत्पत्तिरिति तदपिनेतिभावेनाह ॥ सद्व्यक्तीनांचेति ॥ यथादंडघटतंतुपटादिद्रव्यव्यक्तीनांद्रव्यत्वाविशेषेपिदंडादिघटादिजननेशक्तं घटादिकंतुदंडादिनिष्ठशक्तिविषयइतिशक्तशक्यत्वरूपविशेषेणपूर्वापरीभावलक्षणविशेषेणवाकार्यकारणभाववद्भवति तथासत्त्वाविशेषेपिशक्तशक्यत्वादि

प्र० विशेषेणैवतथाभावोपपत्तेरित्यर्थः ॥ अधिष्ठानार्थमिति ॥ जगदारोपस्यनिरधिष्ठानत्वानुपपत्त्याब्रह्मणोधिष्ठानस्यसत्त्वमवश्यमपेक्षितमि तितेनसत्त्वेनहेतुनारोपितत्वंब्रह्मणोनेत्युच्यतेऽसंभवस्त्वितिसूत्रइत्यर्थः । ''विवर्तताहिकार्यते''तिकल्पतरूक्तमाह ॥ आरोपितताहीति ॥ सौत्रासंभवपदेति ॥ यद्यपिभामत्यां ''उत्पत्त्यसंभव''इत्येवार्थउक्तः । नत्वसंभवपदस्यैवानुत्पत्त्यर्थकत्वं । येनासंभवपदस्यानारोपार्थ त्वमस्वरसंस्यात् । तथाचारोपासंभवइत्येवार्थोऽभिमतः । तथापिभाष्ये ''सतउत्पत्तिर्नाशंकितव्ये''त्युक्त्याऽसंभवपदस्यैवानुत्पत्तिरर्थःपर

अधिष्ठानार्थमपेक्षितेनसत्त्वेनब्रह्मणआरोपितत्वमिहनिषिध्यते । आरोपितताहिकार्यतेति । तत्रप्रक्रमानानुगु ण्यं । नहिपूर्वाधिकरणयोः ''आत्मनआकाशःसंभूत''इत्यादिश्रुत्याऽऽकाशवाय्वादेरात्माकाशादावारोपितत्वमु क्तं । येनेहब्रह्मणितदाशंक्यनिषिध्येत । सौत्रासंभवपदास्वारस्यंच । ''नात्माश्रुते''रित्यनेनपौनरुक्त्यंच । नचा त्रब्रह्मणोनुत्पत्त्युक्तिः । नात्मेत्यत्रतुतस्माद्भिन्नस्यजीवस्येतिवाच्यं । विशिष्टरूपस्यजीवस्यब्रह्मणश्चारोपितत्वात् ।

प्र० भाष्येऽभिमतइतितद्रीत्यावा उत्पत्त्यसंभवइत्यर्थवर्णनापेक्षयाश्रुतासंभवपदस्यैवानुत्पत्त्यर्थत्वमुचितमित्युपेत्यवाऽऽरोपार्थत्वेतत्पदास्वारस्य सिद्मुक्तमितिध्येयं । यत्तुकल्पतरावेतदेवपौनरुक्त्यमाशंक्य ''तत्रहिब्रह्मनित्यत्वमुपेत्यैवजीवस्यतदुत्पत्तिराशंकिष्यत''इत्यादिनासमाहितं तदनूद्य निराह ॥ नचात्रेति ॥ अनुत्पत्त्युक्तिरिति ॥ ततएवनित्यत्वोक्तिश्चेत्यपिध्येयं । किंब्रह्मजीवशब्दाभ्यांविशिष्टमभिमतमुतचिन्मात्रमि तिकल्पौहृदिकृत्वाक्रमेणप्रत्याह ॥ विशिष्टेति ॥ आरोपितत्वादिति ॥ आरोपस्यैवोत्पत्तिपदार्थत्वोक्तेरनुत्पत्त्युक्तिरयुक्तेत्यर्थः । नित्य

प्र० त्वोपगमश्चायुक्तइत्याह ॥ **आरोपितस्यचेति** ॥ एकेनैव अधिकरणेनेत्यर्थः । "अन्येत्वेवंव्याकुर्वत"इत्यादिसुधोक्तंविवरितुमाह ॥ **केचित्त्विति** ॥ तन्मतेहिनेदमधिकरणांतरं । अपितु "एतेने"तिसूत्रवदिदमपिपूर्वशेषएव । तत्र "असंभवस्तुसत"इत्येतदंशार्थमनुवदति ॥ **असंभवोऽनुत्पत्तिरिति** ॥ "तुशब्दोऽवधारणार्थः । असंभवः अनुत्पत्तिः । सतः ब्रह्मणएवे"ति तद्भाष्योक्तेरितिभावः । अनुपपत्तेरित्यस्यैकविज्ञानेनसर्वविज्ञानानुपपत्तेरित्यर्थकस्य एवकारव्यावर्त्यतयाप्राप्तेनमहदादिकमुत्पद्यतइतिसाध्येनान्वयः । ब्रह्मणोऽनुत्पत्तेरदृश्यत्वा

आरोपितस्यचनिवृत्तिनियमात् । चिन्मात्रानारोपस्यचैकेनैवसिद्धेः । केचित्तु असंभवोऽनुत्पत्तिः सतएवब्रह्मणएव । अन्यत्तुमहदादिकमुत्पद्यतइत्येवंमहदादेरुत्पत्त्यर्थमिदंसूत्रमित्याहुः । तन्न । अवक्तव्योक्तेरवश्यवक्तव्यानुक्तेश्च । वियदधिकरणोक्तैरेकविज्ञानेनसर्वविज्ञानादिन्यायैःसिद्धाहिमहदादेरुत्पत्तिःपृथगवक्तव्या । अवश्यवक्तव्याच सतोऽनुत्पत्तिः "सदजायते"त्यादिश्रुत्यविरोधाय ॥ ७ ॥ असंभवाधिकरणं ॥ ३ ॥

प्र० धिकरणे "नित्यंविभुंसर्वगतंसुसूक्ष्मं सबाह्याभ्यंतरोह्यज"इतिनित्यत्वाजत्वयोरुक्त्यासिद्धत्वेनावक्तव्यत्वाद्वियन्मातरिश्वनोरुत्पत्तेरुक्तत्वात्परिशेषान्महदादेरुत्पत्त्यर्थमिदंसूत्रमित्याहुरित्यर्थः ॥ **पृथगवक्तव्येति** ॥ प्रागुक्तस्योपरिमन्मते "एतेने"त्यत्रैव "ज्ञोतएवे"त्यत्रैवचत्वन्मते विशेषशंकानुक्तेरितिभावः । अवश्यवक्तव्यत्वेबीजमाह ॥ **सदजायतेति** ॥ ७ ॥ **असंभवाधिकरणं** ॥ ३ ॥

प्र० ॥ **ॐतेजोतःॐ** ॥ "एवंसर्वस्यापिब्रह्मेतरस्योत्पत्तौसिद्धाया"मितिटीकोक्तिसूचितामवांतरसंगतिमाह ॥ **एवमिति** ॥ कार्यविशेषे अग्न्यादिरूपे ॥ **कारणविशेषेति** ॥ वायुब्रह्मरूपकारणविशेषेत्यर्थः । "तेजोत्रविषय"इत्यादिटीकांव्यनक्ति ॥ **अत्रेति** ॥ चिंतेत्यन्वयः । उक्तं जन्मादिसूत्रइत्यर्थः । यद्वापूर्वत्रब्रह्मतदन्ययोरनुत्पत्त्युत्पत्त्योरुक्त्यार्थादुक्तमित्यर्थः । वायुतस्तेजोजन्मश्रुतिविरुद्धंनवेत्येवोक्तौवायूपादानकत्वोक्तिपरतयाप्युपपत्तेरविरोधकत्वप्रसंगाच्छ्रुतेरुक्तार्थविरोधस्फोरणायवायुदेवतातइत्युक्तं । तथाचवायुदेवतायाअग्निस्रष्टृत्वप्राप्तेश्श्रुतेरु

॥ ॐतेजोतस्तथाह्याहॐ ॥ एवंब्रह्मान्यस्यसर्वस्योत्पत्तौब्रह्मणश्चानुत्पत्तौसिद्धायामिदानीं कार्यविशेषेकारणविशेषविप्रतिपत्तिर्निरस्यतइतिसंगतिः । अत्रोक्तंब्रह्मणएवसर्वस्रष्टृत्वंवायुदेवतातस्तेजोजन्मश्रुतिविरुद्धंनवेतिचिंता । तदर्थं "वायोरग्नि"रितिश्रुतिःकिंवायोर्द्वारत्वमात्रेणायुक्तोतयुक्तेति । तदर्थंब्रह्मणोद्वारोपादानंकिंद्वाररहितस्याशक्त्याकिंवाशक्तस्यापिलीलयेति ॥

प्र० क्तार्थविरोधित्वंलभ्यते । अतएवदेवतानयटीकायां "वायुप्रभृतीनांदेवतात्वा"दित्युक्तमितिभावः । वायुदेवतातइत्युपलक्षणं । वायुजडात्तेजःपरिणामरूपतेजोजन्मश्रुतिविरुद्धंनवेत्यपिध्येयं । पूर्वत्रचस्वातंत्र्येणसर्वस्रष्टृत्वमित्यस्मिन्पक्षेध्येयं । "किंवायुद्वारमंतरेणे"त्यादिटीकासूचितचिंतामाह ॥ **किंवायोरिति** ॥ वायुदेवतायावायुभूतस्यचेत्यर्थः । "उपादानशक्तेश्चपरमात्माधीनत्वा"दितिटीकोक्तेः । "स्वेच्छयैवलीलये"तिटीकासूचितमाह ॥ **किंद्वाररहितस्येति** ॥ यद्यशक्त्यातदेश्वरेतदभावेनद्वारवैयर्थ्येनश्रुतिस्तन्मात्रेणायुक्तेतितद्विरुद्धंब्रह्मणएव

प्र० स्रष्टृत्वं । यदितुलीलयेतितदातुनेतिव्यक्तमितिभावः । टीकाक्षरार्थमाह ॥ विवादाभावइतीत्यादिना ॥ पौनरुक्त्यंनिराह ॥ तदनन्यत्वमिति ॥ कथंटीकोक्तशंकानिरासोनेनेत्यतोभावमाह ॥ देवतानांचेति ॥ ७ ॥ तेजोधिकरणं ॥ ४ ॥

[११०।१२] विवादाभावइति ॥ यद्यपि "आकाशाद्वायुः एतस्माज्जायतेप्राणोमनःसर्वेंद्रियाणिच । खंवायुर्ज्योति"रितिश्रुत्योर्विवादोस्ति । तथाप्यतिव्यवहितस्यतेजसोब्रह्मजत्वसाधकैतदधिकरणन्यायेनैवाव्यवहितस्यवायोस्तत्सिद्धेःपृथग्विवादाभावइतिभावः । "विष्णोरेवतेजसउत्पत्तौद्वारकारणवैयर्थ्य"मितिन्यायविवरणोक्तांपूर्वपक्षयुक्तिमाह ॥ [११०।२३] किंब्रह्मवायुद्वारमिति ॥ "द्वारमनुसृत्यैवविष्णोःप्रवृत्ति"रितिन्यायविवरणोक्तांसिद्धांतयुक्तिमाह ॥ [१११।३] वाय्वादेरकारणत्वेपीति ॥ स्वतंत्रकारणत्वाभावेपीत्यर्थः ॥ [१११।६] उभयकारणत्वनिवृत्त्यर्थत्वादिति ॥ ब्रह्मवद्वायुरपिस्वतंत्रकारणमितिशंकानिवृत्त्यर्थत्वादित्यर्थः । अतएव वक्ष्यति "उपादानशक्तेश्चपरमात्माधीनत्वा"दिति । तदनन्यत्वमित्यत्रकारणांतरस्ययुक्तिप्राप्तंस्वातंत्र्यंनिरस्तं । अत्रतुश्रुतिप्राप्तमितिभेदः ॥ [१११।९] वायुप्रभृतीनांदेवतात्वादिति ॥ देवतानांचोपादानोपादेयत्वाभावादितिभावः ॥७॥ तेजोधिकरणं॥४॥

॥ ॐआपःॐ ॥ अधिकरणसंगतिमाह ॥ [१११।११] तेजसोनंतरंप्राप्ताइति ॥ अत्रोक्तंब्रह्मणएवसर्वस्रष्टृत्वंतेजोदेवतातोऽब्जन्मश्रुतिविरुद्धंनवेतिचिंता । तदर्थंकिं "अग्नेराप"इतिश्रुतिःप्रबलोत "ब्रह्मैवेदमग्रआसीत् तदपोसृजते"ति । तदर्थं "अग्नेराप"

प्र० ॥ ॐआपःॐ ॥ टीकायामवसरसंगतिर्व्यक्तेतिभावेनाह ॥ अधिकरणेति ॥ तदपोसृजततेतीति ॥ श्रुतिःप्रबलेत्यनुकर्षः । इयंच "युक्तियुक्तत्वेनतेजोजातत्वश्रुतेःप्राबल्या"दितिटीकासूचिता । "भवतुवायोरग्न्युत्पत्तौद्वारत्वप्रतिपादकतातच्छ्रुतेः । अत्रपुनरग्नेःकारणत्वमे

प्र० वे"त्यादिटीकासूचितामाह ॥ किंतेजसइति ॥ उतयुक्तेति॥"महाशक्तिरपिहरिर्लीलये"त्यादिटीकोक्तदिशेतिभावः ॥ अन्येत्विति ॥ आकाशाद्वायुरितिश्रुतेराकाशानंतरंवायुरुत्पन्नः । वायोरनंतरमग्निरुत्पन्नइतिनिर्वाहसंभवात् "तज्जलान् एतस्माज्जायतेप्राणः सइदंसर्वमसृजते"त्यादिश्रुतिभिरविशेषेणसर्वस्यब्रह्मजत्वावगमात् "तत्तेजोसृजते"तिश्रुत्यनुरोधेनतेजसोब्रह्मजत्वमितिप्राप्ते "आत्मनआकाशस्संभूतः पृथिव्याओषधयः"इति पूर्वापरपंचम्योरुपादानविषयत्वदर्शनादुपपदविभक्तितोपिकारकविभक्तेर्बलीयस्त्वाच्चवायुजत्वंतेजसः । ब्रह्मजत्वंतुवायु

इतिश्रुत्यनुग्राहिकाघर्मात्स्वेदादिदृष्टिरूपायुक्तिःकिंतेजसोद्धारत्वमात्रेणनयुक्तोतयुक्तेति । अन्येतु "तेजः आपः"इत्यधिकरणद्वयेतेजोजलयोर्ब्रह्मकार्यत्वमितिप्राप्तेवायुतेजःकार्यत्वमितिसिद्धांतः । नचैवमपसिद्धांतः । तेजोजलयोर्वायुतेजोभावापन्नब्रह्मकार्यत्वमुपेत्यशुद्धब्रह्मकार्यत्वनिषेधादित्याहुः । तन्न । तथात्वेशुद्धवाय्वादिकार्यत्वेनजन्मादिसूत्रंवियदधिकरणोक्तांप्रतिज्ञाहानिंचाक्षिप्यपूर्वपक्षस्य, तेजोवायुभावापन्नब्रह्मकार्यत्वमितितत्समाधानेनसिद्धांतस्यचसंभवे तदनाक्षेपादिनापूर्वपक्षाद्ययोगात् । किंचैवंहि "तेजोत"इतिसौत्रोतश्शब्दःस्वस्थाने आपइत्यनुवृत्तिस्थलेचाव्यवहितप्रकृतसदाख्यब्रह्मरूपैकार्थपरोभवति । अन्यथाहिस्वस्थानेव्यवहितप्रकृतमातरिश्वपरोऽनुवृत्तिस्थलेचतेजःपरःस्यात् ।

प्र० भावापन्नब्रह्मणोजातत्वेनेतिसिद्धांतइत्याहुरित्यर्थः । "अतिदेशोयं । अतआपःकिंसतोजायंतउततेजसइतिसंशयादिपूर्ववत् । अपामग्निदाह्यत्वादग्नेरपामुत्पत्त्ययोगादितिशंकात्रनिवर्त्यत"इतिकल्पतरूक्तेस्सहैवपूर्वोत्तरपक्षावनुवदति ॥ तेजः आपः इत्यधिकरणद्वयइति ॥ तात्पर्यार्थमाह ॥ शुद्धेति ॥ वाय्वादिभावानापन्नेत्यर्थः । सूत्राक्षरास्वारस्यंचाह ॥ किंचैवमिति ॥ वाय्वादिभावापन्नाज्जनिर्नामकिंवा

प्र० य्वादिविशिष्टाज्जातत्वंकिंवावाय्वादिविवर्तत्वमितिकल्पौहृदिनिधायसिद्धांतप्रमेयंनिराह ॥ **किंचतेजआदेरिति** ॥ **विशिष्टेति** ॥ अत एवभिन्नेत्यर्थः ॥ **सूत्रैरिति** ॥ तेजोतस्तथाह्याह अपः पृथिवी अधिकाररूपशब्दांतरेभ्यः इतिचतुर्भिःसूत्रैरित्यर्थः । तन्मते पृथिवीत्यस्य पार्थक्यात् ॥ **इत्यादिभिरिति** ॥ चराचरेत्यंतैरित्यर्थः ॥ **पूर्वपक्षत्वादीति** ॥ अतश्शब्दस्यव्यवहितपरत्वंस्वस्थानेवायुपरत्वमनुवृत्तिस्थ

किंचतेजआदेर्वाय्वादिभावापन्नविशिष्टभिन्नब्रह्मकार्यत्वे एकविज्ञानेनसर्वविज्ञानंस्यात् । विवर्त मतेशुक्तितत्वज्ञानेनरूप्यस्येववाय्वादितत्वज्ञानेनतेजआदेर्निवृत्तिश्चस्यात् । केचित्तु "तेज"इत्या दिसूत्रैस्तेजआदीनांकेवलवाय्वादिजत्वमितिपूर्वपक्षयित्वा "तदभिध्याना"दित्यादिभिस्सूत्रैः "ब हुस्या"मित्यभिध्यानादिनावाय्वादिशरीरकब्रह्मजत्वमितिसिद्धांतितमित्याहुः । तन्न । अतश्श ब्दस्याव्यवहितप्रकृतैकब्रह्मपरत्वेनतेजइत्यादिसूत्राणांसिद्धांतत्वेनानेकाधिकरणत्वसंभवेतत्त्यागेन पूर्वपक्षत्वाद्ययोगात् । "तदभिध्याना"दितिसूत्रेतुशब्ददर्शनात्ततःपूर्वेषांपूर्वपक्षत्वेच "असंभव स्त्वि"त्यत्रतद्दर्शनात्ततःपूर्वेषां "एतेने"त्यादीनांतत्त्वंस्यात् ॥ ७ ॥ **अबधिकरणं** ॥ ५ ॥

प्र० लेचतेजःप्रभृतिपरत्वमित्यादिपदार्थः । त्वयापि आपोतस्तथाह्याह पृथिव्यतस्तथाह्याह इत्युत्तरत्राप्यनुवृत्त्याऽतइत्यस्य तेजसः अद्भ्यः इत्यर्थवर्णनादितिभावः । "तुशब्दात्पक्षोव्यावृत्त"इतिश्रीभाष्योक्तिसूचितमाशंक्यनिराह ॥ **तुशब्देति** ॥ ७ ॥ **अबधिकरणं** ॥ ५ ॥

प्र० ॥ ॐपृथिवीॐ ॥ "प्रकृताआपएवात्रविषय"इत्यादिटीकांपूर्वपक्षटीकाद्यनुरोधेनव्यनक्ति ॥**अत्रेति**॥ फलद्योतनायसिद्धयइत्यंतोक्तिः। एतेन "द्वारकारणविषयश्रुतीनांविरोधेनाप्रामाण्येसमन्वयासंभवा"दितिपूर्वटीकाविवृता । "ताअन्न"मित्यत्रतच्छब्दपरामर्शद्योतनाय "ता

१११२३

॥ **ॐपृथिव्यधिकाररूपशब्दांतरादिभ्यःॐ** ॥ अधिकरणसंगतिमाह ॥ **एवंसर्वस्येति** ॥ अत्रश्रुतिसमन्व येनोक्तस्यब्रह्मणस्सर्वस्रष्टृत्वस्यसिद्ध्यै "ताआपऐक्षंत ताअन्नमसृजंत अद्भ्यःपृथिवी"तिश्रुतिद्वयंपरस्परविरुद्धंस दप्रमाणमुतनेतिचिंता । [अत्रश्रुतिसमन्वयेनोक्तं ब्रह्मणःसर्वस्रष्टृत्वादिकंकिमयुक्तमुतयुक्तमितिचिंता । तदर्थं "ताअन्नमसृजंत अद्भ्यःपृथिवी"तिश्रुतिद्वयंकिंपरस्परविरुद्धमुतनेति]तदर्थं "ताअन्न"मितिश्रुतावन्नशब्दःकिं प्रसिद्धान्नपरःकिंवाप्रकरणादिनापृथिवीपरइति । अत्र "ताअन्नमसृजंत अद्भ्यःपृथिवी"तिश्रुत्योरन्यतराप्रामा ण्यमात्रेणजन्मादिसूत्राक्षेपायोगात्, द्वयोःसमबलत्वेनागृह्यमाणविशेषत्वाच्चोभयाप्रामाण्येनपूर्वपक्षितं । विय दाद्यधिकरणेषुतुवियदाद्युत्पत्तिश्रुतिमात्राप्रामाण्येनजन्मादिसूत्राक्षेपसंभवादनुत्पत्तिश्रुतेःप्रबलत्वेनगृह्यमाणवि शेषत्वाच्चैकाप्रामाण्येनपूर्वपक्षितं । अतएवतत्रन्यायविवरणेऽनुत्पत्तिश्रुतेःप्राबल्यायानुभवाद्यनुगृहीतत्वमुक्तं ।

प्र० आप"इतिपूर्वांशोक्तिः ॥ **प्रकरणादिनेति** ॥ भूतप्रकरण, कृष्णरूप, "आपश्चपृथिवीचान्न"मित्यादिशब्दांतरैरित्यर्थः । व्यक्तोत्रफलफ लिभावः । अत्रटीकायांपूर्वाधिकरणपूर्वपक्षापेक्षयावैषम्योक्तौबीजोक्त्यातात्पर्यन्यायविवरणफलत्वंचदर्शयति ॥ **अत्रेत्यादिना** ॥ "नचा

प्र० न्नशब्दस्ये"त्यादिटीकातात्पर्यंशंकापूर्वंव्यनक्ति ॥ नचेहापीति ॥ अक्षरार्थमाह ॥ अद्भ्योवेति ॥ न्यायविवरणोदाहृतेति ॥ "अद्भ्योवाअन्नमित्यादी"त्यादिपदोक्तानां "ताअन्नमसृजंतताआपोन्नमसृजंते"त्यादिबहुवाक्यानामित्यर्थः ॥ परव्याख्येति ॥ म

नचेहापिन्यायविवरणेन्नश्रुतेःप्राबल्यायबहुवाक्यानुसारितोक्तेतिशंक्यं । यतोऽन्नश्रुतेःप्रकरणानुगृहीतपृथिवीश्रुतिविरोधोपयुक्तसमबलत्वायैवबहुवाक्यानुसारितोक्ता । नतुप्राबल्याय । अतएवोक्तंटीकायां "नचान्नशब्दस्यपृथिव्यर्थत्वेनाविरोधः । प्रसिद्धान्नपरत्वस्वीकारेबहुवाक्यानुसारित्वगुणलाभा"दिति । "अद्भ्योवाअन्न"मित्यादिन्यायविवरणोदाहृतबहुवाक्यानांप्रसिद्धार्थपरत्वरूपगुणलाभादित्यर्थः । [हेत्वंतरमाह ॥ [११२।२] तस्मादिति ॥] नकेवलंप्रसिद्धान्नपरत्वेबहुवाक्यानुसारिता । किंतुलिंगद्वयमप्यस्तीत्याह ॥ [११२।२] तस्मादित्यादिना ॥ [११२।४] उक्तश्रुतिविरोधादिति॥ "ओषधीभ्योन्न"मितिश्रुतिविरोधादित्यर्थः॥ भूतविपर्ययत्वादिति [११३।१]॥ अनेनप्रसिद्धान्नविषयतैवानिरस्यते । नतुभूताभिमानिदेवताविषयतापीतिज्ञेयं ॥ [११२।१४] तेजोशितमितिवदिति ॥ तत्रयथातेजश्शब्दस्तैजसपरस्तथापृथिवीवाचकोऽन्नशब्दःपार्थिवपरइत्यर्थः । अत्रसूत्रेपरव्याख्यानविरुद्धा ॥ ७ ॥ पृथिव्यधिकरणं ॥६ ॥

प्र० तांतरेतुपृथिवीत्यसांप्रदायिकंविच्छेदमंगीकृत्यातइत्यनुवर्त्यातइत्यस्याद्भ्यइत्यर्थवर्णनादनेकार्थत्वमतश्शब्दस्यदोषइतिभावः ॥७॥ पृथिव्यधिकरणं ॥ ६ ॥

प्र० ॥ **ॐतदभिध्यानात्ॐ** ॥ “प्रकृताधिभूताधिदैवानिविषय”इत्यादिटीकांतात्पर्यतोविवृणोति ॥ **अत्रेति** ॥ पूर्वोक्तं जन्मादिसूत्रोक्तं । “प्राणानांग्रंथिरसी”त्यादिभाष्यादिसूचितांचिंतामाह ॥ **प्राणानामिति** ॥ “लोकेपितुरन्यस्यैवे”त्यादिटीकासूचितामाह ॥ **पितुरिति** ॥

११२।१९

॥ **ॐतदभिध्यानादेवतुतल्लिंगात्सः ॐ** ॥ अधिकरणसंगतिमाह ॥ **एवमिति** ॥ अत्रपूर्वोक्तंविष्णोःसर्वसंहर्तृत्वंकिंरुद्रस्यसर्वसंहर्तृत्वश्रुतिविरुद्धंनवेतिचिंता । तदर्थं “प्राणानांग्रंथिरसिरुद्रोमाविशांतक”इति रुद्रस्यसंहर्तृत्वश्रुतिःकिंस्वातंत्र्येणसर्वसंहर्तृत्वपरा उतकतिपयसंहारेरुद्रस्यद्वारत्वमात्रपरेति । तदर्थंपितुरन्यस्यैवमारकत्वदर्शनयुक्त्यनुगृहीतारुद्रस्यसंहर्तृत्वश्रुतिः किं “यमप्येतिभुवनंसांपरायेसनोहरि”रिति विष्णोःसर्वसंहर्तृत्वश्रुतितःप्रबलोतनेति । तदर्थंलोकेपितुरमारकत्वेपितृत्वमेवतंत्रं(उत्पादकस्यामारकत्वे किमुत्पादकत्वमेवप्रयोजकं)किंवाममतादिदोषयुक्तत्वमिति । यद्यपिसृष्टेरनंतरास्थितिः तथापिविष्णोः स्थितिहेतुतायामविवादात्पितुरन्यस्यैवमारकत्ववत्स्थापकत्वस्यादृष्टेश्चसृष्ट्यनंतरंलयविचारोयुक्तः । “पितुरन्यस्यैवमारकत्वदृष्टे”रितिन्यायविवरणोक्तांपूर्वपक्षयुक्तिंविवृणोति ॥ ११२।२५ **पितुरन्यस्यैवेत्यादिना** ॥

प्र० मारकत्वेति ॥ सापेक्षत्वात्समासः । “ममत्वादिदोषे”त्यादिसिद्धांतटीकासूचितामाह ॥ **लोकेपितुरिति** ॥ लयचिंतायाअसंगतत्वमाशंक्यनिराह ॥ **यद्यपीति** ॥ “नस्वयमुत्पाद्यपालयितुर्विष्णोर्जगत्संहरणंन्याय्य”मितितत्वप्रदीपदिशापितृशब्दार्थमाह ॥

प्र०अत्रपितृशब्देनेति ॥ पूर्वत्रेति ॥ पूर्वत्रापीतिकुतोव्याख्येत्यतआह ॥ अन्यथेति ॥ अन्येत्विति ॥ पूर्वत्रसृष्टिक्रमेभूतानामविरोधउक्तः ।

अत्रपितृशब्देन नकेवलंजनकोविष्णुःकिंतुरक्षकश्च । नचरक्षकस्यसंहर्तृत्वंयुक्तमितिसूचितं । "तस्याभिध्याना" दित्यस्येच्छावत्त्वरूपेऽभिध्यातृत्वेश्रुतित्वेपिजन्मादिसूत्रोक्तेप्रयत्नवत्त्वरूपेकर्तृत्वेलिंगत्वात्सूत्रेलिंगशब्दोयुक्तइत्य भिप्रेत्य इच्छायाःप्रयत्नेलिंगत्वंप्रश्नपूर्वकंदर्शयति ॥ किंचातइत्यादिना[११३।३] ॥ तत्वभावादित्यस्यव्याख्या यथार्थ ध्यानादिति । ननु "किमुसादेर्जगत"इतिपूर्वभाष्येऽनुषक्तेन "तत्कर्तृत्वंप्रतीयत"इत्यनेनैवजगत्संहर्तृतोक्ता । सैव "इत्येतस्मादेवसंहारकर्ते"त्युत्तरभाष्येसंहारकर्तृत्वेहेतुत्वेनोच्येत । तदयुक्तं । साध्यावैशिष्ट्यादित्याशंक्य पूर्ववाक्योक्त्याशक्त्योत्तरवाक्योक्तःप्रयत्नःसाध्यते । अतोनदोषइत्याह ॥ कर्ताविष्णुरितिप्रतीयते । शक्तस्यै[११३।६] वतत्संभवादिति ॥ अत्रेतिभाष्यप्रतीकं । तस्यार्थः परतंत्रेपीति ॥ पूर्वत्रसंबध्यतइति[११३।८] ॥ पूर्वत्रापिसंबध्य तइत्यर्थः । अन्यथा "नतुसर्वात्मनेरित"मित्यस्यपूर्वस्यविशेषणस्य "एकदेशक्रियाचे"त्यनेनविशेष्येणानन्वया दसंगतिःस्यात् । उत्तरंचसमस्तमितिविशेषणंविशेष्यसाकांक्षत्वादनन्वितंस्यादितिभावः । "लोकपितृवैरूप्याद्वि ष्णो"रितिन्यायविवरणोक्तांसिद्धांतयुक्तिंविवृणोति ॥ ममत्वादिदोषराहित्येनलोकपितृवैलक्षण्यादिति[११३।१०] ॥ अन्येतु ॥ "आकाशाद्वायु"रित्यादावाकाशाद्यभिमानिदेवानामीश्वरानधिष्ठितानांस्वतंत्राणामेवोत्तरोत्तरभूत

प्र०अत्रतुतदधिष्ठातृदेवतासुसउच्यते । तत्राकाशाद्यधिष्ठात्र्योदेवताः किंस्वतंत्राएववाय्वादिसर्गेवर्तंत उतेश्वराधिष्ठिताइतिसंदेहे आकाशाद्वायुरि

प्र०त्यादिस्वस्ववाक्येनिरपेक्षाणांश्रुतेः चेतनानांचेतनांतरापेक्षायांकारणाभावाच्चस्वतंत्राएवेतिजगतोब्रह्मजत्वव्याघातइतिप्राप्ते आकाशादिविका रात्मनावतिष्ठमानस्यतस्येश्वरस्याभिध्यानात् "सोकामयते"त्यादिनाऽभिध्यानपूर्वसर्वात्मकत्वाभिधानात् "यःपृथिव्यांतिष्ठन्यःपृथिवीमंतरोय मयती"त्यादिनियंतृत्वरूपतल्लिंगात्सपरमेश्वरस्सर्वस्यकर्तेतिसिद्धांतसूत्रार्थंचाहुरित्यर्थः । सूत्रार्थंचप्रत्याचष्टे ॥ किंच यइति ॥ व्यर्थमिति ॥

कर्तृतोच्यतइतिप्राप्ते ईश्वराधिष्ठितानांपरतंत्राणामेवसोच्यतइत्याहुः । तन्न । त्वयाऽऽकाशादिशब्दानांभूतार्थ त्वस्यपंचम्याश्चोपादानार्थत्वस्योक्तत्वेनाभिमान्यर्थत्वस्यनिमित्तार्थत्वस्यचाभावात् । अभ्युपगमवादेनसिद्धांतो क्तेश्चक्लिष्टत्वात् । किंच "यःपृथिवीमंतरोयमयती"तित्वदुक्तस्यनियंतृत्वलिंगस्य "तल्लिंगा"दित्यनेनैवोक्तत्वात् "सोकामयते"त्यभिधानस्यचदेवतानामीश्वराधिष्ठितत्वेलिंगत्वायोगात्सूत्रे "तदभिध्याना"दितिव्यर्थं । नचा काशादित्यादिवाक्यंतत्तद्देवतानांकर्तृत्वपरंतत्तद्भूतानामुपादानत्वपरंचेतिद्वेधापूर्वपक्षेप्राप्तेतत्तद्भावापन्नस्यब्रह्मण उपादानत्वपरत्वमितिसिद्धांतइतियुक्तं । त्वदीयभाष्योक्तस्यास्यपक्षस्यभामतीकल्पतरुभ्यामेव "तेजोत"इत्यनेन गतार्थत्वेननिरस्तत्वात् । अपिच ममरीत्यासयुक्तिकया[पितुरन्यस्यमारकत्वयुक्त्यनुगृहीतया "रुद्रोमाविशांतक"

प्र० तल्लिंगात्सइत्येतावतैवपूर्तेरितिभावः । कल्पतरौहि "एतदुक्तंभवति । यथाऽऽकाशात्मनेश्वरोवाय्वाद्युपादानमेवंतदभिमानिदेवतात्मनाधि ष्ठाते"तिभाष्यादिभावउक्तः । तमनूद्यनिराह ॥ नचेति ॥ भाष्याद्युक्तमाह ॥ तत्तद्भावेति ॥ निरस्तत्वादिति ॥ "नतावदिहभूता नांब्रह्मानधिष्ठितानांस्रष्टृत्वाभावश्चिंत्यते । ईक्षत्याद्यधिकरणैर्गतार्थत्वात् । नापिब्रह्मणएवतत्तद्भूतात्मनास्थितस्योत्तरकार्योपादानत्वं । तेजो

प्र० तइत्यत्रतन्निर्णयात् । अतोऽधिकरणानारंभ"इतिकल्पतरावुक्तेः । भामत्यांकेवलदेवतापूर्वपक्षस्यैववर्णनादितिभावः । टीकाभाष्ययोजनापरे तिभावेनाक्लेशेनैवसूत्राक्षरयोजनामाह ॥ सूत्रेति ॥ इतिश्रुत्युक्तादिति ॥ एतेन "आकाशाद्वायुरित्यादौपूर्वपूर्वभूतशरीरःसएवपुरुषो त्तम उत्तरोत्तरभूतकारणं । नतुकेवलंभूतं । तत्तेजऐक्षत बहुस्यांप्रजायेयेतिबहुभावरूपात्परमात्मलिंगा"दितिकेषांचिदर्थःप्रत्युक्तः । त्वन्म तेतदभिध्यानादित्यस्यमन्मतइवश्रुतिसमानाक्षरत्वाभावात् । तदीक्षणादित्युक्तौत्वदुदाहृतश्रुतिसमानाक्षरत्वलाघवयोर्लाभेनतथैवनिर्देष्टव्य इतिभाष्योदाहृतया]ब्रह्मणोन्यस्यलयकर्तृत्वश्रुत्याब्रह्मणोलयकर्तृत्वश्रुतेरवश्यनिरसनीयंविरोधं "तस्याभिध्याना"दितिसमा नाक्षरश्रुतिविषयेण "तदभिध्याना"दितिसूत्रेणनिरस्य ब्रह्मणोलयकर्तृत्वइहस्थापिते उत्तराधिकरणेलयक्रमविचारःसंगतो नान्यथा । सूत्राक्षरार्थस्तु । तदभिध्यानात् तस्याभिध्यानादितिश्रुत्युक्ताद्धरेरत्तादिबंधसंजिहीर्षारूपात् । तल्लिंगात् सादि जगत्संहर्तृत्वसाधकलिंगात् । योऽबादिस्रष्टृत्वेनप्रकृतः यश्चजनकत्वेनामारकतयाशंकितः यश्च "ॐतत्सदितिनिर्देशोब्रह्मण स्त्रिविधःस्मृत"इतिस्मृतौतच्छब्दवाच्यत्वेनोक्तः "सनोहरिर्घत"मितिश्रुतौचसइत्युक्तः सएवहरिःसंहर्ता । तुशब्दस्त्वभिध्या नगतस्यसंजिहीर्षात्वरूपविशेषस्यद्योतकः । एवकारस्तुकैमुत्यन्यायसूचकइतिभाष्यएवोक्तं॥७॥ तदभिध्यानाधिकरणं॥७॥

प्र०त्वाच्च । श्रुत्यंतरेऽभिध्यानभावेपिविप्रतिपन्ने "आकाशाद्वायु"रित्यत्रतदभावाच्च । अभिध्यानात्तल्लिंगात्सइतिवातदभिध्यानात्सइत्येतावतावा पूर्तेश्च । तुशब्दवैयर्थ्यस्यस्पष्टत्वाच्च । एवकारेणैवपूर्वपक्षनिरासप्राप्तेरिति ॥ विशेषस्यद्योतकइति ॥ "तुशब्दश्चविशेषवाची"तितत्वप्रदी पोक्तेरितिभावः ॥ ७ ॥ तदभिध्यानाधिकरणं ॥ ७ ॥

प्र० ॥ ॐविपर्ययेणतुॐ ॥ संगतिमिति ॥ विशेषचिंतारूपामित्यर्थः । फलोक्तिंविवृण्वन्नेवविषयसंशयटीकांतात्पर्यतोव्यनक्ति ॥ अत्रेति ॥

॥ ॐविपर्ययेणतुक्रमोतउपपद्यतेचॐ॥ संगतिमाह ॥ [११३।१३] सर्वंभगवतेति ॥ अत्रश्रुतिसमन्वयेनोक्तस्यविष्णोस्स्रष्टृत्वसंहर्तृत्वादेस्सिद्धये "व्युत्क्रमाद्विलयश्चे"तिश्रुतिःकिं "क्रमाद्विलीयत"इतिश्रुत्या लोकेप्रायेणोत्पत्तिक्रमेणैवलयदर्शनयुक्त्यनुगृहीतयाबाधितोतनेतिचिंता । (क्तंविष्णोःस्रष्टृत्वादिकमयुक्तंनवेतिचिंता । तदर्थंश्रुतिरप्रमाणमुतनेति। तदर्थं "व्युत्क्रमाद्विलयश्चे"तिश्रुतिः किं "क्रमाद्विलीयत"इतिश्रुत्यालोकेप्रायेणोत्पत्तिक्रमेणैवलयदर्शनयुक्त्यनुगृहीतयाबाधितोतनेति ।) तदर्थंक्रमा"दितिश्रुतौक्रमशब्दःकिमनुक्रमपरःकिंवाव्युत्क्रमपरइति । तदर्थंलोकेप्रथमोत्पन्नानांप्रथमंनाशेकिंप्रथमोत्पत्तिःप्रयोजिका किंवासामर्थ्यविशेषाभावइति । "लोकानुसारित्वंबहुवाक्यानुरोधश्चे"तिन्यायविवरणोक्तंपूर्वपक्षयुक्तिद्वयंविवृणोति ॥ [११३।१५] लोकानुकूलत्वगुणेनेत्यादिना ॥ [११३।२०] क्रमंव्युत्क्रमयोःक्रमपदप्रवेशइति ॥ अनुक्रमव्युत्क्रमयोःक्रमपदवाच्यतयाप्रवेशइत्यर्थः । अनेनच "क्रमवाक्यस्यसावकाशत्व"मितिन्यायविवरणोक्ता सिद्धांतयुक्तिः क्रमपदमक्रमस्यव्यावर्तकं । नतुव्युत्क्रमस्य । आरोहक्रमादवरोहक्रमस्येवानुक्रमवद्व्युत्क्रमस्यापि क्रमत्वादितिविवृतेतिद्रष्टव्यं । सप्तमीपक्षइवप्रथमापक्षेपिसन्निधानशब्दान्वयोनेत्यतआह ॥ [११३।२५] सन्निधीयतेत्रेति ॥

प्र० पूर्वोत्तरपक्षटीकासूचिताश्चिंताआह ॥ व्युत्क्रमादित्यादिना ॥ आरोहेति ॥ सोपानारोहवदित्यर्थः । टीकाद्यर्थंसूत्रारूढंकर्तुमाह ॥

प्र० सूत्राक्षरार्थस्त्विति ॥ अतएवेति ॥ एतेनातइत्यस्यावृत्तिः तुशब्दस्यावधारणार्थतयात्रान्वयोवा पूर्वस्मादेवकारानुषंगोवा सूचितः ॥ अन्येत्विति ॥ भामत्युक्तमनुवदति ॥ यत्प्रयंतीति ॥ सृष्टिक्रमएव नतुलोकदृष्ट्याविपरीतक्रमः । तस्यविजातीयत्वादित्यर्थः । अतस्सृष्टिक्रमाद्विपरीतक्रमएवलयक्रमः । मृदादेर्जातस्यघटादेर्मृदादौलयदर्शनादुपपद्यतेचविपर्ययक्रमइतिसूत्रार्थंहृदिकृत्वासिद्धांतमन्वाह ॥ लय

सूत्राक्षरार्थस्तु ॥ "क्रमाद्विलीयत"इतिश्रुत्युक्तःक्रमस्तु अतः प्रकृतात्सृष्टिक्रमात् विपर्ययेणभवति । अतएव "व्युत्क्रमाद्विलयश्चेतिवाक्यशेषादेव उपपद्यतेच विपर्ययः पूर्वोत्पन्नानांसामर्थ्याधिक्यादिति । अन्येतु "यत्प्रयंतीत्यादिषुलयस्यैवश्रवणात्सृष्टाविवलयेक्रमस्याश्रवणात्क्रमापेक्षायांश्रौतेलयेश्रौतः सजातीयःसृष्टिक्रमएवग्राह्यइतिप्राप्ते लयेसृष्टिक्रमग्रहे उपादानलये उपादेयस्थितिःस्यात् । साचायुक्ता । तस्माद्विजातीयोपिदृष्टःसृष्टिविपरीतक्रमएवग्राह्यः । दृष्टोहिमृदोजातस्यघटस्यमृद्यप्ययइति सिद्धांत"इत्याहुः ॥ तन्न ॥ अस्यविचारस्यश्रुतेःकेनचित्सहविरोधानिरासकत्वेनाध्यायासंगतेः ।

प्र० इति ॥ दृष्टइत्युक्तंव्यनक्ति ॥ दृष्टोहीति ॥ मृदइतिपंचमी ॥ अध्यायासंगतेरिति ॥ एतेनयदुक्तंकल्पतरौ "यद्यप्यत्रश्रुतिविप्रतिषेधोनावध्रियते । तथाप्युत्पत्तिक्रमेनिरूपितेलयक्रमोबुद्धिस्थोविचार्यतइतिप्रासंगिक्यौपादावांतरसंगती"इति तन्निरस्तं । अध्यायसंगतेरेवाभावेपादादिसंगतेरनवसरदुःस्थत्वात् । त्वन्मतेदेवताधिकरणादेरिवप्रासंगिकसंगत्याचिंतोपपद्यतइतिचेन्न । सर्वदेवतोपास्यत्वरूपलिंगसम

प्र० न्वयस्यार्थिकतयामन्मतेऽध्यायसंगतेस्तत्रैवोक्तत्वाच्च । दोषांतरंचाह ॥ ममरीत्येति ॥ भाष्योक्तेति ॥ ननु सानप्रसिद्धेतिचेत्किंतवोतसर्वस्य । नाद्यः । अप्रयोजकत्वात् । नांत्यः । निर्णयायोगात् । औदुंबराधिकरणेशाबरभाष्ये "ऊर्जंपशूनाप्नोत्यूर्जोवरुध्या"इत्युक्तश्रुतेः "यथाह्ययंज्योतिरात्माविवस्वा"नित्यादिश्रुतेः "अतएवचोपमे"त्यत्रपरभाष्योक्तायाः तथाश्रीभाष्येपि "ज्योतिश्चरणाभिधाना"दित्यत्रोक्तायाः

ममरीत्यालोकानुसारित्वादियुक्त्यनुगृहीतया "क्रमाद्विलीयत"इतिभाष्योक्तश्रुत्या "व्युत्क्रमाद्विलयश्चे"ति भाष्योक्तश्रुतेर्विरोधनिरासेनसाक्षात्संगतिसंभवेप्रासंगिकत्वायोगाच्च । "व्युत्क्रमाद्विलयश्चे"तिभाष्योक्तव्युत्क्रमश्रुतौ "जगत्प्रतिष्ठादेवर्षेपृथिव्यप्सुप्रलीयते । ज्योतिष्यापःप्रलीयंतेज्योतिर्वायौप्रलीयत"इतित्वदुक्तस्मृत्यनुमितश्रुतौचलयेक्रमस्यश्रुतत्वेनतदश्रवणस्वीकारेणपूर्वोत्तरपक्षयोरयोगाच्च । भस्मीभूतपटादेस्तंतुषुलयादृष्ट्यादृष्टानुसारेणकार्यस्यसाक्षात्कारणेलयइतिसिद्धांतोक्त्ययोगाच्च । तेजआदीनामीक्षितृत्वादिनाचेतनत्वात्पित्रादिलयानंतरमेवचप्रायःपुत्रादिलयदृष्टेर्दर्शनानुसारेणतेजआदीनांलयानंतरमेवाबादिलयप्राप्तेश्च ।

प्र० "इंद्रश्शचीपतिर्बलेनपीडितोदुश्च्यवनोवृषासमत्सुसासहिः"इतिश्रुतेश्चाप्रसिद्धत्वाच्च ॥ भाष्योक्तेति ॥ श्रीमद्भाष्योक्तश्रुताविल्यर्थः ॥ त्वदुक्तेति ॥ परभाष्योदाहृतेत्यर्थः । एतेनप्रलयेक्रमद्वैविध्याश्रवणेनसंशयानुपपत्तेरधिकरणारंभोऽनुपपन्नइतिश्रुतप्रकाशोक्तंनिरस्तं । उक्तदिशाश्रुतिविगानसंभवात् । दृष्टोहीत्यादिना योदृष्टानुसारिहेतुरुक्तःसोप्ययुक्तइत्याह ॥ भस्मीभूतेति ॥ तंतुषु तंत्वादिषु । गोमयादि

प्र॰ जन्यवृश्चिकशरीरादिरादिपदार्थः ॥ एतेनेति ॥ दर्शनस्यानियतत्वकथनेनेत्यर्थः । यद्वा चेतनत्वादित्यादिकथनेनेत्यर्थः । तेन "न्याय मूले"तिभामतिगतन्यायशब्दस्योपादानलयेकार्यस्थित्ययोगोन्यायइत्यर्थउक्तः । सोपिन्यायोव्यभिचारी । असत्यपिपितरितदुपादानकस्यपुत्रस्य गोमयेलीनेपितदुपादानकस्यवृश्चिकशरीरस्यस्थितिदर्शनादितिसूचितं । यस्तु अतः अव्यक्तमहदहंकाराकाशादिक्रमात् । विपर्ययेण यस्सर्वेषांकार्याणांब्रह्मानंतर्यरूपःक्रमः "एतस्माज्जायतेप्राण"इत्यादिषुप्रतीयते सचक्रमस्तत्तद्रूपाद्ब्रह्मणस्तत्तत्कार्योत्पत्तेरेवोपपद्यते । परंपरयाकारणत्वेप्यानंतर्यश्रवणमुपपद्यतइतिकेषांचित्सूत्रार्थः सोप्यपास्तः । अनेकाध्याहारदोषात् । "सइदंसर्वमसृजते"त्यादाविव "एतस्मा"

एतेन "जगत्प्रतिष्ठेत्यादिस्मृतिर्न्यायमूला । नश्रुतिमूले"तिभामत्युक्तंपरास्तं ॥ ७ ॥ विपर्ययाधिकरणं ॥ ८ ॥

॥ ॐअंतराविज्ञानमनसीक्रमेणतल्लिंगादितिचेन्नाविशेषात्ॐ ॥

पूर्वोक्तस्यव्युत्क्रमेणलयइत्यस्यक्वचिदपवादशंकानिरासात्संगतिः ।

प्र॰ दितिश्रुतौक्रमोत्पत्त्यनुक्तेरेवभावेनविपरीतक्रमोत्पत्त्युक्तेरभावेनसामान्यश्रुतेःक्रमोक्तिपरविशेषश्रुत्यनुरोधेनपाठक्रमेणवानिर्णयस्यसिद्धत्वात्तदर्थंपृथक्सूत्रस्यानारभ्यत्वात् । तत्तच्छरीरकब्रह्मजातत्वोक्त्यर्थमिदमित्यप्ययुक्तं । अस्यसूत्रेऽप्रतीतेः । पूर्वसूत्रेणैवतदर्थस्यलाभाच्च । अवश्यंनिरसनीयस्यलयक्रमश्रुतिविगानस्यास्सद्भाष्योक्तस्यतन्मतेनिरासाभावप्रसंगाच्चेति ॥ ७ ॥ विपर्ययाधिकरणं ॥ ८ ॥

॥ ॐअंतराविज्ञानमनसीॐ ॥ टीकानुक्तेराह ॥ पूर्वोक्तस्येति ॥ "अक्षरात्परमादेवेतिश्रुतेर्वक्ष्यमाणलिंगदर्शनस्यचविरोध"इतिटी

प्र०कोक्तश्रुतिःकेत्यतस्तद्विवृण्वंष्टीकोक्तपूर्वोत्तरपक्षसूचितचिंतापरंपरांवदन्विषयसंशयटीकांतातपर्यंतोऽव्यनक्ति ॥ **अत्रकिंभाष्येति** ॥ पूर्वसूत्र भाष्येत्यर्थः ॥ **वाङ्मनसीति** ॥ "वाङ्मनसिलीयतइतिस्मरे"दितिटीकोक्तार्थः । भाष्यानुक्तेराह ॥ **लोकदृष्टीति** ॥ टीकोक्तंसूत्रारूढंक

अत्रकिंभाष्योदाहृतासर्वत्रापिव्युत्क्रमेणलयश्रुतिः "यच्छेद्वाङ्मनसीप्राज्ञस्तद्यच्छेज्ज्ञानआत्मनि"इतिमनोविज्ञानयोःसृष्टिक्रमेणलयप्रतिपादकश्रुत्याविरुद्धानवेतिचिंता । तदर्थंविज्ञानतत्वेलीयमानंमनस्तत्वंकिंविज्ञानतत्वस्यकारणमुतनेति । तदर्थं "मनसश्चविज्ञान"मितिसृष्टिश्रुतौमनोविज्ञानशब्दौकिंमनस्तत्वविज्ञानतत्वपरौ किंवांतःकरणावबोधपराविति । तदर्थंतौशब्दौकिंतत्वयोरेवमुख्यौकिंवांतःकरणावबोधयोरपीति । "लोकदृष्ट्यनुसारा"दितिन्यायविवरणोक्तांपूर्वपक्षयुक्तिंविवृणोति ॥ **लोकानुकूलंचैतदित्या**[११४।६]**दिना** ॥ [११४।७]**संमसामर्थ्यस्यापिसंभवादिति** ॥ सृष्टौमनसःपूर्वमवस्थानात्प्रलयेविज्ञानस्यपश्चादवस्थानात्समसामर्थ्यसंभाव्यतइत्यर्थः । "भजज्ञौभागसेवयो"रितिवचनाद्भागार्थस्यभजतेर्भावेक्तप्रत्ययांताद्भक्तशब्दाद्वाक्तिन्प्रत्ययांताद्भक्तिशब्दाद्वा "तस्येद"मितिसंबंधसामान्येविहिताण्प्रत्ययांतस्यभाक्तशब्दस्यभागविषयावाचकत्वं युक्तमित्यभिप्रेत्याह ॥ [११४।१३]**अयंचव्यपदेशइंद्रियावबोधाख्यभागविषयइति** ॥

प्र० रोति ॥ भजज्ञाविति ॥ "स्यात्प्रचीडुचसंपर्केभजज्ञौभागसेवयो"रितिकविकल्पद्रुमवचनादित्यर्थः । ञकारउभयपदार्थः । औकारश्चा

प्र० निङर्थः । "भागविषय"इतिटीकार्थंव्यनक्ति ॥ यद्यपीति ॥ सूत्रेति ॥ द्वितीयसूत्रेत्यर्थः । आद्यसूत्रार्थोव्यक्तइतिभावः । चराचरत

यद्यपिमनश्शब्दस्यमनस्तत्वमंतःकरणरूपमिंद्रियंचेत्येकोराशिरर्थः । उभयत्रापिप्रयोगात् । एवंविज्ञानशब्दस्यापिविज्ञानतत्वमवबोधश्चेत्येकोराशिरर्थः । तथापि "मनसश्चविज्ञान"मितिवाक्यस्थौमनोविज्ञानशब्दाविंद्रियावबोधरूपभागयोरेववर्तेते । नतुमनस्तत्वविज्ञानतत्वयोरिति "मनसश्चविज्ञान"मितिव्यपदेशोभागविषयइत्यर्थः । "अंतस्तद्व्यक्तत्यपेक्षये"त्यादिभाष्यंप्रकृतानुपयोगीत्याशंक्य मैवं । तत्वानांसर्वसृष्टिर्हि "परादव्यक्तमुत्पन्न"मित्यादिभाष्योदाहृतस्मृत्युक्तक्रमेणैव । क्वचित्तत्वानामेवायंपूर्वपक्ष्यभिप्रेतोविपरीतक्रमःश्रूयतेचेत्साश्रुतिर्ब्रह्मांडांतःसृष्ट्यभिप्राया । बहुश्रुतिसंग्रहरूपास्मृतिस्तुबाह्यसृष्ट्यभिप्राया । यद्वा विपरीतक्रमश्रुतिर्ज्ञानिनंप्रतिस्वदेहेतत्वाभिमानिदेवानामापरोक्ष्यक्रमाभिप्राया । द्वारपालादिदर्शनानंतरमंतेराज्ञइवाधमदेवतादर्शनानंतरमंतेहरेर्दर्शनादितिपरिहारद्वयकथनार्थत्वादुत्तरभाष्यस्येत्यभिप्रेत्योत्तरभाष्यंव्याचष्टे ॥ क्वचित्तत्वानामेवेत्यादिना ॥ सूत्राक्षरार्थस्तु ॥ तद्व्यपदेशस्तु मनसश्चविज्ञानमितिमनोविज्ञानयोःकार्यकारणव्यपदेशस्तु । भाक्तःस्यात् इंद्रियावबोधरूपभागविषयःस्यात् । चराचरात्मकसर्वविषयेष्वपिमनोभावरूपेणालोचनेनावबोधस्य भावित्वात् उत्पद्यमानत्वादिति । समासांतर्गतं तद्भावंप्रतिविशेषणस्यापिचराचरव्यपाश्रयत्वस्यपृथगुपादानंतु यद्यपि तद्व्यपदेशः मनोविज्ञानशब्दरूपोव्यपदेशः चराचरव्यपाश्रयः टीकोक्तरीत्याराशिद्वयविषयः । तत्वयोरचरत्वात् । इंद्रि

प्र० द्भावभावित्वादितिस्यादित्याशंक्याह ॥ समासेति ॥ अन्येत्विति ॥ तन्मते "अंतरे"त्येकंसूत्रमेकमधिकरणं । चराचरेत्यधिकरणांतरं ।

प्र० तत्राद्यार्थभाष्याद्युक्तमनूद्यनिराह ॥ आत्मनइति ॥ आम्नानक्रममात्रमिति ॥ नतूत्पत्तिक्रमः विवक्षितइत्यन्वयः । कुतइत्यतोमध्ये हेतुमाह ॥ अर्थेति ॥ कारणोत्पत्त्यनंतरमेवकार्योदयादितिभावः । भूतादौ भूतानांकारणेऽहंतत्वइत्यर्थः ॥ लिंगैरिति ॥ मनस्तत्वादा

यावबोधयोस्तुचंचलत्वेनचरत्वात् । तथापीहभागविषयः । इतियोजनांतरप्रदर्शनार्थमितिद्रष्टव्यं । अन्येतु । "आत्मनआकाश"इतितैत्तिरीयश्रुतिः "एतस्माज्जायतेप्राणोमनःसर्वेंद्रियाणिच । खंवायुर्ज्योतिरापःपृथिवीविश्वस्यधारिणी"त्याथर्वणश्रुतिविरुद्धा । अत्रह्यात्मानंभूतानिचअंतरा तदंतरालेइंद्रियमनसीआत्मजन्यत्वेनाम्नायेते । तस्मात्तैत्तिरीयोक्तक्रमभंगइतिप्राप्ते करणानां "अन्नमयंहिसोम्यमन"इत्यादिश्रुत्याभौतिकत्वेनभूतानंतरमेवोत्पत्तिः । आथर्वणेचाम्नानक्रममात्रं । अर्थक्रमस्यबलीयस्त्वात् । नतूत्पत्तिक्रमः । तस्माद्भूतोत्पत्तिक्रमभंगोनेतिसिद्धांतइत्याहुः । तन्न । "मनस्तत्वाच्चखादिक"मितिभाष्योक्तस्मृत्या तथा आकाशादूर्ध्वंतन्मात्राणिभूतादौ लीयते । भूतादिर्महतिलीयते । महानव्यक्तेलीयतइत्यादिलिंगैः । तथा आथर्वणएव "खंवायु"रित्याद्युत्तरवाक्यइव "एतस्माज्जायतेप्राण"इत्यादावपिपाठक्रमेणचमनआद्यनंतरमेवाकाशोत्पत्तेःसिद्धेः । अन्नमयत्वश्रुतिस्तु "अन्नमशितंत्रेधाविधीयत"इतिवाक्यशेषात्पार्थिवेनान्नेनमनसउपचयमाह । नतुपृथिवीभूतान्मनस्तत्वोत्पत्तिं । किं

प्र०काशजन्मदर्शनंस्मार्तंलिंगं । अहंतत्वस्यभूतानांचमध्येतन्मात्राणांशब्दादीनांलयदर्शनंश्रौतंलिंगं । आदिपदोपात्तमेवलिंगांतरं । तैरित्यर्थः । सूत्राक्षरार्थस्त्वाह ॥ किंचेति ॥ "सूत्रे आत्मानंभूतानिचेतियोज्यं । आत्मानंभूतानिचांतरा । अंतराले । आत्मनोभूतानांचमध्यइ

प्र० त्यर्थः । विज्ञानमनसी इंद्रियमनस्त्वे । आम्नायेते । क्रमेणतयोरपिसृष्टिरंगीकार्या । कुतः एतस्माज्जायतेप्राणोमनस्सर्वेंद्रियाणिच । खंवा
युरितितल्लिंगात् । अतस्तैत्तिरीयोक्तभूतोत्पत्तिक्रमभंगइतिचेन्न । अविशेषात् । प्रथमंप्राणादिकंजायतेपश्चात्खादिकमित्याथर्वणेविशेषाश्र
वणा"दितिभाष्येऽविशेषादित्यस्यार्थउक्तः । भामत्यांतु "विशिष्यतेभिद्यतेभज्यतइतियावदितिविशेषोभंगः । अविशेषात् उत्पत्तिक्रमभंगा
भावा"दित्यर्थउक्तः । तत्रसर्वत्राप्यस्वारस्यमाह ॥ **आथर्वणइति** ॥ उपादानं नयुक्तमित्यन्वयः । विज्ञानशब्देनैवयोगेनकथंचित्प्रामा
चाथर्वणआत्मनोभूतानांचांतरालेप्राणस्यापिश्रुतत्वात्सूत्रेतत्त्यागेनविज्ञानमनसोरेवोपादानं तथा "विज्ञानतत्वंमहत"इ
त्यादिषुविज्ञानतत्वेरूढस्यविज्ञानशब्दस्य "विज्ञायतेनेने"तिभामत्युक्तमिंद्रियेयौगिकत्वं तथायौगिकेनविज्ञानशब्देनैवमन
सोप्युक्तिसंभवेनसूत्रेपृथङ्मनःशब्दः तथा मद्रीत्या "विज्ञानमनसी"इत्यस्यद्वितीयांतस्यविज्ञानमनसीअंतराविनेत्यनध्या
हारेणैवान्वयसंभवे अंतरेत्यस्याध्याहृताभ्यामात्मानंभूतानिचेत्याभ्यांद्वितीयांताभ्यां विज्ञानमनसीइत्यस्यप्रथमांतस्याध्याहृ
तेनाम्नायेतेइत्यनेनान्वयः तथा क्रमस्यांतरालार्थेनांतराशब्देनैवोक्तयापुनःसूत्रेक्रमशब्दः तथा क्रमशब्दस्यपूर्वसूत्रप्रकृतलय
क्रमपरत्वत्यागेनसृष्टिक्रमपरत्वं तथा अस्याधिकरणस्यसृष्टिक्रमप्रकरणादुत्कर्षः तथासौत्राविशेषशब्दस्यभामत्यांक्लेशेनोक्त
प्र० ण्यस्यापिग्रहणंभविष्यतीत्यतोयोगएवायमयुक्तोस्यरूढत्वादित्याह ॥ **तथाविज्ञानसत्वमिति** ॥ तथाशब्दस्समुच्चये । इत्यादिषु भाष्यो
क्तस्मृत्यादिषु । "विज्ञायतेऽनेनेतिव्युत्पत्त्याविज्ञानशब्देनेंद्रियाणिबुद्धिंचब्रूम"इतिभामत्युक्तमित्यर्थः ॥ **मनश्शब्दइति** ॥ युक्तइत्यन्वयः
॥ **सौत्राविशेषशब्दस्येति** ॥ अविशेषादित्यत्रप्रतियोगिवाचिविशेषशब्दस्येत्यर्थः । सौत्रविशेषेत्येववापाठः ॥ **क्लेशेनेति** ॥ "विशिष्यते

प्र० भिद्यते भज्यतइतियाव"दितिक्केशेनेत्यर्थः ॥ क्रमभंगेति ॥ भूतोत्पत्तिक्रमभंगपरत्वमित्यर्थः । एतेन "भूतप्राणयोरंतरालेविज्ञानमनसी विज्ञानसाधनत्वेनविज्ञानशब्दितेंद्रियमनसीअपिक्रमेणोत्पद्येते । कुतः । तल्लिंगात् तैत्तिरीयश्रुतिप्रसिद्धक्रमकसादिभूतैस्सहपाठरूपाल्लिंगा दितिचेन्न । एतस्माज्जायतइत्यनेनप्राणादिपृथिव्यंतानांसर्वेषामव्यवधानेनब्रह्मजत्वप्रतिपादनस्याविशिष्टत्वात्सएवविधेयोनक्रम"इतिकेषांचि त्सूत्रार्थोपिप्रत्युक्तः । अनेकाध्याहारादिदोषात् ॥ ७ ॥ अंतराविज्ञानाधिकरणं ॥ ९ ॥

क्रमभंगपरत्वंचनयुक्तं ॥ ७ ॥ अंतराविज्ञानाधिकरणं ॥ ९ ॥

॥ ॐनात्माश्रुतेर्नित्यत्वाच्चताभ्यःॐ ॥ एवंब्रह्मान्यस्यसर्वस्यव्युत्क्रमेणलयेश्रुत्योक्ते तर्हिब्रह्मणोपितथैवसोस्त्वितिशंकोदया त्संगतिः। अत्रपूर्वोक्तंब्रह्मणस्सर्वस्रष्टृत्वादिकंब्रह्मणोलयश्रुतिविरुद्धंनवेतिचिंता । तदर्थं "सइदंसर्वंविलाप्यांतस्तमसिनिलीन" इतिब्रह्मणोलयश्रुतिःकिंदेहनाशरूपविनाशपरोतापिहितत्वपरेति । तदर्थंनिलीनशब्दस्यविनाशरूपार्थत्यागेनापिहितत्वपरत्वे किंज्ञापकंनास्त्युतास्तीति । असंभवस्त्वित्यत्रब्रह्मणोनुत्पत्तिरुक्ता। अत्रत्वविनाशइतिभेदः । न्यायविवरणोक्तांलयश्रुत्यनुग्राहि कांपूर्वपक्षयुक्तिमाह ॥ चेतनत्वादिति[११४।२३] ॥ असंभवस्त्वित्यधिकरणन्यायेनगतार्थत्वंनिरस्यति ॥ नचवक्तव्यमिति[११४।२४] ॥ अन्येतु

प्र० ॥ ॐनात्माश्रुतेःॐ ॥ लयश्रुतीति ॥ "तमसिनिलीन"इतिश्रुतीत्यग्रेव्यक्तं ॥ अपिहितत्वेति ॥ अंतर्हितत्वेत्यर्थः ॥ ज्ञापकमिति ॥ समाख्यादिरूपमित्यर्थः ॥ इतिभेदइति ॥ आर्थिकपौनरुक्त्यनिरासेनगतार्थत्वंनिरस्यतीत्यग्रेव्यक्तं ॥ अन्येत्विति ॥ तन्मते "चरा

प्र० चरे"त्यस्याधिकरणांतरत्वात्तस्यच "नात्मे"त्यस्यचदूषणोक्तिसौकर्याययुगपदुभयार्थमनुवदति ॥ **चरेति** ॥ चराचरेत्यारभ्यापादपरिसमा
प्तिजीवविचारः । तत्र "चराचरे"ति, "नात्मे"तिचद्वयमपिजीवस्योत्पत्तिविनाशनिरासपरं । चैत्रादिनामधेयंतावज्जीवात्मनोनशरीरस्य ।
तन्नाम्नेशरीरायश्राद्धादिकरणानुपपत्तेः । तथाचचैत्रोजातोमृतइतिव्यपदेशोजीवस्यैव । तथाजातकर्मवैश्वानरेष्ट्यादिकरणमपिजीवजननिनि
मित्तमेवेतितदन्यथानुपपत्त्याजीवउत्पद्यतइतिविज्ञायतइत्यर्थः । तद्व्यपदेशः जीवजननादिव्यपदेशः । चराचरव्यपाश्रयः जंगमस्थावरश

चराचरेत्यधिकरणे चैत्रोजातइतिव्यपदेशाज्जातकर्मादिविधानाच्चप्रतिशरीरंजीवउत्प
द्यतइतिप्राप्ते प्रतिशरीरंजीवोत्पत्तौशास्त्रोक्तस्वर्गादिफलायोगाज्जन्मव्यपदेशोजायमान
स्थावरजंगमात्मकशरीरसंबंधाद्भाक्तोगौणइतिसिद्धांतः । नात्मेत्यधिकरणेतु "सर्व
एतआत्मानोव्युच्चरंती"त्यादिश्रुत्यावियदादिवत्प्रतिसर्गंब्रह्मणोजीवउत्पद्यतइतिप्राप्ते

प्र० रीरविषयएवमुख्यस्सन्जीवेभाक्तः गौणः । देहसंयोगादिनिमित्तकः । कुतः । तद्भावभावित्वात् देहप्रादुर्भावतिरोभावयोर्भावेनजन्ममर
णव्यपदेशभावादितिसूत्रार्थंहृदिकृत्वागौणतायांबीजंवदन्नेवसिद्धांतमनुवदति ॥ **प्रतिशरीरमिति** ॥ **वियदादिवदिति** ॥ पूर्वत्रहिशरी
राश्रयौजीवस्योत्पत्तिविनाशौनस्तइत्युक्तं । वियदादिवत्स्वरूपेणैवस्वर्गादौजीवउत्पद्यते । तावतापिकल्पमात्रावस्थायित्वेनस्वर्गादिभोगसंभ ॥ ९४९ ॥
वादित्यर्थः । आत्माजीवोनोत्पद्यते आकाशाद्युत्पत्तिप्रकरणेऽस्योत्पत्तेरश्रवणात् । "अविनाशीवाअरेऽयमात्मे"त्यादिश्रुतिभ्योस्यनित्यत्वात् ।

प्र० चशब्दोक्ताजत्वाविकारत्वब्रह्मतादात्म्यादिभ्यश्चेतिसूत्रार्थंहृदिकृत्वाभामत्युक्तंसिद्धांतप्रमेयमन्वाह ॥ **तत्सृष्ट्वेति** ॥ **भेदेति** ॥ यदिभिद्ये
रन्जीवास्तदापरंवियदादिवदुत्पद्येरन् । नचैवं । भेदस्यैवौपाधिकत्वादित्यर्थः ॥ **दंडापूपनयेति** ॥ कैमुत्यन्यायहतस्येत्यर्थः । नित्यब्रह्म
भेदायोगादित्यादिनायदास्वरूपोत्पत्तिरेववार्यतेतदादेहोत्पत्त्याश्रयोत्पत्तिशंकायाःकावकाशइत्यर्थः । यद्वा सर्गादावुत्पत्त्यभावोक्तौमध्येमध्ये
जन्माभावःकैमुत्यसिद्धइत्यर्थः ॥ **देहात्मेति** ॥ देहात्मभेदासिद्धौदेहोत्पत्त्याश्रयोजन्मव्यपदेशोजीवेभाक्तइत्युक्त्यनुपपत्तेः । तद्भेदसिद्धौ

तत्सृष्ट्वातदेवानुप्राविश"दित्यादिश्रुत्यासृष्टानुप्रविष्टब्रह्मरूपस्यजीवस्यनित्यब्रह्मभेदायोगात्कृतहानादिप्रसंगाच्चनो
त्पत्तिरितिसिद्धांतइत्याहुः । तन्न । द्वितीयसिद्धांतेनदंडापूपनयहतस्याद्यपूर्वपक्षस्यानुदयात् । तद्व्यपदेशइतिसूत्र
स्थस्य "विज्ञानमनसी"इतिपूर्वसूत्रप्रकृतविज्ञानमनःक्रमपरामर्शितच्छब्दस्याप्रकृतजीवजन्मविषयत्वायोगाच्च ।
त्वद्रीत्यादेहात्मभेदसाधकेन "एकआत्मनःशरीरेभावा"दित्यधिकरणेनाद्यस्यगतार्थत्वाच्च । चैत्रोजातइत्यादेस्त्व
न्मतेगौरोहमित्यादिवदध्यासत्वेनसूत्रेगौणत्वोक्त्ययोगाच्च । द्वितीये "तत्सृष्ट्वातदेवानुप्राविश"दितिश्रुत्यासृष्टा

प्र० चगृहोत्पत्तिविनाशयोर्देवदत्तइवशरीरजन्ममरणयोर्जीवेमुख्यत्वशंकानुदयात् । तद्भेदस्यचतृतीये एके लोकायतिकाः आत्मनोसत्त्वंमन्यंते ।
शरीरेसत्येवप्राणचेष्टाद्यात्मधर्माणांभावादितिपूर्वपक्षयित्वा "व्यतिरेकस्तद्भावभावित्वा"दित्यत्रजीवोदेहव्यतिरिक्तइत्यादिनात्वयातस्याधिकर
णस्यदेहात्मभेदसाधकत्वेनव्याख्यानात्तेनैवेहपूर्वपक्षस्यनिरासात् "चराचरे"तिसूत्रंव्यर्थमित्यर्थः ॥ **अध्यासत्वेनेति** ॥ अतएवभामत्यां
"एतच्चलौकिकव्यपदेशस्याभ्रांतिमूलत्वमभ्युपेत्याधिकरणं । उक्तात्वध्यासभाष्येभ्रांतिमूलकते"त्युक्तमितिभावः । द्वितीये नात्मेत्यत्र ।

प्र० जीवशब्देनकिंप्रवेशविशिष्टश्चिन्मात्रंवेतिविकल्प्यक्रमेणनिराह ॥ **अनुप्रवेशविशिष्टस्येति** ॥ सिद्धांतेपि अपरिहाराच्चेत्यन्वयः । उक्तत्वेन त्वयैवेत्यर्थः । मतांतरेतु सर्वशब्दानामाकाशादिशरीरकब्रह्मवाचित्वेगगनादौव्युत्पत्तिसिद्धोव्यपदेशोनस्यादितिशंकानिरासार्थं “चराचरे” तिसूत्रं । चराचरव्यपाश्रयस्तु निखिलजंगमस्थावरव्यपाश्रयस्तु । तत्तच्छब्दव्यपदेशोभाक्तः वाच्यैकदेशेभज्यते । कुतः । तद्भावभावित्वात् तस्यसर्वप्रकारिणोब्रह्मणोभावेनप्रतीतिभावेनभावित्वात् । तत्पर्यवसानस्येदानींतत्प्रतीतेरभावेनतत्रव्युत्पत्त्यभावोपपत्तेरितिवा चराचरव्यपाश्रयस्तद्व्यपदेशः चराचरभाविशब्दोब्रह्मण्यभाक्तः मुख्यएव । कुतः । तद्भावभावित्वात् तद्भावेनब्रह्मानुप्रवेशेनभावित्वात् । सर्वशब्दानांब्रह्मा

नुप्रवेशविशिष्टस्यैवजीवत्वेनतस्यनित्यत्वोक्त्ययोगाच्च । चिन्मात्रानादित्वंतु “असंभवस्त्वि”त्यनेनैवसिद्धं सिद्धांतेपिसाद्यंतःकरणावच्छिन्नस्यकर्तुस्सादित्वेनकृतहान्याद्यापातस्यापरिहाराच्च । द्युभ्वाद्यधिकरणन्यायेनसौत्रात्मशब्दस्यपरमात्मन्येवमुख्यत्वेनद्वितीयस्यभाष्योक्तरीत्याऽवश्यंविचार्यब्रह्मलयविषयतायाएवोचितत्वाच्च । नकर्मेत्यत्रसंसारानादित्वस्योक्तत्वेनद्वितीयस्यतेनगतार्थत्वाच्च । एतेन “नात्मे”त्यस्यजीवानुत्पत्तिपरतांवदतांकेषांचित्पक्षोपिनिरस्तः ॥७॥ आत्माधिकरणं ॥१०॥

प्र० नुप्रवेशानंतरमेवशब्दानांतत्तद्वाचकत्वादित्यर्थइतिवाव्याख्यातं । तत्रतद्व्यपदेशइतितच्छब्दस्याप्रकृतशब्दपरत्वायोगइत्युक्तप्रायं । ब्रह्मणीत्यध्याहारः । भाक्तशब्दस्यप्रसिद्धगौणार्थत्वत्यागः । तद्भावभावित्वादितिहेत्वर्थस्तुप्रथमाध्यायांतेदूषितः । अभाक्तत्वमित्येतदपितत्रैवनिरस्तमितितदुपेक्ष्य “नात्मे”त्यधिकरणप्रमेयंनिराह ॥ **एतेनेति** ॥ नकर्माविभागादितिचेदित्यत्रसंसारानादित्वस्यश्रीभाष्यादावुक्तत्वेनास्यगतार्थत्वेनेत्यर्थः ॥ ७ ॥ **आत्माधिकरणं** ॥ १० ॥

प्र० ॥ ॐज्ञोतएवॐ ॥ विषयादिपरटीकांविवृण्वन्पूर्वोत्तरपक्षटीकासूचितांचिंतापरंपरामाह ॥ अत्रेति ॥ उक्तं पूर्वोक्तमित्यर्थः । अत्रटीकायांसूत्राद्यनुरोधेनजीवस्यधर्मिताप्रदर्शनेपिफलस्यपादार्थस्याध्यायार्थस्यचद्योतनाय “ब्रह्मणस्स्रष्टृत्व”मित्यादिकमुक्तं । एवंपूर्वत्रोत्तरत्रच ॥ ॐज्ञोतएवॐ ॥ एवंसूचीकटाहन्यायेनाल्पमधिभूतादिविचारंकृत्वेदानीमापादसमाप्तिबहुर्जीवविचारःक्रियतइतिसंगतिमाह ॥ [११५।८] एवमिति ॥ अत्रोक्तंब्रह्मणस्सर्वस्रष्टृत्वंजीवानुत्पत्तिश्रुतिविरुद्धंनवेतिचिंता । तदर्थं “सर्वएतआत्मानोव्युच्चरंती”तिजीवोत्पत्तिश्रुतिःकारणाभावादियुक्त्यनुगृहीतयाजीवनित्यत्वश्रुत्याबाधितोतनेति । तदर्थमुत्पत्त्यनुत्पत्तिश्रुतीकिमेकरूपोत्पत्तिविषयेकिंवोत्पत्तिश्रुतिःपराधीनविशेषावाप्तिपरा अनुत्पत्तिश्रुतिस्तुस्वरूपोत्पत्तिनिषेधपरेति । पूर्वपक्षेजन्मादिसूत्राक्षेपायभाष्योक्तनित्यत्वश्रुतेरनित्यत्वश्रुतितःप्राबल्यार्थंन्यायविवरणोक्तांपूर्वपक्षयुक्तिमाह ॥ [११५।१२] अनादित्वादिति ॥ उत्पत्तेरेवा [११५।१२] भावप्रसंगादिति ॥ श्रौतप्रागभावशून्यत्वंजीवेनचेद्धटादेरप्युत्पत्तिर्नस्यात् । प्रमितत्वाविशेषादित्यर्थः । यद्वाप्रागभावशून्यत्वमनुत्पत्तितोन्यन्नचेत्प्रागभावउत्पत्तितोन्योनस्यात् । तथाचप्रागभावहीनस्यात्मलाभरूपोत्पत्तिरेवनस्यादित्यर्थः ॥ [११५।१३] एवंभूतानामपीति ॥ स्वरूपोत्पत्तिमत्त्वेनाश्रुतानांप्रत्युतानुत्पत्तिमत्त्वेनश्रुतानामपीत्यर्थः ॥ [११५।१४] असंप्रतिपत्तेरिति ॥ उत्पत्तिमतांभूताकाशादीनांकारणशून्यत्वेकारणशून्यानांचाव्याकृताकाशादीनामुत्पत्तिमत्त्वेऽसंप्रतिपत्तेरित्यर्थः । ननु जीवस्य

प्र० ध्येयं । टीकाक्षरार्थमाह ॥ उत्पत्तेरिति ॥ प्रागभावशून्यत्वं जीवे इतिपदच्छेदः ॥ प्रागभावहीनस्येति ॥ उत्पत्तेरेवप्रागभावत्वेघटादेरुत्पत्तितःपूर्वंप्रागभावाभावादितिभावः । “नचाकाशादीना”मित्यादिटीकातात्पर्यंशंकोत्तराभ्यांव्यनक्ति ॥ नन्विति ॥ अनुत्पत्तिश्रुतिः

प्र० नित्योनित्यानामित्यादिश्रुतिरपीत्यर्थः । परमते "अंतरे"त्यत्रोक्तोदोषःस्वमतेनेत्याह ॥ जीवार्थमिति ॥ अन्येत्विति ॥ तन्मते "ज्ञोत एवे"त्येकंसूत्रमेकमधिकरणं । वैशेषिकप्रक्रिययाजीवस्यजडरूपस्यागंतुकज्ञानवत्त्वनिरासकं । युक्तेश्चेतिसूत्रंमतद्वयेपिनास्त्येव । तत्रऽन्या

पराधीनविशेषावाप्तिरूपोत्पत्तिर्वियदधिकरणन्यायसिद्धा । स्वरूपेणोत्पत्तिस्तुनेष्टेतिव्यर्थमिदमितिचेन्न । उत्पत्तिश्रुतिः पराधीनविशेषावाप्तिरूपोत्पत्तिपराचेदनुत्पत्तिश्रुतिरपिब्रह्मणीवजीववियदादावपितदभावपरा । अनेकार्थत्वस्यान्याय्यत्वादित्यतीतसर्वाक्षेपेणपूर्वपक्षिते ब्रह्मणिपराधीनविशेषावाप्तिरूपोत्पत्तिश्रुतिर्नास्ति । जीवादौत्वस्तीतितदविरोधायानेकार्थत्वंन्याय्यमितीह "युक्तेश्चे"तिसूत्रएवोक्तेः । अतएव "असंप्रतिपत्ते"रितिटीकायांसर्वमाक्षिप्तं । इहजीवमात्रउक्तादेहयोगरूपोत्पत्तिः"एतेने"त्यत्रमुख्यप्राणेविशेषयुक्त्याऽऽक्षिप्यसमाहितेतिनतेनास्यगतार्थता । जीवार्थप्रकरणांतरस्यकृतत्वादुत्पत्तिश्रुत्यविरोधोप्ययंलयश्रुत्यविरोधानंतरमुक्तः । अन्येतु । आत्मनोज्ञानमागंतुकं । इंद्रियसंप्रयोगादिहेत्वंतरानुविधानात् । घटस्यलौहित्यवदितिप्राप्ते आत्माज्ञानरूपः । अतएव अनुत्पत्तेरेव । स्वयंज्योतिरित्यादिश्रुतेश्च । इंद्रियसंप्रयोगादिस्तुविषयविशेषपरिच्छेदार्थइतिसिद्धांतइत्याहुः । तन्न । युक्त्यविरोधकीर्तनस्यपादासंगतेः ।

प्र० वर्त्यशंकापूर्वसूत्रार्थमनूद्यनिराह ॥ आत्मनइति ॥ परिच्छेदार्थइति ॥ वृत्त्युपजननार्थइत्यर्थः ॥ युक्त्यविरोधेति ॥ एतच्चयथाश्रुतभाष्यभामत्यभिप्रायेण । कल्पतरौतु "आत्मैवास्यज्योतिरित्यादिश्रुतीनांपश्यंश्चक्षुःशृण्वन्श्रोत्रमित्यादिभिर्जीवस्यागंतुकज्ञानत्वादिनीभिर्विरो ॥ ९५१ ॥

प्र० धःपरिह्रियत"इत्युक्तेः । यद्वा "पश्य"न्नित्यादिश्रुतेरागंतुकज्ञानवत्त्वाप्रतीतेरितिभावः । तत्पक्षेदोषांतरमाह ॥ सौत्रेणेति ॥ ज्ञाअवबोधनइत्यस्मात् "इगुपधज्ञाप्रीकिरःक"इतिकर्तरिकप्रत्ययांतत्वेनानुशिष्टत्वात्, "धीरोमनीषीज्ञःप्राज्ञ"इत्यमरोक्तेश्चेतिभावः । ननु परभाष्ये "अतएवे"तिसौत्रंपदमनूद्य "यस्मान्नोत्पद्यतेपरमेवब्रह्माविकृतमुपाधिसंपर्काज्जीवभावेनावतिष्ठत"इत्याद्युक्तमित्यतआह ॥ ज्ञानरूपेति ॥ मतांतरंत्वग्रेनिरसिष्यते ॥ ७ ॥ ज्ञाधिकरणं ॥ ११ ॥

सौत्रेणज्ञातृवाचिनाज्ञशब्देनज्ञानत्वानुक्तेश्च । अंतःकरणावच्छिन्नस्यज्ञातृत्वेपितस्यजन्यत्वेनानुत्पत्तिज्ञत्वयोरैकाधिकरण्यासिद्धेः । अनुत्पत्तिमात्रेणज्ञत्वासिद्धेश्च । ज्ञानरूपब्रह्माभेदस्यचाप्रकृतत्वेनसौत्रेणातःशब्देनानुक्तेः ॥ ज्ञाधिकरणं ॥ ११ ॥

॥ ॐउत्क्रांतिगत्यागतीनांॐ ॥ जीवेधर्मिण्युत्पत्त्यनुत्पत्तीचिंतिते । अथतद्धर्मेपरिमाणेऽणुत्वमहत्त्वेचिंत्येतेइतिसंगतिः । अत्रब्रह्मणिश्रुतिसमन्वयसिद्ध्यर्थंजीवस्याणुत्वोत्क्रमणादिश्रुतिःकिंसर्वदेहसंबद्धस्पर्शादिज्ञानरूपयुक्त्यनुगृहीतया "व्याप्ताह्यात्मान"इतिव्याप्तिश्रुत्याबाधितोतनेतिचिंता । तदर्थंव्याप्तिश्रुतिःकिंजीवविषयासर्वदेहसंबद्धस्पर्शादिज्ञानंचाणुत्वेनोपपद्यते उतव्याप्तिश्रुतिरीश्वरविषया सर्वदेहसंबद्धस्पर्शादिज्ञानंचजीवस्याणुत्वेप्यंशव्याप्त्यादिनोपपद्यतइति । तदर्थंव्याप्तिश्रुतौश्रुतं

प्र० ॥ ॐउत्क्रांतिगत्यागतीनांॐ ॥ अत्रजन्मादिसूत्राक्षेपायोगादाह ॥ श्रुतिसमन्वयसिद्ध्यर्थमिति ॥ अणुत्वेति ॥ "अणुर्ह्येषआत्मे"त्यणुत्वश्रुतिः । "सोस्माच्छरीरादुत्क्रम्यामुंलोकमभिगच्छती"त्याद्युत्क्रमणगत्यादिश्रुतिः ॥ सर्वदेहसंबद्धेति ॥ कमनीयतनयाद्यालिंगनादिनाजातसर्वांगीणस्पर्शादिज्ञानेत्यर्थः । युक्तेरपिनिरवकाशत्वसावकाशत्वचिंतामाह ॥ नोपपद्यतउपपद्यतइति ॥ युक्तेरप्युपपादकाभा

प्र० वभावचिंतामाह ॥ नयुक्तंयुक्तमिति ॥ अत्राद्या "नाणुतरच्छ्रुते"रितिसूत्रांशसूचिता । अन्येतु "अविरोधश्चंदनव"दित्यादिसूत्रसू

बहुत्वंभिन्नाश्रितमित्युत्सर्गन्यायस्यापवादकंनास्त्यंशव्याप्त्या दिकंचनयुक्तमुतसामान्यन्यायस्यापवादकमस्त्यंशव्याप्त्यादि कंचंदनवद्युक्तमिति । पूर्वपक्ष्यभिमतव्याप्तिश्रुतेःप्राबल्याय "सर्वदेहस्पर्शज्ञाना"दितिन्यायविवरणोक्तांपूर्वपक्षयुक्तिमाह॥

११५।२६ ११६।६

सर्वदेहेति ॥ सिद्धांतमाह॥ सिद्धांतयदिति ॥ एतेनचैत्रभो गार्थस्यांकुरादेश्चैत्रादृष्टजन्यत्वादात्मसमवेतस्यचादृष्टस्यसाक्षा दंकुराद्यसंबंधादात्मनोंकुरसंबंधावश्यंभावाद्विभुत्वमितितार्कि कोक्तंनिरस्तं। चैत्रभोगाहेतोरप्यंकुरादेरात्मद्वारातदृष्टसंबंधेपि तदजन्यत्वेनात्मद्वारकसंबंधस्यातंत्रतया प्रतियोग्यभाववाच्यवा चकज्ञानज्ञेयादाविवादृष्टकार्ययोरपिसंबंधांतरस्यैववक्तव्यत्वात् ।

प्र० चिते । अंशव्याप्त्यादीत्यादिपदेनचिद्गुणव्याप्तेर्ग्राह्यत्वादपवादकमधिकारस्वशब्दोन्मानत्वरूपं । व्यक्तोत्रफलपलिभावः । प्रतियोग्यभावा

प्र० दाविवक्षप्रस्वरूपसंबंधोनास्तीत्यतआह ॥ अस्तिहीति॥ नप्रभानिष्ठमिति ॥ पार्थिवत्रसरेण्वादिनिष्ठं । प्रभायाश्शुक्लभास्वररूपत्वादि
अस्तिहिकारीर्यद्दष्टस्यवृष्ट्यासहतदुद्देशेनविहितक्रियाजन्यत्वरूपःसंबंधः ॥ प्रसंगाच्चिं[११६।१९]त्यंतइति ॥ प्रस्तुतस्याणुत्वस्यो
त्क्रांतिमात्रेणसिद्धेरणुत्वसाधकाधिकरणमध्येस्वातंत्र्यपारतंत्र्यादिचिंताप्रासंगिकीत्यर्थः । "यस्ययोगेदुहिताजायतेदिवउभे
अहनीसुदिनेविवस्वतः" । इत्युत्तरार्धे ऐतरेयभाष्योक्तरीत्या "यस्ययोग"इत्यनेनशरीराख्यरथस्यभगवदर्पणरूपःसंबंधः,
"विवस्वत"इत्यनेनभगवान्, "दिवोदुहिते"त्यनेनपरोक्षज्ञानं, "सुदिनेअहनी"इत्यनेनजीवन्मुक्तिमुक्तीविवक्षितेइत्यभिप्रे
त्यव्याचष्टे ॥ [११६।२२]यत्संबंधादिति ॥ घटादिरूपस्यै[११७।१३]वतत्रप्रतीयमानत्वादिति ॥ नीलघटादिसंबद्धबालार्कप्रभादौप्रतीयमा
नमारुण्यादिकंतुन्यायमतेपिनप्रभानिष्ठमितिभावः । किंच "गुणादिपंचकस्यनिर्गुणत्वनिष्क्रियत्वादिपरिभाषानादरणीये"
तिटीकाकारैरन्यत्रोक्तत्वाद्गुणेषुचतुर्विंशतिसंख्यावत् समवायादावेकत्वसंख्यावत् रूपेस्पर्शात्पृथक्त्ववत् जातेःसर्वगतत्वेन
महत्त्ववच्चप्रभायागुणत्वेपितत्ररूपचलनादिकमप्यस्तु । अतएवदीपेगच्छतिप्रभायाअपिगतिदर्शनात्क्रियावत्त्वेनालोकस्यद्र
व्यत्वमितिनिरस्तं । घटेगच्छतितद्रूपस्यापिगतेः । अन्यथाऽयेनेचलत्यचलतःस्थाणोरिवरूपस्यतत्रैवावस्थितिःस्यादित्यपिद्र
ष्टव्यं ॥ [११७।१४]द्रव्यत्वसाधकताविवादादिति ॥ उत्तराधिकरणेगुणस्यापिगंधस्यद्रव्यंविहायापिवृत्तेर्वक्ष्यमाणत्वादितिभावः ॥
[११७।१४]तदनुविधानादिनेति ॥ नचछायायांव्यभिचारः । भित्त्यादावचलेपिछायायाःसूर्यप्रातिलोम्येनचलनात् । लोकेमाणिक्य
प्र० तिभावः । अन्यत्र मिथ्यात्वानुमानखंडनटीकायां । विवृतमेतत्तत्रैवभावप्रकाशिकायां ॥ नचछायायामिति ॥ तस्यास्तमोविशेषत्वा

प्र० त्तमसोद्रव्यत्वस्यतर्कतांडवेसाधनादितिभावः । स्वात्मनाचोत्तरयोरित्यत्रस्वात्मपदकृत्यमाह ॥ शुभमादत्तइति ॥ छ ॥ उत्क्रांत्य धिकरणं ॥ १२ ॥

प्रभादौतद्गुणत्वव्यवहारः, "तेजोबलैश्वर्यमहावबोधसद्वीर्यशक्त्यादिगुणैकराशि"रितिस्मार्तस्तेजसिगुणत्वव्यवहारश्चगुणत्वे प्रमाणमितिदर्शयितुमादिशब्दः । अतएवटीकाकारैः "शुद्धानंदोरुसंविद्युती"तिद्युतेर्गुणत्वमुक्तं ॥ [११७।१६] कारणांतरदर्शना दिति ॥ तदैवतत्रत्यतैजसपरमाणवएवद्व्यणुकादिप्रक्रमेणालोकमंडलमारभंतइत्यत्रमानाभावादितिभावः ॥ [११७।१६] अप्रतीतिप्रसं गादिति ॥ अकार्यद्रव्यत्वेपरमाणुत्वापातेनाप्रत्यक्षत्वप्रसंगादित्यर्थः ॥ [११७।१७] तथासतिप्रदीपानुविधानानुपपत्तेरिति ॥ उप लक्षणंचैतत् । निबिडावयवेंद्रनीलादाववयवविकिरणस्यासंभावितत्वात्तत्रप्रभानस्यादित्यपिद्रष्टव्यं ॥ [११०।१८] बाहुल्यंस्यादिति ॥ आद्यक्षणइवद्वितीयादिक्षणेष्वप्यवयवानांविकिरणस्यन्याय्यत्वादितिभावः । पक्षांतरमाह ॥ [११७।१९] अप्रधानसाम्येनवेति ॥ शुभमादत्तइत्यर्थकेनश्रुतिसूत्रस्थेनस्वात्मशब्देनेश्वरस्योत्क्रांत्यादिनाजीववन्नदुःखमितिदर्शितं ॥छ॥ उत्क्रांत्यधिकरणं ॥१२॥

॥ ॐव्यतिरेकोगंधवत्तथाचदर्शयतिॐ ॥ यदिजीवोणुस्तर्हियोगिनोबहुरूपत्वायोगइतिपूर्वाक्षेपेणपूर्वपक्षोत्थानात्संगतिः। अत्रजीवस्यबहुरूपत्वश्रुतिःकिंनिरवयवत्वयुक्त्यनुगृहीतयैकरूपत्वश्रुत्याबाधितोतनेतिचिंता । [अत्रश्रुतिसमन्वयेनोक्तंवि ष्णोःसर्वस्रष्टृत्वादिकमयुक्तंनवेतिचिंता । तदर्थंश्रुतिरप्रमाणंनवेति । तदर्थंजीवबहुरूपत्वश्रु तिःकिंनिरवयवत्वयुक्त्यनुगृहीतयैकरूपत्वश्रुत्याबाधितोतनेति]तदर्थंभिन्नांशरहितस्यबहुरूप त्वंनघटत उतयोगसामर्थ्याद्घटतइति । तदर्थंयोगिनोऽघटितघटनाशक्तिमत्त्वेकिमीश्वरत्वमा पद्यतउतनेति । न्यायविवरणोक्तांपूर्वपक्षयुक्तिमाह ॥ [११८।१२] तथासतीति ॥ अत्रसूत्रेगंधवच्छ ब्देनात्यंतभेदहीनस्यापिव्यतिरेकसंभावकोदृष्टांतउक्तः । दर्शयतिचशब्दाभ्यांत्वत्यंताभिन्न स्यापिविभागरूपेव्यतिरेकेश्रुतिस्मृतीप्रमाणीकृते । तत्संभावकंयोगसामर्थ्ययोगिनस्तादृश सामर्थ्यंदातृत्वरूपमीश्वरसामर्थ्यंचश्रुतिस्मृतिभ्यामेवोक्तेइतिनसूत्रेपृथगुक्ते । प्रमितेऽनन्य गतिकेचाविरोधईश्वरशक्त्येतिनातिप्रसंगः ॥ छ ॥ व्यतिरेकाधिकरणं ॥ १३ ॥

प्र० ॥ ॐव्यतिरेकोगंधवत्ॐ ॥ "युज्यतेखलुविभावात्मनी"त्यादिटीकासूचितामाह ॥ यदीति ॥ योगिनः निरवयवजीवस्येतिशेषः । सुधायांतु "अविरोधश्चंदनव"दित्युक्तार्थोपपादकत्वेनसंगतिरुक्ता । पूर्वोत्तरपक्षटीकासूचिताश्चिंताआह ॥ अत्रेति ॥ "सपंचधासप्तधा

प्र० दशधाभवती"तिबहुरूपत्वश्रुतिः । "सएकधानसप्तधे"त्यैकरूप्यश्रुतिः । टीकोक्तंसूत्रारूढंदर्शयितुंसूत्रार्थंनिष्कृष्याह ॥ अत्रसूत्रइति ॥ नन्वेवंजीवजडेश्वराणामभेदमुपेत्यतन्निबंधनसर्वानुपपत्तिरपीशाचिंत्यशक्त्यैवसमाधीयतामित्यतआह ॥ प्रमितइति ॥ गुणक्रियादीनांध

प्र० र्मिणातादात्म्यमुपेत्यभेदनिबंधनकार्याणामपीश्वराचिंत्यशक्त्यैवनिर्वाहःक्रियतां किंविशेषादिनेत्यतआह ॥ अनन्यगतिकेति ॥ छ ॥ व्यतिरेकाधिकरणं ॥ १३ ॥

प्र० ॥ ॐपृथगुपदेशात्ॐ ॥ अभेदादिति ॥ मिथ्याभेदेनतदायत्तत्वंतुनयुक्तं । सर्वज्ञस्येश्वरस्यभेदभ्रांतेरयोगेननियमनायोगादितिभावः । विरोधस्फोरणायजीवान्यस्येत्युक्तं । पूर्वोक्तंजगत्स्रष्टृत्वादिकमित्यर्थः । ब्रह्मशब्देननिर्दिष्टजीवान्यस्यैवजन्मादिसूत्रेस्रष्टृत्वाद्युक्तेरितिभावः ।

॥ ॐपृथगुपदेशात्ॐ ॥ नजीवशक्तेरीशायत्तत्वं । तयोरभेदादितिपूर्वाक्षेपेणपूर्वपक्षोत्थानात्संगतिः । अत्रोक्तंजीवान्यस्य ब्रह्मणोजगत्स्रष्टृत्वादिकंकिंजीवब्रह्माभेदश्रुतिविरुद्धंनवेतिचिंता । तदर्थंषड्विधतात्पर्यलिंगोपेतयाऽभेदश्रुत्याबाधितत्वाद्भेद श्रुतिरप्रमाणमुतोपजीव्यसयुक्तिकभेदश्रुतिबाधितत्वादद्वैतश्रुतिगौणीति । तदर्थमभेदश्रुतिःकिमुपजीव्याविरोधायपदद्वय लक्षणयैक्यपरोततदविरोधायतत्पदमात्रस्यगौणार्थत्वेन(गौणा)भेदपरेति ॥ [११८।२०]सकलंजगद्गुणसदृशगुणात्मकत्वेनेति ॥ "सर्वभूतगुणैर्युक्तंदेवंत्वंज्ञातुमर्हसी"तिभारते "गामाविश्यचभूतानिधारयाम्यहमोजसे"त्यादिगीतासुचपृथिव्यादीनांयेधार कत्वादयोगुणास्तत्सदृशगुणात्मकत्वस्यब्रह्मण्युक्तेरितिभावः ॥ [११८।२५]लक्षणावृत्तौहीत्यादि ॥ परमतेपदद्वयेलक्षणा । ममम्ते तुतत्पदमात्रेगौणी । नचाल्पबाधेनैवोपपत्तौबहुबाधोन्याय्यइतिभावः । टीकायांसामानाधिकरण्यस्यगौणत्वोक्तेस्तु तत्पदं सर्वकर्तृत्वादिविशिष्टब्रह्मपरमेव । तत्त्वंपदयोःसामानाधिकरण्यंतुनाभेदपरं । किंतुसादृश्यपरमितिनाभिप्रायः । सिंहस्याध्यय

प्र० "षड्विधतात्पर्ये"त्यादिटीकासूचितामाह ॥ षड्विधेति ॥ "विरुद्धधर्माधिकरणत्वयुक्तियुक्तत्वेने"ति "उपजीव्यप्रमाणविरुद्धंचे"तिचटी कासूचितांकोटिमाह ॥ उपजीव्येति ॥ "तत्त्वंपदवाच्यार्थपरित्यागेने"त्यादिटीकासूचितामाह ॥ पदद्वयेति ॥ तत्पदमात्रस्येति ॥

प्र० "असिपदमात्रस्यगौणार्थत्ववर्णन"मितिटीकातुव्याकरिष्यतइतिनतद्विरोधइतिभावः । टीकाक्षरार्थमाह ॥ सकलेति ॥ सन्न्यायरत्नाव ल्यामिति ॥ "तथापितुचिदानंदपूर्वास्तत्सदृशायुणा"इत्यनुव्याख्यानव्याख्यावसरइत्यर्थः । तर्हिकोभावष्टीकायाइत्यतआह ॥ अपि

नमित्यादौसामानाधिकरण्याभावेऽपिसिंहप्रातिपदिकस्यैवसदृशेगौणत्वात् । सन्न्यायरत्ना वल्यां "तत्त्वमसी"त्यत्रजगत्स्रष्टृपरामर्शिनस्तच्छब्दस्यैवत्वंशब्दवाच्येजीवेगौणवृत्त्याश्रयणे न "तत्त्वंपदयोरुभयोरपिलक्षणाश्रयणस्यपराहतात्व"दित्युक्तत्वाच्च । अपितुतत्पदेनैव गौण्यावृत्त्यासादृश्येलब्धेपरस्परान्वितानेकप्रकृतिनिष्ठैकविभक्तिरूपसामानाधिकरण्यार्थस्यमु ख्यस्यतत्पदशक्यतावच्छेदकेनब्रह्मत्वेनरूपेणब्रह्माभेदस्यजीवेऽसत्त्वेप्यमुख्यस्यचेतनत्वादिरू पेणाभेदस्यसत्त्वात्सामानाधिकरण्येनामुख्याभेदलाभइत्यभिप्रायः । अस्तिहिसिंहश्चैत्रइत्य त्रापिचैत्रेसिंहत्वेनरूपेणसिंहाभेदाभावेपिशूरत्वेनतदभेदः । एतदेवाभिप्रेत्यानुव्याख्याने "अतोऽभेदवदेवैताःश्रुतयःप्रवदंतिहि । पौराणानिचवाक्यानिसादृश्याभेदसंश्रया"दिति, "चेतनत्वादिसादृश्यंयद्यभेदइतीष्यते । अंगीकृतंतदस्माभिर्नस्वरूपैकताक्वचि"दितिचोक्तं ।

प्र० त्विति ॥ एवमाशयेनटीकोक्तौबीजमाह ॥ एतदेवेति ॥ श्रुतयः अहंब्रह्मास्मीत्यादयः । "अहंहरिस्सर्वमिदंजनार्दन"इत्यादिपौराणवा

प्र० क्यानीत्यर्थः । "सामानाधिकरण्यममुख्य"मित्येतदाक्षिप्यघटयति ॥ यद्यपीति ॥ तत्सदृशे तत्सदृशइत्यर्थेसतीत्यर्थः । तस्य तत्सदृशरूपार्थस्येत्यर्थः ॥ अन्यत्रोक्तानीति ॥ अनुव्याख्यानतत्वनिर्णयबृहदारण्यकभाष्यादावित्यर्थः ॥ न्यायामृतइति ॥ द्वितीयपरिच्छेदे

यद्यपितच्छब्दस्यतत्सदृशेर्थेसतितस्यगौणार्थतावच्छेदकेनसादृश्येनैवरूपेणत्वंपदार्थजीवाभेदोमुख्यएव । तथापिशक्यतावच्छेदकेनब्रह्मत्वेनरूपेणाभेदोनमुख्यइतिद्रष्टव्यं ॥ नहिलिंगानीति ॥ यद्यपिलिंगानिमानांतराविरोधेमुख्यार्थेतात्पर्यबोधकान्येव । तथापिप्रकृतेमानांतरविरोधान्मुख्यार्थेतात्पर्यपरेणैवत्यक्तं । अमुख्यार्थमध्येगौणेननतात्पर्यं । किंतुलाक्षणिकएवेत्यत्रतुलिंगानिनशक्तानीतिभावः । अत्राभेदश्रुतेरर्थांतराणिउपजीव्यप्रमाणविरोधः परकीयार्थेतात्पर्यलिंगविघटनं स्वमतेतत्समर्थनं भेदेबहुप्रमाणानिचभाष्यकारादिभिरन्यत्रोक्तानि । तत्संग्रहश्चन्यायामृतेजीवेश्वरभेदप्रकरणेस्माभिःकृतोद्रष्टव्यः ॥ ७ ॥ पृथगधिकरणं ॥ १४ ॥

॥ ॐयावदात्मभावित्वाचनदोषस्तद्दर्शनात्ॐ ॥ "बंधान्मोक्षंततएवाभिवांछे"दितिपूर्वोक्तानादिबंधानंतमोक्षाक्षेपेणपूर्वपक्षोदयात्संगतिः ।

प्र० ॥ ७ ॥ पृथगधिकरणं ॥ १४ ॥

॥ ॐयावदात्मभावित्वात्ॐ ॥ "तस्यानादिकर्मसंबंधाद्ययुक्ते"रित्यादिपूर्वपक्षोपसंहारटीकासूचितामाह ॥ बंधादिति ॥ पूर्वोक्तेति ॥

प्र०पूर्वभाष्योक्तश्रुत्युक्तेत्यर्थः । पूर्वोत्तरपक्षटीकासूचिताश्चिंताआह ॥ अत्रजीवस्येति ॥ नित्यत्वश्रुतिः "सोनादिनापुण्येनपापेनचानुबद्धःपरेणनिर्मुक्तआनंत्यायकल्पत"इतिनित्यत्वश्रुतिः ॥ अनित्यत्वेति ॥ "अन्यत्राभावाच्चे"त्यत्रभाष्योक्तया "ब्रह्मँल्लयमभ्युपैतीतिश्रुत्येत्यर्थः ॥ पूर्वाधिक

अत्रजीवस्यनित्यत्वश्रुतिरुत्पत्तिमत्त्वयुक्त्यनुगृहीतयाजीवानित्यत्वश्रुत्याबाधितोतनेतिचिंता । (अत्रश्रुतिसमन्वयेनोक्तंब्रह्मणःसर्वस्रष्टृत्वादिकमयुक्तमुतनेतिचिंता । तदर्थंकिंश्रुतिरप्रमाणमुतनेति तदर्थंजीवस्यनित्यत्वश्रुतिरुत्पत्तिमत्त्वयुक्त्यनुगृहीतयाअनित्यत्वश्रुत्याबाधितोतनेति) तदर्थंपूर्वाधिकरणोक्तजीवोपाधिविषयालयादिश्रुतिःकिंजीवस्वरूपविषययानित्यत्वादिश्रुत्याविरुध्यतेनवेति । तदर्थंकिमुपाधिनाशेप्रतिबिंबभूतोजीवोनश्यत्युतनेति । तदर्थंजीवप्रतिबिंबनोपाधिःकिंविनाशीबाह्योपाधिरेवोताविनाशीस्वरूपोपाधिरेवेति । ज्ञोतइत्यत्रजीवोत्पत्त्यनुत्पत्तिश्रुत्योर्विरोधेशंकितेउत्पत्तिश्रुतिरुपाधिविषया । अनुत्पत्तिश्रुतिःस्वरूपविषयेत्युक्तं । इहतूपाध्युत्पत्तिस्वरूपानुत्पत्तिश्रुत्योरपिविरोधः । उपाध्युत्पत्तौप्रतिबिंबभूतजीवानुत्पत्त्ययोगादितिशंकिते येनस्वरूपोपाधिनाजीवःप्रतिबिंबोनतस्योत्पत्तिः । यावदात्मभावित्वात् । यस्यतुबाह्योपाधेरुत्पत्तिर्नतेनजीवःप्रतिबिंबइत्युच्यतइत्यपुनरुक्तिः । "आत्मानित्यः जीवोनित्यः"इतिपादद्वयंभारतेभिन्नस्थलस्थंवाक्यद्वयं । ततोनभारतेपुनरुक्तिरित्याह ॥ वचनद्वयाचेति ॥ ७ ॥ यावदधिकरणं ॥ १५ ॥

प्र०रणोक्तेति ॥ "अविनष्टाएवोत्पद्यंत"इति "ज्ञोतएवे"त्यत्रोक्तेत्यर्थः । नित्यत्वादीत्यादिपदेनानादिपुण्यपापसंबंधश्रुत्येत्यर्थः । भाष्यटीकाद्युक्तमधिकरणार्थंनिष्कृष्यवदन्पूर्वेणापौनरुक्त्यमाह ॥ ज्ञोतइत्यत्रेति ॥ टीकाक्षरार्थमाह ॥ आत्मानित्यइति ॥ ७ ॥ यावदधिकरणं ॥१५॥

तात्पर्य- प्र० ॥ ॐपुंस्त्वादिवत्त्वस्यॐ ॥ "अस्येतितद्गुणसारत्वंप्रकृतंपरामृश्यत"इतिटीकोक्तिसूचितामाह ॥ पूर्वत्रेति ॥ "पृथगुपदेशा"दित्यधिक चंद्रिका.

॥ ११४ ॥ ॥ ॐपुंस्त्वादिवत्त्वस्यसतोऽभिव्यक्तियोगात्ॐ ॥ पूर्वत्रपृथगधिकरणीयाद्यसूत्रोक्तो "बंधान्मोक्षंततएवाभिवांछे"दि द्वि. तृ.
त्युपदेशउपपादितः । इहतुतदीयसूत्रोक्तंतद्गुणसारत्वमुपपाद्यतइतिसंगतिः । अत्रजीवस्यानंदादिरूपत्वश्रुतिःकिमनुपलब्धि
युक्त्यनुगृहीतयाऽनानंदादिरूपत्वश्रुत्याबाधितोतनेतिचिंता । (अत्रश्रुतिसमन्वयेनोक्तंब्रह्मणःसर्वस्त्रष्टृत्वादिकंकिमयुक्तंनवे १६
तिचिंता । तदर्थंश्रुतिरप्रमाणंनवेति। तदर्थंजीवस्यानंदादिरूपत्वश्रुतिःकिमनुपलब्धियुक्त्यनुगृहीतयाऽनानंदादिरूपत्वश्रुत्या
बाधितोतनेति ।) तदर्थंसतोप्यानंदादेरज्ञानावरणादनुपलब्धिरयुक्तोतयुक्तेति । तदर्थमावरणमज्ञानंकिंज्ञानाभावएवकिंवा
ज्ञानाभावादिनिमित्तंभावांतरमिति । भाष्योदाहृतायां "विज्ञानात्मे"तिषट्प्रश्नोपनिषदि "सआनंद"इतिश्रुत्यंतरेचजीव
लिंगाभावात्पूर्वपक्षानुदयइतिनशंक्यं । आद्यश्रुतौ "प्राणाभूतानिसंप्रतिष्ठंतियत्रे"तिवाक्यशेषेद्वितीयश्रुतौच "सपरेणामुंलो
कंनीयतेसविमुच्यत"इतिवाक्यशेषेजीवलिंगश्रवणादित्याह ॥ प्राणाभूतानीत्यादिना ॥ तस्यैवानुपपत्तेरिति ॥ ज्ञाना
भावएवाज्ञानमितिमते ॥ वैपरीत्यादिति ॥ शरीरस्यानंदाद्यनुभवरूपभोगायतनत्वेनभोगप्रतिबंधकत्वायोगादित्यर्थः ।
भाष्ये असुराणामावरणाभावेनानंदाद्यनुपलब्ध्यापादनमयुक्तं । स्वरूपानंदादेरभावादेवानुपलब्ध्युपपत्तेः । अनावरणस्या ॥ ९५६ ॥
प्र० रणीयेत्यर्थः । पूर्वपक्षादिटीकासूचितचिंताआह ॥ अत्रजीवस्येति ॥ दुर्गमानिटीकावाक्यानिव्यनक्ति ॥ भाष्येति ॥ टीकोक्तार्थस्य

प्र० भाष्यानुगुण्यंप्रदर्श्यसूत्राक्षरानुगुण्यंचप्रदर्शयति ॥ एवंचसूत्रइति ॥ अन्येत्विति ॥ सूत्रनवकेनेतिपाठस्साधुः । सूत्राष्टकेनेतिका

नुपलब्धिंप्रत्यप्रयोजकत्वाच्चेत्याशंक्य आनंदाद्यनुपलब्धिर्नापाद्यते । किंतुतत्प्रयोजिकासुखाद्युपलब्धिविरुद्धा स्वरूपदुः खाद्युपलब्धिरापाद्यतइत्याह ॥ [१२०।१६] दुःखाद्यनुभवएवभवेदिति ॥ भाष्येमध्यममनुष्याणामानंदोपलब्धितदभावावापा दितौ । तत्रोपलब्ध्यभावापादनमयुक्तं । आवरणाभावस्यानुपलब्धिंप्रत्यप्रयोजकत्वादित्याशंक्य सुखोपलब्धेरेवाभावो नापाद्यते । किंतुकेवलायादुःखाद्यनुपलब्धिविशिष्टायाःसुखोपलब्धेरभावः ।। ततश्चसुखाद्यनुपलब्ध्यापादनेनदुःखाद्युपल ब्धिरेवापादिताभवति । अतोनदोषइत्याह ॥ [१२०।१६] केवलतदुपलब्ध्याभावइत्यादिना ॥ [१२०।१७] समैवेति ॥ मध्यममनुष्याणांमि श्रत्वात्सुखस्यदुःखस्यचोपलब्धिःसमैवस्यादित्यर्थः । एवंचसूत्रेसुराणांनित्यंसुखस्यैव असुराणांनित्यंदुःखस्यैव मनुष्याणां तुद्वयोरुपलब्धिरापाद्यते । सूत्रेऽनुपलब्धिशब्देन "असुरा"इत्यादाविवप्रकृतसुखोपलब्धिविरुद्धदुःखोपलब्धेरेवविव क्षितत्वात् । अन्यतरशब्देनद्वयोरपिविवक्षितत्वादितिद्रष्टव्यं ॥ [१२०।१८] एवंसुराइतिहृदयमिति ॥ श्रुतौपरमात्मशब्देनोत्तम जीवराशिर्वा "परमात्मे" त्यस्यानंतरं "एवंसुरा"इत्यध्याहारोवाविवक्षणीयः । नैवमसुराइत्युत्तरवाक्येऽसुरजीवानांप्र तियोगित्वेनोक्तेः । भाष्योक्तस्मृतिसमाख्यानाच्चेतिभावः । अन्येतु उत्क्रांतीत्यादिसूत्रनवकेनजीवस्याणुत्वेपूर्वपक्षिते

प्र०चित्क:पाठोलेखकदोषमूलः । तथाहि "एषोणुरात्माचेतसावेदितव्यः । सयदास्माच्छरीरादुत्क्रामती"त्यादावुत्क्रांतिगत्यागतीनांश्रवणाज्जीवो

प्र० णुः । स्वात्मनासंबद्धयोर्मरणादुत्तरयोर्गमनागमनयोः "चंद्रमसमेवतेसर्वेगच्छंती"त्यादिवाक्योक्त्योर्व्याप्तेजीवेऽनुपपत्तेर्मध्यमपरिमाणत्वेऽनित्यत्वप्रसंगादणुर्जीवः । "नाणुरतच्छ्रुतेरितिचेन्नेतराधिकारात्" । "सवाएषमहानजआत्मे"त्यनणुत्वश्रुतेर्जीवोणुर्नेतिचेन्न । इतरस्यब्रह्मणो वेदांतेषुप्राधान्येनाधिक्रियमाणत्वान्महत्त्वश्रुतेस्तद्विषयत्वोपपत्तेः । "स्वशब्दोन्मानाभ्यांच" । "एषोणुरात्माचेतसावेदितव्य"इतिसाक्षादणुत्ववाचिशब्दात्, "वालाग्रशतभागस्यशतधाकल्पितस्यच । भागोजीवस्सविज्ञेयस्सचानंत्यायकल्पते । आराग्रमात्रोह्यपरोपिदृष्ट"इत्युन्मानत्वाच्चजीवोणुः । नन्वणुत्वेकथंसर्वांगीणतापोपलब्धिरित्यतउत्तरं "अविरोधश्चंदनवत्" । एकदेशस्यचंदनस्यसर्वांगीणाह्लादजनकत्वव

"तद्गुणे"त्यादिसूत्रचतुष्टयेनमहत्त्वंसिद्धांत्यतइत्याहुः । तन्न । सूत्रकृतावैराग्यपादे "तदंतरप्रतिपत्ता"वित्यादिसूत्रैर्जीवेतत्तत्कर्मफलानुभवायदेहांतरगतेः, "यथेतमनेवंचे"द्यादिसूत्रैःसुकृतफलभोगायधूमादिमार्गेणगतेः, "संयमनेत्वनुभूये"त्यादिसूत्रैर्दुष्कृतफलभोगायसंयमनीमार्गेणगतेः,

प्र० दणोरपिसर्वांगीणकार्यकरत्वोपपत्तेः । "अवस्थितिवैशेष्यादितिचेन्नाभ्युपगमाद्धृदिहि" । दृष्टांतदार्ष्टांतिकयोरेकदेशावस्थानस्यप्रत्यक्षत्वाप्रत्यक्षत्वाभ्यामवस्थितेर्वैशेष्याद्वैषम्यान्नदृष्टांतबलेनाणोर्जीवस्यव्यापिकार्यकरत्वनिर्णयश्शक्यइतिचेन्न । "हृदिह्येषआत्मे"तिश्रुतेः । तथात्वस्य जीवेप्युपगमात् । "गुणाद्वालोकवत्" । प्रदीपालोकवदणोरपिजीवस्यचिद्गुणेनदेहव्याप्तिर्युक्ता । "व्यतिरेकोगंधवत्" । द्रव्यगुणस्यगंधस्येवचिद्गुणस्यापिद्रव्यव्यतिरेकेणवृत्तिर्युक्ता । "तथाचदर्शयती"त्यंशस्तुनास्त्येव । "पृथगुपदेशात्" । "प्रज्ञयाशरीरंसमारुह्ये"तिचात्मप्रज्ञयोःकर्तृकरणभावेनपृथगुपदेशात् । तस्मादणुरात्मेतिपूर्वपक्षितइत्यर्थः ॥ **तद्गुणेत्यादीति** ॥ तस्याबुद्धेर्येगुणाइच्छादयस्तत्सारत्वात्तत्प्रधा

प्र० नकत्वादात्मनस्तद्व्यपदेशस्तद्गुणाणुत्वव्यपदेशः । यथाप्राज्ञस्यपरमात्मनउपाधिगुणप्रधानत्वादणीयस्त्वादिव्यपदेशस्तद्वत् । एवंतर्हिबुद्धिसंयोगनाशेसंसारित्वंचनस्यादित्यतउत्तरं "यावदात्मभावित्वाच्चनदोषस्तद्दर्शनात्"बुद्धेर्यावदात्मभावित्वान्नोक्तदोषः । "ससमानस्सन्नुभौलोकावनुसंचरती"तिनित्यसंबंधदर्शनात् । सुप्त्यादौबुद्धिलयोपगमात्कथंनित्यसंबंधइत्यतउत्तरं "पुंस्त्वादिव"दिति । बाल्येसतःपुंस्त्वादेर्यौवनेऽभिव्यक्तिरिवसुप्त्यादौशक्तिरूपेणविद्यमानायाबुद्धेःप्रबोधादाविवाभिव्यक्तियोगात् । अन्यथैवंभूतबुद्धिलक्षणांतःकरणानभ्युपगमेनित्यंविष

अर्चिरादिपादेमोक्षायार्चिरादिमार्गेणगतेश्च तत्तदधिकरणोदाहृतानेकश्रुतिस्मृतितात्पर्यनिर्णायकन्यायैःसिद्धांतितत्वेनोत्क्रांत्यादिसूत्राणांपूर्वपक्षत्वोक्तेरतिसाहसत्वात् । नहिबुद्धिःकर्मफलभोगेनसंसरतिनवामुच्यते । किंचोत्क्रांत्यादिसूत्राणां"अणुर्ह्येषआत्मा सोस्माच्छरीरादुत्क्रम्य यथाव्याप्यशरीराणिहरिचंदनविप्रुषः" । इत्यादिभाष्योदाहृतश्रुतिस्मृत्यनुगुणानांवक्ष्यमाणन्यायोपबृंहितानां

प्र० याणामुपलब्धिरनुपलब्धिर्वास्यात् । विषयेंद्रियात्मनांनित्यंसमवधानात् । अन्यस्यापेक्षणीयस्याभावात् । अन्यतरस्यात्मनइंद्रियस्यवानियमश्शक्तिप्रतिबंधोवावक्तव्यस्स्यादितिसिद्धांतइत्याहुरित्यर्थः ॥ **अर्चिरादिपादइति** ॥ चतुर्थस्यतृतीयपादे । सूत्राणामप्यर्थस्तन्मतेप्यविशिष्टइतिभावः । तत्रसर्वत्रापिगत्यादेर्बुद्धिविषयत्वमाशंक्यनिराह ॥ **नहीति** ॥ **वक्ष्यमाणेति** ॥ परोक्तदूषणोद्धारप्रस्तावेवक्ष्यमाणेत्यर्थः

प्र० ॥ शंकालिंगेति ॥ चेदित्यादिलिंगेत्यर्थः । अनुक्तपरिहाराणामितिबहुव्रीहिः ॥ कथंचेति ॥ पूर्वपक्षिणैवश्रुत्यादिविरोधोक्त्याखंडितत्वा दितिभावः । अनुक्तपरिहाराणामित्येतदसिद्धं । सिद्धांतसूत्रभाष्येसर्वस्यापिपूर्ववाद्युक्तस्यपरिहारोक्तेरित्यतआह ॥ नह्यत्रेति ॥ पूर्वपक्ष सूत्रेषूक्तस्यसिद्धांतसूत्रेषुपरिहारेणभाव्यमितिकुतइत्यतआह ॥ दृश्यतेहीति ॥ आद्यस्यद्वितीयपादेऽर्थबाधादधिकरणेषड्भिस्सूत्रैःपूर्वपक्षो

शंकालिंगरहितानामुत्तरसूत्रेष्वनुक्तपरिहाराणांचकथंशंकासूत्रत्वं । कथंच "नाणुरतच्छ्रुतेरितिचे"दितिशंकालिंगसहितसूत्रोक्तस्योक्तश्रुत्यादिविरुद्धस्यचमहत्त्वस्यसिद्धांतत्वं । नह्यत्रोत्तरसूत्रेषुपरिहारउक्तः । किंतुत्वयैवसूत्रव्याख्याव्याजेनसूत्राणिदूषितानि । दृश्यतेहिजैमिनिसूत्रेषु "शास्त्रदृष्टविरोधाच्च । अन्यानर्थक्या"दित्यादिसूत्रैरर्थवादाप्रामाण्येपूर्वपक्षिते "दूरभूयस्त्वात् । आकालिकेप्सा । सर्वत्वमाधिकारिक"मित्यादिसूत्रैर्दृष्टविरोधशास्त्रविरोधान्यानर्थक्यादीनांक्रमेणपरिहारः । तथा "तदर्थशास्त्रात् । अर्थविप्रतिषेधा"दित्यादिसूत्रैर्मंत्राप्रामाण्येपूर्वपक्षिते "गुणार्थेनपुनःश्रुतिः । परिसंख्या । अर्थवादोवे"तित्रिभिस्सूत्रैस्तदर्थशास्त्रवैयर्थ्यस्यत्रेधापरिहारः । "गुणादविप्रतिषेध"इत्यादिनाअर्थविप्रतिषेधस्यचपरिहारः ।

प्र० द्वादशभिस्सिद्धांतः । तत्रसिद्धांतपरिहारसूत्रक्रमानुरोधेनशास्त्रविरोधात् । दृष्टविरोधात् । शास्त्रदृष्टविरोधादितिविभागावृत्तिभ्यांशाबर भाष्ये "शास्त्रदृष्टविरोधाच्चे"तिसूत्रंव्याख्यातं । तत्र "स्तेनंमनोऽनृतवादिनीवा"गित्यस्यचौर्यादिविधौतात्पर्ये "नचौर्यंकुर्या"दितिशास्त्रवि रोधादप्रामाण्यमितिशंकायां "रूपात्प्राया"दित्यनेनस्तेनवद्रूपंमनसइतिप्रायेणानृतवादित्वंवागिंद्रियस्यास्तीतिगौणार्थत्वमेवतद्वाक्यस्य । ननु

प्र० विधौतात्पर्यमितिपरिहारः । ''धूमएवाग्नेर्दिवादद्दशेनार्चि''रित्यादिवाक्यस्यप्रत्यक्षविरोधादप्रामाण्यमितिशंकायाः ''दूरभूयस्त्वा''दितिसूत्रेणदूरएवदिवाधूमोभूयान्दृश्यतेनार्चिरितिगौणार्थत्वेनपरिहारः । ''कोहितद्वेदयद्यमुष्मिँल्लोकेऽस्तिवानवे''त्यस्यपारत्रिकफलाज्ञानादिप्रतिपादकस्य ''ज्योतिष्टोमेनस्वर्गकामोयजेते''त्यादिशास्त्रदृष्टविरोधाच्छास्त्रोपदेशविरोधादप्रामाण्यमित्यस्य ''आकालिकेप्से''तिसूत्रेणधूमाकुललोचनानामृत्विगादीनांतात्कालिकफलप्राप्तीच्छयेदंवचनंधूमनिर्गतिमार्गकरणार्थंगौणार्थमितिपरिहारउक्तः । अत्रदृष्टविरोधशास्त्रविरोधयोरेवपरिहारसूत्रेउक्ते । आदिपदेन ''रूपात्प्राया''दित्याद्यपिग्राह्यं । तथा ''अन्यानर्थक्या''दितिसूत्रेण ''पूर्णाहुत्यासर्वान्कामानाप्नोती''त्यादौपूर्णाहुतिनामककर्मणैवसर्वकामावाप्तावन्यकर्मानर्थक्यमितिशंकायाः ''सर्वत्वमाधिकारिक''मित्यनेनाधिकृतसर्वापेक्षंतद्वचनं । नत्वसंकुचितसर्वमितिपरिहारउक्तः । तथातत्रैवमंत्राधिकरणे ''तदर्थशास्त्रात् । वाक्यनियमात् । बुद्धशास्त्रात् । अचेतनेर्थबंधनात् । अर्थप्रतिषेधा''दित्यादिभिरष्टभिस्सूत्रैःपूर्वपक्षे ''अविशिष्टस्तुवाक्यार्थः । गुणार्थेनपुनश्श्रुतिः । परिसंख्या । अर्थवादोवा'' इत्यादिभिरनेकैस्सूत्रैःसिद्धांतःकृतः । तत्र ''इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्त''इतिमंत्रार्थप्रतिपादकशास्त्रान्मंत्रानर्थक्यशंकायाः ''परिसंख्ये''त्यनेनपरिहारः । अश्वरशनादानवचनंगर्दभरशनापरिवर्जनरूपेपरिसंख्येति मंत्रार्थवशादेवमंत्राणामभ्यादानशेषत्वेप्राप्तेपि ''चतुर्भिरभ्रिमादत्त''इतिमंत्रार्थप्रतिपादकशास्त्रान्मंत्रानर्थक्यशंकायां ''गुणार्थेनपुनश्श्रुति''रित्यनेनमंत्राणांचतुष्ट्वसंख्यारूपगुणविध्यर्थंपुनश्श्रवणमितिपरिहारउक्तः । तथा ''उरुप्रथस्वोरुतेयज्ञपतिःप्रथता''मितिमंत्रलिंगादेवमंत्रस्यपुरोडाशप्रथनशेषत्वावगतिसंभवे ''उरुप्रथस्वेतिपुरोडाशंप्रथयती''तिमंत्रार्थप्रत्यायकशास्त्रंव्यर्थमापद्यतइतिमंत्रार्थबोधकशास्त्रसद्भावान्मंत्रानर्थक्यमिति ''तदर्थशास्त्रा''दितिसूत्रेणशंकायां ''अर्थवादोवे''तिसू

प्र० त्रेणपरिहारउच्यते । प्रथयतीतिप्रथनमेवविधीयते । तत्ररूपादेवप्राप्तोमंत्रउरुप्रथस्वेत्यनूद्यते । सचानुवादोर्थवादःप्रशंसा । ईदृशंप्रथनंप्र शस्तं । यदेवंरूपेणमंत्रेणक्रियमाणंयजमानस्यप्रजापशुविस्तृप्तिंविधत्तइति । तथा "अदितिर्द्यौरदितिरंतरिक्ष"मित्यादावदितिदेवतायाद्यंतरि क्षाद्यात्मकत्वरूपार्थस्यविप्रतिषेधान्मंत्राप्रामाण्यशंकायां "अर्थविप्रतिषेधा"दित्यनेनकृतायां "गुणादविप्रतिषेधस्स्या"दित्यनेनसूत्रेणगुणवादे नस्तुत्यर्थेनाविप्रतिषेधोऽविरोधस्स्यादितिपरिहारउक्तः ॥ **तथाव्याकरणेपीति** ॥ आद्यस्यद्वितीयेपादे "लुपियुक्तवद्व्यक्तिवचने । विशेष

तथाव्याकरणेपि "लुपियुक्तवद्व्यक्तिवचने"इत्यादिनामतांतरमुक्त्वा "तदशिष्यंसंज्ञाप्रमाणत्वा"दित्यादिनापरिहारः । तथागौतमसूत्रेषु "तदप्रामाण्यमनृतव्याघातपुनरुक्तिदोषेभ्य"इत्यादिसूत्रैर्वेदाप्रामाण्येपूर्वपक्षिते "नकर्मकर्तृसाधनवैगुण्यात् । अभ्युपेतकालभेदेदोषवचनात् । अनुवादोपपत्तेश्चे"त्यादिसिद्धांतसूत्रैःक्रमेणदोषत्रयपरिहारः । किंचेहकिंजीवशब्देनानवच्छिन्नंशुद्धंब्रह्मलक्ष्यतेकिंवांतःकरणेनाविद्ययावावच्छिन्नस्तत्प्रतिबिंबितोवाविशिष्टोजीवउच्यते । नाद्यः ।

प्र०णानांचाजाते"रितिसूत्रद्वयेनमतांतरमुक्त्वेत्यर्थः । तत्राद्यस्यायमर्थः । "जनपदेलु"बित्यादिनालुप्संज्ञयालुप्तस्यार्थोलुप्शब्देनोच्यते । तस्मि न्लुपि लुप्संज्ञयालुप्तस्यार्थे युक्तवत् प्रकृतिवत् । प्रत्ययार्थयुक्तत्वात्प्रकृतेः प्रकृताविव व्यक्तिवचने लिंगसंख्ये भवतइति । यथापंचालानां क्षत्रियाणांनिवासोजनपदःपंचालाइति । नतुपंचालोजनपदइत्येकवचनं । द्वितीयस्यतुलुबर्थविशेषणानामपिप्रकृतिवदेवलिंगसंख्येभवतो जात्तौतुनेति । यथापंचालानांनिवासोरमणीयोजनपदःपंचालारमणीयाइति । जातौतुपंचालाजनपदइत्येवेति ॥ **तदशिष्यमिति** ॥ तत्प्रकृ

प्र० तिवल्लिंगसंख्याविधानं । अशिष्यं नकार्यं । कुतः । संज्ञाप्रमाणत्वात् संज्ञारूपशब्दानांस्वार्थप्रत्यायकत्वादित्यर्थः । येसंज्ञाशब्दास्तेस्वाभिधे यगतलिंगसंख्यापेक्षयाभिन्नलिंगसंख्याअपिस्वार्थस्यप्रतिपादकाभवंतीत्यर्थः । तथाचपंचालाःकुरवइत्यादिशब्दाअपिजनपदस्यसंज्ञाशब्दाएवे ति "आपोदारा"इत्यादिवच्छब्दस्वाभाव्यादेवस्वार्थंप्रतिपादयिष्यंतीतितदर्थंनयतितव्यमितिभावः । गौतमसूत्रेषु न्यायसूत्रेषु । तदप्रामाण्यं वेदाप्रामाण्यं । कुतः । अनृतादिदोषेभ्यः । "पुत्रकामः पुत्रेष्ट्यायजेते"तिवाक्योक्तफलस्यपुत्रेष्टौकृतायामपिपुत्रजन्मनोऽनुपलंभात् । "उदि तेहोतव्यमनुदितेहोतव्य"मित्यादौव्याघातः । "कुवित्सोमस्यापा"मित्यादौपुनरुक्तिः । "शृण्वेवे"त्यादौनिरर्थकत्वं । "अग्निर्हिमस्यभेषज"

त्वया "चराचरेतिसूत्रात्प्राग्ब्रह्मविचारः । तदारभ्यापादसमाप्तिजीवविचार"इत्युक्तत्वेनेहब्रह्मविचारस्यासंगतेः । शुद्धउत्क्रांत्यादिश्रुतेरभावेनाणुत्वश्रुतेश्च "व्योमव"दित्यादौगतेरुक्तत्वेनपूर्वपक्षस्यानुदयाच्च । पूर्वपक्षे "जीवेमहत्त्वश्रुतिर्ब्रह्माभेदाभिप्राये"तिभाषणस्य, सिद्धांते "सौत्रमुत्क्रांत्यादिकंबुद्ध्युपाधिक"मितिभाषणस्य, सिद्धांतसूत्रे "प्राज्ञव"दितिब्रह्मणोदृष्टांतीकरणस्य चायोगाच्च । नांत्यः । विशिष्टेपरिच्छिन्नाविद्यादिनावच्छिन्नेमहत्त्वायोगात् । मध्यमपरिमाणत्वेचानित्यत्वापातात् । [यच्चोक्तं

प्र० मित्यादौज्ञातज्ञापकत्वमित्येवंरूपदोषेभ्यइत्यर्थः । आद्यस्यपरिहारःकर्मेति ॥ कर्मवैगुण्यात्कर्तृवैगुण्यात्साधनवैगुण्यादित्यर्थः । व्याघात स्यपरिहारोऽभ्युपेतेति ॥ तत्तदधिकार्यभ्युपेतकालभेदे कालव्यत्यासे । "प्रातःप्रातरनृतंतेवदंतिपुरोदयाच्चजुह्वतियेऽग्निहोत्र"मितिदोषव चनात्तत्तदधिकार्यादिभेदेनव्याघातादित्यर्थः । पुनरुक्तेःपरिहारोऽनुवादोपपत्तेश्चेति ॥ गुणादिविधानाद्यर्थमितिभावः ॥ त्वयेति ॥ "चराचरे"तिसूत्रकल्पतरौतथोक्तेरितिभावः । श्रुतिविगानंचनेत्याह ॥ **शुद्धइति** ॥ "एषोणुरात्माचेतसावेदितव्य"इत्याद्यणुत्वश्रुतेश्चे

प्र०त्यर्थः। “सर्वत्रप्रसिद्धोपदेशा”दित्यधिकरणगुणसूत्रे “निचाय्यत्वादेवंव्योमवच्चे”त्यत्र “यथाव्योमसर्वगतमपिसूचीपाशाद्यपेक्षयार्भकौकोऽ
उत्क्रांतिर्यद्यप्यचलतोपिदेहस्वाम्यनिवृत्त्यायुक्ता । उत्तरेगत्यागतीतुस्वात्मनैव । नह्यचलतोगत्यादीतिस्वात्मनेतिसूत्रार्थ
इति। तन्न । उत्क्रांतेरपिगत्यादिवत्क्रियात्वेनाऽविशेषात् । नहिदेहानभिमानीसुप्तोसंप्रज्ञातसमाधिस्थोवोत्क्रांतइत्युच्यते।
सूत्रे आत्मनाचोत्तरेइतिनिर्देशापत्तेश्च । ममतुषष्ठी उत्क्रांतिसूत्रेऽवश्यंविवक्षणीयस्यसकाशादित्यस्येहानुषक्तस्यान्वयाय ।
ब्रह्मणिस्वात्मशब्दोपिविषयवाक्यानुकरणाय । यच्चोक्तं “सत्यंज्ञानमनंतंब्रह्म । सवाएषमहानजआत्मे”तिमहत्वश्रुतेर्ना
णुर्जीवइतिचेन्न । तत्रब्रह्मणएवाधिकारादिति “नाणु”रितिसूत्रार्थइति । तन्न । सत्यादिवाक्येजीवविषयत्वशंकाबीजाभा
वात् । सवाइत्यत्रतुत्वन्मतेजीवस्यैवाधिकृतत्वात् । अतएवत्वया “सवेतिश्रुतिर्जीवब्रह्माभेदाभिप्राये”तिभाषितं ।
यच्चोक्तं “एषोणुरात्माचेतसावेदितव्य”इतिसाक्षादेवाणुत्ववाचिशब्दात् “बालाग्रशतभागस्यशतधाकल्पितस्यच । भागो
जीव”इत्युन्मानाच्चाणुर्जीवइति “स्वशब्दे”तिसूत्रार्थइति तन्न । अणुत्वसाधकत्वेऽस्योत्क्रांतिसूत्रानंतर्यापातात् । द्युभ्वा
दिसूत्रइवात्रापिस्वशब्दपदेनात्मशब्दस्यैवग्राह्यत्वाच्च । बालाग्रशतभागशतभागत्वस्योन्मानशब्दार्थत्वायोगाच्च] यच्च
“चंदनव”दित्यस्यदूषणमुक्तं युक्ताचंदनबिंदोस्सांशत्वादंशैर्देहव्याप्तिः । जीवस्तुनिरंशइति । तन्न । जीवस्सांशइति “व्य
तिरेक”इतिसूत्रएवोक्तत्वात् । यच्च“आलोकव”दित्यस्यदूषणमुक्तं आलोकोनगुणः । निबिडावयवंहितेजोद्रव्यंप्रदीपः । ॥ ९६० ॥

प्र० णीयोव्यपदिश्यतेतद्वत्सर्वगतस्यापिब्रह्मणोहृदयपुंडरीकेनिचाय्यत्वाद्द्रष्टव्यत्वादेवंव्यपदेशोऽणीयस्त्वादिव्यपदेश”इतित्वयाव्याख्यानादिति

प्र० भावः ॥ विरलावयवंत्विति ॥ तथाचालोकस्यप्रदीपव्यतिरेकेणवृत्तावपिनचिद्गुणस्येतिभावः ॥ द्वेधेति ॥ अद्रव्यत्वेनवाऽप्रधानत्वेनवे त्यर्थः ॥ रत्नेति ॥ तत्रावयवापगमाभावादितिभावः ॥ धर्मितोऽन्यत्रेति ॥ घटत्वादेरखंडस्यसर्वघटादिनिष्ठस्यांतरालिकपटादिवृत्तित्व

विरलावयवंतुप्रभेति । तन्न । टीकायामेवप्रभायाद्वेधागुणत्वनिर्वाहात् । रत्नप्रभादावुक्तप्रकारायोगाच्च । अन्यत्रा दृष्टत्वेपिशब्दादेर्गुणस्याश्रयाग्रहणेपिग्रहणवत्, संयोगादेरव्याप्यवर्तनवत्, जातिसमवायादेर्धर्मितोऽन्यत्रवर्तनव त्, वह्न्यौष्ण्यस्यतत्समीपेवर्तनवच्चप्रभायागुणत्वेप्यन्यत्रवर्तनस्योपपत्तेश्च । [यच्चोक्तं "व्यतिरेक" इतिसूत्रंपूर्वाधि करणशेषत्वेनदृष्टांतांतरमात्रपरमिति । तन्न । तथात्वेहि "गुणाद्वे" तिवदत्रापिवाशब्दःस्यात् । यच्च "गंधव" दित्यस्यदूषणमुक्तं सहैवाश्रयद्रव्यावयवैर्गंधोव्यतिरिच्यतइति । तन्न । युगपत्सर्वतोयोजनादिव्यापिगंधोपलं भायानेकस्थूलावयवापसरणेसद्योगुरुत्वादिह्रासस्या[स्य, द्रव्यक्षयस्यचा]पातात् । स्फटिककरंडांतःस्थकस्तूर्या दाववयवापसरणेऽवयवांतरानुप्रवेशकल्पनेचमानाभावात् । प्रत्यभिज्ञाविरोधाच्च । "उपलभ्याप्सुगंधंचके चिद्ब्रूयुरनैपुणाः । पृथिव्यामेवतंविद्यादपोवायुंचसंश्रित" मितिस्मृतिरपिपृथिवीगंधस्यवाय्वादिनिष्ठत्वंनिषेधति ।

प्र० स्यावर्जनीयत्वादितिभावः ॥ गुरुत्वादिह्रासस्येति ॥ ननूक्तमत्रभामत्यां "द्रव्यांतरावयवपूरणा" दिति । तत्राह ॥ स्फटिकेति ॥ स्वा श्रयातिरेकेणान्यस्यगंधस्यावर्तनेपरभाष्योदाहृतस्मृतेरर्थांतरमाह ॥ उपलभ्येति ॥ अपोवायुंचसंश्रितमितिकेचिद्ब्रूयुः । तेऽनैपुणाः ।

प्र० कथंतर्हि पृथिव्यामेवर्तविद्यादिति ॥ नन्विति ॥ अन्यथा "अथैकएवसन्गंधवद्व्यतिरिच्यत"इतिश्रुत्यादिविरोधादितिभावः ॥ यच्चोक्त

नत्वाश्रयाद्व्यतिरेकं । यच्चोक्तं ज्ञानादात्मान्यइति "पृथ"गितिसूत्रार्थः । बुद्धिगुणप्रधानत्वात्संसार्यात्मनोबुद्धिगुणेनाणुत्वो त्क्रांत्यादिनाणुत्वादिव्यपदेशइति "तद्गुणेतिसूत्रार्थ"इति । तन्न । आनंदादितोन्यत्वमशंकित्वाज्ज्ञानादेवान्यत्वशंकाबीजाभा वात् । ममरीत्या "पृथ"गित्यत्र "ज्ञोत"इत्यादौप्रकृतस्यजीवस्य "स्वात्मने"तिप्रकृतात्सजातीयादीश्वराद्भेदमुक्त्वा तद्गुणे त्यत्रश्रुत्यनुसारिसूत्राक्षरानुसारेणतत्त्वमसीतिव्यपदेशस्यगतिकथनेनाविरोधाध्यायेऽवश्यवक्तव्यभेदाभेदश्रुत्यविरोधपरत्वसं भवे "पृथ"गित्यस्यपूर्वपक्षत्वकल्पनायाश्चायोगाच्च । "तमुत्क्रामंतंप्राणोनूत्क्रामती"तिश्रुतौत्वद्रीत्याप्राणाख्यबुद्धिगतितः प्रागेवजीवगत्युक्त्यातस्याबुद्ध्युपाधिकत्वायोगाच्च । किंच किंबुद्धिगतेनगत्यादिनातदवच्छिन्नात्मनिगत्यादिजायते किंवाबु द्धिगतमेवारोप्यते उपचर्यतेवा । नाद्यः । घटगत्यातदवच्छिन्नभसिगत्यंतराद्दृष्टेः । अन्यथायतोघटस्यबुद्धेर्वागतिस्तत्राका शस्यात्मनोवासछिद्रत्वं यत्रगतिस्तत्रद्विगुणीकृत्यवृत्तिश्चस्यात् । नद्वितीयतृतीयौ । [वैराग्यपादे "यथेतमनेवंचे"त्यादिसू त्रैस्त्वद्रीत्यापिकर्मफलभोगायधूमादिमार्गेणगत्यादिप्रतिपादकत्वेनार्चिरादिपादेच "अर्चिरादिनातत्प्रथिते"रित्यादिसूत्रैर्ज्ञान फलभोगायार्चिरादिमार्गेणगत्यादिप्रतिपादकत्वेनचनिर्णीतानां]धूमादभ्रमभ्रादाकाशमाकाशाच्चंद्रलोकं अर्चिषोहरह्नआपूर्य माणपक्ष"मित्यादिश्रुतीनां, "धूमोरात्रिस्तथाकृष्णःषण्मासादक्षिणायनं । तत्रचांद्रमसंज्योतिर्योगीप्राप्यनिवर्तते । अग्निर्ज्यो ॥ ९६१ ॥

प्र० मिति ॥ विवृतोयंसूत्रार्थःप्रागस्माभिः । प्रमेयास्वारस्यंचाह ॥ तमुत्क्रामंतमिति ॥ व्याप्तिश्रुतिस्त्विति ॥ "अजआत्मामहान्ध्रुव"इ

प्र० त्यादिश्रुतिस्त्वित्यर्थः । येनतद्विरोधादप्रामाण्योपचरितार्थत्वयोर्युक्ततास्यादितिभावः ॥ अमूर्तइति ॥ गगनादावित्यर्थः ॥ अपरमार्थ

तिरहःशुक्लःषण्मासाउत्तरायणं । तत्रप्रयातागच्छंतिब्रह्मब्रह्मविदोजनाः" । इत्यादिस्मृतीनांचाबाधेप्यत्यंताप्रा माण्योपचारितार्थत्वयोरयोगात् । व्याप्तिश्रुतिस्तुब्रह्मविषयत्वादबाधिकेति "नेतराधिकारा"दितिसूत्रएवोक्तं। नचव्यावहारिकस्यगत्यादेस्सत्त्वान्नात्यंताप्रामाण्यं । अमूर्तेमूर्तावच्छिन्नेपिव्यावहारिकगत्यदृष्टेः । बुद्धिगत व्यावहारिकगत्युपाधिकस्यात्मगतगत्यादेर्व्यावहारिकत्वायोगाच्च । नहिघटोपाधिकंनभसःपरिच्छिन्नत्वंमहत्त्व मिवव्यावहारिकं । नचव्यावहारिकत्वेपिधर्मिणापरमार्थसदात्मनासमसत्ताभावमात्रेणौपाधिकत्वं । धर्मिणो ऽवच्छिन्नात्मनोप्यपरमार्थत्वात् । नचगत्यादिश्रुतिर्बुद्धिमात्रविषयत्वान्नोपचरितार्थेतियुक्तं । "नाकस्यपृष्ठे सुकृतेलेऽनुभूत्वेमंलोकंहीनतरंवाविशंति । तेशुभमनुभूयावर्ततेपुनःकर्मकुर्वंतिपुनर्गच्छंति"इत्यादिश्रुतौ, "गच्छंतिपापिनःसर्वेनरकंनात्रसंशयः । तत्रभुक्त्वापतंत्येवे"त्यादिस्मृतौ "संयमनेत्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शना"दितिसूत्रेचगतेःसुखदुःखानुभवरूपसंसारसामानाधिकरण्योक्तेः । "योनिमन्येप्रपद्यंतेशरीरत्वाय देहिनः । स्थाणुमन्येनुसंयंति । एषह्येनंजीव(मभिजीव)यत्येषउद्गमयती"त्यादिश्रुतौसाक्षाज्जीवगतत्वोक्तेश्च ।

प्र० त्वादिति ॥ तथाचसमसत्त्वमेवेतिभावः ॥ साक्षाज्जीवगतत्वोक्तेश्चेति ॥ गतेरित्यनुकर्षः । गत्यादिकंबुद्ध्यसंवलितचेतननिष्ठमेवेति

प्र० साधयति ॥ किंचेत्यादिना ॥ अविद्यानिवृत्त्यनंतरंगत्युक्तेरित्यंतेन ॥ परब्रह्मतेति ॥ तथाचतद्गंतुःशुद्धत्वमेवेतिभावः । विरुद्धांश किंचगत्यादिशुद्धात्मनिष्ठमेव।“तेनप्रद्योतेनैषआत्मानिष्क्रामती”तिश्रुतौशुद्धात्मवाचकात्मशब्दात् “सएनान्ब्रह्मगमयति । ब्रह्मविदाप्नोतिपर”मित्यादिश्रुतिषु, “तत्रप्रयातागच्छंतिब्रह्मब्रह्मविदोजनाः । प्रविशंतिपरंपद”मित्यादिस्मृतिषु, “मुक्तोपसृप्यव्यपदेशात् । परंजैमिनिर्मुख्यत्वा”दित्यादिसूत्रेषुच गंतव्यस्यपरब्रह्मतोक्तेः । “तयोर्ध्वमायन्नमृतत्वमेती”तिश्रुतौचगंतुर्मुक्त्युक्तेः । “मनउदक्रामन्मीलितइवाश्नत्पिबन्नास्तैवे”त्यादिश्रुतौचमनसउत्क्रमणेप्यात्मनस्तदभावश्रवणात् । [“एतंप्राणमयमात्मानमुपसंक्रम्य । एतंमनोमयमात्मानमुपसंक्रम्य । इमाँल्लोकान्कामान्नीकामरूप्यनुसंचरन् । एतत्सामगायन्नास्ते” इत्यादिश्रुतौचत्वद्रीत्याप्राणमयादित्यागानंतरमपिसंचरणश्रवणाच्च ।] “तदाविद्वान्नामरूपाद्विमुक्तःपरात्परंपुरुषमुपैतिदिव्य”मितिश्रुतौचनामरूपविमोक्षानंतरंगत्युक्तेः । “परंज्योतिरुपसंपद्यस्वेनरूपेणाभिनिष्पद्यते । सतत्रपर्येती”त्यादिश्रुतौचस्वरूपाभिव्यक्त्यनंतरंगत्युक्तेः । “अणुर्ह्येषआत्मा । यंवाएतेसिनीतःपुण्यंचपापंचे”त्यादिश्रुतौचाणुत्वस्यशुद्धगतमुक्तिसामानाधिकरण्यबंधसामानाधिकरण्योक्तेः । “एषोणुरात्माचेतसावेदितव्य”इतिश्रुतौचाणुत्वस्यवेदितव्यत्वोक्तेः ।] “तद्यथानस्सुसमाहितमुत्सर्जद्यायादेवमेवायंशारीरआत्माप्राज्ञेनात्मनान्वारूढउत्सर्जद्याती”त्यादिश्रुतौचस्वाभाविकगत्याश्रयशकटादिदृष्टांतस्यैवोक्तेः । “तद्यथातृणजलूकातृणस्यांतंगत्वान्यमाक्रममाक्रम्यात्मानमुपसंहरत्येवमेवायमात्मेदंशरीरंनिहत्याविद्यांगमयित्वान्यमाक्रममाक्रम्यात्मानमुपसंहरती”तिश्रुतौचाविद्यानिवृत्त्यनंतरंगत्युक्तेः ।

प्र० मनूद्यनिराह ॥ **यच्चोक्तमिति** ॥ तद्गुणसूत्रभाष्यइत्यर्थः ॥ **स्वाभाविकेति** ॥ आनंत्याय अनंतःकल्पतइत्यर्थः । ननुब्रह्मणस्सर्वगतस्य

यच्चोक्तं "बुद्धेर्गुणेनात्मगुणेनचैवह्याराग्रमात्रोह्यपरोपिदृष्ट"इतिश्रुतौबुद्धिगुणेनाराग्रमात्रत्वमात्मगुणेनतुविभुत्वमुक्तमिति तन्न । "यद्यथाणुनश्चक्षसःप्रकाशोव्याततएवमेवास्यपुरुषस्यप्रकाशोव्याततोणुर्ह्येवैषपुरुषोभवती"तिश्रुतिं "चिद्गुणेनैवनान्यथे"तिस्मृतिंचानुसृत्यबुद्धेर्ज्ञानस्यगुणेनव्याप्तः अपरः आत्मगुणेनचाराग्रमात्रइत्यन्वयात् । पाठक्रमादर्थक्रमस्यबलीयस्त्वात् । त्वन्मतआत्मनोनिर्गुणत्वाच्च । यच्चोक्तं "सचानंत्यायकल्पत"इत्युत्तरवाक्येस्वाभाविकानंत्योक्तेःपूर्वोक्तंबालाग्रशतभागत्वमौपाधिकमिति तन्न । [आनंत्यशब्दस्यमरणादिरूपनाशाभावात्मकमोक्षपरत्वात् । अन्यथानंतत्वस्यसाध्यत्वोक्त्ययोगात्]चतुर्थीनिर्दिष्टस्यानंत्यस्यपुनरावृत्तिरहितमोक्षरूपफलत्वात् । यच्चोक्तं "कस्मिन्न्वहमुत्क्रांतउत्क्रांतोभविष्यामिकस्मिन्वावप्रतिष्ठितेप्रतिष्ठास्यामीति । सप्राणमसृजते"तिश्रुतेर्जीवस्योत्क्रांत्यादिप्राणोत्क्रांत्याद्युपाधिकमिति तन्न । अस्यसृष्टिवाक्यस्यब्रह्मविषयत्वात् । वत्सेधावतिगौर्धावतिइत्यादाविवात्रापिब्रह्मणिप्राणोत्क्रमणादन्यस्यैवोत्क्रमणस्यश्रुतेश्च । परमात्मनोपिरूपविशेषेणोत्क्रमणस्य "प्राज्ञेनात्मने"त्यादिश्रुतिसिद्धत्वाच्च । विस्तरस्तुन्यायामृतेजीवाणुत्ववादेद्रष्टव्यः । यच्चोक्तं बुद्धेर्यावत्संसार्यात्मभावित्वात्सुषुप्तौविद्यमानायाएवपुंस्त्वादिवदभिव्यक्तत्वाच्चतस्याउत्क्रांत्यादावुपाधित्वंयुक्त

प्र० कथमुत्क्रमणमित्यतआह ॥ **परमात्मनोपीति** ॥ विवृतमेतद्भूमनये । न्यायामृतेद्वितीयपरिच्छेदइत्यर्थः । तद्दशायां सामग्रीदशायामि

प्र० त्यर्थः ॥ नित्यशब्देति ॥ तस्योत्तरावधिशून्यवाचित्वादितिभावः ॥ केचित्त्विति ॥ अत्रापिचतुर्दशसूत्राणीत्येवपाठस्साधुर्नतुत्रयोद
शेति । तन्मतेयुक्तेश्चेत्यस्याभावेप्यवशिष्टानांभावात् । "नात्माश्रुते"रितिपूर्वनयेजीवस्यवियदादिवदुत्पत्तिर्नेत्युक्तं । इहतुजीवस्वरूपंनिरू
मिति "याव"दिति "पुंस्त्वे"तिचसूत्रयोरर्थइति तन्न । त्वयैवाविद्यायाएवजीवोपाधित्वार्थंसुषुप्तावहमर्थाभावार्थंचतदाबु
द्ध्यभावस्यसाधितत्वात् । यच्चोक्तं नचमनएवनास्तीतिशंक्यं । तथात्वेबाह्येंद्रियसंप्रयोगादिसामग्रीदशायांमनोवधानानव
धानाभ्यामुपलब्ध्यनुपलब्धीइतिव्यवस्थित्यसंभवेनतद्दशायांनित्यमुपलब्धिरनुपलब्धिर्वास्यादित्यतिप्रसंगनिरासायमनसों
गीकार्यत्वादिति "नित्योपलब्ध्यनुपलब्धी"त्यादिसूत्रार्थइति तन्न । अतींद्रियचक्षुरादेरसत्त्वमशंकित्वासाक्षिसिद्धमनसए
वासत्त्वशंकाबीजाभावात् । सौत्रनित्यशब्दास्वारस्यात् । सौत्रान्यथाशब्दस्य "पुंस्त्वादिव"दितिपूर्वसूत्रोक्तावरणविरहवा
चितायाएवोचितत्वाच्च । उक्तरीत्यामनःसिद्धावपित्वन्मतेतार्किकमतइवाणुत्वाभावेनयुगपदनेकेंद्रियसंबंधसंभवेनतद्दशा
यांनित्योपलब्धिप्रसंगाच्च । यदिचानेकेंद्रियसंबंधेसत्यपिमनस्येवावधानाख्यःकश्चिद्विशेषःकल्प्यते तर्हिक्लृप्तआत्मनिबाह्यें
द्रियेवासकल्प्यतां । केचित्तु "ज्ञोत"इत्यादि "नित्योपलब्धी"त्यंतानिचतुर्दशसूत्राण्येकमधिकरणं । तत्रजीवस्यज्ञातृत्वंस्वा
भाविकं । नतुतार्किकमतइवागंतुकं । नापिसौगतमतइवज्ञानस्वभावत्वमिति "ज्ञोत"इतिसूत्रार्थः । "उत्क्रांती"त्यादीनितु
प्र० प्यते । आत्मा सुगतकपिलाभिमतचिन्मात्रमुतकणादाभिमतपाषाणकल्पोचित्स्वभावएवागंतुकचैतन्यगुणइतिसंशये "योविज्ञानेतिष्ठ"न्नि
त्यादिश्रुतेर्ज्ञानस्वभावएवेतिवा विभोरात्मनोज्ञानरूपत्वेसर्वदासर्वोपलंभप्रसंगादिनाकणादाभिमतरूपएववेतिप्राप्ते ज्ञः सर्वदाज्ञातृस्वभावए

प्र० वात्मा । नज्ञानमात्रं । नापिजडस्वभावः । कुतः । "जानात्येवायंपुरुष"इत्यादिश्रुतेरेवेतिसूत्रार्थइत्यर्थः ॥ तदुपयोगित्वेनेति ॥ आत्मनो
ज्ञातृत्वेस्वाभाविकेसति तस्यसर्वगतस्यसर्वदासर्वत्रोपलब्धिप्रसंगादित्याशंकानिरासायस्वाभाविकज्ञातृत्वोपयोगितयेत्यर्थः । प्रतिपादयंतीतिशत्रं
तं । तदुपयोगित्वेनेत्येतद्व्यनक्ति ॥ ज्ञातृस्वभावस्येति ॥ अचलतः क्रियारहितस्य ॥ स्वात्मनैवेति ॥ चोऽवधारणइतिभावः । अयमर्थः
तदुपयोगित्वेनाणुत्वंजीवस्यप्रतिपादयंतिसिद्धांतसूत्राण्येव । ज्ञातृस्वभावस्यजीवस्यसर्वगतत्वेहिसर्वतत्संबंधात्सदाज्ञायेत ।
"स्वात्मने"तिसूत्रस्यतु उत्क्रांतिर्यद्यप्यचलतोपिदेहस्वाम्यनिवृत्त्यायुक्ता । उत्तरेगत्यागतीतुस्वात्मनैव । नह्यचलतोगत्याग
तीइत्यर्थः । "स्वशब्दे"तिसूत्रस्यतु "एषोऽणुरात्मे"तिसाक्षादेवाणुत्ववाचिशब्दात् "वालाग्रशतभागस्येत्युन्मानाच्चाणुर्जी
वइत्यर्थः । "व्यतिरेक"इतिसूत्रस्यतुपृथ्वीगंधवतीतिवत् "जानात्येवायंपुरुष"इतिश्रुतौज्ञानात्मनोरेकस्मिन्पदेप्रकृतिप्रत्य
याभ्यांविशेषणविशेष्यत्वनिर्देशाद्भेदइत्यर्थः । "पृथ"गितिसूत्रस्यतु "नहिविज्ञातुर्विज्ञातेर्विपरिलोपोविद्यत"इतिश्रुतौपदद्व
येनविशेषणविशेष्यत्वेननिर्देशाद्भेदइत्यर्थः । "तद्गुणे"त्यादिसूत्रयोस्तु आत्मनोज्ञानगुणसारत्वाज्ज्ञानस्ययावदात्मभावि
त्वाच्च ज्ञातर्यात्मनिश्रुतिषुज्ञानत्वव्यपदेशइत्यर्थः । "पुंस्त्वे"तिसूत्रस्यतुसुषुप्त्यादौसतोप्यनभिव्यक्तस्यज्ञानस्यजागरणादाव
प्र० परमतेप्यविशिष्टः । "नाणु"रितिसूत्रव्याख्यानंमतद्वयेपिसिद्धांत्यर्थाविरोधीतियक्त्वा "स्वशब्दोन्मानाभ्यांचे"तिसूत्रार्थमन्वाह ॥ स्वश
ब्देतीति ॥ इत्यर्थइति ॥ अयमपिपरमतेऽविशिष्टः । "अविरोधश्चंदनव"दित्यादिसूत्रत्रयव्याख्यानविरुद्धेतियक्त्वा "व्यतिरेकोगंध
व"दित्यस्यार्थमनुवदति ॥ व्यतिरेकइतीति ॥ भेदइति ॥ नतुज्ञानस्वरूपमात्मेत्यर्थः ॥ विशेषणविशेष्यत्वेनेति ॥ ज्ञानात्मनोरित्य

प्र० नुकर्षः । ज्ञानगुणसारत्वात् ज्ञानाख्यगुणप्रधानत्वात् । ज्ञानत्वव्यपदेशः विज्ञानंयज्ञंतनुतइत्यादावित्यर्थः । प्राज्ञवत् यथाऽऽनंदगुणप्रधा
नत्वादानंदोब्रह्मेत्युच्यतेप्राज्ञस्तद्वदिति । ज्ञानस्ययावदात्मभावित्वाज्ज्ञानात्मत्वव्यपदेशदोषोनास्ति । चकारात्स्वप्रकाशत्वादिव्यपदेशदोषो
नेत्यर्थः । तद्दर्शनात् यावद्द्रव्यभाविगोत्वादिनागवादिशब्दव्यपदेशदर्शनादित्यर्थः ॥ **स्वरूपाण्येवेति** ॥ “बलमानंदओजश्चसहोज्ञानम

भिव्यक्तेर्यावदात्मभावित्वसिद्धिरित्यर्थइत्याहुः। तन्न। “स्वरूपाण्येवजीवस्य विज्ञानघनएवे”त्यादिश्रुत्या “ज्ञान
स्वरूपमत्यंतनिर्मलंपरमार्थत”इत्यादिस्मृत्याचविरुद्धत्वेनज्ञानस्वभावत्वनिरासायोगात् । ज्ञातृस्वभावस्यात्मनो
णुत्वपक्षेतत्संबद्धस्यविभोराकाशेश्वरादेर्नित्यमप्रकाशवद्विभुत्वपक्षेपितत्संबद्धस्याप्रकाशोपपत्त्याऽणुत्वस्यज्ञातृ
स्वभावत्वेऽनुपयोगाच्च । आनंदादेःस्वाभाविकत्वमनुक्त्वाज्ञानस्यैवतदुक्तौविशेषहेत्वभावाच्च । “स्वात्मने”ति
सूत्रउत्तरेइतिप्रथमानिर्देशापत्तेश्च । ममतुषष्ठी उत्क्रांतिसूत्रेऽवश्यविवक्षणीयस्यसकाशादित्यस्येहानुषक्तस्यान्वया
य। “स्वशब्दे”तिसूत्रस्यत्वणुत्वसाधकत्वउत्क्रांतिसूत्रानंतर्यापाताच्च । उन्मानशब्दस्यवालाग्रशतभागशतभाग
त्वेयोगरूढ्योरभावाच्च। “व्यतिरेक”इतिसूत्रस्यजीवाणुत्वेयोगिनोनेकशरीरस्थित्ययोगइतिदृढतरबाधकपरिहा
रार्थतायाएवौचित्येनभेददृष्टांतांतरपरत्वायोगाच्च । रूपादेरपिदृष्टांतत्वसंभवेनविशिष्यगंधग्रहणायोगाच्च ।

प्र० नाकुलं । स्वरूपाण्येवे”तिभाष्योक्तश्रुतिः । तदुपयोगित्वेनेत्युक्तंनिराह ॥ **ज्ञात्रिति** ॥ **प्रथमेति** ॥ अयंदोषःपरमतेपिसमः । उत्क्रांति
सूत्रानंतर्येत्यादिदोषोपिसमः ॥ **शतभागशतभागत्वइति** ॥ “वालाग्रशतभागस्यशतधाकल्पितस्यचे”त्युक्तेःशतभागस्यशतभागत्वइत्यर्थः

प्र० ॥ भेदेति ॥ ज्ञानात्मनोर्भेदमात्रपरत्वइत्यर्थः ॥ इतिवाक्यद्वयरूपस्येवेति ॥ ज्ञानात्मनोर्भेदउक्तवाक्यद्वयरूपस्यभेदोपदेशस्यप्रमाणत्वे पितस्योपसंग्रहायैकपदरूपपदद्वयरूपयोर्भेदोपदेशयोरुपसंग्रहायसूत्रद्वयमिवतृतीयमपिसूत्रंकर्तव्यं । यद्येतयोरेवसूत्रयोरन्यतरेणैवसूत्रेणवा क्यद्वयरूपभेदोपदेशस्यापिसंभवान्नपृथक्सूत्रांतरमपेक्षितं तर्ह्येतयोरन्यतरेणैवसूत्रेणैकपदरूपपदद्वयरूपयोरपिभेदोपदेशयोरुपसंग्रहसंभवेना न्यतरसूत्रानर्थक्यमित्यर्थः ॥ त्वत्पक्षइति ॥ अधिकरणव्यतिरेकेणाभावानभ्युपगमादितिभावः । "तद्गुणसारत्वात्, यावदात्मभावित्वा

भेदमात्रपरत्वे "व्यतिरेक"इतिसूत्रेणैववा "पृथ"गितिसूत्रेणैववा "विज्ञानंत्वेवविजिज्ञासितव्यं । अथातआत्मादे श"इतिवाक्यद्वयरूपस्यैवैकपदरूपस्यपदद्वयरूपस्यचभेदोपदेशस्यग्रहणसंभवेनसूत्रद्वयवैयर्थ्याच्च । अघटंभूतलमि त्यादौविशेषणविशेष्यभावेपित्वत्पक्षेभेदाभावाच्च। गंधादेःकस्तूर्यादिसारत्वेपियावद्द्रव्यभावित्वेपितत्रगंधादिशब्दस्य मुख्यत्वाभावाच्च। एतावंतंकालंसुखमहमस्वाप्समितिपरामर्शदर्शनेनसुप्त्यादौजागरणइवात्मादिज्ञानस्याभिव्यक्तत्वे नेंद्रियाणांघटादिविषयसंबंधस्यचतदास्वरूपेणैवाभावेनानभिव्यक्त्युक्त्ययोगाच्च ॥ ७॥ पुंस्त्वाधिकरणं ॥ १६ ॥

प्र० च्चे"तिसूत्रद्वयार्थंप्रागुक्तंप्रत्याह ॥ गंधादेरिति ॥ एवमेवश्रुतिष्वात्मनोज्ञानत्वव्यपदेशोऽमुख्यस्स्यादितिभावः । "पुंस्त्वादिव"दितिसूत्रा र्थंप्रत्याह ॥ एतावंतमिति ॥ आत्मादिज्ञानस्य आत्मकालसुखादिज्ञानस्येत्यर्थः ॥ अभावेनेति ॥ विषयेंद्रियसंबंधाभावादनभिव्यक्ति रितियोक्तिस्तस्याअयोगाच्चेत्यर्थः ॥ ७ ॥ पुंस्त्वाधिकरणं ॥ १६ ॥

तात्पर्य- ॥ १२३ ॥

प्र० ॥ ॐकर्ताॐ ॥ "जीवोनकर्ते"तिटीकासूचितामाह ॥ अस्त्विति ॥ कर्तृत्वश्रुतिरिति ॥ "यत्कर्मकुरुतेतदभिसंपद्यत"इतिश्रुतिः ॥ श्रुत्येति ॥ "नान्यःकर्ते"तीश्वरान्यकर्तृत्वनिषेधश्रुत्येत्यर्थः । अस्पष्टत्वादाह ॥ अयंभावइति ॥ "उपलब्धिवदनियम"इतिसूत्रसंबद्ध

चंद्रिका॰ द्वि. तृ. १७

॥ ॐकर्ताशास्त्रार्थवत्त्वात्ॐ ॥ अस्त्वानंदादीनांसतामेवाभिव्यक्तिः । कर्तृत्वस्यतुन । तस्यकदाप्यभावादितिपूर्वपक्षोत्थानात्संगतिः । अत्रजीवस्यकर्तृत्वश्रुतिःकिंहिताकरणादियुक्त्यनुगृहीतयातदकर्तृत्वश्रुत्याबाधितोतनेतिचिंता । [अत्रश्रुतिसमन्वयेनोक्तंब्रह्मणःस्रष्टृत्वादिकमयुक्तंनवेतिचिंता । तदर्थंश्रुतिरप्रमाणंनवेति । तदर्थंजीवस्यकर्तृत्वश्रुतिः किंहिताकरणादियुक्त्यनुगृहीतयातदकर्तृत्वश्रुत्याबाधितोतनेति] तदर्थमकर्तृत्वश्रुतिःकिंकर्तृत्वमात्रनिषेधपरोतस्वतंत्रकर्तृत्वनिषेधपरेति ।

१२०।२३

तदर्थंजीवस्येश्वरवत्स्वतंत्रकर्तृत्वाभावेपिपरतंत्रकर्तृत्वमात्रेणविध्यादिविषयत्वमयुक्तमुतनेति ॥ नकर्तेतिपूर्वपक्षइति ॥ अयंभावः । जीवस्यकर्तृत्वंकिंस्वतंत्रमुतपरतंत्रं । नाद्यः । श्रुत्यादिविरोधात् । हिताकरणादिदोषप्रसक्तेश्च । द्वितीयेपिपारतंत्र्यंकिंकर्तृत्वशक्तेःस्वायत्तत्वेपितक्षणःप्रासादादिकारयितृपुमधीनत्ववदीश्वराधीनत्वमात्रंकिंवादारुयोषावदीश्वराधीनचेष्टाकत्वं । नाद्यः । "यआत्मानमंतरोयमयती"त्यादिश्रुतिविरोधात् । अंत्येदारुयोषावदेवनजीवोविधिनिषेधविषयःस्यादिति ।

प्र० टीकांहृदिकृत्वाह ॥ किंस्वतंत्रमित्यादि ॥ "नान्यःकर्ते"त्यादिश्रुत्या "इतरव्यपदेशा"दित्यधिकरणेनचविरोधादित्यर्थः । "परात्तुतच्छ्रुते"रितिसूत्रसंबद्धटीकांविकल्पमुखेनव्यनक्ति ॥ किंकर्तृत्वशक्तेरिति ॥ "कृतप्रयत्ने"ति सूत्रसंबद्धटीकार्थमाह ॥ अंत्यइति ॥ इति ॥ ९६५ ॥

प्र० शब्दस्यायंभावइतिपूर्वेणान्वयः ॥ सूत्रोक्तरीत्येति ॥ "शास्त्रार्थवत्त्वा"दित्यनेनयुक्तेः, "उपादाना"दित्यनेन "मोक्षाद्यर्थसाधनाद्युपादानप्रतीते"रित्युक्तयाप्रत्यक्षस्य, "विहारोपदेशात् । व्यपदेशाच्चक्रियायांनचेन्निर्देशविपर्यय"इत्याभ्यां "जक्षन्क्रीडन्रममाणः । आत्मानमेवलोकमुपासीते"त्यादिश्रुतेरुक्तेरितिभावः । एतेनतत्तत्सूत्रभाष्यटीकातात्पर्यार्थसंग्रहःकृतोभवति । "उपलब्धिवदनियम"इत्यादिसूत्रभाष्य

१२०।२६ १२१।१

न्यायविवरणोक्तांपूर्वपक्षयुक्तिमाह ॥ कल्पनालाघवंचेति ॥ सिद्धांतयदिति ॥ अयंभावः सूत्रोक्तरीत्यायुक्तिप्रत्यक्षश्रुतिभिर्जीवःकर्तैव । नच "नान्यःकर्ते"त्यादिश्रुत्या "इतरव्यपदेशा"दितिपूर्वोक्त्याचविरोधः । तत्रजीवेस्वतंत्रकर्तृत्वनिषेधात् । इहचास्वतंत्रकर्तृत्वोक्तेः । परतंत्रकर्तृत्वेपिजीवस्यविध्याद्यविषयत्वंनतावत्पुरुषेणनर्त्यमानदारुयोषावज्जडत्वात् । नापिचेतनत्वेपिमत्तस्यमदेनेवदुर्बलस्यप्रबलजलौघादिनेवेश्वरेणबलान्नोद्यमानत्वात् । ईश्वरस्यजीवगतेच्छाद्युत्पाद्यैवप्रवर्तकत्वात् । नापिजीवस्यकर्तृत्वेपीश्वरस्यापिकर्तृत्वात् । रथाकर्षणादौसत्रादौचान्यस्यकर्तृत्वेपिस्वस्यकर्तृत्वमात्रेणविध्यादिदर्शनात् । नापिविष्टिगृहीतस्येवस्वेच्छाधीनप्रवृत्त्याद्यभावात् । जीवप्रवृत्त्यादेरीशेच्छाधीनत्वेपिजीवेच्छाजन्यत्वस्यानुभवात् । नापिस्वेच्छामात्राधीनप्रवृत्त्याद्यभावात् । सर्वत्रापिप्रवृत्त्यादेरदृष्टादिजन्यत्वेनतस्यविध्याद्यविषयत्वातंत्रत्वात् । नापिजीवेच्छादेरपीशेच्छोत्पादितत्वात् । पित्राद्युत्पादितेच्छादिमतोपिमाणवकस्यसंध्योपासनादिविध्यादिदर्शनात् । नापिकर्तृत्वशक्ते

प्र० टीकातात्पर्यशंकापूर्वंव्यनक्ति ॥ नचेति ॥ "कृतप्रयत्नापेक्षस्तुविहितप्रतिषेधावैयर्थ्यादिभ्य"इतिसूत्रभाष्यादितात्पर्यंप्रागुक्तशंकानिवर्तकत्वेनव्यनक्ति ॥ परतंत्रेति ॥ प्रसक्तपक्षान्प्रतिक्षिपति ॥ नतावदित्यादिना ॥ विध्यादिविषयस्येति ॥ ज्योतिष्टोमादियागादेरित्यर्थः

प्र० ॥ उक्तंहीति ॥ गीताभाष्ये ॥ कृतिविघातादिति ॥ जीवस्यविध्याद्यविषयत्वमित्यन्वयः ॥ इतिपक्षइति ॥ तार्किकपक्षेरामानुज पक्षेपीत्यर्थः ॥ अदृष्टाभावपक्षेपीति ॥ चार्वाकपक्षेपीत्यर्थः । गीताभाष्ये अष्टादशेऽध्याये ॥ अकर्तृत्वेपीति ॥ अपराधीनकर्तृत्वा रीशाधीनत्वात् । अन्वयव्यतिरेकाभ्यामीशाधीनायाएवतस्याविध्यादिविषयत्वेतंत्रत्वात् । क्वेदमुपलब्धमंगभवता ईशाधी नैवसातत्रहेतुर्नतुतदधीनेति । नापिविध्यादिविषयस्यजीवकृत्यसाध्यत्वात् । असिद्धेः । दृश्यतेहियागादेस्तत्कृतिसाध्यत्वं । अस्तिहिजीवस्यापीश्वरदत्तंजडंप्रतिस्वातंत्र्यं । उक्तंहि "स्वातंत्र्यंहिजडान्प्रती"ति । परंतुसाकृतिरदृष्टादिनेवेशेनापिजायते । नापिक्वचिदीश्वरेणजीवकृतिविघातात् । ईश्वरःपुण्यपापादावुदासीनइतिपक्षेद्वितीयादिप्रवृत्तावनुमंतृत्वेपिप्रथमप्रवृत्तावुदा सीनइतिपक्षेपीश्वरेण अनीश्वरपक्षेप्यदृष्टादिना अदृष्टाभावपक्षेपिदृष्टहेत्वंतरेणपाकादिकृतिविघातदर्शनेनकस्यापिकुत्रापिनि योगानुपपत्तेः । तस्माज्जीवेपिविध्यविषयेभ्यईशजडमुक्तेभ्योव्यावृत्तस्यस्वसंबंधितयाविधिज्ञानस्यतज्जन्यायाःफलेतत्साधनेचे च्छायास्साधनविषयककृतेश्चानुभवसिद्धत्वात्तस्यचज्ञानादेः "नऋतेत्व"दित्यादिश्रुतिभिरीश्वराधीनत्वेप्यस्वतंत्रकर्तृत्वमात्रेण विधिविषयत्वंकर्मफलभाक्त्वंचयुक्तं । एतदेवाभिप्रेत्योक्तंभगवत्पादैर्गीताभाष्ये "अकर्तृत्वेपिविधिद्वारेश्वरप्रसादादिच्छोत्प त्त्योक्तकारणैःकर्मद्वारापुरुषार्थोभवतीति नप्रवृत्तिविधिवैयर्थ्य"मिति । भारततात्पर्यनिर्णयेपि "प्रत्यक्षैषाकर्तृताजीवसंस्था प्र० भावेपिजीवस्यनतंप्रतिप्रवृत्तिविधिवैयर्थ्यंकुतइतिहेतोरित्यन्वयः । विधिशब्देनतज्ज्ञानमुपलक्ष्यते । इच्छेत्यनेनप्रयत्नोपि । उक्तकारणैः अधिष्ठानादिभिः । उपयुक्तमात्रस्यान्वयमुखेनेदमुदाहरणं । नतुसमग्रस्येतिनविसंवादश्शंक्यः ॥ भारतेति ॥ हठवादे । "उक्तोपिदो

प्र० षपरिहारःस्मारयितुंपुनरत्रोक्त''इतिटीकावाक्यंव्यनक्ति ॥ पुण्यपापेति ॥ एतेनस्मारणंव्यर्थमितिप्रत्युक्तं । विष्णोरेवस्वातंत्र्येवैषम्याद्या
पत्तेःप्रागुक्तस्मारणेनविनाऽपरिहारादिति ॥ उक्तंहीति ॥ हठवादएवभगवत्पादैरित्यर्थः ॥ अन्येत्विति ॥ मतांतरेतु ''यथाचतक्षे''त्यं
तथागमादनुमानाच्चसर्वं । विष्णोर्वशेतन्नहेयंद्वयंचजानन्विद्वान्कुरुतेकार्यकर्मे''ति । पुण्यपापादिजनकक्रियाविषयजीवगते
च्छाप्रयत्नादौसर्वत्रेश्वरस्यप्रयोजककर्तृत्वेपि जीवनिग्रहानुग्रहयोरीश्वरस्यानादिसिद्धजीवगतयोग्यतापेक्षत्वान्नवैषम्यादीत्युक्तं
वैषम्याधिकरणे । कर्माद्यनपेक्ष्यफलदानेशक्तस्यापीश्वरस्यतदपेक्ष्यैवफलंदास्यामीतिस्वसंकल्पादेवतदपेक्षेतिनस्वातंत्र्यहानिः ।
उक्तंहि ''एतानपेक्ष्यैवफलंददानीत्यस्यैवसंकल्पइतिस्वतंत्रते''ति ॥ अयंपरइति[१।२।१३] ॥ ''परात्तुतच्छ्रुते''रितिसूत्रात्परइत्यनुषज्य
तइतिभावः ॥ विधिनिषेधशास्त्रावैयर्थ्यायैवेति[१।२।१४] ॥ नत्वशक्तस्यस्वस्यसाहाय्यार्थमित्यर्थः । अन्येतु ''कर्ते''त्यादिसूत्रसप्त
कमेकमधिकरणं । तत्रचसांख्यरीत्याबुद्धेःकर्तृतेतिप्राप्तेजीवस्येतिसिद्धांतः । ''यथाचतक्षे''तिसूत्रमधिकरणांतरं । तत्रचजी
वस्यकर्तृत्वमग्नेरौष्ण्यमिवस्वाभाविकमितिप्राप्ते तक्षणःकर्तृत्वंवास्याद्युपाधिनेवांतःकरणाद्युपाधिनाकल्पितमितिसिद्धांतः ।
''परात्त्वि''त्यादिसूत्रद्वयमधिकरणांतरं । तत्रचजीवस्योक्तंकर्तृत्वमीश्वरानपेक्षमितिप्राप्ते तत्सापेक्षमितिसिद्धांतइत्याहुः ।
तन्न । जीवकर्तृत्वाकर्तृत्वश्रुत्योर्विरोधस्यभोक्तृत्वाभोक्तृत्वश्रुत्योरिवत्वदुक्तेन''तद्गुणसारत्वा''दितिन्यायेनैवौपाधिकानौपा
प्र० तंसूत्राष्टकमेकमधिकरणं । ''परात्त्वि''तियोगद्वयमधिकरणांतरं । तत्प्रमेयनिरासोग्रेव्यक्तः ॥ सूत्रसप्तकमिति ॥ सूत्राणामर्थोग्रेव्यक्तः
॥ जीवकर्तृत्वाकर्तृत्वश्रुत्योरिति ॥ ''असंगोह्ययमित्यादिश्रुतीनांविध्यादिश्रुतीनांचात्मकर्तृत्ववादिनीनांचविरोधःपरिह्रियत''इतिकल्प

प्र० तरूक्तयाकर्तृत्वाकर्तृत्वश्रुत्योर्विरोधनिरासोत्रक्रियते । सच "तद्गुणसारत्वा"दित्यत्रबुद्धिगुणप्रधानकत्वादात्माबुद्धिगुणेनाणुत्वेन "एषोणुरात्माचेतसावेदितव्य"इतिश्रुतौव्यपदिश्यतइत्युक्तन्यायेनात्राप्यात्मनस्स्वतोकर्तुर्बुद्धिगुणेनकर्तृत्वेन "यजेते"त्यादौतस्यकर्तृत्वव्यपदेशःसेत्स्यतीतीयंचिंतानारंभणीयैव । यथाभोक्तृत्वाभोक्तृत्वश्रुत्योर्विरोधस्तेनैवनिरस्तइतिनाधिकरणांतरारंभस्तद्वत् । अन्यथातदर्थमधिकरणांतरारंभस्स्यादित्यर्थः । नन्वेतदेवाशंक्योक्तंभाष्यभामत्योः "तस्यैवैषप्रपंच"इतीतिचेन्न । प्रपंचनस्यापिव्यर्थत्वात् । ननुप्रकृतिरेवकर्त्रीतिसांख्यपक्षनिरासार्थोयमारंभइतिचेन्न । प्रकृतिगतस्यवांतःकरणगतस्यवाकर्तृत्वस्यात्मन्यारोपइत्यस्यमतद्वयेपिसंमतत्वेनतन्निरासस्यापिव्यर्थत्वात् ।

धिकविषयतयानिरासेनैतदधिकरणस्यवैयर्थ्यात् । सांख्यस्मृतिविरोधस्यचाद्यपादेनिरासादिहासंगतेश्च । यच्चोक्तमुभाभ्यांकर्ता । "विज्ञानात्मापुरुष"इत्यादेःकर्तृत्वप्रतिपादकस्य "यजेते"त्यादिविधिनिषेधरूपस्यचशास्त्रस्यार्थवत्त्वात् । "स्वेशरीरेयथाकामंपरिवर्तते"इति

प्र० सूत्रेविशेषस्याप्रतीतेश्चेतिभावः । दोषांतरंचाह ॥ **सांख्येति** ॥ "स्मृत्यनवकाशदोषप्रसंग"इत्यत्रेतिभावः ॥ **इहेति** ॥ श्रुतिविगाननिरासस्यैवेहसंगतत्वेनतत्रचात्मनःकर्तृत्वाकर्तृत्वयोरेवश्रवणेनत्वदभिमतनिरसनीयस्याप्रतीतेरितिभावः । सूत्रार्थानप्यनूद्यनिराह ॥ **यच्चोक्तमुभाभ्यामिति** ॥ यद्यप्यत्रसूत्राणांक्रमसंख्येअस्मन्मतेपरमतेप्यविशिष्टे । मतांतरेतुनैवं । "विहारोपदेशात् । उपादाना"दित्यनयोरुपादानाद्विहारोपदेशाच्चेत्येकयोगत्वक्रमव्यत्यासयोरुपगमात् । तथापिसूत्राणामर्थस्यमतद्वयेप्यनतिभेदेनोभाभ्यामित्युक्तं । "द्रष्टाश्रोतामंताबोद्धाकर्ताविज्ञानात्मापुरुषइत्यादे"रित्येतत्परभाष्योक्तं । "यजेते"त्यादितुभाष्यद्वयेप्युक्तं । "शास्त्रफलंप्रयोक्तरितल्लक्षणत्वा"दितिजैमिनिसू

प्र० त्रोक्तदिशाफलभोक्तुरेवकर्तृत्वाद्भोक्तुर्जीवस्याकर्तृत्वे "यजेतस्वर्गकाम"इत्यादिशास्त्रमनर्थकंभवेदितिभावः । अर्थवत्त्वादित्यादिहेतूनांजीवःकर्तेतिसाध्येनान्वयः ॥ **विहारेति** ॥ विहारस्संचारक्रिया । तत्रस्वातंत्र्यंनाकर्तुस्संभवतीतिकर्तृत्वसिद्धिरितिभावः ॥ **प्राणानिति** ॥ प्राणानिंद्रियाणिगृहीत्वायथाक्रमंस्वेस्वेशरीरेपरिवर्ततइतींद्रियोपादानेस्वातंत्र्यप्रतीतेस्तस्यचाकर्तुरयोगात्कर्तृत्वसिद्धिरितिभावः । "व्यपदेशा

विहारोपदेशात् । "प्राणान्गृहीत्वे"त्युपादानात् । "विज्ञानंयज्ञंतनुत"इतिक्रियायांकर्तृत्वेनव्यपदेशाच्च जीवःकर्ता । अत्रचविज्ञानशब्दस्यबुद्धिपरत्वे "तदेतेषांप्राणानांविज्ञानेने"तिश्रुत्यंतरइवकर्तृत्वविपरीतकरणत्वेननिर्देशःस्यादिति "कर्ते"त्यादिसूत्रचतुष्टयार्थइति । तन्न । आद्यसूत्रस्थशास्त्रशब्देनैव "यत्कर्मकुरुतेतदभिसंपद्यते । साधुकारीसाधुर्भवती"त्यादेरिव "यथाकाम"मित्यादेरपिकर्तृत्वप्रतिपादकशास्त्रस्यग्रहणसंभवेनद्वितीयादिसूत्रत्रयवैयर्थ्यात् । बुद्धेःकर्तृत्ववादिनंप्रतिश्रुत्यंतरेकरणत्वोक्तिविरोधस्यैववक्तव्यत्वेन "विज्ञान"मितिश्रुतौबुद्ध्युक्तौकर्तृत्वविपरीतकरणत्वोक्तिःस्यादित्यापादनस्यासंगतेश्च । यच्चोक्तं

प्र० च्चक्रियायांनचेन्निर्देशविपर्यय"इत्येतदर्थमाह ॥ **विज्ञानमिति** ॥ नचेदित्यादिसूत्रशेषार्थमाह ॥ **अत्रचेति** ॥ "विज्ञानंयज्ञ"मितिश्रुतावित्यर्थः ॥ **सूत्रचतुष्टयेति** ॥ स्वपरमतानुरोधेनेदं । मतांतरेतुसूत्रत्रयार्थइतियोज्यं ॥ **इत्यादेरिवेति** ॥ अन्यथातदर्थमपिसूत्रांतरंस्यात् । वाक्यभेदेनसूत्रभेदेशास्त्रापर्यवसानंचस्यादितिभावः ॥ **सूत्रत्रयवैयर्थ्यादिति** ॥ एतच्चोपलक्षणं । विहारादिसूत्रयोः "प्राणान्गृहीत्वास्वे

प्र० शरीर"इत्यादिवाक्यविषयत्वेश्रुत्यनुरोधेनोपादानाद्विहारोपदेशादित्येवरामानुजमतवत्सूत्रणंस्यादितिपरमतेदोषः । मतांतरेतु एवंसूत्रक्रमैकयोगत्वेअसांप्रदायिके । उपादानेनविहारोपदेशादितिसूत्रणंस्यादितिदोषइत्यपिध्येयं ॥ **परैरिति** ॥ मतांतरेतुजीवस्याकर्तृत्वेदोषोक्तिपरमिदं सूत्रं । जीवस्य विभुत्वउपलब्धिनियमोनस्यादित्युपलब्ध्यनियमः "नित्योपलब्धी"तिसूत्रेप्रागुक्तः । तथाचोपलब्धिवदात्मनोकर्तृत्वेप्रकृतेश्चकर्तृत्वेतस्यास्सर्वसाधारणत्वात्सर्वेकर्माणिसर्वेषांभोगायस्युरित्यनियमस्स्यादित्यर्थोक्तेरितिभावः ॥ **इत्यादीति** ॥ दुःखीनस्यादितिशंका

परैः जीवःकर्ताचेन्नियमेनसुखीस्यादित्यादिशंकानिरासार्थं "उपलब्धी"तिसूत्रमिति तन्न । क्रियावेशमात्रस्यनियतसुखाप्रसंजकत्वात् । तत्प्रसंजकस्यचस्वातंत्र्यस्याभावेपिसांख्यानभिमतक्रियावेशानुरोधेनशंकानुदयात् । यच्चोक्तं करणशक्तियुक्तायाबुद्धेःकर्तृत्वेकरणकारकशक्तिविपरीताकर्तृकारकशक्तिःस्यादिति "शक्ती"तिसूत्रार्थइतितन्न । [कारकशक्तिवाचिविभक्तिविपर्ययापादकेन "नचेन्निर्देशे"त्यनेनास्यार्थिकपुनरुक्तेः]। सांख्यमतेबुद्धेःकर्तृत्वेपितत्वांतरस्यमनसःकरणत्वसंभवेनेष्टापत्तेः ।

प्र० ऽऽदिपदार्थः । इष्टानिष्टोपलब्धिवद्देशकालादिवशादनियमेनहिताहितकारित्वोपपत्तिरितिसूत्रार्थः । शंकायाएवानुदयेनतन्निरासायसूत्रणंव्यर्थमितिभावेनकिंकर्तृत्वमात्रेस्वतंत्रकर्तृत्वेवेयमाशंकेतिविकल्पौक्रमेणनिराह ॥ **क्रियेति** ॥ मतांतरेतु अनियमस्स्यादितिप्रसंगरूपत्वाध्याहारयोःकल्पनादितिदोषोध्येयः ॥ **यच्चेति** ॥ परैरित्यस्ति । मतांतरेतु आत्मनोकर्तृत्वेभोक्तृत्वशक्तेर्विपर्ययोहानिस्स्यात् । कर्तुरेवभोक्तृत्वादित्यर्थवर्णनात् ॥ **मनसइति** ॥ यदत्रोक्तंभामत्यां "करणांतरकल्पनायांनाम्निविवाद"इति तन्न । बुद्धेर्जीवान्यत्वेनजीवकर्तृत्वाप्राप्तेः ।

प्र० ननुच बुद्धिर्मनोवृत्तिविशेषएवेतिचेन्न । "मनसस्तुपराबुद्धि"रित्यादौमनोबुद्धिपुरुषाणांतत्वांतरत्वप्रतीतेः । अतएव "तत्वांतरे"त्युक्तं । मतांतरेतु भोक्तृत्वहानिरित्येवसूत्रणंस्यादितिदोषप्रसंगरूपत्वकल्पनादोषश्चध्येयः । "समाध्यभावाच्चे"तिसूत्रार्थंनिराह ॥ यच्चोक्तमिति ॥ परैरित्यन्वेति । मतांतरेतु बुद्धेःकर्तृत्वउपासनाविधावपितस्याएवकर्तृत्वापत्तेस्समाधेश्चप्रकृतेरन्योस्मीत्येवंरूपत्वात्तादृशसमाधेःप्रकृतावभावा

यच्चोक्तं जीवस्याकर्तृत्वेनिदिध्यासनादिरूपसमाधेरप्यभावःस्यादिति "समाधी"तिसूत्रार्थइति तन्न । यागादिविधिशास्त्रस्येवसमाधिविधिशास्त्रस्याप्याद्यसूत्रस्थशास्त्रशब्देनैवग्रहणसंभवेनास्यवैयर्थ्यात्। यदिचसमाधिदशायांकर्तृभूतबुद्ध्यविवेककृतस्यकर्तृत्वस्यायोगइतीहाभिप्रायस्तर्हिंसिद्धांत्यभिप्रेतस्यारोपितकर्तृत्वस्याप्ययोगः । किंचत्वन्मते "शक्तिविपर्यया"दित्यस्य "समाध्यभावा"दित्यस्यचप्रसंगरूपहेतुताकल्प्या । "यथे"तिसूत्रस्याधिकरणांतरत्वमप्ययुक्तं । उक्तार्थेदृष्टांतांतरमात्रार्पकेणयथाशब्देन, चशब्देनचपूर्वशेषत्वप्रतीतेः। कल्पितत्वेस्फटिकलौहित्यस्यैवदृष्टांतयितव्यत्वेनतक्षकर्तृत्वस्यतदयोगाच्च । नहिकार्योत्पादनेसहकार्यपेक्षामात्रेणकर्तृकरणादेःकर्त्रादित्वंकल्पितंभवति । यदिचतक्षणइवजीवस्यशक्तेःस्वाभाविकत्वेपिकार्यनिष्पादकत्वंसहकार्यधीनत्वादागंतुकमितिविवक्षा तदेष्टापत्तिः। किंचकर्तृत्वस्य "तन्मनो

प्र० त्तदन्योजीवःकर्तेत्यर्थः । अवैयर्थ्यमाशंक्यनिराह ॥ यदिचेति ॥ अयोगइति ॥ बुद्ध्यविवेककृतकर्तृत्वस्यमुक्तिहेतुसमाधावनुपयोगादितिभावः ॥ आरोपितेति ॥ तथाचमन्मतइवस्वाभाविकमेवकर्तृत्वमुपेयमितिभावः । मतांतरेतु पूर्वत्रजीवस्याकर्तृत्वेदोषउक्तः । इहतु बुद्धेःकर्तृत्वइत्यस्यसूत्रस्योपलब्धिसूत्रानंतर्यंस्यादितिदोषोध्येयः । सूत्रार्थंचनिराह ॥ कल्पितत्वइति ॥ यथालोकेतक्षावास्यादिकरणसंप

प्र० त्नः कर्ताभवति । सएवविमुक्तवास्यादिकरणोनिर्व्यापारस्सुखीभवति । एवमात्मांतःकरणादिसंयुक्तःकर्तादुःखीभवति । मुक्तौतद्वियुक्तःसुखी
कुरुते"त्यादौमनसःकृतिकर्मत्वश्रवणात् तथा "मनउदक्रामत् । मीलितइवाश्नन्पिबन्नास्तैवे"त्यादौमनसउत्क्रमणेप्यात्मनः
कर्तृत्वश्रुतेः । तथा "एतंप्राणमयमात्मानमुपसंक्रम्य । एतंमनोमयमात्मानमुपसंक्रम्य । इमाँल्लोकान्कामान्नीकामरूप्यनुसं
चरन्नि"त्यादौत्वद्रीत्याप्राणमयादित्यागेपिसंचरणकर्तृत्वश्रवणात् तथा "सयदामनसामनस्यति । यन्मनसानमनुते । यच्च
क्षुषानपश्यति । मनसावाअग्रेसंकल्पयति । अथवाचाव्याहरती"त्यादिश्रुतौ "शरीरवाङ्मनोभिर्यत्कर्मप्रारभतेनर"इत्या
दिस्मृतौचमनसःकरणत्वोक्तेः तथा मनसोंतःकरणत्वप्रसिद्धेः । तथा सुप्तौत्वद्रीत्याबुद्धेरभावेप्युच्छ्वासादिकर्तृतायाःप्रत्यक्षे
ण "सुप्तोभूर्भूरित्येवप्रश्वसितीत्यादिश्रुत्याचसिद्धेः । तथाविहारेतिसूत्रीयभाष्योदाहृतया "परंज्योतिरुपसंपद्यस्वेनरूपेणा
भिनिष्पद्यते । सतत्रपर्येतिजक्षन्क्रीडन्रममाण"इत्यादिश्रुत्यास्वरूपाविर्भावरूपपरममुक्तावपिकर्तृत्वोक्तेर्नमनसःकर्तृकोटिता ।
[किंचविशिष्टस्यकर्तृत्वेमोक्षसाधनविधिरयुक्तःस्यात् । कर्तुरिष्टसाधनत्वस्यविधिबोध्यत्वात् । नचाहंकरोमीतिप्रत्यक्षेण तथा
"शास्त्रफलंप्रयोक्तु"रितिन्यायानुगृहीतेन मोक्षसाधनविषयाकृतिर्मोक्षसमानाधिकरणा । तत्साधनविषयकृतित्वात् । संम
तवदित्यनुमानेन तथा "कर्ताविज्ञानात्मापुरुषः । तत्कर्मकुरुतेतदभिसंपद्यत"इत्यादिश्रुतिभिः तथामोक्षसमानाधिकरण
विधिनिषेधाद्यतिक्रमजन्यपापादिलेपयोग्यं, चेतनत्वेनशासनयोग्यंचजीवमधिकृत्यकर्तव्यनिषिद्धार्पकविधिनिषेधशास्त्रवैय ॥ ९६९ ॥
प्र० भवतीतिनकर्तृत्वंस्वाभाविकं । येनतस्यानिवृत्त्यापत्त्यामोक्षोनस्यादितिसूत्रार्थउक्तः । सनयुक्तः । यथाचस्फटिकलौहित्यमुभयथेत्येवसूत्र

प्र० णापत्तेरित्यर्थः । कर्तृत्वश्रुतेरित्यादिपंचम्यंतानांनमनसःकर्तृकोटितेत्यनेनान्वयः । स्वातंत्र्यनिषेधपरत्वेज्ञापकमाह ॥ **तत्रैवंसतीति** ॥
केवलात्मानं परमात्मानधीनमात्मानमित्यर्थः । तद्वाक्यात् गीतावाक्यादित्यर्थः । परभाष्योक्तश्रुतिरपिनकर्तृत्वस्यास्वाभाविकत्वेमानमि
थ्यान्यथानुपपत्त्याचसिद्धआत्मनःकर्तृत्वेबाधकमस्ति । येनतन्मिथ्यास्यात् । "आत्मेंद्रियमनोयुक्तंभोक्तेत्याहुर्मनीषिण"इति
श्रुतिस्त्वात्मनोभोक्तृत्वेदेहादेरिवमनसःसहकारित्वमाह । नतुमनसोभोक्तृकोटितां ।] "अहंकारविमूढात्माकर्ताहमितिमन्य
त"इतिस्मृतिरपिजीवस्यस्वातंत्र्यनिषेधपरा । "तत्रैवंसतिकर्तारमात्मानंकेवलंतुयः । पश्यत्यकृतबुद्धित्वान्नसपश्यती"त्यादि
तद्वाक्यात् । "ध्यायतीवलेलायतीवे"त्यादिश्रुताविवशब्दोप्यस्वातंत्र्यात् । [कृत्याश्रयत्वेचाज्ञानाश्रयत्वमिवनद्रव्यांतराप
त्तिरूपविकारापादकं । नचजीवकर्तृत्वस्यप्रत्यक्षप्राप्तत्वादपुरुषार्थत्वाच्चनतत्रश्रुतेस्तात्पर्यमितियुक्तं । ईश्वरकर्तृत्वस्याप्राप्तत्वे
नतच्छ्रुतेस्तत्परत्वस्यदुर्वारत्वात् । कर्तृत्वस्याहंकरोमीतिविशिष्टात्मनिप्राप्तावपिशुद्धेऽप्राप्त्याश्रुतेस्तत्परत्वोपपत्तेश्च । अन्यथा
सत्यज्ञानादिवाक्यमपिसन्घटोऽहमस्मीत्यादिप्रत्यक्षप्राप्तविशिष्टात्मसत्यतानुवादिस्यात् । किंचयत्रप्रमाणेननिषेद्धुमनुवादस्त
त्रानुवाद्यस्यसत्त्वाभावेपियत्रान्यद्विधातुंसः तत्रतस्यसत्त्वमेव । अन्यथानुवाद्यस्यासत्त्वे आश्रयासिद्धौधर्मधर्मिसंसर्गरूपानु
मितिविषयइवानुवाद्यविधेयसंसर्गरूपवाक्यार्थोबाधितःस्यात् । नहि "रूप्यंदक्षिणा नसुरांपिबे"दित्यादिशास्त्रेष्वारोपितरू
प्यादेर्धीः । कर्तृत्वस्यक्लेशसंबंधेचाशक्यविषयत्वंतंत्रं । लीलादिकरणेनक्लेशादृष्टेः । लीलादेरुत्सवादेर्विहितकर्मणश्चाकरणे
प्र० त्याह ॥ ध्यायतीवेति ॥ ननुभ्रमएवनास्तीतिसांख्यमतंनिरसितुमात्मनिबुद्धिगतकर्तृत्वारोपोत्रसाध्यतइत्यतआह ॥ सांख्येति ॥

प्र० तत्रैवेति ॥ इदंरूप्यमित्यादिस्थलएव । नत्वध्यासनिष्ठकर्तृत्वादिविषयइत्यर्थः । तत् औपाधिकमपिकर्तृत्वं । परादेव । "एषह्येवसाधुकर्म
नैवतद्दृष्टेश्च । "यदावैकरोत्यथनिस्तिष्ठति । नाकृत्वानिस्तिष्ठति । कृत्वेवनिस्तिष्ठति । नासुखंलब्ध्वाकरोति । सुखमेवलब्ध्वा
करोती"त्यादिश्रुतेश्च । "नहिकश्चित्क्षणमपिजातुतिष्ठत्यकर्मकृत्" इत्यादिस्मृतेश्च । अन्यथासुखज्ञानयोरपिक्लेशाविनाभा
वादात्मातद्रूपोनस्यात् । यथाचसुप्तौक्लेशाभावेपिज्ञानादितथाकृतिरपीत्युक्तं] । किंच "कर्ते"तिपूर्वाधिकरणेबुद्धेरेवकर्तृत्वमा
त्मनस्तुतदविवेकादारोपितमितिसांख्यमतनिषेधेनात्मनःकर्तृत्वंसमर्थ्येह "यथाचतक्षे"त्यधिकरणेपुनर्बुद्धिगतमेवारोप्यतइ
तिसिद्धांतोक्तौपूर्वाधिकरणपूर्वपक्षएवेहसिद्धांतःस्यादितिमहदिदंव्याख्यानकौशलं । सांख्याभिमताख्यातिनिरासस्त्विदंरूप्य
मितिप्रसिद्धस्थलेतन्निरासंविनानसिध्यतीतितत्रैवनिरस्यं । नत्विह । किंचत्वन्मतेजीवेऽणुत्वोत्क्रांत्यादिकंयथाबुद्ध्युपाधिकंमि
थ्यातथाकर्तृत्वमपि । एवंचोत्क्रांत्यधिकरणेऽणुत्वादेःपूर्वपक्षत्वं "कर्ते"त्यधिकरणेतुकर्तृत्वस्यसिद्धांतत्वमितिविभागःकिंकृतः ।
यथोत्क्रांत्यधिकरणे "उत्क्रांती"त्यादिसूत्राष्टकेनपूर्वपक्षयित्वा "तद्गुणसारत्वादित्यनेनसिद्धांतितमेवं "कर्ते"त्यधिकरणेपिसू
त्रसप्तकेनपूर्वपक्षयित्वा "यथाचतक्षे"त्यनेनसिद्धांतितमितिकस्मान्नभाष्यते । "परात्त्वि"त्यधिकरणमप्ययुक्तं । जीवेंतः
करणसन्निधानादारोपितस्याविद्यककर्तृत्वस्यरूप्यादेरिवेश्वरानपेक्षत्वात् । यच्चोक्तं "कृतप्रयत्नापेक्ष"इत्यस्यजीवकृतोयःप्रय
त्नोधर्माधर्मलक्षणस्तदपेक्षईश्वरइत्यर्थइति तन्न । कृतशब्देनैवधर्माधर्मरूपकर्मोक्तिसंभवेनप्रयत्नशब्दवैयर्थ्यात् । धर्मादेरप्रय ॥ ९७० ॥
प्र० कारयती"तिश्रुतेरितिपरोक्तंप्रमेयंनिराह ॥ जीवइति ॥ केचित्त्विति ॥ तन्मते "परात्त्वि"तियोगद्वयमधिकरणांतरं । तत्राद्यसूत्र

प्र० व्याख्या नविरुद्धा । जीवस्यपराधीनकर्तृत्वेदोषपरिहाराय "कृतप्रयत्नापेक्षस्तुविहितप्रतिषेधावैयर्थ्यादिभ्य" इतिसूत्रं । सर्वासुक्रियासुजी
वकृतंप्रयत्नमुद्योगमपेक्ष्यांतर्यामीतदनुमतिदानेनप्रवर्तयति । विहितप्रतिषेधावैयर्थ्यनिग्रहानुग्रहादिहेतुभ्यइत्यस्यार्थउक्तः । तद्भाष्यटीका
यामुक्तंतत्तात्पर्यंव्यनक्ति ॥ **ईश्वरइति** ॥ "भोगादृष्टोपनीतार्थस्वभावाद्वासनान्वितात् । इच्छादेर्मनसोत्पत्तौयुक्तोदासीनताविभो" रितिसं
ग्रहतत्प्रपंचनेश्रुतप्रकाशोक्तेहृदिकृत्वाह ॥ **विषयेति** ॥ इच्छाद्वाराहीश्वरोजीवान्प्रेरयति । इच्छाचजीवस्यविषयसन्निधापनेनोत्पाद्या ।
त्वरूपत्वाच्च । "पूर्वकर्मप्रयत्नंचे" त्यादिभाष्योदाहृतस्मृतिविरोधाच्चेति । केचित्तु ईश्वरोजीवस्यचिच्छक्तिंप्रवृत्तिशक्तिंकरण
कलेवरादिसहकारिजातंचदत्वाप्रथमप्रवृत्तावुदास्ते । जीवस्तुस्वयमेवप्रवर्तते । तथाहि । विषयविशेषसन्निधिस्तावद्भोगादृष्टा
त् । तत्रेच्छादिश्चवासनाविशेषात् । वासनोन्मेषश्चतत्तद्देहारंभकादृष्टाज्जन्मकालएवसिद्धइतिनेशापेक्षा । एवंचप्रथमेच्छाप्रय
त्नयोरभग्नस्वातंत्र्यस्यजीवस्यविध्यादिविषयत्वं, पुण्यपापादिकर्तृत्वं, तत्फलभोक्तृत्वंचयुक्तं । द्वितीयेच्छादावीश्वरोनुमंता ।
प्रवृत्तप्रवर्तकोह्यनुमंता । तदाहेत्वंतरासन्निधापितमपिविषयंबुद्धौसन्निधापयति । अयमेवचौदासीन्यावस्थातोनुमंतृत्वावस्था
याविशेषः । साचानुमतिःप्रथमप्रवृत्तिफलप्रदानरूपेतिनेश्वरस्यनैर्घृण्यादि । एवंविशेषोपकारंप्रथमतएवकेषुचिदीश्वरःकरो
प्र० तच्चादृष्टादिनैवसिद्धमितीश्वरस्यतत्रनकृत्यमित्यर्थः । इच्छाप्रयत्नरूपद्वितीयादिप्रवृत्तावेवमस्तु । किमीश्वरेणेत्यतश्श्रुतप्रकाशोक्ते "सन्निधाप
कवैधुर्येप्यर्थंबुद्धिस्थतांनयन् । प्रयोजकोनुमंताचभवतीशस्तदातदा । पूर्वप्रवृत्तेश्चफलमनुमत्यादिकंभवे" दितिसंग्रहतत्प्रपंचनेहृदिकृत्वाह
॥ **द्वितीयेच्छादाविति** ॥ **एवंविशेषोपकारमिति** ॥ हेत्वंतरासन्निधापितविषयस्यबुद्धौसन्निधापनरूपंविशेषोपकारमित्यर्थः । करण

प्र० कलेबरादिदानरूपप्रकारश्चेतनानांसर्वकार्यसाधारणः । तत्रविषयसन्निध्यादेरदृष्टादिनैवसिद्धतयेश्वरस्यतत्रौदासीन्येपीहद्वितीयेच्छादौहेत्वं तरासन्निधापितविषयसन्निधापनरूपविशेषोपकारकर्तृत्वात्प्रयोजकत्वंतस्येत्यर्थः ॥ अप्रवृत्तेति ॥ विषयसन्निधापनेनतस्येच्छाप्रयत्नयोरी श्वरेणोत्पादनादितिभावः । आद्येच्छाप्रयत्नरूपाद्यप्रवृत्तावीश्वरस्यौदासीन्येसर्वकर्तृत्वश्रुतिःकथमित्यतआह ॥ एषहीति ॥ संकोचेहेतुमाह

तीति तत्रप्रयोजकोपिभवति । अप्रवृत्तप्रवर्तकोहिप्रयोजकः । "एषह्येवसाधुकर्मकारयती"त्यादिश्रुतिस्तुद्वितीयादिप्रवृत्ता वनुमंतृत्वादिविषया । अन्यथाहिविधिनिषेधशास्त्रानर्थक्यंस्यात् । तदुक्तं "आदावीश्वरदत्तयैवपुरुषःस्वातंत्र्यशक्त्यास्वयं तत्तज्ज्ञानचिकीर्षणप्रयतनान्युत्पादयन्वर्तते । तत्रोपेक्ष्यततोनुमत्यविदधत्तन्निग्रहानुग्रहौतत्तत्कर्मफलंप्रयच्छतिततःसर्वस्य पुंसोहरि"रितीति । अत्रब्रूमः । "एषह्येवे"त्यादिश्रुतिसंकोचेनेश्वरस्याद्यप्रवृत्तावौदासीन्यकल्पनंनतावत् "तेषांसततयुक्ता नांभजतांप्रीतिपूर्वकं । ददामिबुद्धियोगंतं । तानहंद्विषतःक्रूरान्संसारेषुनराधमान् । क्षिपामी"त्यादिवचनाविरोधाय । अत्र साधनानुसारिफलदानस्यैवोक्त्याऽऽद्यप्रवृत्तावौदासीन्यानुक्तेः । नापीश्वरस्यनैर्घृण्याद्यभावायौदासीन्यकल्पनं । प्रथमप्रवृत्ता

प्र० ॥ अन्यथेति ॥ आद्यप्रवृत्तावपिजीवस्यास्वातंत्र्येतत्रापीश्वरस्यैवेच्छादिकर्तृत्वइत्यर्थः ॥ तत्रोपेक्ष्येति ॥ आद्यप्रवृत्तावुदासीनोभूत्वा ॥ ९७१ ॥
ततः अनंतरं । द्वितीयादिप्रवृत्तावित्यर्थः । वैषम्यनयेत्वशुभशुभप्रवृत्त्योर्यथाक्रममुपेक्षानुमत्यर्थकत्वमुपेत्यसंमतिरुक्ता ॥ इत्यादिवच नाविरोधायेति ॥ तद्भाष्येस्वोक्तार्थसंमतित्वेन "तेषा"मिति "तानह"मितिचवाक्यद्वयस्यानुग्रहनिग्रहोक्तिपरस्योदाहृतत्वादितिभावः

प्र० ॥ समर्थितत्वादिति ॥ "वैषम्यनैर्घृण्येने"त्यधिकरणइतिभावः ॥ अनुमंतृत्वेनचेति ॥ द्वितीयादिप्रवृत्तिप्रेरकत्वेप्रवृत्तप्रवर्तकत्वरूपा नुमंतृत्वेनचेत्यर्थः । "एतदुक्तंभवती"त्यादिनाश्रुतप्रकाशोक्तमनूद्यनिराह ॥ एतेनेति ॥ अननुमंतृत्वेति ॥ आदावसत्कार्येप्रवृत्तंतथैव द्वितीयप्रवृत्तौप्रेरयतीतिप्रवृत्तप्रवर्तकत्वप्राप्तेरितिभावः ॥ अहेतुत्वाभावाच्चेति ॥ चिच्छक्त्यादिदानरूपसाधारणोपकारमुखेनप्राथमिके

वीश्वरस्यप्रयोजकत्वेपितदभावस्यसमर्थितत्वात् । अन्यथामहानिष्टान्निवर्तनेशक्तस्याप्यौदासीन्येनानुमंतृत्वेनचनै र्घृण्यादिदुर्वारं । यदिचद्वितीयादिप्रवृत्तावनुमतिराद्यप्रवृत्तिफलदानरूपा तर्ह्याद्यप्रवृत्तिप्रयोजकतापि "नानादि त्वा"दित्युक्तरीत्यानादिपूर्वकर्मफलदानरूपास्तु । नापीश्वरस्यकर्मफलानन्वयायतत्कल्पनं । प्रयोजकत्वेपिविधिनि षेधातीतत्वादेवतदुपपत्तेः । अन्यथाशक्तस्याप्यौदासीन्येनानुमंतृत्वेनचतदन्वयोदुर्वारः । एतेनयथापित्रापुत्रयोःस दसद्व्ययसाधारणेवित्तक्षेत्रादिकेविभज्यदत्ते तत्रकस्यचित्सद्व्ययेकस्यविदसद्व्ययेचतत्फलान्वयःपुत्रयोरेव । नतुपितुः । तद्वदिहापि । ईश्वरस्यसदसत्प्रवृत्तिसाधारणकारणभूतचिच्छक्त्यादिमात्रदातृत्वाद्विशिष्यतत्प्रवृत्त्यादौप्रागहेतुत्वा दितिनिरस्तं । पितृवदीश्वरस्यभाविसदसत्प्रवृत्त्यज्ञानाभावात् । अननुमंतृत्वाभावात् । आद्येच्छाप्रयत्नौप्रत्य हेतुत्वाभावाच्च । नापिजीवस्यविध्यादिविषयत्वायतत्कल्पनं । द्वितीयादिप्रवृत्ताविवप्रथमप्रवृत्तावप्यस्वातंत्र्ये

प्र० च्छादावपिकारणत्वात् । अन्यथासर्वकारणत्वभंगापत्तेः । "बाह्यांतःकरणव्याप्तितच्छक्त्याधानधारणैः । साधारणोपकारेस्यादिच्छादेः कारणंपर"इतिश्रुतप्रकाशोक्तेरितिभावः । द्वितीयप्रवृत्तिप्रेरणरूपस्यानुमंतृत्वस्याद्यप्रवृत्तिफलदानरूपत्वादनुमंतृत्वंननैर्घृण्यादिदोषावहमित्य

प्र० तोदोषांतरमेतदुक्तमहेतुत्वाभावाच्चेति ॥ उक्तरीत्येति ॥ अन्वयव्यतिरेकाभ्यामीशाधीनायाएवतस्याविध्यादिविषयत्वेतंत्रत्वादित्युक्त रीत्येत्यर्थः । ‘‘अंशेस्वातंत्र्याज्जीवस्यविधिनिषेधविषयत्व’’मितिश्रुतप्रकाशोक्तमेवप्रत्युतानुपपन्नमित्याह ॥ नहीति ॥ तथाचप्रथमेच्छाप्र यत्नयोरंशेस्वतंत्रस्याप्यंशांतरेपराधीनस्यविध्यादिविषयत्वंकरणकलेबरादिपरिकरलाभस्यपराधीनत्वेनतदंशेतस्यास्वातंत्र्यादितिभावः ॥ तत्क

प्युक्तरीत्यातदुपपत्तेः । नहिचुल्लीसंमार्जनेस्वातंत्र्यमात्रेणका
ष्ठप्रक्षेपादावस्वतंत्रोपिपाकेविनियुज्यते । नापीश्वरेतरहेतुभिरे
वप्रथमप्रवृत्तेरनुपपत्त्यातत्कल्पनं । ततएवद्वितीयादिप्रवृत्ताव
पितत्कल्पनापातात् । श्रुतिस्तूभयत्रसमा । किंचयत्रेश्वरआदा
वेवप्रयोजकस्तत्रवैषम्यंदुर्वारं । किंचप्रथमप्रवृत्तेरपिपूर्वकर्म
फलत्वात्त्वन्मतेपीश्वरस्यसर्वकर्मफलदत्वात्कथंतत्रौदासीन्यं ।

प्र० ल्पनापातादिति ॥ ईश्वरस्यौदासीन्यकल्पनापातादित्यर्थः । नन्वेतदाशंक्यश्रुतप्रकाशे ‘‘अंतःप्रविष्टश्शास्ताजनानामितिश्रुतिबलादेवम भ्युपगम्यत’’इत्युक्तमित्यतआह ॥ श्रुतिस्त्विति ॥ उभयत्र प्रथमप्रवृत्तौद्वितीयादिप्रवृत्तौचेत्यर्थः । ‘‘एवंविशेषोपकारंप्रथमतएवे’’त्यादि नोक्तंनिराह ॥ किंचयत्रेति ॥ द्वितीयादिप्रवृत्तावित्यर्थः । ननुद्वितीयादिप्रवृत्तिप्रेरणस्यप्रथमप्रवृत्तिफलदानरूपत्वान्नवैषम्यादीतिचेन्न ।

प्र० अनिष्टप्रवृत्तिनिवारणशक्तस्यतथैवप्रेरणेवैषम्यात्द्यनिवारणादितिभावः । श्रुतप्रकाशोक्तंसमाधिमाशंक्यनिराह ॥ ननुचेति ॥ इति भाष्योक्तमिति ॥ "पूर्वकर्मप्रयत्नंचसंस्कारंचाप्यपेक्ष्यतु । ईश्वरःकारयेत्सर्व"मित्यादिभाष्योक्तस्मृतितात्पर्यार्थानुवादोयं ॥ ७ ॥

ननुचप्राचीनकर्मफलदानेच्छयेशस्तांकरोति । नतुफलातरसाधनानुष्ठापनेच्छया । द्वितीयादिप्रवृत्तिंतुतदनुष्ठापनेच्छया । ततश्चाभिसंधिभेदाददोषइतिचेन्न । पूर्वापराधफलत्वेनैवचोरस्यातिपीडाकुर्वतस्तांचमृतिहेतुतयाजानतोराजादेश्चोरमृत्यादावौदासीन्यादर्शनेनप्राचीनकर्मफलत्वेनाद्यप्रवृत्तिंकुर्वतस्तांचानर्थहेतुतयाजानतईश्वरस्यतत्रौदासीन्यायोगात् । घटप्रकाशनार्थंदीपमुपाददानस्यतुपुंसोदैवात्तेनपटेप्रकाशितेतत्रौदासीन्यंयुक्तं । तेनदीपेननियमेनपटःप्रकाशयिष्यतइतिज्ञानाभावात् । तथाज्ञानेतुतत्रापिनौदासीन्यं । तस्मात्तत्तत्स्वभावाद्यनुसारित्वादेवेश्वरस्यनवैषम्यादीतिभाष्योक्तमेवयुक्तमिति ॥ ७ ॥ कर्तृत्वाधिकरणं ॥ १७ ॥

॥ ॐअंशोनानाव्यपदेशादन्यथाचापिदाशकितवादित्वमधीयतएकेॐ ॥ "परात्तुतच्छ्रुते"रितिपूर्वोक्तोजीवेश्वरयोरुपजीव्योपजीवकत्वरूपःसंबंधःसमर्थ्यइतिवा पूर्वोक्तस्यजीवानामस्वतंत्रकर्तृत्वस्यनिर्वाहायभिन्नांशत्वमुच्यतइतिवासंगतिः ।

प्र० कर्तृत्वाधिकरणं ॥ १७ ॥

॥ ॐअंशोनानाव्यपदेशात्ॐ ॥ "जीवस्येश्वरसंबंधित्वव्यपदेशा"दितिटीकासूचितामाह ॥ परात्त्विति ॥ "किमीश्वरांशोनवे"

प्र० तिसंशयटीकां "इतिनिर्णयोनयुज्यत"इत्युत्तरटीकानुरोधेनव्यनक्ति ॥ अत्रजीवानामिति ॥ विधिनिषेधाविति ॥ "अंशाएवहीमे जीवा"इतिविधिः । "नैवांश"इतिनिषेधः ॥ सिद्धांतकोटिरिति ॥ एतेन ईश्वरांशोनवा ईश्वरांशएवेति टीकायोज्येतिदर्शितं । बीजोक्तिपूर्वंटीकांव्याचष्टे ॥ अत्रभाष्यइति ॥ अत्रतत्वप्रदीपे "अन्यथाचे"तिसौत्रांशस्य "नानाव्यपदेशादन्यथाचे"तिपूर्वेणान्वयमुपेत्यपितृ

अत्रजीवानांब्रह्मांशत्वंनिर्णेतुमशक्यमुतशक्यमितिचिंता । तदर्थमंशत्वविधिनिषेधौकिमेकरूपांशत्वविषयावुतविधिर्भिन्नांशत्वविषयोनिषेधस्तुस्वरूपांशत्वविषयइति । संदेहटीकायांतुसंदेहात्मकपूर्वपक्षकोटिकीर्तनेनतद्विरुद्धासिद्धांतकोटिरर्थलब्धेतिपृथङ्नोक्ता । अत्रभाष्येसंदेहकारणंश्रुतिविगानमेवोक्तं । नतुपूर्वपक्षेऽनंशत्वनिर्णयेहेतुरुक्तः । न्यायविवरणेपिनानाश्रुतेरप्रामाण्यमित्यवेपूर्वपक्षयित्वाप्रामाण्येनैवसिद्धांतितं। अनंशत्वेनपूर्वपक्षकरणंसिद्धांताविरुद्धंच । सिद्धांतेपिमुख्यांशत्वाभावात् । अतष्टीकारोप्यनध्यवसायेनैवपूर्वपक्षमाह ॥ निर्णयोनयुज्यतइतिपूर्वपक्षइति ॥ सिद्धांतेत्वयंभावः ।

१२२।१३

प्र०पुत्रत्वादिनानाप्रकारसंबंधव्यपदेशात्संबंधराहित्येनचव्यपदेशादित्यर्थउक्तः । टीकायांतु "अन्यथाचापिदाशकितवादित्व"मित्युत्तरेणान्वयमुपेत्यभेदेनाभेदेनचाध्ययनमर्थउक्तः । तद्योजनाद्वयमप्यत्रयुक्तमेव । योजनाद्वयेपिभाष्येस्वारस्यदर्शनात् । तत्रसंबंधतद्राहित्याभ्यांव्यपदेशरूपाद्यहेतावंशत्वरूपंसाध्यंनित्यमुपजीवकत्वरूपं । भेदाभेदाभ्यामध्ययनरूपद्वितीयहेतौब्रह्मांशत्वंनामततोन्यूनत्वेसतिकिंचित्तत्सदृशत्वमितिभावे ॥ ९७३ ॥

प्र० नतत्वप्रदीपरीत्याटीकांनयन्नाद्यपक्षंतावद्विवृणोति ॥ जीवस्येत्यादिनाकिंचेत्यतःप्राक्तनेनग्रंथेन ॥ संबंधएव नत्वभेदइत्यर्थः । एतेनांशत्वरूपव्यक्तीकरणेन "अंशोभवत्येवे"तिटीकास्थांशशब्दोविवृतः । "मांरक्षत्वि"त्यादिटीकार्थमाह ॥ भाष्येति ॥ "परस्य नाने"त्युपयुक्तांशमात्रानुवादोनसमग्रस्येतिनभाष्योक्तविसंवादइशंक्यः । "समस्तसूत्रार्थेस्मृतिंचाहे"तिटीकोक्तेरत्राद्यपक्षेसंगतांशंतावदुदाहरति ॥

जीवस्यब्रह्मांशत्वं अतएवतदुपजीवकत्वेनतच्छेषत्वरूपःसंबंधएवमुमुक्षुणावश्यंज्ञेयः । भाष्योक्तास्वंशत्वपरासु "अंशोह्येषपरस्य नानाह्येनंव्यपदिशंति । पितेतिपुत्रेतिभ्रातेतिसखेतिचे"त्यादिश्रुतिषु, "पुत्रभ्रातृसखित्वेनस्वामित्वेनयतोहरिः । बहुधागीयतेवेदैर्जीवोंशस्तस्यतेनत्वि"त्याविस्मृतिषुच "अवःपरेणपितर"मित्यादिभाष्योक्तश्रुतिस्मृतिसिद्धपितृत्वपुत्रत्वस्वामित्वभ्रातृत्वसखित्वादिप्रकारैर्भगवतउपजीव्यत्वरूपसंबंधव्यपदेशएवजीवस्यांशत्वेहेतुरुक्तः । "नैवांशोनसंबंध"इत्याद्यनंशत्वश्रुतिषुचानंशत्वेसंबंधाभावोहेतुरुक्तः । टीकायामपि "तत्संबंधित्वमेवांशत्व"मित्युक्तं । परैरपि "सोन्वेष्टव्यःसविजिज्ञासितव्यः । यआत्मानमंतरोयमयतीत्यादिसंबंधव्यपदेशएवनानाव्यपदेश"इत्युक्तं । परंतुतन्मतेसंबंधोमिथ्या । नच

प्र० पुत्रेति ॥ अतएवसुधायांसौत्रांत्यभागार्थएव "यथोक्त"मित्यादिना "यतोभेदेने"त्यादिरेवसन्मतित्वेनोदाहृतोनतु "पुत्रे"त्यादिपूर्वभागोपीतिभावः ॥ श्रुतिस्मृतिसिद्धेति ॥ एतेनभाष्ये "अवःपरेणे"त्याद्युक्तेःपितृत्वादिसिद्धावुपयोगो "नानाह्येन"मित्यादेस्तेनप्रकारेणव्यपदेशसिद्धावुपयोगोदर्शितः । एवकारेणाभेदादिव्यपदेशोनिवार्यते । अयमेवहेतुरभिमतोनत्वभेदइत्यत्रज्ञापकमाह ॥ नैवेति ॥ भाष्योक्तश्रु

प्र० तिषुचेत्यर्थः । ननु तदारंभकत्वंतदेकदेशत्वंवातदंशत्वंमुख्यं । नतुसंबंधित्वमेवांशत्वमित्यतआह ॥ श्रुत्येति ॥ "नानाव्येन"मित्यादिश्रुत्यै वेत्यर्थः । मुख्यांशत्वंतुनसंभवति । ब्रह्मणोनारब्धत्वात् । घटादिवत्प्रदेशवत्त्वाभावाच्चेतिभावः । अस्मदुक्तंतुतत्राप्यस्तीत्याह ॥ नियतंचेति॥ तंत्वादेः पटाद्यारंभकस्येत्यर्थः । तस्मात् आरंभकत्वतदेकदेशत्वादिरूपमुख्यांशत्वस्यासंभवात् । एवंरूपस्यैवश्रुत्यादिसिद्धत्वाच्चेत्यर्थः । ईश्व

श्रुत्यैवश्रौतांशशब्दार्थउक्तेप्यन्योर्थोयुक्तः । नचकस्यापिमतेजीवस्यतंत्वादिवदंशत्वमस्ति । नियतंचतंत्वादेरंशस्यांशिनंप्रतिशेषत्वं । तस्मात्पुत्रःपितुरिवभृत्यादिःस्वाम्यादेरिवचजीवो पीश्वरपोष्यत्वादिनातद्गर्भवासित्वेनतदंतर्भूतत्वादीश्वरस्यांशः । "योनःपिता पतिंविश्वस्या त्मेश्वर"मित्यादिश्रुतेः । "पितासिलोकस्यचराचरस्य पितामहस्यजगतोमाताधातापितामाहः । गतिर्भर्ताप्रभुस्साक्षीनिवासश्शरणंसुहृत् । पितेवपुत्रस्यसखेवसख्युः पितामातासुहृद्बंधुर्भ्रा तापुत्रस्त्वमेवमे"इत्यादिस्मृतेश्च । भगवतः पुत्रत्वमपिपुन्नाम्नोनरकात्त्राणकर्तृत्वादुपजी व्यत्वेनैव । जीवस्यव्यंजकत्वरूपंपितृत्वमप्यभिव्यक्तेनभगवतासंरक्ष्यत्वादुपजीवकत्वेनैव ।

प्र० रस्यपितृत्वपोषकत्वस्वामित्वादौश्रुतिमाह ॥ योनःपितेति ॥ "पतिंविश्वस्यात्मेश्वरꣳशाश्वतꣳशिवमच्युतं । नारायणंमहाज्ञेयं"इतिनारा यणोपनिषदि । "पितासी"त्यादिगीता । उपजीव्यत्वाद्यसिद्धिमाशंक्यनिराह ॥ भगवतइति ॥ एवंतर्हिनैवांशोनसंबंधोनापेक्ष्योजीवः

प्र०परस्येत्यादिश्रुतिविरोधइत्यतस्तत्वप्रदीपोक्तमेवसमाधिंतदुक्तमेवज्ञापकमाह ॥ अनंशत्वश्रुतिस्त्विति ॥ अतएवभाष्येति ॥ एतेनश्रुतिशेषोक्तेरुपयोगश्चोक्तोभवति ॥ इत्येवार्थइति ॥ नतुसर्वात्मनासंबंधमात्रनिषेधोर्थः । येनतद्विरोधस्स्यादित्यर्थः । एवं "नानाव्यपदेशा" दितिटीकोक्तंहेतुंसमर्थ्यांशत्वमुपपाद्येदानीं तत्वप्रदीपोक्तंहेत्वंतरंचोक्त्वातत्रोपष्टंभकानिचाह ॥ उक्तेति ॥ नचेत् अयमपिहेतुरस्मिन्पक्षे

अनंशत्वश्रुतिस्तु लोकेस्वामिभृत्यादेरन्योन्यमुपकार्योपकारकत्वेपीहेश्वरउपकर्तैव । नतूपकर्तव्यः । जीवस्तूपकर्तव्यएव । नतूपकर्तेत्यभिप्राया । अतएवभाष्योदाहृतानंशत्वश्रुतौ "नापेक्ष्योजीवःपरस्ये"तिजीवस्यानुपकर्तृत्वमुक्त्वा "फलदःप्रभुरेकराट् । ननियम्यःसकस्यापिससर्वस्यनियामक"इतीश्वरस्यैवोपकर्तृत्वमुक्तं । एवंच "नासावस्यकुतश्चन । नायंतस्यापिकश्चने"तिश्रुतेरपि असौ ईश्वरः । अस्य जीवस्य । कुतश्चन केनापिप्रकारेण । नोपकर्तव्यः । अयं जीवः । तस्य ईश्वरस्य । कुतश्चननोपकर्तेत्येवार्थः । उक्तसंबंधरूपशेषत्वेसौत्रान्यथाशब्दोक्तःसंबंधाभावव्यपदेशोपिहेतुः । नचेद्भाष्ये "अन्यथाचे"तिचशब्दोस्वरसःस्यात् । भाष्योदाहृतश्रुतौ "नासावस्यकुतश्चने"तिसंबंधनिषेधोपिप्रकृतानुपयुक्तःस्यात् । ईश्वरस्यसदोपजीव्यत्वमेवेत्यादिमाहात्म्यंचनसिध्येत् ।

प्र० ऽभिमतोनचेदित्यर्थः ॥ उपजीव्यत्वमेवेति ॥ अन्यथाजीवोपकार्यत्वेनोपजीवकत्वस्याप्यापत्तेरितिभावः । "प्रकाशादिवन्नैवंपर"इत्यत्र तु "नैवांश"इतिसामान्यतोऽनंशत्वश्रुतेरभिन्नांशनिरासपरत्वरूपगतेरार्थिकत्वेपि "नसंबंध"इतिविशिष्यासंबंधरूपानंशत्वश्रुतेस्साक्षात्सूत्रा

प्र० द्यारूढगत्युक्तिर्नस्यात्। "अन्यथाचे"तिसूत्रांशभाष्यांशाभ्यांतच्छ्रुतेरपिहेत्वर्पकतयाग्रहणेतुभगवतोनुपकार्यत्वपरतयागतिरुक्ताभवतीतिभावेनाह ॥ असंबंधरूपेति ॥ स्वोक्तेर्मूलमाह ॥ अतएवेति ॥ संबंधाभावव्यपदेशस्याप्युक्तरूपांशत्वपक्षेहेतुत्वादेवेतिवा उक्तोपष्टंभकबाहुल्यादेवेतिवार्थः ॥ उक्तेति ॥ उक्तः शेषत्वरूपस्संबंधः । वक्ष्यमाणः सारूप्यलक्षणोऽभेदः । तदुभयरूपमंशत्वंसमर्थयतइत्येवमर्थतया

असंबंधरूपानंशत्वश्रुतेर्गत्युक्तिश्चसूत्रभाष्यारूढानस्यात् । "अनंशत्वश्रुतेर्गतिंचाहे"तिभाष्यंतुभेदाभेदव्यपदेशप्रयुक्तांशत्वप्रतियोगिकानंशत्वविषयं । नत्वसंबंधरूपानंशत्वविषयं । अतएवतत्वप्रदीपे "नानाव्यपदेशः संबंधव्यपदेशः । अन्यथाव्यपदेशः संबंधाभावव्यपदेश"इत्युक्तं । "हेत्वंतरेणैतत्समर्थयत"इतिटीकास्थैतच्छब्दोप्युक्तवक्ष्यमाणसंबंधाभेदरूपोभयविषयः । टीकाकारीया "अन्यथे"त्यस्यवक्ष्यमाणसंबंधोक्तिरपिवक्ष्यमाणेनापिसंबंधाभिप्राया । नतूक्तेनासंबंधाभिप्राया । जीवेश्वरयोःसदोपजीव्योपजीवकत्वरूपसंबंधव्यपदेशोपिभेदव्यपदेशएवेतिटीकोक्तोवक्ष्यमाणेनापिसंबंधोयुक्तः । तस्माज्जीवःसदासर्वत्रसर्वैरपिप्रकारैरीश्वरोपजीवकरूपभिन्नांशएव । नतुमत्स्यादिवत्स्वरूपांशः ।

प्र० व्याख्येयमित्यर्थः । ननु "अन्यःपर"इत्यादिभाष्योक्तश्रुतिरीश्वरस्यजीवोपकार्यत्वरूपसंबंधनिषेधार्थिकाप्यर्थान्नित्यमीश्वरस्यजीवोपजीव्यत्वरूपसंबंधपरेतिपूर्वान्वयस्यसंभवेपिकथंटीकायांभेदव्यपदेशपरत्वमुपेत्यश्रुतेर्वक्ष्यमाणेनान्वयउक्तइत्यतआह ॥ जीवेश्वरयोरिति ॥ एतेन "जीवःपरमात्मनोंशइतिप्रतिज्ञातेर्थेनानाव्यपदेशादितिपुत्रभ्रातृत्वादिनानासंबंधव्यपदेशंहेतुमभिधायान्यथाचापीत्यादिनार्थापत्तिरप्यच्युत"इत्यादिसुधायामपि "अभिधाये"त्यनंतरं अन्यथाचेश्वरजीवयोरुपकार्योपकारित्वरूपंसंबंधाभावरूपंहेतुंचाभिधायेत्यप्युपलक्ष्यमित्युक्तंभवति ।

प्र० "श्रुतिद्वयेनजीवेश्वरयोर्भेदाभेदावुच्येते"इत्यादिटीकांविवृण्वन्द्वितीयपक्षमुपपादयति ॥ किंचेति ॥ उक्तंहीति ॥ द्वितीयगीताभाष्योक्ते स्कांदवाक्ये "यदंतरंप्रलयजवारिविप्रुषोर्यदंतरंस्तंबहिरण्यगर्भयोः । स्फुलिंगसंवर्तकयोर्यदंतरंतदंतरंविष्णुहिरण्यगर्भयो"रित्युक्त्याजीवमात्रेम

किंचसंवर्तकाग्निप्रतिततोत्यंतभिन्नस्याग्निकणस्येवानर्घेणमहारत्नेनतुलितस्यगुरुत्वमात्रेणसमस्यरत्नाभासस्येवजीवस्यततोन्यूनत्वेसतिकिंचित्साद्दश्यरूपंगौणंभिन्नांशत्वमेव । अस्यमहारत्नस्यायंरत्नाभासःसहस्रांशइत्यादिव्यवहारात् । उक्तंहि "स्फुलिंगसंवर्तकयोर्यदंतर"मिति । उक्तंचानुव्याख्याने "साद्दश्यंचांशतास्यत्वि"ति । भाष्येच "विभिन्नांशोल्पशक्तिस्स्यात्किंचित्साद्दश्यमात्रयु"गिति । अत्रचाद्येंशत्वेसौत्रनानाव्यपदेशशब्दोक्तस्संबंधव्यपदेशःसौत्रान्यथाव्यपदेशशब्दोक्तासंबंधव्यपदेशसहितोहेतुः । द्वितीयेतुसौत्रदाशकितवादित्वशब्दोक्तोभेदव्यपदेशःसौत्रान्यथाशब्दोक्ताभेदव्यपदेशसहितोहेतुरितिद्रष्टव्यं । अतएवसिद्धांतभाष्योदाहृतायामाद्यश्रुतौनानाव्यपदेशोभेदाभेदव्यपदेशनिरपेक्षएवहेतुरुक्तः । द्वितीयश्रुतौतुनानाव्यपदेशनिरपेक्षएवभेदाभेदव्यपदेशोहेतुरुक्तः । स्मृतौचनानाव्यपदेशंहेतुमुक्त्वा "अतश्चांशत्वमुद्दिष्ट"मितिभेदाभेदव्यपदेशाख्यंहेत्वंतरमुक्तं । टीकायामपि "हेत्वंतरेणैतत्समर्थयत"इत्युक्तं ।

प्र०हदंतरंकैमुत्यसिद्धमितिभावः । आद्ये सदोपजीव्यत्वरूपतच्छेषत्वाख्यांशत्वे ॥ असंबंधेति ॥ जीवेशयोरुपकर्त्रुपकार्यत्वरूपसंबंधाभावव्यपदेशेत्यर्थः । द्वितीये किंचिन्न्यूनत्वेसतिसाद्दश्यरूपेंशत्वे ॥ अतएवेति ॥ हेतुसाध्ययोर्व्यवस्थितत्वादेवेत्यर्थः । द्वितीयपक्षेकथंश्रुत्योरवि

प्र० रोधइत्यतआह ॥ एवंचेति ॥ सादृश्यादिरूपेंशत्वेभिमतेसतीत्यर्थः । टीकाक्षरार्थानाह ॥ एतद्दीर्घतमोवाक्यमितीत्यादिना ॥
एवंचांशत्वविधिनिषेधौभिन्नांशत्वरूपांशत्वविषयावितिनविरोधइति ॥ एतद्दीर्घतमो[१२२।२२]वाक्यमिति ॥ यदिहि "अहं
शतधाहंसहस्रधा"इत्यादिवदिदमीश्वरवाक्यंस्यात्तदाश्रुतिस्थेन "मे"इतिशब्देनोक्तंस्वोपास्यत्वमयुक्तंस्यादितिभावः ॥
[१२६।२३]सूर्यमंडलसाम्योक्त्येति ॥ "अथयदेतदादित्यस्यशुक्लंभाःसैवर्गथयन्नीलंपरःकृष्णं । अथयदेतदक्ष्णःशुक्लंभाःसैवर्ग
थयन्नीलंपरःकृष्ण"मितितत्वप्रदीपोदाहृतश्रुत्यंतरोक्तस्याक्षिगतस्यशुक्लादिरूपत्रयवत्त्वेनादित्यसाम्यस्य "त्रिवृदिववैचक्षुः
शुक्लकृष्णंकनीनिके"तिमहैतरेयोपनिषदिकथितत्वेनेत्यर्थः । मोक्षधर्मे "शुश्रूषु"रित्यत्रजीवनिष्ठशुश्रूषांप्रतिप्रकृतोनारा
यणएवविषयत्वेनसबंध्यतइत्याह ॥ [१२४।३]शुश्रूषुस्तस्येति ॥ एवंचभूतसंबंधाधीनप्रलयादिमत्त्वाकार्यत्वप्रवृत्तिनिमित्तका
भ्यांभूतप्रलयाव्यक्तशब्दाभ्यामुक्तोजीवसमूहस्तस्यनारायणस्यशुश्रूषुर्मोक्षार्थंजिज्ञासुरितियोजनेतिभावः । तत्वप्रदीपेतु
"भूतप्रलयस्थानभूताऽव्यक्तशब्दिताश्रीःप्रकृतस्यनारायणस्यशुश्रूषुः । येचाप्यक्षरमव्यक्तमितिस्मृते"रितिप्रकारांतरेण
योजितं। ननु मोक्षधर्मे यत्किंचिज्जीवजातंदेहबद्धमित्यनेनजीवानांदेहबंधमुक्त्वा "ईश्वरोही"त्यादिनांशिनोनारायणस्यै
वनिर्गुणादिशब्दैर्देहासंबधउक्तोनत्ववताराणामंशानामित्यतआह ॥ [१२४।४]अवतारप्रसंगइति ॥ प्रकरणादवतारविषयमेवत
द्वाक्यं । नारायणशब्दस्त्वंशयंशाभेदाभिप्रायइत्यर्थः । "प्रतिरूपोबभूवे"त्यत्रेंद्रशब्दोक्तेश्वरस्यप्रतिबिंबत्वंनोच्यते ।
प्रतिरूपप्रतियोगिवाचकरूपशब्देनैवोक्तेः । किंतु "अस्ये"तिशब्दनिर्दिष्टजीवसमुदायस्यैवेत्याह ॥ [१२४।१०]जीवसमुदायइति ॥

प्र० सूत्राणांपौनरुक्त्यंटीकाद्युक्तार्थभेदप्रदर्शनेननिराह ॥ अत्रसूत्रइत्यादिना ॥ अन्येत्विति ॥ सूत्रार्थमग्रेनिरसिष्यन्नधिकरण अत्रसूत्रे "स्मर्यत"इत्यनेनजीवस्येश्वरांशत्वेस्मृतिरुक्ता । "स्मरंतिचे"त्यनेनत्वंशत्वेपिमत्स्याद्यवताराणांस्वरूपांशत्वंजीवानां भिन्नांशत्वमित्यत्रस्मृतिरुक्ता । "प्रकाशादिव"दित्यनेनोक्तस्वरूपांशत्वभिन्नांशत्वात्मकेवैषम्येतेजोभिमानिवह्निदेवतांशयोः कालाग्न्यभिमानिखद्योताभिमानिनोःस्वरूपांशत्वभिन्नांशत्वरूपंवैषम्यंदृष्टांतितं । "ज्योतिरादिव"दित्यनेनत्वंशत्वेप्यवतारा णांजीवानांवासाम्येहेत्वंतरत्वेनोक्तदेहासंबंधतत्संबंधप्रयुक्तेश्यनुग्राह्यत्वानुग्राह्यत्वरूपवैषम्येसूर्यमंडलाभिमान्यादित्यांशयो र्वियद्गतप्रभाभिमान्यक्षिगोलकाभिमानिनोःपरदेहासंबंधसंबंधप्रयुक्तमंश्यननुग्राह्यत्वानुग्राह्यत्वरूपंवैषम्यंदृष्टांतितमितिभेदः। अक्ष्यभिमानिनीदेवताहिपरदेहदोषेणदुष्टा । तस्यादेवतात्वंत्वंतर्धानादिशक्तियोगमात्रेणेतिद्रष्टव्यं । [अत्रचांशत्वमयंज्ये ष्ठस्यांशोयंतुकनिष्ठस्येत्यादाविवशेषत्वविशेषः । नचोपात्तस्यषष्ठीनिर्दिष्टस्यज्येष्ठादेरप्यंशंप्रतिसंबंध्यंशित्वत्यागेनसमुदायस्य तत्कल्पनंयुक्तं । अवयवस्याप्यवयविनंप्रतिशेषत्वविशेषएवांशत्वं । स्वरूपांशस्याप्यभेदेप्यंशत्वादेवांशिनंप्रत्युपसर्जनत्वम स्त्येव । भेदाभेदाभ्यांतुस्वरूपांशभिन्नांशविभागः । यद्वा संवर्तकाग्निंप्रत्यग्निकणस्येवब्रह्मप्रतिजीवस्यततोन्यूनत्वेसतितत्सदृ शत्वमंशत्वं । उक्तंहि "यथार्चिषोग्ने"रिति । स्वरूपांशस्यापिशक्त्यात्मनामहत्त्वेप्यंशिवद्व्यक्त्यात्मनातदभावात्ततोन्यूनत्वं । यद्यपिस्वरूपांशेतद्भिन्नत्वेसतितन्निष्ठबहुधर्मयोगित्वरूपंसादृश्यंनास्ति । तथापीहविवक्षितस्तन्निष्ठबहुधर्मयोगित्वरूपस्तदेकदे शोस्त्येव । परंतुभिन्नांशेजीवेबहुत्वंत्रिचतुरादौसंकुचितं । स्वरूपांशेत्वसंकुचितं । अतएवस्वरूपभिन्नांशयोर्भेदः । प्रतिबिंब

प्र० प्रमेयंतावदनूद्यनिराह ॥ भेदेति ॥ "जीवब्रह्मभेदाभेदश्रुतिसंदेह" इत्यादिकल्पतरूक्तेरितिभावः ॥ अभिन्नपदंप्रयुज्येतेति ॥ अभिन्नो

त्वमपितदधीनत्वेसतितत्सादृश्यविशेषएवेतिनप्रतिबिंबवाचिश्रुतिस्मृतिसूत्रविरोधः । यद्वा तदेकदेशत्वं तदंशत्वं । एवंचस्वरूपांशइवजीवेतदेकदेशत्वाभावान्महारत्नेनसहतुलित(काचखंडे)कांचनखंडेरत्नचतुर्थांशत्ववन्मार्गेविन्यस्तपादाकृतौपादत्ववच्चांशत्वंगौणं । मुख्यत्वेप्रबलबहुभेदश्रुत्यादिबाधात् । उक्तं ह्यनुव्याख्याने "अंशाभासाश्चसर्वेपिपरस्यांशानमुख्यत" इति । अत्रचाद्येसौत्रोनानाव्यपदेशोहेतुः । अतएवभाष्येपितृत्वस्वामित्वादिनाब्रह्मणःशेषित्वमुक्तं । द्वितीयतृतीययोर्भेदाभेदव्यपदेशौहेतू । प्रबलभेदश्रुतिःसादृश्याभिप्रायेतिदर्शयितुमुभयोक्तिः ॥ अन्येतु ॥ भेदाभेदश्रुत्योर्विरोधइतिपूर्वपक्षे भेदस्यप्रत्यक्षादिनाप्राप्तत्वाच्छ्रुतेस्तत्रातात्पर्यात्समिथ्या । अभेदस्यत्वप्राप्तत्वाच्छ्रुतेस्तत्रतात्पर्यात्ससत्यइति सिद्धांतइत्यधिकरणतात्पर्यमित्याहुः । तन्न । मद्रीत्यांशानंशत्वश्रुत्योर्विरोधेप्राप्तेतदविरोधायानंशत्वश्रुतेर्गतिमुक्त्वांशत्वोक्तेरेव "अंशोनानाव्यपदेशा" दितिसूत्राक्षरानुसारित्वात् । अन्यथांशपदस्थानेऽभिन्नपदंप्रयुज्येत । नह्यंशत्वमेवाभिन्नत्वं । नापितद्व्याप्तं । पटांशस्याप्येकस्यतंतोःपटाद्भेददर्शनात् ।

प्र० नानाव्यपदेशादितिसूत्रणंस्यादित्यर्थः । नन्वंशत्वंभिन्नाभिन्नत्वं । एकैकस्यतंतोःपटाद्भेदाभेदवत्त्वेनभेददर्शनोपपत्तेरितिचेत्तर्हिहापितत्रैवभे

प्र० दाभेदौसमसत्ताकौस्यातां । नतुभेदोसत्योभेदस्सत्यइतिदोषःस्पष्टः । दोषांतरंचाह ॥ किंचेति ॥ समुदायित्वमिति ॥ ब्रह्मसमुदायो जीवास्तुसमुदायिनइतिब्रह्मांशत्वंजीवस्येत्यर्थः ॥ अनंगीकाराच्चेति ॥ प्रतिबिंबत्वोपगमेनजीवानांब्रह्मसमुदायित्वस्यमिथ्यावादिनानंगीकाराच्चेत्यर्थः । "एकस्यैवब्रह्मणोनाद्यनिर्वचनीयाविद्योपधानभेदादेकस्येवबिंबस्यदर्पणाद्युपाधिभेदात्प्रतिबिंबभेद" इतिभामत्युक्तेः । "आभा

किंच त्वन्मतेसूत्रोक्तंजीवस्यांशत्वंनतावदारंभकत्वं । ब्रह्मणोनादित्वात् । नापिखंडत्वं । अच्छेद्यत्वात् । नापिसमुदायित्वं । [समुदाय्यनन्यत्वात्समुदायस्यव्यवहारदशायामपिजीवान्यब्रह्मायोगात् ।] एकैकस्यजीवस्यमुक्तावेकैकस्यकंथाभागस्यापगमेकंथायाइवब्रह्मणोह्रासप्रसंगात् । अनंगीकाराच्च । नापिभिन्नाभिन्नत्वं । विरोधात् । "भेदाभेदौनमुख्यत" इत्यादिस्मृतिविरोधाच्च । नाप्यवयवत्वं । तंतोःपटंप्रतीवनिरवयवब्रह्मप्रत्यकल्पितस्यतस्यायोगात् । अतएवपरेषांभाष्यं "अंशइवांशः । नहिनिरवयवस्यमुख्योंशःसंभवती" ति । नापिघटाकाशस्याकाशंप्रतीवकल्पितावयवत्वं । प्रतिबिंबपक्षेतदयोगात् । अवच्छेदपक्षस्यचविवरणएवनिरासात् । आकाशांशःस्वाभाविकइत्यन्यत्रोक्तत्वात् । "आभासएवचे" त्युत्तरसूत्रेण "आभासएवचैषजीवःपरस्यजलसूर्यकादिव" दिति

प्र० सएवचे" तिसूत्रभाष्येप्रतिबिंबत्वोक्तेश्चेतिभावः ॥ इत्यादिस्मृतीति ॥ भाष्योक्तस्मृतीत्यर्थः ॥ अन्यत्रेति ॥ "अतस्सर्वपदार्थानांभागास्संत्येवसर्वदा । सर्वदिक्ष्वभिसंबंधादविभागःपराणुते" त्यादिवैशेषिकाधिकरणानुव्याख्यानसुधयोः "खेपिदेशांतरस्यस" इत्याद्युपाधिखंडन

प्र० तट्टीकादावुक्तत्वादित्यर्थः ॥ त्वद्भाष्येणचेति ॥ तत्रप्रतिबिंबत्वोक्त्याकल्पितावयवत्वादिरूपांशत्ववचनंविरुद्धमित्यर्थः ॥ सौत्रहेत्विति ॥

त्वद्भाष्येणचविरोधाच्च । कल्पितपरत्वे "पादोस्यविश्वाभूतानी"त्यादिश्रुतेः, "ममैवांश"इत्यादिस्मृतेः, "अंश"इतिसूत्रस्यचाप्रामाण्यापाताच्च । नाप्यत्यंताभिन्नत्वं । "नानाव्यपदेशा"दितिसौत्रहेत्वयोगात् । तत्रांशशब्दास्वारस्याच्च । [प्रतिबिंबवाद्युक्तश्रुत्यादिविरोधाच्च । पटाद्भिन्नेप्येकस्मिंस्तंतौपटांशत्वदर्शनाच्च ।] नापिप्रतिबिंबत्वं । परपक्षेप्रतिबिंबनासंभवस्यान्यत्रोक्तत्वात् । तेनात्यंतभेदस्यैवसिद्धेश्च । [यच्चोक्तमुभाभ्यां सूत्रेत्वंशत्वेनानाव्यपदेशोन्यथाव्यपदेशश्चसमुच्चित्यहेतुरिति तन्न । "व्रीहिभिर्यजेते"त्यादौतृतीययेव "नानाव्यपदेशा"दितिपंचम्यानिरपेक्षस्यहेतुत्वप्रतीतेः । यच्चोक्तमुभाभ्यां आद्यसूत्रे "अन्यथे"त्यनेननानात्वादन्यथात्वंविवक्षितमिति तन्न । तथात्वे "अन्यथे"त्यनेनैववा"दाशकितवादित्वमधीयत" इत्येतावतैववापूर्णत्वेनोभयवैयर्थ्यात् । यच्चोक्तं भेदश्रुतिःप्राप्तविषयेति तन्न । सौत्रेणापिशब्देनाभेदइवभेदेपितात्पर्यप्रतीतेः । त्वदुक्तस्यनियम्यनियामकोपास्योपासकरूपेणनानाव्यपदेशस्याप्राप्तप्रतिबोधनत्वाच्च । नचतात्पर्यविषयेणसत्येननियामकत्वादिनाक्षिप्तोभेदोमिथ्या । किंचप्रत्यक्षादिसिद्धोभेदोयदिसत्योनतर्हिश्रुत्याप्यभेदसिद्धिः । यदितुमिथ्यातर्हिनभेदश्रुतिरनुवादिनी । तदप्राप्तसत्यभेदप्रापकत्वोपपत्तेरित्युक्तंजिज्ञासासूत्रे ।] किंचजीवस्यांशत्वंकिंशुद्धचिन्मात्रंप्रतिकिंवोपहितमीश्वरंप्रति । नाद्यः । "पराचुतच्छ्रुते"रितिपूर्वोक्तस्येश्वरनियंतृत्वस्यसिद्ध्यर्थंजीवेश्वरयोरंशांशिसंबंधउच्यत ॥ १७८ ॥

प्र० तस्यभेदव्यपदेशादितित्वयाभाषणादितिभावः ॥ तत्रेति ॥ अभेदइत्यर्थः । भिन्नाभिन्नेतंत्वादौवाऽस्मदभिमतांशत्वादौवातस्यस्वारस्येनत्व

प्र० त्पक्षेसूत्रेऽभिन्नपदमेवस्यादितिभावः । अन्यत्र न्यायामृते । तेन प्रतिबिंबत्वेनेत्यर्थः । तथैवबिंबप्रतिबिंबवादेद्वितीयपरिच्छेदेसमर्थनादि तिभावः ॥ **इतित्वयेति** ॥ "उपकार्योपकारकभावोजीवेश्वरयोरुक्तः । सचसंबद्धयोरेवदृष्टोलोके । यथास्वामिभृत्ययोर्यथाग्निविष्फुलिंग यो"रित्यादिनाभाष्येकथितत्वेनेत्यर्थः । प्रक्रमेभाष्यादावेवमुक्त्वासूत्रव्याख्यानेजीवस्यचिन्मात्रांशत्वभाषणेप्रक्रमविरोधइतिवा "परात्त्वि" तिसूत्रईश्वरस्यैवजीवकर्तृत्वनियंतृत्वोक्त्यातद्धटनार्थंप्रवृत्तेऽस्मिन्नधिकरणेशुद्धांशत्वोक्तौकथंप्रक्रांतेश्वरनियंतृत्वनिर्वाहकमिदंभवेदितिवार्थः । चिन्मात्रांशोजीवइतिप्रतिज्ञार्थपक्षे "मंत्रवर्णा"दिति "स्मर्यत"इतिसूत्रद्वयेपरभाष्योक्तश्रुतिस्मृत्यनानुगुण्यंचाह ॥ **द्वितीयेति** ॥ इदंश

इतित्वयापिभाषितत्वेनप्रक्रमाननुगुणत्वात् । द्वितीयसूत्रोक्ते "पादोस्यविश्वाभूतानी"तिमंत्रवर्णइदंशब्देनसहस्रशी र्षत्वादिविशिष्टप्रकृतेश्वरस्य तृतीयसूत्रो(क्तायांम)क्ते "ममैवांश"इति(स्मृतौचे)स्मरणेचेश्वरप्रयुक्तास्मच्छब्देनेश्वरस्यैवो क्तेश्च । नांत्यः । त्वन्मतेपिविरुद्धधर्मवतोर्जीवेशयोरभेदाभावेनाभेदव्यपदेशस्यायोगात् । त्वया "निरतिशयोपाधि

प्र० ब्देन अस्येतिषष्ठ्यंतपदेन ॥ **अस्मच्छब्देनेति** ॥ ममेतिशब्देनेत्यर्थः । तत्रेदमादिशब्देनचिन्मात्रोक्तावप्रकृतपरत्वलाक्षणिकत्वयोरापात इतिभावः ॥ **विरुद्धेति** ॥ अल्पज्ञत्वसर्वज्ञत्वादिविरुद्धधर्मवतोरित्यर्थः ॥ **अभेदव्यपदेशायोगादिति** ॥ त्वयाहि नानाव्यपदेशादन्य थाचापिव्यपदेशादित्यन्वयमुपेत्य सविजिज्ञासितव्यइत्यादौजीवेशयोर्ज्ञातृज्ञेयत्वादिनाभेदव्यपदेशादन्यथाचाप्यनानात्वेनाप्यभेदेनापिव्यपदे शात् । तथाहि"दाशकितवादित्वमधीयतएक"इतिभाषितत्वेनजीवोमायोपहितेश्वरांशइत्यभिप्रेतेप्रतिज्ञार्थे "नानाव्यपदेशा"दित्यस्यभेदव्यपदे

प्र० शरूपहेतोर्योगेपि "अन्यथाचापी"त्यंशोक्ताभेदव्यपदेशरूपहेतोरयोगादित्यर्थः ॥ **इतिभाषितत्वेनेति** ॥ "अपिस्मर्यत"इतिसूत्रेस्वामिभृत्ययोरत्यंतभिन्नयोरीशित्रीशितव्यभावोदृष्टइतिशंकानिरासाय "निरतिशयोपाधिसंपन्नश्चे"त्यादिनाभाष्येजीवस्येश्वरप्रशास्यत्वाभावस्योक्ततया "जीवोब्रह्मांशइवतत्तंत्रतयानत्वंशइतितात्पर्यार्थ"इतिभामत्युक्तदिशातदधीनत्वरूपांशत्वस्येश्वरंप्रत्ययोगात् । नहिमहागृहावच्छिन्नाकाशं

संपन्नश्चेश्वरोहीनोपाधिसंपन्नाञ्जीवान्प्रशास्ती"तिभाषितत्वेनेश्वरस्याप्युपहिततयामहागृहाकाशंप्रत्यल्पगृहाकाशस्येवेश्वरंप्रतिजीवस्यांशत्वायोगाच्च । नचमठाकाशःपुनर्घटेनेवेश्वरोपाधिनावच्छिन्नमेवचैतन्यंपुनर्जीवोपाधिनाचावच्छिद्यते । तथात्वेहिमुक्तस्यशुद्धब्रह्मत्वंनस्यात् । किंच नतावदविद्यांतःकरणाद्युपाधिविशिष्टस्यांशत्वं । तत्राभेदव्यपदेशायोगात् । नापितदुपलक्षितस्यचिन्मात्रस्य । तत्रकाल्पनिकभेदस्याप्यभावेननानाव्यपदेशायोगात् । यच्चोक्तमुभाभ्यां आद्यसूत्रेऽन्यथेत्यनेननानात्वादन्यथात्वंविवक्षितमिति तन्न । तथात्वेचान्यथाचापीत्यनेनैववा "दाशकितवादित्वमधीयतएक"इत्यनेनैववापूर्णत्वेनेतरवैयर्थ्यात् । द्वितीयतृतीयसूत्रयोस्त्वनुपपत्तिरुक्ता ।

प्र० प्रत्यल्पगृहावच्छिन्नमाकाशमंशोभवतीत्यर्थः । एवंब्रह्मशब्दार्थविकल्पेनजीवस्यतदंशत्वंनिरस्यजीवशब्दार्थविकल्पेनापितस्यांशत्वंनिराह ॥ **किंचेति** ॥ **तत्राभेदेति** ॥ नानाव्यपदेशादन्यथाचापीत्यनेनोक्तभेदाभेदव्यपदेशाभ्यांह्यंशत्वावगमस्त्वयोक्तइत्यन्यथाचापीत्यंशोक्ताभेदव्यपदेशोहेतुर्नयुज्यते । विशिष्टस्यजीवस्यशुद्धादीश्वराद्वाऽभेदाभावादित्यर्थः । एवंब्रह्मांशोजीवइतिप्रतिज्ञांशमन्यमतेनिरस्यमतांतरेऽग्रेनिरसिष्य ॥ ९७९ ॥

प्र० न्मतद्वयेपिहेत्वंशार्थमनूद्यनिराह ॥ **यच्चोक्तमिति** ॥ "ज्ञातृज्ञेयत्वसृज्यस्रष्टृत्वनियम्यनियामकत्वादिनानात्वव्यपदेशादन्यथाचानानात्वेनाप्यभेदेनापिव्यपदेशादित्यर्थोविवक्षित"इत्युक्तमित्यर्थः ॥ **अन्यथापीत्यनेनैववेति** ॥ नानाव्यपदेशादन्यथापीतिवा नानाव्यपदेशाद्दाशकितवादित्वमप्यधीयतएकइतिवापूर्णत्वेनेतरवैयर्थ्यादन्यथाचापीत्यस्यविवरणपरतयैवदाशेत्याद्यंशस्यपरभाष्येप्रतीतेः । ननु "अन्यथाचे"त्यनेन "तत्त्वमसी"त्याद्यभेदव्यपदेशोभिमतः । "अपिदाशकितवादित्व"मित्यनेनतुसर्वजीवाभेदः । अतएवरामानुजभाष्ये "अपिदाशकितवादित्वमधीयतएके । ब्रह्मदाशाब्रह्मकितवाइत्याद्याथर्वणिकाब्रह्मदाशकितवादित्वमप्यधीयते । ततश्चसर्वजीवव्यापित्वेनाभेदोव्यपदिश्यतइत्यर्थ"इत्युक्तं । सुधायामप्येवमेवसूत्रार्थोनूदितइत्यतोदाशकितवादित्वमित्यनेनैववेत्युक्तं । यद्वा जीवोब्रह्मांशइत्यस्ययदिब्रह्माभिन्नइ

यच्चोक्तं जीवंप्रत्यंशयपीश्वरोनजीववद्दुःखी ।

प्र० त्यर्थस्तदाऽभेदव्यपदेशमात्रस्यैवोपयोगेनतन्मात्रोक्त्यैवांशत्वसिद्धेर्नानाव्यपदेशादन्यथाचापीत्येतत्सर्वंव्यर्थमित्यर्थः । नचांशइत्यस्यभिन्नाभिन्नइत्यर्थः । विरोधात् । भेदस्यपरमतेमिथ्यात्वेनतस्यावक्तव्यतयाऽभेदस्यैववक्तव्यत्वात् । मतांतरेचभिन्नाभिन्नत्वानभ्युपगमात् । जीवविशिष्टब्रह्माख्यवस्त्वेकदेशत्वरूपांशत्वस्याभेदोपदेशमात्रेणहेतुनोपपत्तेरितिभावः ॥ **उक्तेति** ॥ द्वितीयसूत्रेत्यादिनेतिभावः । नन्वीश्वरंप्रत्येवांशत्वं । अतोनोक्तानुपपत्तिरितिचेन्न । तत्पक्षस्य "नांत्य"इत्यादिनादूषितत्वादितिभावः । अयंचदोषःपरमते । मतांतरेतुसूत्रद्वयोपात्तश्रुतिस्मृतिस्थेदंशब्दास्मच्छब्दयोर्जीवाविशिष्टकेवलभगवत्परामर्शितयाविशिष्टब्रह्मैकदेशत्वरूपांशत्वस्यजीवेभावेपिकेवब्रह्मैकदेशत्वाभावात् । "पादोस्यविश्वाभूतानि । ममैवांश"इतिचनिर्देशानुपपत्तिरितिदोषोध्येयः । "प्रकाशादिवन्नैवंपर"इत्येतदर्थमनूद्यनिराह ॥ **यच्चेति** ॥

प्र० उभाभ्यामित्यस्ति । नैवंपरइत्यस्यार्थोदुःखीत्यंतोमतद्वयेप्यविशिष्टः । प्रकाशादिवदित्यस्यपरमतेर्थमाह ॥ **प्रतिबिंबइति** ॥ सौत्रापिपदार्थोस्मिन्मतेऽप्रेव्यक्तः । मतांतरेतु यथाऽग्न्यादित्यादेर्भास्वतोविशिष्टस्यप्रभारूपप्रकाशोंशोभवति । स्वभावविलक्षणौचतौभवतस्तथेत्यर्थः । आदिपदेनगवाश्वशुक्लकृष्णादीनांविशिष्टवस्तूनांगोत्वादिविशेषणान्यंशोयथातथेतिगृह्यते ॥ **सिषाधयिषितधर्मवतोरिति** ॥ अंशत्वरूप

प्रतिबिंबेकंपयुक्तेपि तद्रहितसूर्यादिवदितिचतुर्थार्थइति तन्न । ममरीत्येश्वरावताराणांजीवानांचांशत्वाविशेषेपिस्वरूपांशत्वभिन्नांशत्वात्मकावांतरविशेषरूपसिषाधयिषितधर्मवतोर्वैदिकयोश्चेतनयोर्वैदिकौचेतनौप्रतिसूत्रप्रामाण्यापादकतात्त्विकव्यवस्थायां "यथासूर्यप्रभाक्षिणी"इतिस्मृतिसिद्धयोर्दृष्टांतत्वस्यसंभवे तवरीत्यासिषाधयिषितदुःखादिव्यवस्थारहितयोर्लौकिकयोरचेतनयोर्वैदिकौचेतनौप्रतिसूत्राप्रामाण्यापादकातात्त्विकव्यवस्थायां "बहवः सूर्यकायद्वत्सूर्यस्यसदृशाजल"इत्यादिस्मृत्यादिविरुद्धस्यदृष्टांतत्वस्यासंभवात् । बिंबप्रतिबिंबयोरपितात्त्विकाभेदस्यपक्षतुल्यतयादृष्टांतत्वायोगाच्च । आदिशब्देनघटाकाशमहाकाशादिकउक्तेपिप्रकाशपदस्य "आभासएवे"त्यनेन

प्र० धर्मवतोरित्यर्थः ॥ **चेतनयोरिति** ॥ कालाग्न्याद्यभिमानिखद्योतादिचेतनयोरित्यर्थः । तात्विकव्यवस्थायामितिपरमताभिप्रायेण । मतांतरेत्वस्मन्मतइवतात्विकत्वाद्व्यवस्थायाः ॥ **सिषाधयिषितेति** ॥ सिषाधयिषिता या दुःखादिव्यवस्था तच्छून्ययोरित्यर्थः । सूत्राप्रामाण्येत्यादि विरुद्धस्येत्यंतंपरमतासाधारणं । तदन्यत्तुमतांतरेपिसमं ॥ **इत्यादिस्मृत्यादीति** ॥ "अतएवचोपमासूर्यकादिव"दित्यत्रभाष्यो ॥ ९८० ॥

प्र० क्तस्मृतौसूर्यसूर्यकयोस्सादृश्याभेदस्यैवप्रतीतेर्मुख्याभेदाप्रतीतेरितिभावः। आदिपदेनबिंबप्रतिबिंबभेदसाधकयुक्त्यादिग्रहः। बिंबेत्याद्यपि परमतएव। नरामानुजमतइतिबोध्यं ॥ **पुनरुक्तेश्चेति** ॥ "आभासएवे"त्यस्य "जलसूर्यकादिवदाभासएवजीवःपरस्यात्मनः। यथानैकस्मिञ्जलसूर्यकेकंपमानेजलसूर्यकांतरंकंपते। एवंनैकस्मिन्जीवेकर्मफलसंबंधिनिजीवांतरस्यतत्संबंधः। कर्मफलयोराभासस्यचाविद्याकृतत्वात्तदाश्रयस्यसंसारस्याविद्याकृतत्वेनोपपत्ते"रितित्वद्भाषणरीत्येश्वरजीवयोरप्यदुःखित्वदुःखित्वादेरुपपत्तेरिदंसूत्रंतेनगतार्थमित्यर्थः ॥ **मिथ्ये**

पुनरुक्तेश्च। ननुचंद्रादावंगुल्यवष्टंभादिनाप्रतीतवक्रत्वादिवज्जीवेप्रतीतंदुःखादिकंमिथ्येतीहप्रकाशपदेनविवक्षितमितिचेन्न। ईशेपिजीववत्संसारित्वापादकंमिथ्यादुःखंस्यादितिशंकायाअनेनापरिहारात्। यच्चोक्तं "तत्रयंःपरमात्माहिसनित्योनिर्गुणःस्मृतः। नलिप्यतेफलैश्चापी"तिस्मृतिःपंचमेन "स्मरंती"त्यनेनविवक्षितेति तन्न। अत्रभेदस्यैवोक्त्याऽभेदेपिव्यवस्थेत्यनुक्तेः। काल्पनिकभेदेनव्यवस्थायामपितात्विकाभेदेनाव्यवस्थापिस्यादितिशंकायाअपरिहाराच्च।

प्र० **तीहेति** ॥ यद्यप्येतत्तत्रापिप्रतीयते तथाप्यत्रविवक्षितमेवतत्रोक्तमितिवा अन्यतरवैयर्थ्येसत्यपिदूषणांतरंवक्तुंवा एतच्चोद्यावतारः ॥ **अपरिहारादिति** ॥ तत्परिहारार्थतयैवास्यसूत्रस्यत्वयावतारितत्वादितिभावः। प्रकाशादिवन्नैवंपरइतिमतांतरपाठोसांप्रदायिकइतिध्येयं। "स्मरंतिचे"तिसूत्रार्थंनिराह ॥ **यच्चोक्तमिति** ॥ अन्यैरितियोज्यं। फलैश्चापि पद्मपत्रमिवांभसेतिस्मृतिशेषः। ननु काल्पनिकभेदमाश्रित्येयंव्यवस्थोक्तिरित्यतआह ॥ **काल्पनिकेति** ॥ परमतेहीदंसूत्रंपूर्वसूत्रेप्रकृतजीवेश्वरदुःखित्वादुःखित्वव्यवस्थासिद्ध्यर्थमित्युपेतं।

प्र० मतांतरेत्वीश्वरशरीरत्वेनतदंशत्वरूपप्रतिज्ञातार्थसाधकत्वेनेत्युपेत्य स्मरंति श्रावयंतिचेत्यर्थमुपेत्य "यस्यात्माशरीरं । तत्सर्वैर्वैहरेस्तनु"रित्यादिश्रुतिस्मृतयउक्ताः । तत्रजीवादेर्हरिशरीरत्वप्रतीतावपीश्वरशरीरत्वेनेश्वरांशत्वस्याप्रतीतेरितिदोषः । श्रुतेःप्राधान्येनश्रावयंतिचेतिनिर्देशापाताच्चेत्यपिदोषोध्येयः । "अनुज्ञापरिहारौदेहसंबंधाज्ज्योतिरादिव"दित्येतदर्थंपरमतेऽनुवदति ॥ **यच्चोक्तमिति** ॥ "ऋतौभार्यामुपेयादित्यनुज्ञा । गुर्वंगनांनोपगच्छेदितिपरिहारः"इतिपरभाष्योक्तानुज्ञापरिहारशब्दार्थमाह ॥ **विधिनिषेधेति** ॥ मतांतरेतु ब्रह्मांशत्वेपिजी

यच्चोक्तं ब्रह्माभेदेपिजीवस्यविधिनिषेधबद्धत्वंदेहाभिमानाद्युक्तमशुचिदेशसंबंधात्सवितृप्रकाशस्यहेयत्वमिव । देहानभिमानाद्धिज्ञानिनोनविध्यादीतिषष्ठार्थइति तन्न । ममरीत्यांश्यधीनत्वरूपसाध्येनदेहसंबंधरूपेणसाधनेनचयुक्तस्य"यथासूर्ये"तिस्मृतिसिद्धस्यचेतनस्यचेतनंप्रतिदृष्टांतत्वसंभवे तवरीत्याविध्यादिबद्धत्वरूपसाध्येनदेहसंबंधरूपहेतुनाचरहितस्यस्मृत्याद्यसिद्धस्यदृष्टांतत्वायोगात् । ब्रह्मैवजीवइतिमतेतस्यदेहसंबंधापरिहाराच्च । अमुक्तावस्थायामाहाराद्यर्थेप्रयतमानस्यज्ञानिनोविहितानुष्ठानकालएवाभिमानस्यायोगाच्च । यच्चोक्तं कर्तुर्भोक्तुश्चोपहितात्मनःसांतत्याभावेनसर्वशरीरसंबंधा

प्र० वानांकेषांचिद्वेदाध्ययनाद्यनुज्ञाकेषांचित्तत्परिहारःशुच्यशुचिदेहसंबंधात् । अग्नेश्शुच्यशुचिगृहश्मशानसंबंधादनुज्ञापरिहाराविवेत्यर्थः । मतद्वयेपिदोषमाह ॥ **ममरीत्येति** ॥ अनुज्ञापरिहाराविर्त्यंशस्यार्थोंश्यधीनत्वरूपेति । "यथासूर्यप्रभाक्षिणी"इतिभाष्योक्तस्मृतिः ॥ **इतिमतइति** ॥ परमतइत्यर्थः । यदपि "देहानभिमाना"दित्यादि तदपिनेत्याह ॥ **अमुक्तेति** ॥ समाध्यभावदशायामित्यर्थः । "असंततेश्चाव्यतिकर"इत्यपिसूत्रंमतद्वयेपिजीवानामन्योन्यभोगासांकर्योक्त्यर्थमित्युपेतं । मतद्वयेपितदर्थमनुवदति ॥ **कर्तुर्भोक्तुश्चेति** ॥ कर्म

प्र० कर्तुःकर्मफलभोक्तुश्चेत्यर्थः । उपहितात्मनइतिपरमताभिप्रायं । मतांतरेतुकर्तुर्भोक्तुश्चात्मनइत्येवध्येयं । अन्यत्समं । सांतत्याभावेन विभुत्वाभावेनेत्यर्थः । परमतेदोषमाह ॥ **दुःखादीति** ॥ **उपाधीति** ॥ शुद्धस्यैवोपाधिसंबंधाद्बंधस्यशुद्धगतत्वइत्यर्थः । रामानुजमतेतुपरमतइवस्वरूपैक्याभावेनजीवानांभगवदंशत्वेप्यन्योन्यंभोगाव्यवस्थाशंकोदयायोगेनतन्निरासार्थमिदंसूत्रंव्यर्थं । यत्त्विदंसूत्रमैक्यवादेभोगाव्यवस्थोक्त्यभिप्रायमिति तन्न । तथात्वेपूर्वपादएवनिवेशापातेनेहासंगतिरितिदोषोध्येयः । "आभासएवचे"तिसूत्रार्थंपरमतेऽनूद्यनिराह ॥ **एतेनेति** ॥ एतेननिरस्तमित्युक्तहेतुंव्यनक्ति ॥ **सौत्रेणेति** ॥ "ततआभासतेनित्यंतद्वदाभासतेपिच । भानमस्तित्वमपिचैवासमंताद्यत

त्कर्मभोगासंकरइतिसप्तमार्थइति तन्न । दुःखादिभोक्तृत्वस्योपाधिविशिष्टगतत्वेबंधस्यशुद्धगतमोक्षसामानाधिकरण्यायोगात् । उपाधिसंबंधाच्छुद्धगतत्वेसांकर्यापरिहारात् । एतेन यदुक्तंजीवेशयोर्बिंबप्रतिबिंबत्वान्मुखप्रतिमुखयोःश्यामत्वावदातत्ववद्दुःखित्वादीत्यष्टमार्थइति तदपिनिरस्तं । सौत्रेणाभासशब्देनैवहेतुतदाभासयोरिवबिंबप्रतिबिंबयोर्भिन्नत्वस्यसूचितत्वात् ॥

प्र०स्ततः । जीवआभासउद्दिष्टःसदैवपरमात्मन"इति "अतएवचोपमे"तिसूत्रानुव्याख्यानोक्तदिशाऽवयवयोगेनापिभिन्नत्वप्रतीतिराभासपदेनबोध्या । यत्तुरामानुजमतेऽद्वैतिमतेजीवानांसुखदुःखादिभोगव्यवस्थापकौपाधिकभेदादिरूपोहेतुराभासएव । चकाराद्भेदश्रुतिविरोधश्चेत्यर्थइति तत्तुनयुक्तं । असंततेरव्यतिकरः आभासत्वाच्चाव्यतिकरइतिपूर्वोक्तसाध्येनैवास्यान्वयसंभवेविशेष्याध्याहारेणव्यवस्थापकहेतुरित्यनेनान्वयायोगात् । हेतवइत्यध्याहृत्याभासाएवेतिबहुवचनांतपाठकल्पनंचासांप्रदायिकमित्युपेक्षितं । आभासत्वाच्चेतिवक्तव्यआभासइतिप्रथमो

प्र० क्विस्तु अदृष्टानियमादाभासोजीवइत्युत्तरार्थो । आद्यसूत्रेहेत्वंशस्यवैयर्थ्यदोषेणप्रागेवनिरासात्प्रतिज्ञार्थमनूद्यनिराह ॥ एकवस्त्विति ॥ स्वविशिष्टेति ॥ जडविशिष्टेत्यर्थः । श्रूयतेहि "यस्यात्माशरीर"मितिवत् "यस्यपृथिवीशरीर"मित्यादिनाजडस्यापित्वन्मतरीत्याब्रह्मशरीरतयाजडवैशिष्ट्यंब्रह्मणइतिभावः ॥ द्वितीयेत्यादि ॥ विवृतमेतत्प्रागस्माभिः । सूत्रांतरदूषणंतुस्फुटत्वान्नोक्तं । तथाचविवृतंप्रागस्माभिः । केचित्तु ॥ एकवस्त्वेकदेशत्वमंशत्वं । तच्चजीवविशिष्टंब्रह्मप्रतिविशेषणस्यजीवस्यास्तीत्याहुः ॥ तन्न ॥ शुक्लःपटः पटस्यशौक्ल्यमितिविशेषणविशेष्यभावस्यकामचारित्वेनब्रह्मविशिष्टंजीवंप्रतिब्रह्मणोप्यंशत्वप्रसंगात् । स्वविशिष्टब्रह्मैकदेशस्यजडस्यापिब्रह्मांशत्वप्रसंगाच्च । विशिष्टातर्गतस्यविशेष्यस्यब्रह्मणोप्यंशत्वापाताच्च । द्वितीयसूत्रोक्तायां "पादोस्ये"तिश्रुताविदंशब्देन "उतामृतत्वस्येशान"इतिपूर्वप्रकृतस्यमुक्तनियामकस्यनिष्कृष्टस्यतृतीयोक्तायां "ममैवांश"इतिस्मृतावप्यस्मच्छब्देन "तत्तेजोविद्धिमामक"मित्याद्युत्तरवाक्यइवनिष्कृष्टस्यविशेष्यस्यब्रह्मणएवांशित्वोक्तेश्च । किंचजीवविशिष्टंब्रह्मेतिकोर्थः । किंविशेष्यमब्रह्मैव तत्तुजीवशिष्टंसद्ब्रह्मभवतीतिवा किंवाविशेष्यमेवब्रह्म तस्यतुजीवोविशेषणमिति । आद्येजीवस्यब्रह्मैकदेशत्वसिद्धावपिब्रह्मणोजीवांतर्यामित्वतच्छेषित्वमुक्तनियामकत्वजगत्कारणत्वादयोनस्युः । नहिनियम्यजीवविशिष्टस्तन्नियामकः । अंत्येचब्रह्मणोंतर्यामित्वादिसिद्धावपिजीवस्यब्रह्मैकदेशत्वासिद्धिः । नहिविशेषणंविशेष्यस्यैकदेशः ॥छ॥अंशाधिकरणं॥१८॥

प्र० एकवस्त्वेकदेशत्वरूपांशत्वाभिप्रायेद्वितीयतृतीयसूत्रोपात्तश्रुतिस्मृत्यनानुगुण्यमुक्तं । इदानीमेकवस्त्वेकदेशत्वमित्येतदेवनयुक्तमित्याह ॥ किंचेति ॥ छ ॥ अंशाधिकरणं ॥ १८ ॥

प्र० ॥ ॐअदृष्टानियमात्ॐ ॥ “नजीवाभगवत्प्रतिबिंबा”इतिटीकासूचितसंगतिमाह ॥ अंशत्वेपीति ॥ पूर्वोक्तमिति ॥ “आभासए वचे”त्युक्तमित्यर्थः । पूर्वपक्षटीकासूचितचिंतामाह ॥ अत्रजीवस्येति ॥ अत्रन्यायविवरणरीत्याटीकायां “नचैकप्रतिबिंबानांमिथोवैचित्र्यंसंभवती”त्युक्तिरुपलक्षणं । नचस्वरूपोपाधेर्वैचित्र्याद्वैचित्र्यमितिवाच्यं । स्वरूपभूतेप्रतिबिंबनोपाधित्वस्यैवादृष्टचरत्वात् । लोकेद

॥ ॐअदृष्टानियमात्ॐ ॥ अंशत्वेपिजीवस्यावतारसाम्यंनेत्यत्रहेत्वंतरत्वेनपूर्वोक्तंप्रतिबिंबत्वमाक्षिप्यसमाधीयतइतिसंगतिः । अत्रजीवस्यप्रतिबिंबत्वश्रुतिः किमेकब्रह्मप्रतिबिंबत्वेवैचित्र्यायोगइतियुक्त्यनुगृहीतयाप्रतिबिंबत्वाभावश्रुत्याबाधितोतनेतिचिंता । [अत्रश्रुतिसमन्वयेनोक्तंब्रह्मणस्रष्टृत्वादिकमयुक्तमुतनेतिचिंता । तदर्थंश्रुतिरप्रमाणमुतनेति । तदर्थंजीवस्यप्रतिबिंबत्वश्रुतिःकिमेकब्रह्मप्रतिबिंबत्वेवैचित्र्यायोगइतियुक्त्यनुगृहीतयाप्रतिबिंबत्वाभावश्रुत्याबाधितोतप्रतिबिंबत्वाभावश्रुतेःसोपाधिकप्रतिबिंबत्वाभावविषयत्वादबाधितेति] तदर्थंबिंबस्यैकत्वेपिस्वरूपोपाधिवैचित्र्यात्प्रतिबिंबवैचित्र्यमयुक्तमुतनेति । [तदर्थंस्वरूपस्योपाधित्वमयुक्तमुतनेति ।] ॥ श्रुत्यंतरमनुमीयतइति ॥ “नसंबंध”इत्यतीताधिकरणोदाहृतंबिंबप्रतिबिंबभावरूपसंबंधनिषेधकंश्रुत्यंतरमिहभाष्येसंदेहबीजत्वेनोदाहृतमित्यनुमीयते । संदेहबीजत्वेनश्रुतिविगानोक्तेःपूर्वाधिकरण

प्र० र्पणाद्युपाधेर्भिन्नस्यैवप्रतिबिंबनोपाधित्वदर्शनादित्यपिपूर्वपक्षोध्येयः । सिद्धांताशयस्तुविवरिष्यतइतिभावेनतदुपयुक्तचिंतामाह ॥ तदर्थं बिंबस्येति ॥ अतीतेति ॥ “अंशोनाने”त्यधिकरणइत्यर्थः । ननुसिद्धांतेऽदृष्टवैचित्र्याद्वैचित्र्यमुच्यते । तदयुक्तमिव । अनादिप्रतिबिंबवैचित्र्यस्यागंतुकादृष्टवैचित्र्यनिमित्ततानुपपत्तेः । तद्वैचित्र्यस्यापिकिंचिदनादिवस्तुवैचित्र्यनिबंधनत्वावश्यंभावाच्च । मुक्तौकर्माभावाच्च ।

प्र० प्रागुपलक्षितपूर्वपक्षस्ययथाश्रुतटीकादिनापरिहारायोगाच्च । अतआह ॥ अयंभावइति ॥ चैतन्याभेदयोश्चेतिपरमते ॥ उक्तंहीति ॥ चतुर्थस्कंधैकविंशाध्यायतात्पर्योक्तस्कांदवचनेस्वरूपोपाधिनिमित्तत्वंप्रतिबिंबस्योक्तमित्यर्थः । तथाचोदाहृतैषास्मृतिः "यावदात्मभावित्वा" दित्यत्रटीकायां ॥ अन्यथेति ॥ वाचनिकस्याप्यन्यत्रादृष्टिमात्रेणत्यागइत्यर्थः । अदृष्टिरप्यसिद्धेत्याह ॥ दृश्यंतेचेति ॥ श्रुतिश्चेति ॥

१२४।२२

भाष्येषुप्रकृतत्वादित्यर्थः ॥ सिद्धांतयदिति ॥ अयंभावः । युक्तमेवजीवानांब्रह्मप्रतिबिंबत्वं। जीवतद्गुणयोरभेदेपिविशेषबलाद्गुणगुणिभाववत्स्वरूपभेदयोश्चैतन्याभेदयोश्चाभेदेपिविशेषणविशेष्यभाववत्समवायस्यसंबंधसंबंधिभाववच्चाभेदेप्युपाधिप्रतिबिंबभावस्यापिसंभवात् । उक्तंहि "जीवोपाधिर्द्विधाप्रोक्तःस्वरूपंबाह्यमेवच । बाह्योपाधिर्लयंयातिमुक्तावन्यस्यतुस्थिति"रिति । अन्यथोद्भूतरूपविशेषवद्द्रव्यस्यैवबिंबग्राहित्वादविद्यांतःकरणादेस्तन्नस्यात् । अचाक्षुषस्यचद्रव्यस्याप्रतिबिंबनाद्ब्रह्मणस्तन्नस्यात् । दृश्यंतेचप्रतिध्वनिप्रतिसूर्यछायापुरुषेंद्रचापादीनिभिन्नोपाधिरहितान्यपिप्रतिबिंबानि । श्रुतिश्च "सोपाधिरनुपाधिश्चप्रतिबिंबोद्विधेयते । जीवःपरस्यानुपाधिरिंद्रचापोयथारवे"रिति । नहिप्रतिध्वन्यादेःस्वधर्माधायकउपाधिरस्ति । नचप्रतिबिंबस्याबिंबेनेवोपाधिनापिनिरूप्यत्वंनियतं । प्रतिध्वन्यादावदर्शनात् । जीवस्यप्रतिबिंबत्वनिषेधश्रुतिस्तु

प्र० "आभासएवचे"त्यत्रभाष्योक्ता ॥ नियतमिति ॥ येनत्रेवभेदोनियतस्स्यादितिभावः । कथंतर्हि "नैवांशोनसंबंधःपरस्ये"तिबिंबप्रतिबिंबभावसंबंधनिषेधपराश्रुतिरित्यतः "अन्याश्रुतिर्निरुपाधिप्रतिबिंबविषये"तिटीकांविवृण्वन्नाह ॥ जीवस्येति ॥ ननु बिंबप्रतिबिंबयो

प्र० रभेदात्कथंतदधीनत्वादीत्यतआह ॥ बिंबेति ॥ भेदश्चसिद्धइत्यन्वयः ॥ श्रुत्येति ॥ पूर्वत्रभाष्योक्त्या ॥ तवैवेति ॥ स्थानांतरगतंवाक्यं । "बहव"इत्यादितु "अतएवचोपमे"त्यत्रभाष्योक्तं । प्रत्यक्षेणेत्युक्तंव्यनक्ति ॥ नहीति ॥ नन्विदंप्रत्यक्षंममैवेदंमुखंतदेवेदंमुख

भिन्नोपाध्यायत्तत्वादिरूपप्रतिबिंबत्वनिषेधपरा । वक्ष्यतिचभाष्यकारः "अतएवचोपमासूर्यकादिव"दित्यत्रतदधीनत्वतत्साद्दृश्याभ्यामेवजीवस्यसूर्यकाद्युपमा । नतूपाध्यायत्तत्वादिनेति । बिंबप्रतिबिंबयोर्भेदश्च नदर्पणेममुखं । किंतुममप्रतिमुखमेवेत्यादिप्रत्यक्षेण, कस्तूरीगुडाग्निपर्वततत्प्रतिबिंबानांसौरभमाधुर्यौष्ण्यगुरुत्वतदभावात्मकवैधर्म्यरूपेणानुमानेन, "यथैषापुरुषेछाया एतस्मिन्नेतदातत"मित्यादिश्रुत्या "तवैवसदृशश्चायंबिंबस्यप्रतिबिंबवत् । बहवस्सूर्यकायद्वत्सूर्यस्यसदृशाजले । एवमेवात्मकालोकेपरात्मसदृशामता"इत्यादिस्मृत्याचसिद्धः । नहिदर्पणेममुखंलग्नं कूपेवापतितमितिकश्चित्प्रत्येति । किंचाभेदपक्षेग्रीवास्थमेवमुखंदर्पणस्थं किंवादर्पणेमुखांतरमारोप्यते यद्वाग्रीवास्थस्यैवसंसर्गमात्रमारोप्यते । नाद्यः । प्रादेशमात्रमुखस्यैकदैवोभयत्रानवस्थानात् । कालभेदेनचेच्चैत्रोबहिरवस्थानकालेगृहांतरिवमुखंदर्पणेवस्थानकाले ग्रीवायांनस्यात् । द्वितीयतृतीययोःकथंप्रत्यभिज्ञाप्रमा । द्वितीयेतदेवेदमितिप्रत्यभिज्ञाविषयस्यैक्यस्यबाधितत्वात् । तृतीयेतद्विषयस्येदमित्यस्यबाधितत्वात् ।

प्र० मित्याद्यैक्यप्रत्यभिज्ञाबाधितमित्यतस्तद्भ्रांतित्वमाह ॥ किंचेति ॥ कथंप्रमेत्युक्तंव्यनक्ति ॥ द्वितीयइति ॥ संसर्गःकिमैक्यंतत्रसत्त्वंवा ।

प्र० नोभयमित्याह ॥ नहीति ॥ ननुप्रतिबिंबस्यजन्मोक्तावुपादानंकिंस्यादित्यतआह ॥ प्रतिबिंबस्योपादानंत्विति ॥ न्यायामृतेद्वितीयप
नहिप्रातिभासिकव्यावहारिकयोरैक्यंव्यावहारिकं । नवागृहएवस्थितस्यचैत्रस्यबहिःसत्त्वज्ञानंप्रमा । नचेदंज्ञानमिदमित्यंशे
भ्रमः ऐक्यांशेतुप्रमेतिवाच्यं । वैपरीत्यस्यापिसुवचत्वात् । शुक्ताविदंपूर्वस्थापितंरूप्यमितिज्ञानस्याप्यैक्यांशेप्रमात्वापाता
च्च । एतेन ग्रीवास्थमुखस्यदर्पणेप्रतीतेनमुखेनैक्यंप्रत्यभिज्ञाविषयइतिनिरस्तं । अत्रप्रतिसूर्यएव नतुसूर्यइतिवद्दर्पणेमुख
च्छायैव नतुमुखमित्येवप्रतीतेः । अन्यथाप्रतिबिंबेनाबिंबानुमितिर्नस्यात् । किंचदर्पणेप्रतिमुखस्याभावेसप्रतिबिंबदर्पणसंब
द्धदर्पणांतरेप्रतिबिंबस्यापिप्रतिबिंबंदृश्यते । तन्नस्यात् । किंचघटेतदवच्छिन्नाकाशस्येवदर्पणेऽविद्यायांचमुखाभासस्यचै
तन्याभासस्यचाभावेकथंश्यामत्वादिकंप्रतिमुखएव संसारश्चजीवएवेतिव्यवस्था । नहिश्यामत्वसंसारावुपाधिगतौ । नवो
पाधावारोपितबिंबगतौ । किंचगगनंतारकितमितिवन्मुखंप्रतिबिंबितमितिप्रयोगप्रत्ययौमुखस्यसंजातप्रतिबिंबसंबंधविष
यावेव । नत्वभेदविषयौ । प्रतिबिंबस्योपादानंतु अंधकारपरिवेषेंद्रचापादाविवस्पर्शहीनंरूपिकिंचिद्द्रव्यंकार्यबलात्कल्प्यं ।
नह्यस्माकंतार्किकाणामिवनवैवद्रव्याणि । विस्तरस्तुन्यायामृतेबिंबप्रतिबिंबादेर्द्रष्टव्यः । [यद्वा भोक्तृरहितसुखवज्ज्ञातृ
रहितज्ञानवत्प्रलयेव्यक्तिरहितघटत्वादिजातिवदतीतादौज्ञेयरहितज्ञाततावत्फलरहितनित्यनियोगवच्चजीवोप्युपाधिरहित
प्रतिबिंबोस्तु । प्रतिध्वनिवत्प्रतिसूर्यवच्छायापुरुषवदिंद्रचापवच्च । "सोपाधिरनुपाधिश्चप्रतिबिंबोद्विधेयते । जीवः
परस्यानुपाधिरिंद्रचापोयथारवे"रितिश्रुतेः । नहिप्रतिध्वन्यादेःस्वधर्माधायकउपाधिरस्ति । नचहेतुमात्रमुपाधिः ।

प्र० रिच्छेदइत्यर्थः । पौनरुक्त्यंनिराह ॥ अत्रजीवानामिति ॥ बिंबशक्तिरुपाधिवैचित्र्यंचोभयंप्रतिबिंबवैचित्र्येकारणमित्येतत्क्रमेणव्यनक्ति

अनादिप्रतिबिंबस्यजीवस्यतदनपेक्षणात् । नचप्रतिबिंबस्यबिंबेनेवोपाधिनापिनिरू
प्यत्वंनियतं । प्रतिध्वन्यादावदर्शनात् । बिंबप्रतिबिंबभेदश्चान्यत्रसमर्थितः ।]
अत्रजीवानांविचित्रत्वादविचित्रब्रह्मप्रतिबिंबत्वंनेतिशंकायाःप्रवाहानाद्यदृष्टादिवै
चित्र्योक्त्यानिरासः । भक्तिपादे "स्थानविशेषात्प्रकाशादिव"दित्यत्रतुविचित्रजी
वानंदादिबिंबत्वाद्ब्रह्मानंदादेर्वैचित्र्यंस्यात् । बिंबवैचित्र्यंविनाप्रतिबिंबानांस्वा
भाविकवै[जलदर्पणसूर्यकांताद्युपाधिवैचित्र्येपिबिंबभूतमुखावैचित्र्येप्रतिबिंबवै]चि
त्र्यादृष्टेरितिशंकायाः । नकेवलमेतदधिकरणोक्तंप्रवाहानाद्यदृष्टादिवैचित्र्यमा
त्रंतत्रहेतुः । किंतूपाधेःस्वरूपानादिज्ञानभक्त्यादिवैचित्र्यंबिंबस्येश्वरस्यशक्तिवि
शेषश्चतत्रहेतुः । नह्यादित्यस्येवान्यस्यापिसूर्यकांतादौप्रतिबिंबोग्निंजनयति । न
वासूर्यस्यैवजलादौसतंजनयतीतिनिरासइतिभेदः । अतएवात्रभाष्यादावदृष्ट

 प्र० ॥ नहीति ॥ अतएवेति ॥ बिंबशक्तेरपितत्राभिमतत्वादेवेत्यर्थः । मतद्वयेपीदं "अदृष्टानियमात् । अभिसंध्यादिष्वपिचैवं । प्रदेशादि

प्र० तिचेन्नांतर्भावा"दितिसूत्रत्रयंपूर्वशेषोनाधिकरणांतरं । तत्र "असंततेः । आभासएवचे"त्याभ्यामैक्यवादेभोगव्यवस्थामुपपाद्य "अदृष्टे"त्यादिनासर्वगतबहुजीववादिनांसांख्यकाणादादीनांमतेभोगाव्यवस्थोच्यतइतिपरमतं । मतांतरंतु मायावादिनांमतेपूर्वसूत्रद्वयेन

वैचित्र्यमेवोक्तं। तत्रतु "ऐश्वर्यात्परमाद्विष्णोर्भक्त्यादीनामनादित"इतीश्वरशक्तिःस्वरूपानादिभक्त्यादिवैचित्र्यंचोक्तं । टीकायामपि "नचादृष्टनियमेनवैचित्र्यं । स्वाभाविकानंदादेरादिमत्कारणानुपपत्ते"रित्यादिनात्रोक्तमदृष्टवैचित्र्यंतत्रपूर्वपक्षएवाशंक्यपरिहृतं । अत्रयदुक्तंपरैः अदृष्टेत्यादिसूत्रत्रयेण किंत्वनेकात्मवादिसांख्यादिमतएवाव्यवस्थेत्युच्यतइति तन्न । ममरीत्या "अदृष्टानियमा"दितिहेतोः "आभासएवचे"तिश्रुतसाध्यान्वयसंभवेसांख्यादिमतेऽव्यवस्थेतिसाध्याध्याहारायोगात् । आत्मभेदे नव्यवस्था । ऐक्येतुव्यवस्थेत्यस्यविरुद्धत्वाच्च । विस्तृतंचैत

प्र० भोगाव्यवस्थामुक्त्वासत्योपाधिकृतसत्यभेदवादेपिजीवानांस्वरूपैक्येनभोगाव्यवस्थोच्यतइति । तत्रपरमतोक्तदोषेणैवमतांतरंदुष्टंस्यादितिभावेनपरमतमेवानूद्यनिराह ॥ अत्रयदुक्तंपरैरिति ॥ किंत्विति ॥ नकेवलंस्वमतेभोगव्यवस्थेत्यर्थः । न व्यवस्थेतिपदच्छेदः ॥ ॥ ९८५ ॥

प्र० अन्यत्रेति ॥ "अतएवचोपमे"त्यत्रानुव्याख्यानसुधयोरुपाधिखंडनतत्वनिर्णयटीकादौन्यायामृतेचेत्यर्थः । पेटिका संगतिग्रंथः

दन्यत्रेति । अस्मिन्पादआद्यमधिकरणत्रिकमुत्पत्त्यनुत्पत्तिश्रुत्योर्विरोधनिरासकत्वेनैकापेटिका । तत्राद्येद्वितीयेचब्रह्मेतरयोर्नभोनभस्वतोरुत्पत्त्यासिद्धांतः । तृतीयेतुब्रह्मणोनुत्पत्त्यासिद्धांतइतिभेदः । चतुर्थपंचमषष्ठानितेजआदेरुत्प[त्तावप्युत्प]त्तिंस्वीकृत्योत्पाद्योत्पादकभावरूपसंबंधविषयकविरोधेशंकितेतन्निरासकत्वेनैकापेटिका । तत्राप्याद्यद्वितीययोरुत्पादकविशेषविषयविरोधनिरासेनसिद्धांतः । तृतीयउत्पाद्यविशेषविषयविरोधनिरासेनसिद्धांतइतिभेदः । सप्तमाष्टमनवमदशमानिसंहारविषयविरोधनिरासकत्वेनैकापेटिका । तत्राप्याद्येसंहर्तृविषयविरोधनिरासः। द्वितीयेतृतीयेचसंहारक्रमविषयविरोधनिरासः । चतुर्थेब्रह्मविषयकसंहारविरोधपरिहारः । एकादशमारभ्यैकोनविंशतिपर्यंतानिजीवविषयत्वेनैकापेटिका । तच्चाधिकरणनवकंयथाक्रमंजीवस्यसादित्वाणुत्वानेकदेहस्थितत्वेश्वरभिन्नत्वानंतत्वज्ञानानंदादिरूपत्वपरतंत्रकर्तृत्वेश्वरांशत्वतत्प्रतिबिंबत्वरूपप्रमेयनवकप्रतिपादकमितिद्रष्टव्यं ॥ ७ ॥ अदृष्टाधिकरणं ॥ १९ ॥ इतिश्रीमद्ब्रह्मण्यतीर्थपूज्यपादानांशिष्येणव्यासयतिनाविरचितायांश्रीमद्भाष्यटीकाविवृतौतात्पर्यचंद्रिकायांद्वितीयाध्यायस्यतृतीयःपादः ॥ ३॥

प्र० स्पष्टः ॥ ७ ॥ अदृष्टाधिकरणं ॥ १९ ॥ इतिश्रीमत्सर्वतंत्रस्वतंत्रसुधींद्रगुरुपादशिष्यराघवेंद्रयतिकृतेचंद्रिकाप्रकाशेद्वितीयाध्यायस्यतृतीयःपादः ॥ २ ॥ ३ ॥

प्र० ॥ श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ एतत्पादाभिधेयंपूर्वपादानंतर्येबीजादिकंचप्रागेवविवृतं ॥ ॐतथाप्राणाःॐ ॥ "जगत्कारणेब्रह्मणी"त्यादिफलोक्तिपरटीकातात्पर्योक्तिपूर्वविषयसंशयटीकांव्यनक्ति ॥ अत्रोक्तमिति ॥ अत्रेति

॥ श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ ॐतथाप्राणाःॐ ॥ अत्रोक्तंब्रह्मणःसर्वस्रष्टृत्वंकिंप्राणानादित्वश्रुतिविरुद्धंनवेतिचिंता । तदर्थंकिंप्राणानादित्वश्रुतिर्मुख्यार्थोत गौणीति । तदर्थमनादित्वश्रुतिसहकारित्वेनस्मृत्युक्तानुपादानत्वंकिंसर्वथानिरुपादनत्वंकिंवासूक्ष्मरूपेणेति । "प्रतिज्ञानुपरोधाच्चे"तिसिद्धांतसूत्रोक्ताया "इदंसर्वमसृजते"तिसामान्यश्रुतेर्बाधायपूर्वपक्षन्यायविवरणेस्पष्टार्थवद्विशेषश्रुतिविरोधइत्युक्तं । तत्रसामान्यव्यवधानाभावरूपंस्पष्टार्थत्वंनिरवकाशत्वरूपविशेषश्रुतित्वेपिहेतुरित्याह ॥ १२६।७ स्पष्टार्थायानिरवकाशत्वेनेति ॥ "एतस्माज्जायतेप्राणोमनःसर्वेंद्रियाणिचे"तिसिद्धांतीयविशेषश्रुतिबाधार्थंभाष्योक्तांपूर्वपक्षयुक्तिमाह ॥ १२६।७ निरुपादानत्वादिति ॥ व्यतिरेकेणेति ॥ १२६।८ यद्यप्यन्वयदृष्टांतोब्रह्मास्ति । तथापिव्यतिरेकव्याप्तिंविनाव्यभिचारशंकायाअनिरासा

प्र० चिंतेत्यन्वयः । उक्तमित्यस्यजन्मादिसूत्रोक्तमित्यर्थः । एवमग्रेपि । आद्यसूत्रसूचितचिंतामुक्त्वाद्वितीयसूत्रसूचितचिंतामाह ॥ किंप्राणेति ॥ टीकाक्षरार्थमाह ॥ प्रतिज्ञेत्यादिना ॥ विशेषश्रुतिबाधार्थमिति ॥ एतेनटीकायां "उत्पत्तिश्रुतिरस्ती"त्यस्यसामान्यश्रुतिश्चास्तीत्यर्थ

प्र० उक्तोभवति ॥ **भाष्योक्तस्मृत्यनुसारेणेति** ॥ “उपादानकृतासृष्टिस्सर्वलोकेषुदृश्यत”इतिस्मृतीत्यर्थः ॥ **तैजसाहंकारेति** ॥ “तैजसात्तुविकुर्वाणादिंद्रियाणिदशाभव”न्निति द्वितीयस्कंधस्यपंचमाध्याये “अतिजाज्वल्यमानत्वात्तैजसानींद्रियाण्यपी”त्यादितत्तात्पर्योक्तवाक्येषुच “तैजसानींद्रियाण्येवक्रियाज्ञानविभागत”इत्यादितृतीयस्कंधकापिलेयवाक्यादौचतैजसाहंकारकार्यत्वश्रवणादितिभावः ॥ **तामसेति** ॥

द्भाष्योक्तस्मृत्यनुसारेणव्यतिरेकएवोक्तः ॥ [१२६।१७] **विप्रतिपत्त्यभावेनेति** ॥ तेजोतइत्यादौतेजआदेर्ब्रह्मकार्यत्वइवप्रकृतेतत्रविप्रतिपत्त्यभावेनेत्यर्थः ॥ [१२६।१८] **प्रतिसृष्टिकालमिति** ॥ यस्मिन्प्रलयकालेनुपचयस्तदानसमर्थानि यस्मिंस्तुसृष्टिकालेसमर्थानितदास्त्येवोपचयइत्यर्थः । इंद्रियाणांभूतैरुपचयेतैजसाहंकारकार्यत्वविरोधइत्यतआह ॥ [१२६।१८] **अत्राहंकारेति** ॥ ननुतथापितामसाहंकारकार्याणांभूतानांकथंभाष्योक्तश्रुतौप्राणकारणत्वोक्तिरित्यतआह ॥ [१२६।१८] **अहंकारोत्पन्नेति** ॥ [१२६।१८] **उक्तयुक्त्यापीति** ॥ *“युक्तियुक्तायाअप्यविशेषश्रुतेस्सकाशादुभय(विशेषश्रुतेस्सकाशादुभय)”* श्रुतेःप्राबल्या”दितिन्यायविवरणोक्तरीत्या “सप्राणमसृजतसप्राणा”नित्यादिसिद्धांतीयविशेषश्रुतेः पूर्वपक्षीयविशेषश्रुतितःप्राबल्यार्थंपूर्वोक्तासामान्यश्रुतिःस्मारितेतिभावः ॥ ७ ॥ **प्राणोत्पत्त्यधिकरणं** ॥ १ ॥

प्र० “तामसादपिभूतादेर्विकुर्वाणादभून्नभ”इत्यादिद्वितीयस्कंधवाक्यात् “तामसात्तुविकुर्वाणाद्भगवद्वीर्यचोदितात् । शब्दमात्रमभूत्तस्मान्नभश्श्रोत्रंतुशब्दग”मित्यादितृतीयस्कंधोक्तेरितिभावः । प्रतिज्ञानुपरोधादितितृतीयसूत्रसार्थक्यमाह ॥ **युक्तियुक्तायाअपीत्यादिना** ॥ ७ ॥ **प्राणोत्पत्त्यधिकरणं** ॥ १ ॥

---

* इदंवाक्यंन्यायविवरणेमुद्रितपुस्तकेनास्ति ।

प्र० ॥ ॐतत्प्राक्श्रुतेश्चॐ ॥ अवांतरेति ॥ कृत्स्नप्राणोत्पत्त्याक्षेपसमाधानरूपावांतरसंगतिमित्यर्थः । पूर्वोत्तरपक्षटीकासूचिताश्चिंतांःसंदेहटीकांविवृण्वन्नाह ॥ अत्रेति ॥ यदिबह्ववयवोपचयस्तदातादृशेंद्रियेभ्योविशिष्यनित्यत्वोक्त्ययोगादनादित्वश्रुतिर्मुख्यार्था । पक्षांतरेतुने

॥ ॐतत्प्राक्श्रुतेश्चॐ ॥ अवांतरसंगतिंसूचयितुंप्रकृतेंद्रियांतर्गतमित्युक्तं । अत्रोक्तंब्रह्मणःसर्वस्रष्टृत्वंमनोनादित्वश्रुतिविरुद्धंनवेतिचिंता । तदर्थंमनोनादित्वश्रुतिर्मुख्यार्थोतगौणीति । तदर्थंगौणत्वइंद्रियांतराणामनित्यत्वमुक्त्वामनसोनित्यत्वोक्तिर्युक्तानवेति । तदर्थंमनसःसृष्टिकालेकिमिंद्रियांतराणामिवबह्ववयवोपचयः किंवाल्पावयवोपचयइति । "विशेषश्रुतिविरोध"इतिपूर्वपक्षन्यायविवरणेपूर्वाधिकरणइवविशेषश्रुतिर्नविशिष्यधर्मिनिर्देशमात्रं । "एतस्माज्जायतेप्राणोमन"इतिसादित्वेपितस्यसत्त्वात् । "प्राणाएवानादय"इतींद्रियेष्वपितस्यसत्त्वेनपूर्वाधिकरणसांकर्यापाताच्च । असांकर्यस्यच "तत्रस्रष्टार्थवच्छ्रुतिः । विशेषश्रुतिवैरूप्य"मित्याद्यनुव्याख्यानउक्तत्वात् । किंत्विंद्रियांतराण्यनित्यकोटौनिक्षिप्यमनसोनित्यत्वोक्तिरित्याह ॥ इंद्रियाणा[१२६।२४]मनित्यत्वमिति ॥ "विशेषश्रुते"रितिसिद्धांतन्यायविवरणेविशेषश्रुतिर्नपूर्वपक्षइवेंद्रियांतराणिनित्यकोटौनिक्षिप्यमनसोऽनित्यत्वोक्तिः । विषयवाक्येतदभावात् । इंद्रियांतराणांनित्यकोटिनिवेशस्यसिद्धांतविरोधित्वाच्च । किंतु पृथक्कीर्तनमात्रं । तावतानिरवकाशत्वसिद्धेरित्याह ॥ पृथ[१२७।४]ङ्मनसइति ॥ अनेनसौत्रस्यप्राक्शब्दस्यनकेवलंमनोविषयसूचनंफलं । किंतुश्रुतेर्निरवकाशत्वसूचनमपीत्युक्तंभवति । तस्यफलांतरमप्याह ॥ नचे[१२७।४]ति ॥ ७ ॥ तत्प्रागधिकरणं ॥ २ ॥

प्र० तिभावः ॥ सादित्वइति ॥ उत्पत्तिमत्त्वेपीत्यर्थः ॥ निरवकाशत्वेति ॥ विशिष्यजन्माभिधायकत्वरूपेत्यर्थः । फलांतरं पूर्वोत्पन्नत्वरूपमित्यर्थः ॥ ७ ॥ तत्प्रागधिकरणं ॥ २ ॥

प्र० ॥ ॐतत्पूर्वकत्वाद्वाचःॐ ॥ पूर्वत्र "प्रकृतेंद्रिये"त्यादिटीकाव्याख्यानेनैवेहापि "प्रकृतेंद्रियांतःपातिवागिंद्रिय"मितिटीकापिसंगतिसूचकत्वेनव्याख्यातेत्यत्रत्यपूर्वपक्षटीकारीत्यानित्यंवेदोच्चारणसमर्थस्यवागिंद्रियस्यव्यर्थमुपचयकल्पनमितिपूर्वस्माद्विशिष्यशंकोत्थानात्पूर्वानंतर्यंच

॥ ॐतत्पूर्वकत्वाद्वाचःॐ ॥ अत्रोक्तंब्रह्मणःसर्वस्रष्टृत्वंकिंवाङ्नित्यत्वश्रुतिविरुद्धंनवेतिचिंता । तदर्थंवाङ्नित्यत्वश्रुतिर्मुख्यार्थोतगौणीति । तदर्थंगौणत्वे "अस्यांहिश्रुतिरवतिष्ठत"इतिश्रुतंनित्यवेदाश्रयत्वमयुक्तमुतयुक्तमिति । तदर्थंवेदाश्रयत्वंकिंवेदोच्चारणसामर्थ्यंकिंवातत्सन्निधियोग्यतेति । सामर्थ्यरूपत्वेसदावेदोच्चारणसमर्थस्यवागिंद्रियस्योपचयकल्पनंव्यर्थमितिनित्यत्वश्रुतिर्मुख्यार्था । अन्यथातुगौणी । "नचविशेषश्रुतिविरोध"इतिपूर्वपक्षन्यायविवरणेविशेषश्रुतिर्नामनाद्याधिकरणइवविशिष्यधर्मिनिर्देशमात्रं । तत्सांकर्यात् । नापिद्वितीयइवान्येषामनित्यत्वोक्तिः । तत्सांकर्यादेव । भाष्योक्ते "नित्यये"त्यादिविशेषवाक्येतदभावाच्च । किंतुनिरवकाशवाक्यशेषसाहित्यमपीत्याह ॥ वाक्य[१२७।१४]शेषादिति ॥ "विशेषश्रुते"रितिसिद्धांतन्यायविवरणेपूर्वाधिकरणयोरिवविशिष्यकीर्तनमात्रंनविवक्षितं । किंतुनिरवकाशवाक्यशेषसाहित्यमपीत्याह ॥ पूर्ववाक्य[१२७।१२]बलेनेति ॥ उपलक्षणंचैतत् । "मनसोवागुदपद्यत वाचोव्याहरण"मितिन्यायविवरणोक्तश्रुतिस्थो

प्र० स्पष्टमितिवा परमतदोषोक्तिप्रस्तावेस्पष्टयिष्यमाणत्वाद्वात्रसंगत्यनुक्तिः । संगतिटीकांविवृण्वन्पूर्वोत्तरपक्षटीकासूचितचिंतापरंपरांवदन्फलफलिभावंचाह ॥ अत्रेति ॥ टीकाक्षरार्थमाह ॥ नचविशेषेत्यादिना ॥ "नचवाग्वावनित्येतिविशेषश्रुतिविरोध"इतिन्यायविवरणवा

प्र० क्येऽपेक्षितांशोक्तिमात्रमित्यविसंवादः । एवमग्रेपि ॥ उत्तरवाक्येति ॥ "वाचोव्याहरण"मित्युत्तरवाक्येत्यर्थः ॥ तटस्थेति ॥ वाचो नित्यत्ववादिनःपूर्वपक्षिणएवंशंकानुदयादितिभावः ॥ अन्येत्विति ॥ अभ्यधिकाशंकांवक्तुंगतार्थत्वमाशंकते ॥ नचैवमिति ॥ तन्मते

त्तरवाक्यबलेनेत्यपिग्राह्यं ॥ मनसः[१२७।२३]संकाशादिति ॥ "उत्पत्तिर्मनस"इतिभाष्योक्तस्मृतौमनसइतिपंचमी । नतुषष्ठीत्यर्थः । ननुवाचोनित्यत्वंनित्यवेदाश्रयत्वेनैव । नतुस्वरूपेण । वाक्यशेषेतदाश्रयत्वोक्तेः । अनित्यत्वंतुनानित्यपुराणाद्याश्रयत्वेन । किंतुस्वरूपेणैव । वाक्यशेषेतदाश्रयत्वानुक्तेरितितटस्थशंकांनिरस्यति ॥ एवंचसमाख्या[१२७।२५]नुरोधइति ॥ समाख्याश्रुतौ "अनित्यावावस्मृतय"इतिवागिंद्रियाश्रितस्मृतीनामनित्यत्वोक्तेरिहापितदाश्रयत्वेनैवानित्यत्वंविवक्षितं । नतुस्वरूपेणेत्यर्थः ॥ [१२७।२५]अन्यथेति ॥ स्वरूपेणैवनित्यत्वानित्यत्वविवक्षायांविरोधात् स्वरूपेणनित्यत्वमुपचितांशैरनित्यत्वमितिविवक्षायांचवाक्यशेषादौनित्यवेदाश्रयत्वाद्युक्त्ययोगात् वाक्शब्देनवेदविवक्षायांच "अस्यांहिश्रुतिरवतिष्ठत"इतिवाक्यशेषविरोधात् अन्यथावाक्यार्थोनयुक्तइत्यर्थः । अन्येतु "तथे"त्यादीनि "तत्पूर्वकत्वा"दित्यंतानिसूत्राण्येकमधिकरणं । तत्र प्राणाअनादयः । "तत्तेजोसृजते"तिछांदोग्येसृष्टिप्रकरणेप्राणानांजन्माश्रवणात् । नचैवंवियदाद्यधिकरणैर्गतार्थता । "असद्वाइदमग्रआसीत्तदाहुःकिंतदसदासीदिति

प्र० "एतेनमातरिश्वे"त्यादेरपिभूतोत्पत्तिसाधनार्थत्वाद्वियदाद्यधिकरणैरित्युक्तं । एकविज्ञानेनसर्वविज्ञानप्रतिज्ञाविरोधादिभिःप्राणानामप्युत्पत्तिसिद्धेरितिभावः । ननु भवतामपि "प्राणावाइदमग्रआसु"रितिभाष्योक्तश्रुतिः "आपोवाइदमग्रआसु"रितिश्रुतितुल्येत्यतआह ॥

प्र० ममत्विति ॥ श्रुतौस्मृतौचेतियथाक्रमंभूतकारणत्वेत्यादिनान्वयः । यद्यपीदंटीकायांनोक्तं । तथापि "तेभ्योभूतानिजज्ञिरइतिभूतकारणत्वश्रुते"रितितत्वप्रदीपोक्तेर्भूतकारणत्वोक्तिरधिकेत्युक्तं । भूतोत्पत्तेःप्रागपिसतामुत्पत्तिरयुक्तेत्यधिकाशंकेत्यर्थः । सिद्धांतंचनिराह ॥ किंचेति ॥

ऋषयोवावतेअग्रेअसदासीत् तदाहुःकेतेऋषयइति प्राणावावऋषय" इतिजगदुत्पत्तेःप्राक्प्राणानांसत्त्वश्रुतेरिहाधिकत्वादितिप्राप्ते "एतस्माज्जायतेप्राणोमनःसर्वेंद्रियाणिच । खंवायुर्ज्योति"रित्यादौजन्मश्रवणात् "असद्वा"इत्यादेश्चावांतरप्रलयपरत्वात्सादयइतिसिद्धांतइत्याहुः । तन्न । एतस्मादितिश्रुतावुत्पत्तौश्रुतायामपिक्वचिदश्रवणमात्रेण पूर्वपक्षानुदयात् । आकाशवाय्वादिष्वपि "वायुश्चांतरिक्षंचैतदमृतं आपोवाइदमग्रआसु"रितिश्रवणेनेहततोधिकाशंकाभावाच्च । तत्रामृतत्वाग्रत्वयोरापेक्षिकत्वइहाप्यग्रत्वंतथास्तु । तत्राप्शब्दस्यब्रह्मणिसमन्वयइहापिप्राणादिशब्दस्यसोस्तु । ममतुभाष्योक्तश्रुतौस्मृतौचप्राणानांभूतकारणत्वोक्तिरुपादाननिषेधश्चभूतेभ्योधिकइतिपूर्वपक्षोदयः । किंचप्राणानांस्वरूपेणसादित्वसिद्धांतो "नित्यान्येतानिसौक्ष्म्येणे"त्यादिभाष्योक्तस्मृतिविरुद्धः । यच्चोक्तं उत्पत्तिश्रुतिर्नामुख्यार्था । गौणत्वासंभवादिति "गौणी"तिसूत्रार्थ इति । तन्न । ममरीत्यावियदधिकरणस्थेन

प्र० एतेन प्राणाउत्पद्यंतइत्याद्यसूत्रप्रतिज्ञार्थोदूषितः । अधिकाशंकायोगोक्त्या तथेत्यतिदेशांशोपिनिरस्तः । "गौण्यसंभवा"दितिद्वितीयार्थंच निराह ॥ यच्चेति ॥ अन्यैरित्यन्वेति । गौण्याअसंभवोगौण्यसंभवस्तस्मादितिविग्रहेतत्तात्पर्यार्थमाह ॥ गौणत्वेति ॥ एकविज्ञानेनस

प्र० र्वविज्ञानप्रतिज्ञाविरोधादिप्रसंगादितिभावः ॥ गौणीतिसूत्रेणेवेति ॥ एतेन त्वन्मतेतुश्रुत्यादिविरोधेनाकाशोत्पत्त्यसंभवात्तदुत्पत्तिश्रुति गौणीतिवियदधिकरणेव्याख्यातं । इहतुबहिरेवसाध्यमध्याहृत्यकेवलहेतुमात्रपरतयाव्याख्यातमितिवैरूप्यमितिसूचितं ॥ अवश्येति ॥ अन्यथाप्राणोत्पत्तेरसिद्धेरितिभावः ॥ अश्रुतेति ॥ अश्रुतायाषष्ठी समस्तस्यसमासंप्राप्तस्यगौण्यसंभवादितिवाक्यस्ययोऽवयवोगौणीति

"गौणी"तिसूत्रेणेवात्रत्येनापितेनावश्यवक्तव्यस्यानादित्वश्रुतिगौणीत्यस्यार्थस्यप्रतिज्ञाध्याहारादिकंविनैवोक्ति संभवे उत्पत्तिश्रुतेगौणत्वस्यासंभवादित्यस्यार्थस्यनामुख्यार्थेतिप्रतिज्ञाध्याहारेणाश्रुतसमस्तावयवषष्ठीकल्पनादि नाचोक्त्ययोगात् । प्रतिज्ञानुपरोधादितिसूत्रंतुपरमतेनास्त्येव । यच्चोक्तं "एतस्मा"दितिवाक्यआकाशादि भ्यःप्राचीनेषुप्राणादिषुश्रुतं "जायत"इत्येकमेवपदमुत्तरस्मिन्नाकाशादावप्यनुवर्तते । आकाशादेश्चमुख्यमे वजन्मेतिप्राणानामपितथा । सकृत्प्रयुक्तस्य "जायत"इतिपदस्यवृत्तिद्वयायोगादिततदितिसूत्रार्थइति । तन्न । ममरीत्यासौत्रस्यतच्छब्दस्य "तथाप्राणा"इतिपूर्वसूत्रनिर्दिष्टप्राणपरतया तथा इंद्रियोत्पत्त्यनुत्पत्तिश्रुतिविरो धनिरासानंतरमधिकाशंकयोत्थितस्यैंद्रियविशेषमनोनित्यत्वानित्यत्वश्रुतिविरोधस्यावश्यनिरसनीयस्यनिरासेन चाधिकरणांतरत्वसंभवेतच्छब्दस्यपूर्वसूत्रानिर्दिष्टाकाशादिपरतयामुख्याबाधेनैवागौणत्वसिद्धेरवश्यावक्तव्यस्य

प्र० पदरूपस्तत्संबंधिनी तस्याःकल्पनादिनेत्यर्थः । आदिपदेनत्वप्रत्ययकल्पनंग्राह्यं । "तत्प्राक्श्रुतेश्चे"त्येतदर्थमनूद्यनिराह ॥ यच्चेति ॥ सौत्रत च्छब्दार्थमाह ॥ आकाशादिभ्यइति ॥ प्राक्शब्दार्थः प्राचीनेष्विति । श्रुतेश्च जायतइतिशब्दस्येतिशेषंमत्वार्थमाह ॥ श्रुतमित्यादि ॥ ॥ ९८९ ॥

प्र० अत्रापिसूत्रउत्पत्तिश्रुतिरमुख्यार्थेत्यन्वयः । अवश्यावक्तव्यत्वेहेतुर्मुख्याबाधेनैवागौणत्वसिद्धेरिति ॥ पूर्वेति ॥ पूर्वाधिक रणशेषत्वायोगादित्यर्थः ॥ श्रुत्यंतरइति ॥ "एतस्मादात्मनस्सर्वेप्राणास्सर्वाणिभूतानिव्युच्चरंती"तिश्रुत्यंतरइत्यर्थः ॥ अंगीकारेणेति ॥ परभाष्येपिहि "यत्रापिचपश्चाच्छ्रुतउत्पत्तिवचनःशब्दःपूर्वैस्संबध्यतेतत्राप्येषएवन्यायः । यथासर्वाणिभूतानिव्युच्चरंतीत्ययमंतेपठितोव्युच्चरं तिशब्द"इत्युक्तेः "तत्प्राक्श्रुते"रित्युक्त्या "एतस्माज्जायत"इत्यस्यैवग्रहणापत्त्याव्युच्चरंतीत्यस्यापिसंग्रहार्थंतत्पश्चाच्छ्रुतेरित्युक्तौतच्छब्दस्यपूर्व

गौणत्वेबाधकस्योक्त्याचपूर्वशेषत्वायोगात् । सर्वाणिभूतानिव्युच्चरंतीतिश्रुत्यंतरेश्रुतस्यव्युच्च रंतिशब्दस्यपूर्वैःप्राणादिभिरपिसंबंधांगीकारेणतत्संग्रहार्थंतत्सहश्रुतेश्चेत्येवसूत्रणीयत्वेन "त त्प्राक्श्रुतेश्चे"तिसूत्रणायोगाच्च । ममतेतुप्राक्शब्देनैवमनसोलाभात्सूत्रेमनःपदाभावः । तथाधिकरणांतरत्वेपिभाष्योक्तरीत्यानुक्तसमुच्चयार्थश्चशब्दश्चयुक्तस्स्यात् । यच्चोक्तं "यत्रापि छांदोग्येप्राणानामुत्पत्तिरनुक्तेतिब्रूषेतत्राप्युक्तेतिब्रूमहे । यतोस्मिन्नेवप्रकरणे अन्नमयंहि

प्र०सूत्रप्रकृतप्राणपरत्वसंभवेपि "एतस्माज्जायत"इतिप्राक्श्रुतजन्मवाचिपदोपेतश्रुत्यसंग्रहापत्तेरुभयसंग्रहायसौत्रतच्छब्दस्यपूर्वसूत्रप्रकृतप्राण परत्वायचतत्सहेत्येवसूत्रणीयं । तैःप्राणैःसहभूतानांजन्मश्रुतेरितिवा तैर्भूतैस्सहप्राणानांजन्मश्रुतेरितिवाव्याख्यानसंभवादित्यर्थः । सिद्धांते पितत्प्राङ्मनश्रुतेरितिनिर्देशःस्यादित्यतआह ॥ ममतेत्विति ॥ चकारःपूर्वशेषतासूचकइत्यतआह ॥ तथेति ॥ "सर्वधर्मोपपत्तेश्चे" त्यादाविवेतिभावः । तत्पूर्वकत्वाद्वाचइतिसूत्रार्थमनूद्यनिराह ॥ छांदोग्यइति ॥ वाचइत्यस्यार्थो वागादीनामिति । तत्पूर्वकत्वादित्य

प्र० स्यार्थस्तेजआदीति । तेजआदिविकारत्वादित्यर्थः । आश्रित्येत्यस्य निरासेनाधिकरणांतरत्वसंभवइत्यन्वयः । वाङ्नित्यत्वादिश्रुतिविरोधो संगतइत्यतउक्तं **साधारणेति** । ज्ञानेंद्रियकर्मेंद्रियसाधारणेंद्रियमात्रस्यजन्माजन्मश्रुत्योर्विरोधस्य "तथाप्राणा"इत्याद्यनये ज्ञानेंद्रियेषुप्रधानस्यमनसोविशेषशंकयाप्राप्तस्यजन्माजन्मश्रुतिविरोधस्य "तत्प्राक्श्रुतेश्चे"त्यत्रपरिहारेपीत्यर्थः । साधारणानांज्ञानेंद्रियमनसश्चेतिविग्रहः । असाधारणज्ञानेंद्रियमनइत्यपिक्वचित्पाठः ॥ **कर्मेंद्रियवागिति** ॥ कर्मेंद्रियरूपवागिंद्रियेत्यर्थः । कर्मेंद्रियमध्येवाचःप्रधानत्वादितिभावः ।

सोम्यमनआपोमयःप्राणस्तेजोमयीवागितिवागादीनांतेजआदिपूर्वकत्वा"दिति "तत्पूर्वकत्वा"दितिसूत्रार्थइति तन्न । ममरीत्यासूत्रस्थतच्छब्दस्यपूर्वसूत्रप्रकृतमनःपरत्वं, वाक्शब्दस्यकेवलवाक्परत्वंचाश्रित्यसाधारणज्ञानेंद्रियमनोनित्यत्वानित्यत्वश्रुतिविरोधपरिहारेभ्यधिकाशंकयोत्थितस्यासाधारणकर्मेंद्रियवाङ्नित्यत्वानित्यत्वश्रुतिविरोधस्यावश्यनिरसनीयस्यनिरासेनाधिकरणांतरत्वसंभवेतच्छब्दस्यपूर्वप्रकृततेजोबन्नपरत्वंवाक्शब्दस्यवाक्प्राणमनोलक्षकत्वंचाश्रित्यावश्यावक्तव्यस्याहंकारिकाणांमनआदीनांप्रत्यहमन्नादिभिराप्यायनस्योक्त्यापूर्वशेषत्वायोगात् ।

प्र० "तथाप्राणा"इत्यादिनैवसिद्धमित्यतउक्तम**भ्यधिकाशंकयेति** ॥ भाष्याद्युक्तयेत्यर्थः । असाधारणज्ञानेंद्रियमनश्चितानंतरमसाधारणकर्मेंद्रियवाग्विचारोऽधिकाशंकयाऽवसरप्राप्तइतिभावः । "अन्नमयंहिसोम्यमन"इत्यादावन्नाद्यवयवैरुपचयएवमनःप्रभृतेरुच्यते नतुभूतविकारत्वमित्यत्रहेतु**राहंकारिकाणामिति** । "तैजसात्तुविकुर्वाणादिंद्रियाणिदशाभव"न्नित्यादेरितिभावः । ननुमयटोविकारएवार्थःकिंनस्यादितिचेत् आहंकारिकाणांभूतविकारित्वायोगात् । किंच "आपोमयःप्राण"इत्यस्यानुपपत्तिरेव । तस्यवायुविकारत्वात् । नचाब्द्वारातद्वि

प्र० कारत्वंप्राणस्यशंकार्हंभवतीत्याह ॥ **नहीति** ॥ येनविकारार्थत्वंमयट आश्रीयेतेतिभावः ॥ **केचित्त्विति** ॥ तन्मतेपि "तत्पूर्वकत्वाद्वाच" इत्यंतानि "तथे"त्यादिसूत्राण्येकमधिकरणं । "गौण्यसंभवात्तत्प्राक्श्रुतेश्चे"त्येकंसूत्रं । "प्रतिज्ञे"तिसूत्रंतन्मतेपिनास्त्येव । तत्रपूर्व "नवियदि त्यासंभवस्त्वि" त्यंतसूत्रात्मकाधिकरणेन, "तेजोतइत्यादिचराचरे" त्यंतसूत्रात्मकाधिकरणेनचवियदादेस्सर्वस्यकार्यत्वेनोत्पत्तावुक्तायां जीवस्य कार्यत्वेपिस्वरूपान्यथाभावलक्षणोत्पत्तौ "नात्माश्रुते"रित्यधिकरणेनापोदितायां तत्प्रसंगेन "ज्ञोतएवे"त्यारभ्यापादसमाप्तिजीवस्वरूपंविचा

नहिवायुविकारस्यप्राणस्याग्निद्वारावायुकार्याच्चाप्कार्यत्वंयुक्तं । केचित्तु यथाजीवोऽनादिस्तथाप्राणाअप्यनादयः । "प्राणावावऋषय"इतिश्रुतेरिति "तथे"तिसूत्रेणपूर्वपक्षय्य तत्रप्राणशब्दोब्रह्मपरः । बहुवचनश्रुतिस्तुगौणी । ब्रह्मणिबहुत्वासंभवादिति "गौणी"त्यादिसूत्रैःसिद्धांतितमित्याहुः । तन्न । जीवानुत्पत्तेर्वियदाद्युत्पत्तेश्चबहुव्यवधा नेसमानेपिजडेषुप्राणेष्वभ्यर्हितस्योत्पत्तिमत्त्वेनवियदादिजडसाम्यस्योक्त्यासिद्धांतत्वसंभवे उत्तरत्रसिद्धांतद्योतक

प्र० यंतदुपकरणानामिंद्रियाणामत्रचिंता । तत्रसूत्रार्थाननूद्यनिराह ॥ **यथेति** ॥ **बहुवचनेति** ॥ "प्राणावा"इतिबहुवचनरूपाश्रुतिरित्यर्थः । इत्यादिसूत्रैरितिबहुवचनंसिद्धाभिप्रायं । नचब्रह्मणिबहुत्वासंभवेप्यन्यएवप्राणाइतिबहुवचनोपपत्तिरितियुक्तं । तत्प्राक्श्रुतेश्च । चोवधा रणे तदित्यनेनान्वेति । तस्यैवपरमात्मनःसृष्टेःप्रागवस्थानश्रुतेर्बह्वर्थासंभवाद्ब्रह्मैवप्राणानत्वन्ये । किंच तत्पूर्वकत्वाद्वाचः । ब्रह्मान्यनाम धेयस्यवियदादिसृष्ट्यनंतरकालीनत्वाच्चप्राणाइतिब्रह्मैवोच्यते । नेंद्रियाणि । तदेंद्रियकार्याभावादितिसिद्धांतितमित्याहुरित्यर्थः । "वियदा

प्र० दिजडे"तितन्मतरीत्यावा सिद्धांतेजडपरत्वस्याप्यनुमतत्वाज्जडेत्युक्तिः ॥ **तुशब्दादेरिति** ॥ "अपिवाकर्तृसामान्यात् । विज्ञानादिभा वेवातदप्रतिषेध"इत्यादाविववाशब्दस्यवाऽभावइत्यादिपदार्थः । एतेन "तुशब्दार्थेनचशब्देनसिद्धांतद्योतनमित्युक्तंदीप"इतिश्रुतप्रकाशोक्तं निरस्तं । सूत्रैक्यस्यासांप्रदायिकत्वेनतस्यतृतीयसूत्रस्थत्वात् । तद्भाष्येऽवधारणार्थत्वोक्तेश्चेतिभावः । "प्रासंगिकाधिकरणांतरव्यवधिस्तुन

तुशब्दादेरभावेच "तथे"तिसूत्रस्यपूर्वपक्षत्वायोगात् । ननुजीवानुत्पत्त्यनंतरस्यजीवाणुत्वादेःप्रासंगिकत्वादव्य वधायकत्वमितिचेन्न । जन्मादिसूत्रनिर्वाहकवियदाद्युत्पत्त्यनंतरस्यतदनिर्वाहकस्यजीवानुत्पत्त्यादेरपिप्रासंगिक त्वात् । प्राणावावऋषयइतिवाक्येबहुत्वस्यगौणत्वेपिप्राणाएवानादयइतिप्राणानादित्वश्रुतेर्गौणत्वंविनोत्पत्त्यसि द्ध्या "गौणी"तिसूत्रेनादित्वश्रुतिर्गौणीत्येववक्तव्यत्वाच्च । यच्चोक्तं तस्यैवब्रह्मणस्सृष्टेःप्राक्श्रुतेर्ब्रह्मैवप्राणशब्दा र्थइति "तत्प्रा"गितिसूत्रार्थइति तन्न । सौत्रस्यतच्छब्दस्यपूर्वसूत्रनिर्दिष्टावश्यवक्तव्यप्राक्त्वावधिभूतेंद्रियपर त्वसंभवेतदप्रकृतावश्यावक्तव्यप्राक्त्वानवधिरूपब्रह्मपरत्वायोगात् । सृष्टेःप्राक्कालकर्मजीवप्रकृत्यादिवत्पूर्वपक्षे

प्र० दोष"इतिश्रुतप्रकाशोक्तमाशंकते ॥ **नन्विति** ॥ जीवाणुत्वादेरित्युक्तिरुभयसंमतत्वात् । तन्मतरीत्याजीवज्ञातृत्वादेरितिज्ञेयं । ज्ञोतइत्या दौज्ञातृत्वादेश्चिंतनात् ॥ **जीवानुत्पत्त्यादेरपीति** ॥ तथाचयथा "ज्ञोत"इत्यादिकंप्रासंगिकमितिकृत्वात्रतथाशब्दस्य "नात्माश्रुते"रित्य त्रोक्तजीवसाम्यपरामर्शाव्यवधायकं तथा "नात्मे"त्येतदपिततःपूर्वोक्तवियदादिसाम्यपरामर्शाव्यवधायकमितितत्साम्योक्त्यासिद्धांतसूत्रत्व

प्र० मेवस्यादितिभावः । गौण्यसंभवादित्येतदर्थंनिराह ॥ **प्राणावाइति** ॥ इत्येवेत्येवकारेणसमन्वयाध्यायएवसर्वशब्दानांसमन्वयसिद्धेरिह प्राणपदसमन्वयोक्तेरसंगतत्वात्तदपवादकलिंगादेरिह "प्राणावाऋषय"इतिवाक्येऽभावात्प्रत्युतप्रलयवृत्तित्वरूपब्रह्मलिंगश्रवणान्मुख्यासंभवे नबहुवचनगौणतायान्याय्यत्वात्त्वदुक्तार्थकत्वमस्यसूत्रस्येतिसूचितं । तत्प्राक्श्रुतेश्चेत्येतदर्थमनूद्यनिराह ॥ **यच्चोक्तमिति** ॥ **प्राणाना मपीति** ॥ "प्राणाएवानादयः नित्यान्येतानिसौक्ष्म्येणे"त्यादिभाष्योक्तश्रुत्यादिबलेनसूक्ष्मरूपेणसत्त्वसंभवेनेत्यर्थः । साध्योक्तिपूर्वसूत्रार्थ

प्राणानामपिसत्त्वसंभवेनब्रह्मणएवेत्यवधारणायोगाच्च । यच्चोक्तं "अतश्चप्राणशब्दोब्रह्मपरः । वाचोब्रह्मान्यविषयस्यनामधेयस्यवाग्विषयभूतवियदादिसृष्टिपूर्वकत्वा"दिति "तत्पूर्वकत्वा"दि तिसूत्रार्थइति । तन्न । सौत्रस्यतच्छब्दस्यपूर्वसूत्रप्रकृतमनःपरत्वसंभवे तदप्रकृतवियदादि परत्वस्य, वाक्शब्देसंकुचितार्थत्वस्यचायोगात् । प्राणावाअनादयइतिपूर्वश्रुताऽनादिशब्दस्या नादिविषयनामधेयस्यवासृष्टिपूर्वकत्वोपपत्तेश्च ॥ ७ ॥ तत्पूर्वकत्वाधिकरणं ॥ ३ ॥

प्र० मनुवददति ॥ **अतश्चेति** ॥ वक्ष्यमाणादपिहेतोरित्यर्थः । प्राङ्नामधेयात्पूर्वंस्वविषयभूतंयद्वियदादितत्सृष्टिपूर्वकत्वादित्यर्थः । विषयेसत्येव नामधेयस्यतत्रप्रवृत्तेरित्यर्थः ॥ **संकुचितेति** ॥ ब्रह्मान्येतिसंकुचितार्थस्येत्यर्थः ॥ **सृष्टिपूर्वकत्वेति** ॥ सृष्ट्यपेक्षयापूर्वकालीनत्वोपपत्तेरि त्यर्थः ॥ ७ ॥ **तत्पूर्वकत्वाधिकरणं** ॥ ३ ॥

प्र० ॥ ॐसप्तगतेःॐ ॥ उत्पत्तिरिति ॥ श्रुतौ "सप्तप्राणाःप्रभवंती"तिप्रभवशब्दश्रवणात्प्राणास्सप्तजायंतेऽथद्वादशेतिचिंत्यतइत्यर्थः । पूर्वो त्तरपक्षटीकासूचिताश्चिताआह ॥ अत्रेति ॥ स्पष्टश्चितायंथःफलफलिभावश्च । टीकाक्षरार्थमाह ॥ सोमस्येति ॥ पात्रविशेषाः उलूख लाकाराः । "अग्निर्देवतेत्युपांशुपात्रमासादयति । सोमोदेवतेत्युत्तरमंतर्यामस्य । तंपरेणप्रत्यंचिद्विदैवत्यपात्राणि । इंद्रोदेवतेत्यैंद्रवायवस्य ।

॥ ॐसप्तगतेर्विशेषितत्वाच्चॐ ॥ प्राणानांधर्मितामाश्रित्योत्पत्तिश्चिंतिता । अथसंख्यारूपधर्माश्रयस्तद्विशेषश्चिंत्यतइतिसं गतिः । अत्रब्रह्मणःश्रुतिसमन्वयेनोक्तंगुणपूर्त्यादिकमयुक्तंनवेतिचिंता । तदर्थंश्रुतिरप्रमाणमुतप्रमाणमिति । तदर्थंप्राणे षुसप्तत्वद्वादशत्वश्रुतीपरस्परविरुद्धेउतनेति । तदर्थंप्राणानांद्वादशत्वेपिसप्तत्वश्रुतिर्नघटतउतघटतइति । तदर्थंद्वादशत्वस प्तत्वसंख्यावच्छेदकंनास्त्युतास्तीति । सोमस्यग्रहाः सोमरसग्रहणार्थाःपात्रविशेषाः । ज्योतिष्टोमेहिउपांश्वंतर्यामैंद्रवायवमैत्रा वरुणाश्विनाःपंच शुक्रामंथिनौद्वौ ऋतुपात्रेद्वे अतिग्राह्यास्त्रयइतिसोमग्रहाद्वादश । यद्यप्यंश्वदाभ्यावपिग्रहौतत्रस्तः । तथा पितयोरनित्यत्वात्सादनोपस्थापनाद्यभावाच्चनित्यसादनादियुक्तग्रहविवक्षयाद्वादशत्वमितिद्रष्टव्यं । अत्र "श्रुत्योरेवपरस्पर

प्र० बृहस्पतिर्देवतेतिमैत्रावरुणस्य । अश्विनौदेवतेत्याश्विनस्य । तान्यपरेणशुक्रामंथिनोःपात्रे । तेअपरेणऋतुपात्रे । स्थाल्यावंतरेणत्रीण्युदंच तिग्राह्यपात्राणि । आग्नेयमैंद्रंसौर्य"मितिपात्राणामासादनक्रमोक्त्यनुरोधेनाह ॥ उपांश्वंतर्यामेति ॥ शुक्रश्चमंथीचशुक्रामंथिनौ । "देव ताद्वंद्वेचे"तिस्मरणात् । तयोर्द्वौपात्रविशेषावित्यर्थः । अंश्वदाभ्यौ । अंशुनामकादाभ्यनामकावित्यर्थः ॥ अनित्यत्वादिति ॥ "काम्या

प्र० वितरा"वित्युक्तेरितिभावः॥ विशेषितत्वाच्चेति॥ शीर्षण्याइत्यनेन "येशीर्षण्याश्शिरस्स्थितास्सप्ततेप्राणा"इतिशीर्षण्यत्वेनप्राणत्वोक्त्याहस्ता विरोध"इतिन्यायविवरणउभयाप्रामाण्येनपूर्वपक्षितत्वाट्टीकायामपि "सप्तैवप्राणा"इत्यादिना "अथवाद्वादशप्राणा"इत्यादिनाचसप्तत्वद्वादशत्वश्रुत्योःसमबलत्वोक्त्यापरस्परव्याघातइत्येकएवपूर्वपक्षोदर्शितः । तदनुसारेणसंदेहटीकापिकिंसप्तोतद्वादशेत्यनिर्णय उतद्वादशेतिनिर्णयइत्यध्याहारेणयोज्या ॥ एकदैवत्या[१२८।१६]भिप्रायेणेति ॥ समसंख्यदेवताकत्वाभिप्रायेणेत्यर्थः । द्वादशमासादीनांहिद्वादशादित्यादयोदेवताः । ननुनिवृत्तकर्मणःसंसारस्थित्यहेतुत्वात् अब्रह्मज्ञानस्यचतस्मादुद्गत्यहेतुत्वात्तयोःकथंस्थितगतिशब्दावतआह ॥ संजाता[१२८।१९]यत्वेनान्यत्रापीति ॥ यथा "यत्प्रपदाभ्यांप्रापद्यतब्रह्मेमंपुरुषंतस्मात्प्रपदे"इतिश्रुत्युक्तस्यप्रपदशब्दनिमित्तस्यचतुर्मुखपादतलोपरिभागगतत्वेपितज्जातीयपुरुषांतरसंबंधिन्यपितस्मिन्प्रपदशब्दस्तथेहप्रवृत्तकर्मणःसंसारस्थितिहेतुत्वाद्ब्रह्मज्ञानस्यचतस्मादुद्गतिहेतुत्वात्सजातीययोःकर्मांतरज्ञानांतरयोरपिस्थितगतिशब्दावित्यर्थः । अन्येतु प्राणाःसप्तैव । "सप्तप्राणा"इत्यादिश्रुतिषुसप्तत्वावगतेः । "सप्तवैशीर्षण्याःप्राणा"इतिविशेषितत्वाच्चेति "सप्ते"तिसूत्रेणपूर्वपक्षयित्वा "दशेमेपुरुषेप्राणाआत्मैकादश"इतिश्रुतेरेकादशेति "हस्ते"तिसूत्रेणसिद्धांतितं । अक्षरार्थस्तुहस्तादयोपिप्राणाःसंति । अतोस्मिन्प्राणानामेकादशत्वेस्थितेसत्येवंसप्तत्वंनेतीत्याहुः । तन्न । ममरीत्या प्राणानांसप्तभ्योधिकसंख्यत्वे "सप्तप्राणा"इतिश्रुतिरयुक्ता । महासंख्यायामवच्छेदकविशेषंविनाल्पसंख्याव्यवहारायोगादितिशंकिते घ्राणरसनचक्षुस्त्वक्श्रोत्रमनोबुद्धिषुज्ञानेंद्रियत्वरूपोविशेषो "गुहाशया"मितिवाक्यसूचितोस्तीत्यवश्यवक्तव्यपरिहारोक्त्या "सप्ते"

प्र० दीनामप्राणत्वावगमादितिभावः । अतइत्यस्यप्रतिपदमस्मिन्निति । तस्यार्थः प्राणानामिति ॥ श्रौतावगतीति ॥ श्रुतिसिद्धसप्तत्वावगतिवाचिनेत्यर्थः । श्रौतावगतेरित्यस्याप्येवमर्थः । विशेषितत्वहेतोस्सप्तत्वासाधकत्वंचाह ॥ किंचेति ॥ द्वाववांचाविति ॥ अवांचौतिसूत्रस्यसिद्धांतत्वसंभवेपरिहारोक्तिसूचितपूर्वपक्षपरत्वायोगात् । श्रौतावगतिवाचिनासौत्रेणगतिशब्देनैव "सप्तप्राणा" इत्यस्याइव "सप्तवैशीर्षण्याःप्राणा" इत्यस्याअपिश्रौतावगतेर्वक्तुंशक्यत्वेन "विशेषितत्वाच्चे" त्यस्यवैयर्थ्याच्च । किंच "सप्तवैशीर्षण्याःप्राणाद्वाववांचा" वितिसमाख्याश्रुतौप्राणानांनवत्वोक्त्यानतयासप्तत्वसिद्धिः । किंच सिद्धांतेब्रह्ममुख्यप्राणादेरपिप्राणशब्दार्थत्वेनतत्रैकादशत्वनियमायोगादिंद्रियेष्वेवसवाच्यइतिपूर्वपक्षेपितेष्वेवसप्तत्वनियमोवाच्यः । नचद्वेश्रोत्रेद्वेनासिकेद्वेचक्षुषीएकावागितिश्रोत्रादिचतुरिंद्रियाधिष्ठानगोलकानांसप्तत्वइंद्रियेषुतत्सिद्ध्यति । हस्तेतिसूत्रेपिहस्तादयोप्यतोनैवमित्येतावतैवपूर्णत्वात् "स्थितेत" इतिशब्दोव्यर्थः । किंच हस्तादयःपंचपूर्वपक्ष्युक्तसप्तांतर्गताएवचेन्नपूर्वपक्षनिरासः । अतिरिक्ताश्चेद्द्वादशत्वेनैवसिद्धांतोवाच्योनत्वेकादशत्वेन । नच वाक्, षड्ज्ञानेंद्रियाणिचेतिसप्त "सप्ते" तिसूत्रेविवक्षितानि । हस्तेतिसूत्रेतुचत्वारिवागन्यकर्मेंद्रियाणि । तथाचैकादशत्वमितिवाच्यं । मममतेसप्तसुज्ञानेंद्रियत्ववत्, हस्तादिषुकर्मेंद्रियत्ववच्च त्वन्मतएकस्यावच्छेदकस्याभावेनादिसूत्रेसप्तशब्दस्य, द्वितीयआदिशब्दस्यचायोगात् । गीयतेचप्राणानांद्वादशत्वं

प्र० पायूपस्थौद्वौप्राणावित्यर्थः। तेषु इंद्रियेष्वित्यर्थः। सतुसप्तत्वनियमस्तेष्वयुक्तइतिभावः। भामत्युक्तसप्तत्वप्रकारमनूद्यनिराह ॥ नचेति॥ व्यर्थइति ॥ अनुवादेप्रयोजनाभावादितिभावः । एकादशत्वेनसिद्धांतःश्रुतिविरुद्धश्चेत्याह ॥ गीयतेचेति ॥ इंद्रियेभ्यइत्युक्तदशेंद्रिये

प्र० भ्योऽन्ययोर्मनोबुद्ध्योरप्याम्नानादितिभावः । यद्वामन्मतंसप्तत्वद्वादशत्वरूपविवक्षाद्वयमपिश्रुत्यादिप्रसिद्धमितिभावेनसप्तत्वेद्वादशत्वेचकाठकादिवाक्यान्युदाहरति ॥ इंद्रियेभ्यइत्यादिना ॥ द्वादशत्वमिति सप्तत्वंचेत्यपिध्येयं । इंद्रियेभ्यः चक्षुरादिपंचेंद्रियेभ्यइत्यर्थः । इंद्रियाणि चक्षुरादीनिपंचेत्यर्थः । इंद्रियाणीतिवाक्यांतरं । अस्यबुद्धिंत्वित्यर्धादुत्तरपादत्वेप्यर्थबोधसौकर्यायपूर्वमुक्तिः । श्रुत्यंतरं यदेति । ज्ञानानि ज्ञानसाधनानि । द्वादशवाइतिभाष्योक्तश्रुतिः । द्वादशैवेंद्रियाणीतितु "तइंद्रियाणी" त्यत्रभाष्योक्ता । विज्ञानेतिस्मृतिः "अंतरे"

"इंद्रियेभ्यःपराह्यर्थाअर्थेभ्यश्चपरंमनः । मनसस्तुपराबुद्धिः । इंद्रियाणिहयानाहुः । बुद्धिंतुसारथिंविद्धिमनःप्रग्रहमेवच । यदापंचावातिष्ठंतेज्ञानानिमनसासह । बुद्धिश्चनविचेष्टते । द्वादशवाएतेप्राणाः । द्वादशैवेंद्रियाण्याहुर्मनोबुद्धीतुद्वादशे" इत्यादिश्रुतिषु "विज्ञानतत्वाच्चमनोमनस्तत्वाच्चखादिकं । सप्तप्राणास्त्ववगतेःपंचप्राणाश्चकर्मणः । श्रोत्रादीनितु पंचैवतथावागादिपंचकं । मनोबुद्धिसहायानिद्वादशैवेंद्रियाणित्वि" त्यादिस्मृतिषुच ।

प्र० त्यत्रभाष्योक्ता । खादिकं इंद्रियादिकमित्यर्थः । सप्तेतिस्मृतिरत्रैवभाष्योक्ता । श्रोत्रादीनित्वितितु "तइंद्रियाणी" त्यत्रभाष्योक्ता । स्मृतिष्वित्यस्यगीयतेचेतिपूर्वेणान्वयः । यद्वा परभाष्यादौयत्सप्तत्वप्रत्याख्यानेनैकादशत्वोक्त्यासिद्धांतकरणं तदुभयमप्ययुक्तं । सप्तेंद्रियपक्षस्यद्वादशेंद्रियपक्षस्यचश्रुत्यादावभिधानादितिभावेन "गीयतेचे" त्यादिनाश्रुत्याद्युक्तिरुभयत्रेतिबोध्यं । ननुद्वादशत्वादिपक्षइवैकादशत्वपक्षोपि

प्र० प्रमितइत्यतआह ॥ यद्यपीति ॥ आत्मा बुद्धिर्मनोवा । परमतेत्वात्मैव ॥ अभेदेति ॥ नत्वेकस्याप्राणत्वबुद्ध्येतिभावः ॥ पंचेति ॥ यद्यपिसूत्रेपंचेतिनास्ति । तथापि "स्थितेकर्मविषये हस्तादयः"इत्युक्त्याकर्महेतुत्वस्यपंचस्वप्यविशेषात्, पूर्वत्र गतेर्ज्ञानस्येत्युक्त्वापश्चात् "हस्तादय"इत्युक्त्यातदन्यपंचानामपिलाभात्, आदिपदसंकोचकाभावात्, "पंचप्राणाश्चकर्मण"इतिस्मृतेश्चपंचेत्युक्तं । "इयमपरासूत्रद्व

यद्यपि "दशेमेपुरुषेप्राणाआत्मैकादश"इत्यादिश्रुतिषु "इंद्रियाणिदशैकंचे"त्यादिस्मृतिषुचै कादशत्वंचबुद्धिमनसोरभेदाश्रयणेनैवोच्यते । तथापीहसूत्रेज्ञानेंद्रियाणिसप्तोक्त्वापुनःपं चकर्मेंद्रियोक्तेर्भेदेनद्वादशत्वंविवक्षितं । एतेन यत्परैःसूत्रयोर्योजनांतरमुक्तं प्राणानामे कादशत्वेपिसप्तैवोत्क्रामंति । "सर्वेप्राणाअनूत्क्रामंती"त्यत्रसप्तानामेवगत्युक्तेः । तत्र सर्वशब्दश्रवणेपि "नपश्यतीत्याहु"रित्यादौ "नस्पृशती"त्यंतेपूर्ववाक्येचक्षुर्घ्राणरसनवा क्श्रोत्रमनस्स्पर्शनानामेवविशेषितत्वादिति "सप्ते"तिसूत्रेणपूर्वपक्षिते "दशेम"इतिवाक्ये

प्र० ययोजने"त्यादिपरभाष्योक्तमनूद्यनिराह ॥ एतेनेति ॥ ममरीत्येत्याद्युक्तदोषेणेत्यर्थः । सूत्रार्थमनुवदति ॥ सप्तैवोत्क्रामंतीति ॥ "सप्तगते"रितिहेत्वर्थमाह ॥ सर्वइति ॥ "तमुत्क्रामंतंप्राणोनूत्क्रामति प्राणमनूत्क्रामंतंसर्वेप्राणाअनूत्क्रामंती"तिश्रुतावित्यर्थः । विशे षितत्वादित्यस्यार्थमाह ॥ तत्रसर्वेति ॥ नपश्यतीति ॥ "यत्रैषचाक्षुषःपुरुषःपराङ्पर्यावर्तते । अथारूपज्ञोभवतिनपश्यतीत्याहुर्नजिघ्र ॥ ९९४ ॥

प्र० तिनरसयती"त्यादावित्यर्थः ॥ **तेयदेति** ॥ "दशेमेपुरुषेप्राणाआत्मैकादशस्तेयदास्माच्छरीरान्मर्त्यादुत्क्रामंती"तिश्रवणादित्यर्थः । दोषांतरंचाह ॥ **पूर्ववाक्येनेति** ॥ **अन्यपरेणेति** ॥ सुप्ताविंद्रियाणांनिर्व्यापाराद्युक्तिपरेणेत्यर्थः ॥ **एतेनेति** ॥ सिद्धांतसूत्रत्वसंभवइत्यादिदोषेण, द्वादशपरत्वसमर्थनादिनाचेत्यर्थः ॥ ६ ॥ **सप्तगत्यधिकरणं** ॥ ४ ॥

तेयदास्माच्छरीरान्मर्त्यादुत्क्रामंती"तिश्रवणादेकादशाप्युत्क्रामंतीतिहस्तेतिसूत्रेणसिद्धांतितमिति तदपिनिरस्तं । उक्तरीत्या "सप्ते"तिसूत्रस्याध्याहारंविनैवसिद्धांतत्वसंभवउत्क्रामंतीत्यध्याहारायोगात् । पूर्ववाक्येनान्यपरेणपूर्वपक्षायोगाच्च । एतेनयत्कैश्चिदुक्तं सप्तैवप्राणाः । "येषुचरंतिप्राणागुहाशयांनिहिताःसप्तसप्ते"तिश्रुतौसप्तानामेवगत्युक्तेरित्याद्यसूत्रेणपूर्वपक्षिते हस्तेतिसिद्धांतितमिति तन्निरस्तं । उत्तरसूत्रेस्थितपदवैयर्थ्यात् ॥ ६ ॥ **सप्तगत्यधिकरणं** ॥ ४ ॥

॥ ॐअणवश्चॐ ॥ पूर्वत्रप्राणानांसंख्याविचारिता । तदनंतरंपरिमाणंविचार्यतइतिसंगतिः । अत्रब्रह्मणःश्रुतिसमन्वयेनोक्तंगुणपूर्त्यादिकिंनयुक्तमुतयुक्तमितिचिंता । तदर्थंकिंप्राणाणुत्वश्रुतिरप्रमाणमुतनेति । तदर्थंकिंप्राणाणुत्वश्रुतिःप्रबलव्याप्तिश्रुतिबाधितोतनेति । तदर्थंकिंव्याप्तिश्रुतिःस्वरूपव्याप्तिपरोतप्रकाशव्याप्तिपरेति । भाष्योक्तांयुक्तिमाह ॥ **अतिसुदृढंहीति** [१२८।२५] ॥ **न्यायविवरणोक्तांतामाह** ॥ **किंचेति** [१२८।२५] ॥ **मानाभावादिति** [१२९।८] ॥ सएवायंशब्दइत्यादिबुद्धिबाधाच्चेत्यपिग्राह्यं ॥

प्र० ॥ ॐअणवश्चॐ ॥ पूर्वोत्तरपक्षटीकासूचितचिंताआह ॥ **अत्रेति** ॥ ननुश्रोत्रस्यचक्षुषइवगत्यादिशब्दग्रहणेकुत्रत्यःकिमीयइतिदेशविशे

प्र० षादिसंदेहोनस्यादित्यतआह ॥ **क्वचिच्छब्देति** ॥ तर्ह्यतिदूरशब्दश्रवणमपिस्यादित्यतआह ॥ **यथाहीति** ॥ अन्यत्रेत्यनुवादेनप्राणादी तिव्याख्या । पूर्वपक्षांशमात्रमनूद्यनिराह ॥ **अन्येत्विति** ॥ सिद्धांतेप्राणानामणुत्वोक्तिर्नविरुद्धा । तथासर्वेऽनंताइत्यादिश्रुत्याप्राणानंत्ये नपूर्वपक्षेतदणुत्वेनसिद्धांतयतांकेषांचिदपिपक्षोनविरुद्धइतिभावः ॥ छ ॥ **अण्वधिकरणं** ॥ ५ ॥

श्रोत्रस्यैवं[१२९।९]गमनोपपत्तेरिति ॥ क्वचिच्छब्दादौदेशसंदेहस्तुरूपादाविवदोषबलाद्युक्तः । ब्रह्मभाषितादीनामग्रहणमपिब्रह्म रूपादीनामग्रहणवद्युक्तं । यथाहिचक्षुषोगमनंकार्यानुसारेणसंकुचितंकल्प्यतेतथाश्रोत्रस्यापीतिभावः । अन्यत्र घ्राणाद्यारं भे । अन्येतु सांख्यमतइंद्रियाणामाहंकारिकत्वादहंकारस्यचजगन्मंडलव्यापित्वात्सर्वगताःप्राणाइतिपूर्वपक्षितवंतः । तन्न । श्रुत्योःपरस्परविरोधनिरासकेस्मिन्पादेसांख्यस्मृतिविरोधनिरासस्यासंगतेः । त्वन्मतेकारणस्यशुद्धस्याविद्यावच्छिन्नस्यवाब्र ह्मणोविद्यायावाऽनणुत्वेपिकार्यस्यमनसोनणुत्ववत्कारणस्याहंकारस्यव्यापित्वेपिकार्याणांप्राणानामव्यापित्वस्योपपत्त्यापूर्वप क्षानुदयाच्च ॥ छ ॥ अण्वधिकरणं ॥ ५ ॥

॥ ॐश्रेष्ठश्चॐ ॥ अत्रसंगतिंसूचयति ॥ **सर्वप्राणप्रेरकःप्राण[१२९।१६]श्रुतिसन्निधापितश्चेति** ॥ अत्रोक्तंब्रह्मणस्सर्वस्रष्टृत्वंकिंमु ख्यप्राणानादित्वश्रुतिविरुद्धमुतनेतिचिंता । तदर्थंतदुत्पत्तिश्रुतिःकिंप्रबलानुत्पत्तिश्रुतिबाधितोतनेति । तदर्थमनुत्पत्तिश्रुतिः किंसर्वात्मनानुत्पत्तिपरोतस्थौल्येनोत्पत्तावपिसौक्ष्म्येणानुत्पत्तिपरेति । ‘‘प्राणादिदमाविरासी’’दितिश्रुतिशेषेभाष्यकारवचन

प्र० ॥ ॐश्रेष्ठश्चॐ ॥ पूर्वोत्तरपक्षसूचितचिंताआह ॥ **अत्रोक्तमिति** ॥ प्रागुक्तमित्यर्थः । गतार्थतांनिराह ॥ **एतेनेति** ॥ ‘‘प्राणादिद

प्र० माविरासीदितिश्रुतिशेष’’इत्यादिवाक्यस्य ‘‘चक्षुरादिव’’दित्यत्रलेखनीयस्यात्रलेखनंलेखकदोषमूलं ॥ **यदुक्तमुभाभ्यामिति** ॥ **आनी दिति** ॥ अनप्राणनइतिधातोर्लङ् । अननंचप्राणव्यापारइति ‘‘आनी’’दित्यनेनैवप्राणस्यप्रलयेसद्भावोभिधीयतइति ‘‘तथाप्राणा’’इत्यादि विशेषाशंकेत्याहुरित्यर्थः । मतद्वयेपिश्रेष्ठोनाममुख्यप्राणशब्दितोजडवायुविशेषइतिबोध्यं ॥ **तन्नेति** ॥ स्यादेवं यदि ‘‘आनी’’दित्यनेनो

सामर्थ्येनमुख्यप्राणलिंगकल्पनान्नपरब्रह्मपरःप्राणशब्दइतिपूर्वपक्षोदयः । एव मुत्तरत्रापिद्रष्टव्यं । ‘‘एतेनमातरिश्वे’’त्यत्रबाह्येनमुख्यवायुरूपेणोत्पत्तिरुक्ता । इहतु अखिलमरणोत्पत्तिकारणेनाध्यात्मिकप्राणरूपेणाप्युत्पत्तिरुच्यतइतिभेदः । यदुक्तमुभाभ्यां ‘‘आनीदवात’’मितिश्रुतौमहाप्रलयेप्राणव्यापारभूताननश्रवणा दिहाधिकाशंकेति । तन्न । ‘‘कोह्येवान्या’’दित्यादिश्रुतौब्रह्मण्यप्यननश्रवणादिहच ‘‘अवात’’मितिनिषेधात्तेनाधिकाशंकायोगात् ॥ छ ॥ **श्रेष्ठाधिकरणं** ॥ ६ ॥

प्र० कमननंप्राणस्यैवासाधारणोव्यापारोभवेत्तदातेनप्रलयेप्राणसत्त्वमुपस्थाप्येत । नचैवमित्याह ॥ **कोहीति** ॥ साधारण्येप्यस्तिप्राणस्याप्यु पस्थापनमित्यतआह ॥ **इहचेति** ॥ अवातं वातंवायुर्नास्तीतिनिषेधात्तस्यप्राणव्यतिरिक्तवायुनिषेधकल्पकाभावान्नप्राणस्यात्रोपस्थितिरित्यर्थः ॥ छ ॥ **श्रेष्ठाधिकरणं** ॥ ६ ॥

प्र० ॥ ॐचक्षुरादिवत्तुॐ ॥ स्पष्टोग्रंथः ॥ ६ ॥ चक्षुराद्यधिकरणं ॥ ७ ॥

॥ ॐपंचवृत्तिःॐ ॥ पूर्वोत्तरपक्षटीकासूचितचिंताआह ॥ अत्रेति ॥ प्राणादीनाकर्माणीति ॥ यद्यपि "प्राणापाना"वितिस्मृतौ ॥ ॐचक्षुरादिवत्तुतत्सहशिष्ट्यादिभ्यःॐ ॥ पूर्वत्रोक्ताप्राणस्योत्पत्तिरिहपूर्वपक्षेस्वातंत्र्यादाक्षिप्यतइतिसंगतिः । अत्रोक्तंब्रह्मणःसर्वस्रष्टृत्वादिकंकिंमुख्यप्राणस्वातंत्र्यश्रुतिविरुद्धंनवेतिचिंता । तदर्थंतत्पारतंत्र्यश्रुतिः[१३०।२३]किंप्रबलस्वातंत्र्यश्रुतिबाधितोतनेति । तदर्थंस्वातंत्र्यश्रुतिःकिंमुख्येश्वराभिप्रायोतावांतरेश्वराभिप्रायेति ॥ कर्तृप्रयोज्यत्वेति ॥ सुषुप्तौजीवप्रयत्नाभावेचक्षुरादीनांव्यापारादर्शनाज्जीवप्रयोज्यत्वं । मुख्यप्राणस्यतुतदाव्यापारदर्शनात्तदप्रयोज्यत्वसितिभावः ॥ ६ ॥ चक्षुराद्यधिकरणं ॥ ७ ॥

॥ ॐपंचवृत्तिर्मनोवद्व्यपदिश्यतेॐ ॥ संगतिंसूचयति ॥ [१३।१।१]मुख्यप्राणप्रसंगसंनिधापिताइति ॥ अत्रश्रुतिसमन्वयेनोक्तंब्रह्मणःसर्वस्रष्टृत्वादिकमयुक्तंनवेतिचिंता । तदर्थंश्रुतिरप्रमाणमुतनेति । तदर्थंप्राणादेर्मुख्यप्राणस्वरूपत्वतद्दासत्वश्रुतीकिंपरस्परविरुद्धेउतनेति । तदर्थंश्रुतिद्वयमप्येकप्राणादिविषयमुतभिन्नप्राणादिविषयमिति ॥ [१३।१।३]तदाज्ञयाकर्मकारित्वादिति ॥ प्राणादीनांकर्माणि "प्राणापानाविडायांचपिंगलायांचवर्ततः । व्यानःसंधिषुसर्वत्रउदानोब्रह्मनाडिगः । सर्वत्रैवसमानस्तुस

प्र० प्राणादीनांस्थानान्येवप्रतीयंते । नतुकर्माणि । तथापितत्वप्रदीपेप्राणादीनांव्यापारानुक्त्वा "प्राणापाना"वितिवाक्यस्यपठितत्वात् "समंचरती"तिसमानव्यापारोक्त्यैवप्राणादीनांप्राणनादिव्यापारस्यशब्दनिरुक्त्यैवलाभेनप्राणादिकर्मप्रतिपादकत्वमस्येत्यभिप्रेत्यप्राणेतिवाक्योक्तिः

प्र० ॥ ॐचक्षुरादिवत्तुॐ ॥ स्पष्टोग्रंथः ॥ ७ ॥ चक्षुराद्यधिकरणं ॥ ७ ॥
॥ ॐपंचवृत्तिःॐ ॥ पूर्वोत्तरपक्षटीकासूचितचिंताआह ॥ अत्रेति ॥ प्राणादीनाकर्माणीति ॥ यद्यपि "प्राणापाना"वितिस्मृतौ
॥ ॐचक्षुरादिवत्तुतत्सहशिष्ट्यादिभ्यःॐ ॥ पूर्वत्रोक्ताप्राणस्योत्पत्तिरिहपूर्वपक्षेस्वातंत्र्यादाक्षिप्यतइतिसंगतिः । अत्रो
क्तंब्रह्मणःसर्वस्रष्टृत्वादिकंकिंमुख्यप्राणस्वातंत्र्यश्रुतिविरुद्धंनवेतिचिंता । तदर्थंतत्पारतंत्र्यश्रुतिःकिंप्रबलस्वातंत्र्यश्रुतिबा
धितोतनेति । तदर्थंस्वातंत्र्यश्रुतिःकिंमुख्येश्वराभिप्रायोतावांतरेश्वराभिप्रायेति ॥ कर्तृप्रयोज्यत्वेति ॥ सुषुप्तौजीवप्रय
त्नाभावेचक्षुरादीनांव्यापारादर्शनाज्जीवप्रयोज्यत्वं । मुख्यप्राणस्यतुतदाव्यापारदर्शनात्तदप्रयोज्यत्वसितिभावः ॥ ७ ॥
चक्षुराद्यधिकरणं ॥ ७ ॥
॥ ॐपंचवृत्तिर्मनोवद्व्यपदिश्यतेॐ ॥ संगतिंसूचयति ॥ मुख्यप्राणप्रसंगसंनिधापिताइति ॥ अत्रश्रुतिसमन्वयेनोक्तं
ब्रह्मणःसर्वस्रष्टृत्वादिकमयुक्तंनवेतिचिंता । तदर्थंश्रुतिरप्रमाणमुतनेति । तदर्थंप्राणादेर्मुख्यप्राणस्वरूपत्वतद्दासत्वश्रुतीकिं
परस्परविरुद्धेउतनेति । तदर्थंश्रुतिद्वयमप्येकप्राणादिविषयमुतभिन्नप्राणादिविषयमिति ॥ तदाज्ञयाकर्मकारित्वादिति ॥
प्राणादीनांकर्माणि "प्राणापानाविडायांचपिंगलायांचवर्ततः । व्यानःसंधिषुसर्वत्रउदानोब्रह्मनाडिगः । सर्वत्रैवसमानस्तुस
प्र० प्राणादीनांस्थानान्येवप्रतीयंते । नतुकर्माणि । तथापितत्वप्रदीपेप्राणादीनांव्यापारानुक्त्वा "प्राणापाना"वितिवाक्यस्यपठितत्वात् "समं
चरती"तिसमानव्यापारोक्त्यैवप्राणादीनांप्राणनादिव्यापारस्यशब्दनिरुक्त्यैवलाभेनप्राणादिकर्मप्रतिपादकत्वमस्येत्यभिप्रेत्यप्राणेतिवाक्योक्तिः

प्र० ॥ इतिभारतेति ॥ द्वितीयस्कंधद्वितीयाध्यायतात्पर्योक्तभारतवचनमेतत् । एतेन "हृदिप्राण"इत्याद्यमरोक्तिर्नादरणीयेतिसूचितं ॥

मंचरतिसर्वग"इतिभारतवचनाज्ज्ञेयानि । "अतस्तदाज्ञये"तिपूर्वपक्षभाष्येमुख्यदासत्वेयुक्त्युक्तेः, "प्राणादिपंचकस्यव्यक्त सद्गुणत्वान्मुख्यप्राणवृत्तित्व"मितिन्यायविवरणेचमुख्यप्राणस्वरूपत्वेयुक्त्युक्तेरुभयानुसरणाय "एवंश्रुतिद्वयस्यापिसमानब
१३१११३
लत्वा"दितिटीकायांश्रुत्योःसाम्येनानध्यवसायपूर्वपक्षोदर्शितः ॥ चेतसोऽव्याप्तिश्चेतनेति ॥ "बहुस्मरणशक्तिस्तुचेतनेत्य भिधीयत"इतिवचनं । यदुक्तमुभाभ्यां "नवायु"इत्यादीनि "अणुश्चे"त्यतःप्राचीनानिसूत्राण्येकमधिकरणं । तत्रमुख्य प्राणोनवायुमात्रं । नापिसांख्यरीत्यासमस्तकरणक्रिया । "एतस्माज्जायतेप्राणोमन"इतिश्रुतौवायुकर्मशब्दाभ्यांतयोःप्राणा त्पृथगुपदेशात् । किंत्वाध्यात्मिकोवायुविकारविशेषोमुख्यप्राणइतिनवाय्वितिसूत्रार्थइति । तन्न । सांख्यमतनिरासस्येहासं गतेः । किंच ममरीत्याऽवश्यनिरसनीयस्यपूर्वोक्तप्राणोत्पत्तिश्रुतेर्वाय्वादिपरत्वस्येहनिरासेन "नानुमानमतच्छब्दा"दित्या देरिवच "नवायु"इत्यस्यसूत्राक्षरानुसारेणपूर्वशेषत्वसंभवे प्राणसंवादादिनाचेतनत्वेननिर्णीतमुख्यप्राणेजडत्वांगीकारेणवायु क्रियात्वपूर्वपक्षोवायुविकारत्वसिद्धांतश्चायुक्तः । नहिजडेश्रुतिषुक्वापिमुख्यप्राणशब्दोदृष्टः । यच्चोक्तंपरैः मुख्यप्राणस्यना मादीन्प्रतिप्रधानत्वाच्छरीरेजीववत्स्वातंत्र्यमितिप्राप्ते प्राणसंवादादिष्वप्रधानभूतचक्षुरादिभिःसहशासनादस्वातंत्र्यमिति

प्र० इतिवचनमिति ॥ चतुर्थस्कंधतात्पर्ये ॥ नामादीनिति ॥ नामवाक्चित्तादीञ्छांदोग्याम्नातान्प्रतीत्यर्थः । चक्षुरादेरिवप्राणस्यजीवान्प्र

प्र० त्युपकर्तृत्वाभावादकरणत्वशंकात्रेत्यतआह ॥ दृश्यतेहीति ॥ श्रुतिसिद्धश्चेत्याह ॥ श्रूयतेचेति ॥ "तत्प्राणेप्रपन्नउदतिष्ठ"दित्यादिश्रुते

"चक्षु"रितिसूत्रार्थइति । तन्न । पूर्वसूत्रेवायुविकारत्वेनजडतयानिर्णीतमुख्यप्राणेजीववत्कर्तृत्वशंकानुदयात् । प्राणसंवादादिनामुख्यप्राणस्योक्तजडत्वाक्षेपेचचक्षुरादीनामपितेनैवतदाक्षेपसंभावनात् । सिद्धांतेचक्षुरादिसाहचर्येणाचेतनत्वसिद्धौसौत्रादिपदेनाचेतनत्वोक्तिरितित्वन्मतहानेः । अनुपकारकत्वाशंकायाश्चस्पष्टेनदृष्टशास्त्रविरोधेनानुदयात् । दृश्यतेह्यन्वयव्यतिरेकाभ्यांचक्षुरादेरूपादिज्ञानमिवप्राणस्यशरीरधारणाद्युपकारः । श्रूयतेचप्राणसंवादादिषु । अकरणत्वशंकायाश्चसिद्धांतप्रतिकूलत्वंच । सिद्धांतयिष्यतेचोत्तरसूत्रेऽकरणत्वं । यत्तुकैश्चिदुक्तं प्राणोवायुविकारश्चेत्किमग्न्यादिवद्भूतांतरमितिशंकानिरासार्थंचक्षुरितिसूत्रमिति । तन्न । प्रत्यक्षादिविरोधेनप्राणेभूतांतरत्वशंकानुदयात् । विशेषहेत्वभावेनाग्न्यादिविकारस्यचक्षुरादेरपितथात्वशंकानिरासापाताच्च । यच्चोक्तंपरैः चक्षुरादिभिःसहशासनेनकरणंचेत्प्राणस्तर्हिंचक्षुरादिविषयरूपादिवदस्यापिविषयांतरंवाच्यं । नचतच्छक्यं । करणैकादशत्वव्याकोपदोषइतिशंकानिरासार्थंसूत्रमकरणत्वादिति । प्राणस्याकरणत्वान्नायंदोषः । ॥ ९९७ ॥

प्र० रितिभावः । सिद्धांतप्रतिकूलत्वंचेत्युक्तंव्यनक्ति ॥ सिद्धांतयिष्यतेचेति ॥ नायंदोषइति ॥ विषयांतरकल्पनादोषइत्यर्थः । ननुप्राण

प्र० स्यजीवोपकरणत्वेकेनचिदुपकाररूपकार्येणभाव्यमित्यतआह ॥ तथाहीति ॥ कार्यमात्रस्येति ॥ कार्यसामान्यस्यशरीरधारणादिरूपस्येत्यर्थः ॥ पूर्वोक्तार्थेति ॥ मुख्यप्राणस्याकरणत्वाज्जीवप्रयोज्यत्वदोषोनेत्येतदर्थपरत्वमिवत्वन्मतेऽकरणत्वाद्विषयांतरकल्पनादोषोनेत्येत

तथाहिदर्शयति "तत्प्राणउत्क्रांतेपद्यते"त्यादिकाश्रुतिःप्राणनिमित्तांशरीरस्थितिमित्यकरणत्वादितिसूत्रार्थइति । तन्न । शरीरस्यकर्मेंद्रियादीनांचोपकरणत्वेपिविषयाभावेनकार्यमात्रस्यशरीरकर्मेंद्रियादाविवप्राणेपिप्रत्यक्षादिसिद्धत्वेनशंकानुदयात् । "तथाहिदर्शयती"त्यस्यममतइव "अकरणत्वाच्चनदोष"इतिपूर्वोक्तार्थपरत्वाभावेनास्वारस्याच्च । यत्तुकैश्चिदुक्तं अकरणत्वादक्रियत्वाज्जीवंप्रत्युपकाररूपक्रियाविशेषराहित्याद्योदोषःप्राप्नोतिस्नास्ति । तथाहिदर्शयतिश्रुतिस्तत्प्राणइत्यादिकोपकारविशेषंशरीरधारणादिकमित्यकरणत्वादितिसूत्रार्थइति । तन्न । स्फुटप्रत्यक्षादिविरोधेनचक्षुरादाविवानुपकारकत्वशंकानुदयस्योक्तत्वात् । पूर्वसूत्रस्थचक्षुरादिशब्दसन्निधानाद्बहुव्रीहितःकर्मधारयस्यबलवत्त्वाच्चाकरणत्वशब्देनप्रसिद्धकरणत्वाभावस्यैवप्रतीतौबहुव्रीह्याद्याश्रयणेनो

प्र० दर्थाप्रतिपादकत्वादित्यर्थः । अकरणत्वादित्यत्र "करणंक्रिये"त्यादितद्भाष्योक्तमर्थमन्वाह ॥ अकरणत्वादक्रियत्वादिति ॥ तस्यैवविवरणं जीवंप्रतीत्यादि । योदोषः चक्षुरादिवज्जीवोपकरणविशेषएव । नतुभूतांतरमितिप्रागुक्तप्रमेयभंगरूपोदोषइत्यर्थः ॥कर्मधारयस्येति॥ अकरणत्वादित्यत्रनकरणमकरणमित्येवंरूपेणेत्यर्थः । तत्रहेतुः पूर्वसूत्रस्थेत्यादि । बहुव्रीह्यादीत्यादिपदेनकरणशब्दस्यक्रियारूपार्थप

प्र० रत्वंग्राह्यं ॥ व्यवहितेति ॥ दोषपदान्वयेनचेत्यर्थः । भाष्योक्तार्थमन्वाह ॥ इतश्चेति ॥ मुख्यप्राणस्तावत्प्राणापानव्यानोदान समानरूपपंचवृत्तिमान् । प्राणादयश्चोच्छ्वासनिश्वासवीर्यवत्कर्मकरणोर्ध्वनयनसमनयनादिरूपव्यापारवंतइत्युच्छ्वासादिव्यापारयुक्तपंचवृ

पकाररूपक्रियाविशेषराहित्यपरत्वकल्पनायोगाच्च । सिद्धांतसूत्रस्थाकरणत्वहेतोः स्वतःप्राप्तसिद्धांतहेतुत्वत्यागेनव्यवहितान्वयेनचपूर्वपक्षहेतुत्वकल्पनायोगाच्च । यच्चोक्तंपरैःइतश्चमुख्यप्राणःकार्यविशेषवान् । यतःसउच्छ्वासादिव्यापारयुक्तप्राणापानादिपंचवृत्तिर्व्यपदिश्यते । यथामनोयोगशास्त्रेप्रमाणविपर्ययविकल्पनिद्रास्मृतयइतिपंचवृत्तीतिपंचेतिसूत्रार्थइति । तन्न । सूत्रेचशब्दाभावेनहेत्वंतरत्वस्यास्वरसत्वात् । "तथाहिदर्शयती"तिपूर्वसूत्रभागेनैवास्यापिकार्यविशेषस्यवक्तुंशक्यत्वेनास्य वैयर्थ्याच्च । ममरीत्याश्रौतदार्ष्टांतिकस्य "यथाहवैनमःपंचधे"तिश्रुत्युक्तदृष्टांतस्यचसंभवे"एतेनयोगःप्रत्युक्त"इत्यत्रनिराकृतयोगशास्त्रोक्तदृष्टांतोक्त्ययोगाच्च ।

प्र० त्तिमान्मुख्यप्राणोपिकार्यविशेषवानित्यर्थः । प्रमाणं प्रमितिः । विपर्ययः मिथ्याज्ञानं । शब्दज्ञानानुपातीवस्तुशून्योविकल्पः । विक्षेपसंस्कारलक्षणमनोवृत्तिर्निद्रा । स्मृतिःप्रसिद्धेतिभामत्युक्तोर्थः ॥ श्रौतेति ॥ "अथपंचवृत्त्यैतत्प्रवर्तत"इत्यादिभाष्यस्थश्रुत्युक्तदार्ष्टांतिकस्ये

प्र० त्यर्थः ॥ केचित्त्विति ॥ यदिप्राणःप्राणापानाद्याकारेणपंचधावस्थितोदेहधारणादिकुर्यात्तर्हिप्राणापानादिकंतत्वांतरंस्यादितिशंकानिरा सार्थंसूत्रं । तदर्थमन्वाह ॥ यथेति ॥ ७ ॥ पंचवृत्त्यधिकरणं ॥ ८ ॥

केचित्तु यथाकामादयोमनसोवृत्तिविशेषाः नतत्वांतरं तथाप्राणापानादयःप्राणस्यवृत्तिविशेषाः नतत्वांतरमितिपंचेतिसूत्रार्थइत्याहुः । तन्न । प्राणस्यप्राणवृत्तित्वायोगात् । "कामःसंकल्पोविचिकित्साश्रद्धाश्रद्धाश्रीर्धीर्भीरित्येतत्सर्वंमनएवे"तिश्रुत्याकामादीनामधिकत्वेनपंचवृत्तित्वेनमनसोदृष्टांतत्वायोगाच्च ॥ ७ ॥ पंचवृत्त्यधिकरणं ॥ ८ ॥

॥ ॐअणुश्चॐ ॥ पूर्वोक्ताधिकसद्गुणत्ववत्प्राणस्यविभुत्वमप्यस्त्वितिपूर्वपक्षोदयात्संगतिः । अत्रश्रुतिसमन्वयेनोक्तंब्रह्मणःसर्वस्रष्टृत्वादिकमयुक्तंनवेतिचिंता । तदर्थंश्रुतिरप्रमाणमुतनेति । तदर्थं मुख्यप्राणस्याणुत्वश्रुतिरप्रमाणमुतनेति । तदर्थमणुत्वश्रुतिःप्रबलव्याप्तत्वश्रुतिबाधितोतनेति । तदर्थंव्याप्तत्वश्रुतिःकिमांतरमुख्यप्राणरूपाभिप्रायाकिंवाबाह्यमुख्यवायुरूपाभिप्रायेति । अन्येतु

प्र० ॥ ॐअणुश्चॐ ॥ तदर्थंमुख्यप्राणस्याणुत्वश्रुतिरिरिति ॥ तदप्रामाण्येहि "तत्सामान्या"दितिन्यायेनब्रह्मणिसमन्वितश्रुतिमात्राप्रामाण्यंभवतीतिभावः ॥ अन्येत्विति ॥ अणुश्चमुख्यप्राणइतिसूत्रार्थः । "समःप्लुषिणासमोमशकेनसमोनागेनसमएभिस्त्रिभिर्लोकैःसमो

प्र० नेनसर्वेणे"तिविभुत्वमपिश्रूयतइत्यतआह ॥ समइति ॥ हिरण्यगर्भप्राणात्मनासर्वगतत्वश्रुतिरित्यर्थः ॥ आध्यात्मिकेनेति ॥ प्राणात्म नेत्यन्वयः । "समःप्लुषिणे"त्याद्युक्तपरिच्छिन्नत्वमित्यर्थः । सौत्राणुशब्देनापितस्यैवविवक्षितत्वेनभाषणादितिभावः । बुद्धिव्याप्यापिनस र्वगतत्वश्रुतिरितिभावेनोक्तं तद्बुद्धेर्वेति । सर्वगतत्वश्रुतिगतिंमतांतरोक्तांनिराह ॥ केचित्त्विति ॥ इतिश्रुतीति ॥ भाष्योक्तश्रुत्युक्ते

"समएभिस्त्रिभिर्लोकै"रितिप्राणस्यसर्वगतत्वश्रुतिराधिदैविकेनहिरण्यगर्भप्राणात्मना । आध्यात्मिके नतुपरिच्छिन्नत्वमित्याहुः । तन्न । हिरण्यगर्भस्यतद्बुद्धेर्वापरिच्छिन्नत्वेनसर्वगतत्वोत्त्ययोगात् । केचित्तु सर्वप्रवृत्तिहेतुत्वात्प्राणस्यसर्वगतत्वोक्तिरित्याहुः । तन्न । "अंतर्वाअणुर्बहिर्महानितिश्रुत्युक्तसमाधौसतिमनआदिसाधारणेनसर्वप्रवृत्तिहेतुत्वेनसर्वगतत्वोक्तेरयोगात् ॥ ७ ॥ अण्वधिकरणं ॥ ९ ॥

॥ ॐज्योतिराद्यधिष्ठानंतुतदामननात्ॐ ॥ प्राणान्मुख्यप्राणंचनिरूप्येहतेषांकंप्रतिकरणत्वमितिचिंत्यतइतिसंगतिः । अत्रश्रुतिसमन्वयेनोक्तंब्रह्मणःसर्वस्रष्टृत्वादिकमयुक्तमुतनेतिचिंता । तदर्थंकिंश्रुतिरप्रमाणमुतनेति । तदर्थमिंद्रियाणांकरणत्वाम्नानंजीवस्वामिकत्वाभिप्रायमुतेश्वरस्वामिकत्वेपिजीवंप्रतिक्रियासाधनत्वमात्राभिप्रायमिति । [ब्रह्मकरणत्वश्रुतिरप्रमा

प्र० त्यर्थः ॥ ७ ॥ अण्वधिकरणं ॥ ९ ॥
॥ ॐज्योतिराद्यधिष्ठानंतुॐ ॥ तेषामिति ॥ मुख्यप्राणान्यप्राणानामित्यर्थः । करणत्वंकर्तृप्रयोज्यत्वरूपं । "उतेश्वरे"त्यारभ्यसर्वाप्येका

प्र० सिद्धांतकोटिः ॥ ब्रह्मप्रयोजकेति ॥ ब्रह्मनिष्ठप्रयोजकत्वजीवनिष्ठकर्तृत्वाभ्यामित्यर्थः । चक्षुरादिकरणसंबंधित्वाद्ब्रह्मजीवयोरुभयकरणत्वश्रुत्यविरोधइत्यर्थः ॥ इतिसूत्रमिति ॥ "सतीष्वप्यधिष्ठात्रीषुप्राणवताजीवेनैवैषांप्राणानांसंबंधः । यत्राकाशमनुविषण्णंचक्षुस्सचा

णमुतनेति । तदर्थंसाप्रत्यक्षानुगृहीतप्रबलजीवकरणत्वश्रुतिबाधितानवेति । तदर्थंजीवकरणत्वश्रुतिःकरणानांजीवस्वामिकत्वाभिप्रायोतेश्वरस्वामिकत्वेपिजीवंप्रतिक्रियासाधनत्वमात्राभिप्रायेति ।] यदग्न्यादिरूपज्योतिराद्यधिष्ठातृब्रह्मतदेवतत्कार्यभूतचक्षुरादिरूपज्योतिराद्यधिष्ठानमितिसूत्रंयोज्यमित्याहभाष्यकारः जीवेनैवकरणैःकारयतीति ॥ एवंचब्रह्मप्रयोजकजीवकर्तृत्वाभ्यांचक्षुरादिकरणसंबंधित्वाच्छ्रुत्योरविरोधइतिभावः । अन्येतु वागादिकरणजातंस्वशक्त्यैवाभिवदनादिकारीतिप्राप्ते अग्न्यादिभिरभिमानिदेवैरधिष्ठितमेवकार्यकारि । अग्निर्वाग्भूत्वामुखंप्राविशदित्याद्यामननादितिसिद्धांतयंति । तन्न। "अभिमानिव्यपदेशस्त्वि"त्यत्रैवाभिमानिदेवतासमर्थनात् । त्वन्मतेतस्यपूर्वपक्षसूत्रत्वेपिसिद्धांतेतस्यानिरासेनानुमतत्वात् । यच्चोक्तमधिष्ठातृत्वेनदेवतानांभोक्तृत्वंस्यादितिशंकानिरासार्थं "प्राणवते"तिसूत्रमिति । तन्न । तस्य "वैशेष्या"दित्युक्तन्यायेनाभिमानिसूत्रस्थविशेषशब्देनैवनिरासस्संभवात् । केचित्तु ज्योतिरितिसूत्रंप्राणेतिसूत्रंचैकीकृत्यप्राणवताजीवेनसहज्योतिरादिदेवतानामिंद्रियविषयंयदधिष्ठानंतत्तदामननात् । परमात्मसंकल्पात् । "यआत्मानमंतरोयमयति योग्निमंतरोयमयती

प्र० क्षुषःपुरुषः । दर्शनायचक्षु"रित्यर्थोक्तेरशंकानिरासः ॥ केचित्त्विति ॥ चक्षुरादिप्राणानांह्यग्न्यादिदेवताधिष्ठितत्वमभिमानिनयसिद्धं ।

प्र० जीवाधिष्ठितत्वंचजीवभोगसाधनत्वेनलोकसिद्धं । तथाचार्थमाह ॥ **प्राणवतेति** ॥ जीवेनसहज्योतिरादिदेवतानामित्यस्यायमर्थः । प्राणवतः प्राणाधिष्ठातुर्जीवस्याग्न्यादिदेवतानांचाधिष्ठात्रीणांयदिंद्रियविषयकमधिष्ठानं । भावेल्युट् । तन्नियमनादिरूपोव्यापारइत्यर्थः । तज्जीवाद्या यत्तंनभवति । किंतुतदामननाद्भवति । तदामननादित्यस्यार्थमाह ॥ **परमात्मसंकल्पादिति** ॥ आमननमाभिमुख्येनगमनं । परमात्मसं कल्पादेवभवतीतितदीयभाष्योक्तेः ॥ **इतिशब्दादिति** ॥ जीवस्याग्न्यादिदेवतानांचस्वस्वकार्येषुपरमात्माधीनत्वप्रतिपादकशब्दादित्यर्थः ॥ **इत्युक्तत्वादिति** ॥ ननूक्तमत्रश्रुतप्रकाशिकायां "परात्तुतच्छ्रुते"रित्यधिकरणेजीवस्यपरायत्तकर्तृत्वेसिद्धेऽत्रप्राणवच्छब्देनजीवस्योपादानंदृष्टां

तिशब्दादितिसूत्रार्थइत्याहुः । तन्न । परात्तुतच्छ्रुतेरित्यत्रैव "यआत्मान"मित्यादि श्रुत्याजीवकर्तृत्वमीशाधिष्ठानमित्युक्तत्वात् । प्राणवतेतितृतीयायाःकारकविभक्तित्वसंभ वेसहयोगसापेक्षोपपदविभक्तित्वकल्पनायोगाच्च ॥ ७ ॥ ज्योतिराद्यधिकरणं ॥ १० ॥

प्र० ततयेतीतिचेन्न । दृष्टांतोक्तेरतिशयाभावात् । प्राणवद्यथेत्यादिनिर्देशापाताच्च । भाष्येशब्दादित्यनेन "यआत्मान"मित्यस्योपादानेनजीव कर्तृत्वस्यान्याधीनत्वोपपादनायोगाच्च । अग्न्यादीनामपिजीवत्वेनतेनैवसिद्धेश्चेतिभावः । दोषांतरंचाह ॥ **प्राणवतेतीति** ॥ "जीवेनकर णैःकारयतिपरमात्मे"त्यस्मद्भाष्योक्तदिशा "कर्तृकरणयोस्तृतीये"त्युक्तकर्तृकारकविभक्तित्वेसंभवति "सहयुक्तेऽप्रधान"इत्युक्तोपपदनिबंधन विभक्तित्वकल्पनमयुक्तं । "उपपदविभक्तेःकारकविभक्तिर्बलीयसी"त्युक्तेरित्यर्थः । ज्योतिरादीनामितिपृथङ्निर्देशाभावेनक्लिष्टयोजनायो गाच्चेत्यपिध्येयं ॥ ७ ॥ **ज्योतिराद्यधिकरणं ॥ १० ॥**

॥१०००॥

प्र० ॥ ॐतइंद्रियाणिॐ ॥ पूर्वोक्तमिति ॥ प्राणवतेत्यत्र "नजीवापेक्षयामुख्यंकारयेत्परमेश्वर"इतिभाष्योक्तमित्यर्थः । पूर्वोत्तरपक्षटीकासू
चिताश्रिताआह ॥ अत्रेति ॥ इंद्रियत्वश्रुतिरिति ॥ तदप्रामाण्यप्रामाण्ययोःसतोः "तत्सामान्या"दितिन्यायेनसमन्वितश्रुतिमात्राप्रा

॥ ॐतइंद्रियाणितद्व्यपदेशादन्यत्रश्रेष्ठात्ॐ ॥ पूर्वोक्तंमुख्यप्राणस्यजीवंप्रत्यकरणत्वमयुक्तं । तस्यापीं
द्रियत्वेनतंप्रतिकरणत्वादितिपूर्वपक्षोत्थानात्संगतिः । अत्रश्रुतिसमन्वयेनोक्तंब्रह्मणःसर्वस्रष्टृत्वादिकमयुक्तमुत
नेतिचिंता । तदर्थंश्रुतिरप्रमाणंनवेति । तदर्थंद्वादशानामेवेंद्रियत्वश्रुतिरप्रमाणमुतनेति । तदर्थंसा इदं
द्रवणयुक्तियुक्तत्वेनप्रबलयासामान्येनत्रयोदशप्राणानामिंद्रियत्वश्रुत्याबाध्यतेनवेति । तदर्थंसामान्यश्रुतिर्द्वा
दशत्वरूपविशेषश्रुत्यनुसारेणमुख्यप्राणंपरिहृत्यनवर्ततउतवर्ततइति । तदर्थमिंद्रियत्वप्रयोजकत्वेनसामान्य
श्रुत्युक्तमिदंद्रवणंमुख्यप्राणस्यास्तिनवेति । "भेदश्रुते"रितिसूत्रेप्राणस्येंद्रियांतराद्भेदेश्रुतिरुक्ता । "वैलक्षण्या"
दितिसूत्रेतुप्रत्यक्षमितिभेदः । मनोपिसत्यतिप्रयत्नेपुमधीनप्रवृत्त्येव । नहिसुषुप्तौपुंप्रयत्नाभावेपिप्राणस्येवमनसः
प्रवृत्तिरस्ति । परेषांभाष्येतु प्रकृतावागादयःप्राणाःप्राणादिवन्मुख्यप्राणस्यवृत्तिभेदाइतिप्राप्ते तत्वांतराणि ।

प्र० माण्यप्रामाण्ययोःप्रसक्तेरितिभावः । अन्यत्स्पष्टं । वैलक्षण्यसूत्रेभाष्यटीकयोर्जीवाधीनप्रवृत्तित्वमिंद्रियाणामुक्तं । मनसस्तद्व्यनक्ति ॥
मनोपीति ॥ प्राणादिवदिति ॥ यथाप्राणापानादयोमुख्यप्राणवृत्तिभेदाएवंवागादिप्राणाअपि । नतत्वांतराणीतिप्राप्तइत्यर्थः । अन्यत्र

प्र० श्रेष्ठात् श्रेष्ठंवर्जयित्वा । तेप्रकृतप्राणरूपवागादींद्रियाणितत्वांतराणि । कुतः । तद्व्यपदेशात् तेषांप्राणानांश्रेष्ठाद्भेदव्यपदेशादितियोजनांह्व दिक्त्वानुवदति ॥ **एतस्मादिति** ॥ **स्वमतमेवदूषितंभामतीकारेणेति** ॥ भामत्यांहियथाश्रुतभाष्यंव्याख्याय "अन्येतु भेदशब्दाध्याहारभियाभेदश्रुतेश्चेतिपौनरुक्त्यभियातच्छब्दस्यानंतरोक्तपरामर्शकत्वादन्यथावर्णयांचक्रु"रित्यादिनास्वभाष्योक्तंस्वमतमेवस्वयंदोषत्रयेण दूषयित्वाऽन्यथावक्ष्यमाणदिशाधिकरणशरीरंवर्णितवानितिस्वमतमेवदूषितमित्यर्थः । दोषत्रयसमर्थनंचकल्पतरावेवव्यक्तं । भाष्यभामती

एतस्माज्जायतेप्राणोमनःसर्वेंद्रियाणिचेत्यादौभेदव्यपदेशादितिसिद्धांतइत्युक्तं । तत्रतत्वांतराणीतिप्रतिज्ञाध्याहारः । तद्व्यपदेशादित्यस्यभेदश्रुतेरित्यनेनपौनरुक्त्यं । तच्छब्दस्याध्याहृततत्वांतरपरतेतिदोषाइतिस्वमतमेवदूषितंभामतीकारेण । कैश्चिच मुख्यप्राणोपींद्रियमितिप्राप्ते तद्वर्जमेकादशैवेंद्रियाणीतिसिद्धांतितं । तत्रेंद्रियस्यैकादशत्वंप्रागेवनिरस्तं । अन्यत्त्वविरुद्धं ॥ ७ ॥ इंद्रियाधिकरणं ॥ ११ ॥

प्र० वाक्येभेदशब्दस्यतत्वांतररूपार्थकत्वस्यकल्पतरावुक्तेः "तत्वांतराणीतिप्रतिज्ञाध्याहार"इत्याद्यनुवादःकृतः ॥ **तद्वर्जमिति** ॥ मुख्यप्राणवर्जमित्यर्थः ॥ **प्रागेवेति** ॥ सप्तगतेरित्यत्रेत्यर्थः । एतेनभामत्यभिमतवर्णकमपिप्रत्युक्तंध्येयं ॥ **अन्यत्त्विति** ॥ भेदश्रुतेर्वैलक्षण्याच्चेत्यनयोरेकयोगकरणंत्वसांप्रदायिकमित्युपेक्षणीयमितिभावः ॥ ७ ॥ **इंद्रियाधिकरणं** ॥ ११ ॥

प्र० ॥ **ॐसंज्ञामूर्तिक्लृप्तिःॐ** ॥ **पेटिकेति** ॥ प्राणचिंतापेटिकायांतदाश्रयशरीरचिंतायाअंतर्भावसंगतिःपूर्वाधिकरणेनानंतरसंगतिश्चेत्यर्थः । यद्वाप्राणपेटिकाप्राक्तनीसर्वापिचिंतेतितदनंतरसंगतिः पूर्वाधिकरणानंतरसंगतिश्चेत्यर्थइतिद्रष्टव्यं ॥ **किंतुविरिंचस्येति** ॥ एतच्च "नचात्रचतुर्मुखस्याप्रसक्तिराशंकनीया । स्वयमेवायंभगवान्प्राणत्वादूर्ध्वंचतुर्मुखपदमधिष्ठास्यतीतिज्ञापयन्प्राणस्वरूपनिरूपणावसरेचतुर्मुखंप्रसं

॥ ॐसंज्ञामूर्तिक्लृप्तिस्तुत्रिवृत्कुर्वतउपदेशात्ॐ ॥ संगतिमाह ॥ तत्प्रसंगसन्निधापितमिति ॥ नकेवलंचिंताविषयस्यशरीरस्यप्राणाश्रयत्वात्पेटिकाधिकरणसंगती । किंतुविरिंचस्यमुख्यप्राणत्वाच्चेत्यपिद्रष्टव्यं । अत्रपूर्वोक्तंविष्णोःसर्वस्रष्टृत्वं "विरिंचोवाइदंसर्वंविरेचयती"तिविरिंचस्यसर्वत्रस्रष्टृत्वश्रुतिविरुद्धंनवेतिचिंता । तदर्थंविरिंचस्यस्रष्टृत्वश्रुतिःकिंविरिंचस्यस्वातंत्र्येणसर्वस्रष्टृत्वाभिप्रायाकिंवाकतिपयपदार्थसृष्टौविरिंचस्यद्वारत्वमात्राभिप्रायेति । तदर्थंसर्वस्रष्टृत्वंकिंत्रिवृत्कुर्वतोप्युतत्रिवृत्कुर्वतएवेति । तदर्थंरूपादिकंकिंत्रिवृत्करणानपेक्षमुततत्सापेक्षमिति । अन्येतु नामरूपव्याकरणंजीवकर्तृकं । "अनेनजीवेनात्मनानुप्रविश्यनामरूपेव्याकरवाणी"तिश्रुतेरितिप्राप्ते ईश्वरकर्तृकं । "सेयंदेवते"त्युपक्रम्य "नामरूपेव्याकरवाणी"त्युत्तमपुरुषोपदेशात् । "जीवेने"त्येतत्तु "अनुप्रविश्ये"त्यनेनसंबध्यते । ननु "व्याकरवाणी"त्यनेनेत्याहुः । तन्न । जीवेश्वरशब्देननामरूपवद्विशिष्टविवक्षायांतस्यस्वनामरूपकर्तृत्वाभावात्, चिन्मात्रविवक्षायांचतस्याकर्तृत्वा

प्र० जयती"तितत्वप्रदीपोक्तंध्येयं । पूर्वोत्तरपक्षटीकासूचितचिंताआह ॥ **अत्रेति** ॥ स्पष्टःफलफलिभावः । मतद्वयेपिसंज्ञेत्यादिसूत्रत्रयमेकमधिकरणं ॥ **जीवकर्तृकमिति** ॥ लोकेडित्थादिनामकरणेघटादिरूपकरणेचजीवस्यकर्तृत्वदर्शनाच्छ्रुतेश्चेतिभावः ॥ **उत्तमपुरुषेति** ॥

प्र० "व्याकरवाणी"तिलोडुत्तमपुरुषप्रयोगेणदेवतायाएवनामरूपव्याकर्तृत्वप्रतीतेरित्यर्थः । चिन्मात्रपक्षेदोषांतरमाह ॥ जीवेति ॥ तत्रापि चिन्मात्रस्यसत्त्वेनतदितरकर्तृत्वसिद्धांतोनयुक्तइत्यर्थः । श्रुतिगत्युक्तिंचनिराह ॥ जीवभावस्येति ॥७॥ संज्ञामूर्तिक्लृप्त्यधिकरणं ॥१२॥ ॥ ॐमांसादिभौमंॐ ॥ "प्रकृतोदेहःकिमाप्यःकिंवापार्थिव"इत्यादिटीकासूचितामाह ॥ पूर्वमिति ॥ फलोक्तिंपूर्वोत्तरपक्षटीकासूचि

जीवकर्तृत्वपूर्वपक्षस्यईश्वरकर्तृत्वसिद्धांतस्यचायोगात् । जीवभावस्यप्रतिबिंबनरूपप्रवेशाधीनत्वेनजीवरूपेणप्रवेशोक्त्ययोगाच्च ॥ ७ ॥ संज्ञामूर्तिक्लृप्त्यधिकरणं ॥ १२ ॥

॥ ॐमांसादिभौमंयथाशब्दमितरयोश्चॐ ॥ पूर्वदेहादेःकर्तोक्तः । इहोपादानमुच्यतइतिसंगतिः । अत्रश्रुतिसमन्वयेनोक्तंब्रह्मणःसर्वस्रष्टृत्वादिकमयुक्तमुतयुक्तमितिचिंता । तदर्थंश्रुतिरप्रमाणंनवेति । तदर्थंदेहादेर्भूतत्रयात्मकत्वश्रुतिरप्रमाणंनवेति । तदर्थंमांसादेस्तर्पकत्वयुक्त्यनुगृहीतयाऽऽप्यत्वादिश्रुत्याबाधितानवेति । तदर्थंभूतत्रयात्मकत्वेप्याप्यत्वादिश्रुत्यादिकंतत्तद्भूतस्यविशेषसंयोगेननोपपद्यतउतोपपद्यतइति ॥ नोक्तदोषइति ॥ पुनर्विशेषोक्त्ययोगइत्युक्तदोषोनेत्यर्थः । यदुक्तंपरेषांभाष्ये

प्र० तांश्चिंताआह ॥ अत्रेति ॥ आद्यांचिंताद्वयंफलोक्तिपरटीकासूचितं ॥ भूतत्रयात्मकत्वश्रुतिरिति ॥ "इमास्तिस्रोदेवताःपुरुषंप्राप्ये"त्यादिश्रुतिरित्यर्थः । एतदप्रामाण्येहिपूर्वोक्तदिशाश्रुतिमात्राप्रामाण्यमितितादर्थ्यमेतच्चिंतायाइतिभावः ॥ आप्यत्वादीति ॥ आप्यत्वपा

प्र० र्थिवत्वादिश्रुत्याभाष्याद्युक्त्येत्यर्थः । "भाष्यकृतोत्तरसूत्रशेषतयासूत्रमिदंविषयोपदर्शनपरतयाव्याख्यात"मितिभामत्युक्तंहृदिकृत्वाह ॥ उत्तरसूत्रेति ॥ यदिसर्वमिति ॥ भूतंभौतिकंचेत्यर्थः ॥ तैजसमिदमिति ॥ अस्थ्यादीत्यर्थः ॥ आप्यमिदमिति ॥ लोहितादी

उत्तरसूत्रविषयप्रदर्शनायमांसादिसर्वभौतिकंत्रिवृत्कृतभूतकार्यमितिमांसादीतिसूत्रेणोक्त्वा यदिसर्वंत्रिवृत्कृतभूतकार्यंतर्हिकथंतैजसमिदमाप्यमिदमितिव्यवस्थेत्याशंक्य भूयस्त्वाद्व्यवस्थेतिसमाधातुंवैशेष्यादित्युत्तरसूत्रमिति । तन्न । मांसादेस्त्रिवृत्कृतभूतकार्यत्वात्सूत्रेणविनापिभूतानांभौतेनत्रिवृत्कृततत्वमात्रेणमांसादेरपितेनत्रिवृत्कृतभूतकार्यत्वेनाव्यवस्थाशंकायाभूयस्त्वेनव्यवस्थेतिसमाधेश्चसंभवेनमांसादिसूत्रस्यनिष्फलत्वात् । भामत्यांतु "अन्नमयंहिसोम्यमनस्तेजोमयीवा"गितिश्रुत्युक्तंमनसःपार्थिवत्वंवाचस्तैजसत्वंचायुक्तं । काणादैर्मनसोनित्यत्वोक्तेः । सांख्यैश्चाहंकारिकत्वोक्तेरितिशंकानिरासार्थंमांसादीतिसूत्रं । तत्रचवाङ्मनसेइतिवक्तव्येमांसाद्यभिधानंसिद्धेनसहसाध्यस्योपादानेदृष्टांतलाभाय । यथामांसादिभौमाद्येवंवाङ्मनसेअपितैजसभौमेइति । काणादादिमतंतुश्रुत्यादिविरुद्धमित्युक्तं । तन्न । सांख्यादिस्मृत्यविरोधोक्तेरिहासंगतेः। किंच सौत्रेणभौमशब्देनतैजसत्वाद्युपलक्षणे "यथाशब्दमितरयो"रितिव्यर्थं ।

ता. चं. १६८ प्र० त्यर्थः । सूत्रेण मांसादीतिसूत्रेणविनापीत्यर्थः । भौतेन भूतसंबंधिनात्रविकृतत्वमात्रेणेत्यर्थः । तेनेत्यस्यार्थस्त्रिवृत्कृतेत्यादि । "शंकानिराकरणार्थत्वमप्यस्यशक्यंवक्तु"मित्यादिनोक्तमाह ॥ भामत्यांत्विति ॥ इतरयोरप्तेजसोश्चकार्येयथाशब्दमुपेयमित्यर्थादितिभावः ।

प्र० “मांसादीत्यादिपदेनाप्तेजःकार्ययोर्मज्जालोहितयोर्ग्रहण”मितिकल्पतरूक्तंहृदिकृत्वाह ॥ मांसादीत्यादिशब्दोक्तेति ॥ वाग्भूतेति ॥ अनुपलक्षणपक्षेमांसादीत्यादिपदेनवाचोग्रहणंकार्यं । तथाचमांसादिभौममितरयोश्चकार्यमित्युक्त आदिपदोपात्तवाचइतरयोरित्यत्रोक्ततेजःकार्यत्वंसिध्यतीत्यर्थः । नन्वेवमितरयोरित्यत्रापामपिग्रहणमनन्वितंस्यादितिचेत्तर्हितदन्वयायादिपदेनप्राणस्यापिग्रहणमस्तु । प्राणआप्यत्वानाप्यत्वविवादोनेतितदुक्तिर्व्यर्थां । मनसोभौमत्वोक्तिरपिनोक्तास्यादितिचेत्तर्हिवाङ्मनसोरेवदार्ष्टांतिकत्वपक्षेपितैजसभौमयोर्मज्जामांसयोरेव

“मांसादी”त्यादिशब्दोक्तलोहितमज्जारूपदृष्टांतगताप्यतैजसत्वयोरपिभौमशब्देनैवलाभात् । अनुपलक्षणेच “मांसादी”त्यादिशब्दोक्तवाग्भूदार्ष्टांतिकस्यतैजसत्वंसिध्येदितियत्किंचिदेतत् । केचित्तु “अनेनजीवनेतिश्रुतेर्जीवविशेषहिरण्यगर्भकर्तृकंनामरूपव्याकरणमितिपूर्वपक्षयंति । तन्न । जीवशब्दमात्रेणहिरण्यगर्भाप्राप्तेरिति । परोक्तंपूर्वमेवदूषितं ॥ ७ ॥ मांसाधिकरणं ॥ १३ ॥ इतिश्रीमद्ब्रह्मण्यतीर्थपूज्यपादानांशिष्येणव्यासयतिनाविरचितायांश्रीमद्भाष्यटीकाविवृतौतात्पर्यचंद्रिकायांद्वितीयाध्यायस्यचतुर्थःपादः ॥ अध्यायश्चसंपूर्णः ॥

प्र० दृष्टांततयोपादातव्यत्वेनादिपदेनमज्जालोहितयोस्स्वशब्देनमांसस्यचोक्तत्रयाणामितरयोरितिभौममितिशब्दाभ्यामुक्ततेजोजलपृथिवीकार्याणांदृष्टांततयोपादानंकार्यं । तदेतदभिप्रेत्याह ॥ यत्किंचिदेतदिति ॥ जीवशब्दमात्रेणेति ॥ तस्यसाधारण्यादितिभावः ॥ ७ ॥ मांसाधिकरणं ॥ १३ ॥ निर्दोषगुणपूर्णेनश्रीप्राणपतिनेरितः । यदवोचमहंतेनप्रीणातुपुरुषोत्तमः ॥ इतिश्रीमत्सर्वतंत्रस्वतंत्रश्रीसुधीन्द्रगुरुपादशिष्यराघवेंद्रयतिकृतेचंद्रिकाप्रकाशेद्वितीयाध्यायस्यचतुर्थःपादः ॥ अध्यायश्चसंपूर्णः ॥ ग्रन्थश्चायंसंपूर्णः ॥ ॥१००३॥

इयं तात्पर्यचंद्रिका कुंभघोणस्थेन टी· आर्· कृष्णाचार्येण
मुंबय्यां निर्णयसागरमुद्रायंत्रे मुद्रापिता । शकाब्दाः १८३५ सन १९१३.

Published by T. R. Krishnacharya Proprietor, Madhva Vilas Book Depot, 151 Solayappa Mudali Street, KUMBAKONAM.

Printed by R. Y. Shedge, at the Nirnaya-Sagar Press, 23, Kolbhat Lane, BOMBAY.

॥ इतिश्रीमत्तात्पर्यचंद्रिकाद्वितीयाध्यायः ॥